॥ श्रीः ॥

महाकविश्रीभवभूतिप्रणीतं

महावीरचरितम् ।

वीरराघवकृतया टीकया समेतम् ।

टी. आर्. रत्नम् ऐयर्
एम्, रङ्गाचार्यर्
वासुदेव लक्ष्मणशास्त्री पणशीकर
इत्येतैः संशोधितम् ।

चतुर्थं संस्करणम् ।

तच्च

शाके १८४७, सनाब्दे १९२६.

मुम्बय्यां
पाण्डुरङ्ग जावजी,
इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये
मुद्रयित्वा प्रकाशितम् ।

मूल्यं सार्धो रूप्यकः ।

॥ श्रीः ॥

महावीरचरितम् ।

प्रथमोऽङ्कः ।

अथ स्वस्थाय देवाय नित्याय हतपाप्मने ।
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥ १ ॥

भावप्रद्योतिनी ।

वन्दे वात्सल्यभरितं वरद वीरराघवम् ।
निर्विघ्नं येन निर्वृत्तो वैश्वामित्रो महामख ॥

अथ तत्रभवान्भवभूति 'एक शब्द सम्यग्ज्ञात. सुष्ठु प्रयुक्त·–' इत्यादिश्रुत्या साधुशब्दप्रयोगं धर्म मन्वान , 'काव्य यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्य परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' इत्येतेन काव्यात्मकं प्रचुरश्रेयोहेतुमवगच्छन् ,'यदि श्रुण्ण पूर्वै –' इत्युक्तरीत्या सर्वगुणाभिरामं राममेव काव्येन चिकथयिषु ,श्राव्यप्रबन्धादृश्यप्रबन्धस्य प्रकर्ष विभाव्य तत्राभ्यर्हितत्वान्नाटक चिकीर्षु ,उत्तरचरितमुत्तररामचरितेन कथयिष्यन् ,पूर्वचरितं महावीरचरिताख्येन नाटकेन निबध्नन् , प्रस्तावनाङ्गस्य पूर्वरङ्गस्य प्रधानाङ्गं नान्दी रचयति—**अथेत्यादिना** । अथशब्दोऽयं माङ्गलिक· । तदुक्तम्—'ओकारश्चाथशब्दश्च द्वावेतौ ब्रह्मण पुरा· । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥' इति । अयं च मृदङ्गध्वनिवत्स्वरूपत एव मङ्गलमिति शाब्दिकसमय· । स्वस्थाय 'स्वे महिम्नि प्रतिष्ठित·' इति श्रुत्या स्वस्मिन्नेव स्थिताय । अनन्याधारायेत्यर्थ । नित्याय उत्पत्तिविनाशरहिताय । हतपाप्मने जरामरणदु खादिपापरहिताय, स्वसबन्धादन्येषामपि तादृशपाप्मसबन्धविध्वंसकाय च । 'सर्वे पाप्मानोऽतो निवर्तन्ते' इति श्रुते· । क्रम पौर्वापर्यम्, विभागोऽवान्तरभेद , तौ त्यक्तौ येन स तथोक्तस्तस्मै । नित्यत्वान्निरवयवत्वाच्च त्यक्तक्रमविभागत्वं विवक्षितम् । चैतन्यज्योतिषे । ज्योतिर्हि प्रकाशकम् । चैतन्यात्मकाय ज्योतिषे । चैतन्यशब्देन भूततृतीयव्यावृत्ति । यद्वा चैतन्यं योगागमजन्यं ज्ञानं ज्योति प्रकाशकं यस्य तथाविधायेत्यर्थ । अथवा चैतन्याना ज्ञानाना ज्योतिषे प्रकाशकाय । 'तच्छुभ्रं ज्योतिषा ज्योति ' इति श्रुते । एवंभूतस्य देवाय दीप्तिशीलाय क्रीडावते विजिगीषवे स्तुत्याय मोदमानाय भगवते नम । 'दिवु क्रीडा–' इत्यादिना देवशब्दस्योक्तार्थेषु व्युत्पत्तिरनुसधेया । एभि· पदै· 'एष आत्मापहतपाप्मा दिव्यो देव एको नारायण '। 'नारायणपरो ज्योति .–' इत्यादिश्रुत्यर्थोऽनुसहित । इदं नमस्क्रियारूपं

(नान्द्यन्ते ।)

सूत्रधारः—भगवतः कालप्रियानाथस्य यात्रायामार्यमिश्राः समादिशन्ति—

'महापुरुषसंरम्भो यत्र गम्भीरभीषणः ।
प्रसन्नकर्कशा यत्र विपुलार्था च भारती ॥ २ ॥

किंच ।

अप्राकृतेषु पात्रेषु यत्र वीरः स्थितो रसः ।
भेदैः सूक्ष्मैरभिव्यक्तैः प्रत्याधारं विभज्यते ॥ ३ ॥

मङ्गलम् । तदुक्तम्—'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्' इति । इयमष्टपदा नान्दी । तदुक्तम्—'आशीर्वचनसयुक्ता नित्य यस्मात्प्रयुज्यते । देवद्विजनृपादीना तस्मान्नान्दीति सज्ञिता ॥ पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥' इति । अत्र देवायेत्यनेन 'रामदेव निनाय' इति वक्ष्यमाणो रामदेवो वर्ण्य इति **सूचितम्** । हतपाप्मन इत्यनेन वालिरावणादिवधोऽत्र वर्ण्य इति **सूचितम्** । अत एव वीररसप्रधानमिति सूचितम् । तदुक्तम्—'वीरशृङ्गारयोरेक प्रधानं यत्र वर्ण्यते । प्रख्यातनायकोपेतं नाटक तदुदाहृतम् ॥' इति । चैतन्यज्योतिष इत्यनेन नायकस्य प्रख्यातत्वमपि सूचितम् । त्यक्तक्रमविभागायेत्यनेन बय क्रमवर्णविभागानाकलनेन जामदग्न्याद्यनुवर्तनीयत्व वर्ण्यस्य सूचितम् । देवायेत्यनेन जानक्या सह क्रीडादिक सूचितम् । 'एवमन्यार्थत शब्दतश्च काव्यार्थसूचनं कृतम् । तदुक्तम्—'अर्थत. शब्दतो वापि मनाक्काव्यार्थसूचनम्' इति ॥ १ ॥ **नान्द्यन्त इति** । नन्दिन इयं नान्दी । तदुक्तम्—'नान्दी नन्दीश्वरप्रिया' इति । तस्या अन्ते अवसाने सूत्रधार आहेत्यर्थ' । सूत्रधारो भरताचार्यः । **भगवत इत्यादि** । भगवत 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रिय' । ज्ञानवैराग्ययोश्चैव षण्णा भग इतीरणा ॥' इत्युक्तैश्वर्यादिपूर्णस्य । कालप्रियानाथस्य कालप्रियानामिकाम्बिकापते । 'कालप्रियनाथस्य' इति ह्रस्वान्तप्रियशब्दयुक्त. पाठ प्रचुरो दृश्यते । तत्राप्यर्थ पूर्ववत् । क्षेत्रविशेषस्येश्वरमूर्तिविशेषसज्ञाभूते कालप्रियानाथशब्दे 'ङ्यापो सज्ञाच्छन्दसोर्बहुलम्' इति वैकल्पिकह्रस्वप्रवृत्ते । यात्रायां उत्सवे । आर्यमिश्रा समादिशन्ति समाज्ञापयन्ति । तत्प्रकारमाह—**महापुरुषेत्यादिना** । यत्र सदर्भे यस्मिन्ग्रन्थे गम्भीरोऽक्षोभ्यो भीषणो भयावह । विशेषणद्वयसमास । महापुरुषस्य धीरोदात्तनायकस्य सरम्भ' स्थेयान्प्रयत्न । प्रतिपाद्य इति शेष । किंच यत्र सदर्भे प्रसन्ना 'श्लेष प्रसाद. समता' इत्यत्रोक्तप्रसादाख्यगुणवती । तदुक्तम्—'प्रसिद्धार्थपदत्व यत्स प्रसादो निगद्यते' इति । कर्कशा च विपुलार्था वाच्यव्यङ्ग्यभेदप्रभिन्नप्रमेयबहुला भारती भवतीति शेष । यद्वा प्रसन्नकर्कशा ईषन्मृद्वर्थसदर्भा विपुलार्था व्यङ्ग्यबहुला भारतीति भारत्याख्यवृत्तिर्भवतीत्यर्थ ।तदुक्तम्—'ईषन्मृद्वर्थसदर्भा भारती वृत्तिरिष्यते' इति ॥२॥ किच यत्र सदर्भेऽप्राकृतेषु प्राकृतभाषारहितेषु पात्रेषु रामजामदग्न्यादिभूमिकाविशेषेषु स्थित प्रयोज्यतया वर्तमानो

स संदर्भोऽभिनेतव्यः' इति । (सहर्षम् ।) महावीरचरितं प्रयोक्तव्यमित्यादिष्टमर्थतोऽत्रभवद्भिः ।

वश्यवाचः कवेर्वाक्यं सा च रामाश्रया कथा ।
लब्धश्च वाक्यनिष्यन्दनिष्पेषनिकषो जनः ॥ ४ ॥

सोऽहमेतद्विज्ञापयामि—अस्ति दक्षिणापथे पद्मपुरं नाम नगरम् । तत्र केचित्तैत्तिरीयाः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरनामानो ब्रह्मवादिनः प्रतिवसन्ति । तदामुष्यायणस्य

रस सामाजिकैर्निरतिशयानन्दरूपत्वेन स्वाद्यमानो वीर स्थायीभूत शत्रुकृतापगव-प्रयुक्तमन प्रज्वलनात्मक क्रोध सूक्ष्मैर्वसिष्ठविश्वामित्रादिरूपालम्बनविशेषेषु गूढैरभिव्यक्तै रामजामदग्न्याद्यालम्बनेषु प्रकटैर्भेदैरवस्थाविशेषै प्रत्याचार पूर्वोक्तेष्वालम्बनेषु सर्वेषु विभज्यते विभागवान्क्रियते । परस्परवैलक्षण्यवान्क्रियत इति यावत् ॥ ३ ॥ स सदर्भोऽभिनेतव्य इति समादिशन्तीति पूर्वेण सबन्ध । अत्र महापुरुषेत्यनेन प्रकरणादिव्यावृत्ति । वीरो रस इत्यनेन शृङ्काररसव्यावृत्ति । प्रसन्नेत्यनेन शृङ्गारादे, भीषण इत्यनेन भयानकस्य चानुप्रवेश सूचित । महापुरुष इत्यनेन नायकस्य इतिवृत्तस्य च प्रख्यातत्वं सूचितम् । एवम्—'वीरशृङ्गारयोरेक प्रधान यत्र वर्ण्यते । प्रख्यातनायकोपेतं नाटकं तदुदाहृतम्॥'इति श्लोकार्थ प्रतिबिम्बित । तत्र विशेषजिज्ञासाया निर्दिष्टगुणसाम्यात्प्रायेण शब्दसाम्याच्च महावीरचरितमेव तादृश सदर्भ इति पर्यवसितम् । तदाह—**महावीरचरितमित्यादिना** । अत्रभवद्भिरार्यमिश्रैरर्थतोऽनुमानादादिष्टमाज्ञप्तम् । **वश्येत्यादि** । वश्यवाच स्वाधीनवाक्प्रवृत्ते कवे क्रान्तदर्शिनो वाक्य तिङ्सुबन्तचयरूप शब्दराशि अभिनेतव्यमिति शेष । किच सा वश्यवाक्कविवाक्यरूपा कथेतिवृत्तप्रतिपादकशब्दपरिपाटी रामाश्रया सकलगुणाभिरामरामविषयिका । भवतीति शेष । किच वाक्यनिष्यन्दस्य वाक्यप्रयोज्यशृङ्गारादिरसस्य निष्पेष उत्कर्षावगमार्थविमर्दनविषये निकष शाणभूतो जन सामाजिकवर्गो लब्ध प्राप्त । अस्माभिरिति [शेष] ॥ ४ ॥ **सोऽहमित्यादि** । सोऽह सामाजिकेनादिष्टोऽहम् । एतद्वक्ष्यमाणकविकाव्यादिविशेषम् । **अस्तीत्यादि** । दक्षिणापथे दक्षिणस्या दिशि पथि । 'ऋक्पूरब्धूपथामानक्षे' इति समासान्तोऽप्रत्यय । शरावत्या दक्षिणे देश इत्यर्थ । तैत्तिरीयास्तित्तिरिणा प्रोक्तमधीयाना । काश्यपा काश्यपापत्यभूता । चरणाना शाखाध्येतृणा गुरवो महोपाध्याया । पङ्क्तिं पावयन्तीति पङ्क्तिपावना भवन्तीति शेष । 'अग्र्या सर्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेया पङ्क्तिपावना ॥' इति मनु । पञ्चाग्नयो गार्हपत्य आहवनीयो दक्षिणाग्नि सभ्य आवसथ्यश्चेति पञ्चाग्नयो येषा ते तथोक्ता । धृत व्रतं 'तस्य व्रत—' इत्यादिश्रुत्युक्तनियतानुष्ठेयधर्मरूपं यैस्ते यथोक्ता । सोमपीथिन सोमपानवन्त । उदुम्बरनामान । अभिजननामेदम् । ब्रह्मवादिनो वेदान्तवेद्यपरब्रह्मप्रवचनशीलाः प्रतिवसन्तीत्यर्थः । **तदामुष्यायणेत्यादि** । अमुष्य पुत्र

तत्रभवतो वाजपेययाजिनो महाकवेः पञ्चमः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्तेर्नीलकण्ठस्यात्मसभव श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो भवभूतिर्नाम जतुकर्णीपुत्रः कविर्मित्रधेयमस्माकमिति भवन्तो विदाकुर्वन्तु ।

श्रेष्ठः परमहंसानां महर्षीणां यथाङ्गिराः ।
यथार्थनामा भगवान्यस्य ज्ञाननिधिर्गुरुः ॥ ५ ॥

तेनेदमद्भुतजगत्त्रयमन्यमूल-
मस्तोकवीरगुरुसाहसमद्भुत च ।
वीराद्भुतप्रियतया रघुनन्दनस्य
धर्मद्रुहो दमयितुश्चरित निबद्धम् ॥ ६ ॥

तदिद भवन्तः परिपुनन्तु । उक्तं च तेन श्रोत्रियपुत्रेण—

आमुष्यायण । नडादित्वात्फक्प्रत्यय । 'आमुष्यायणामुष्यपुत्र–' इत्यादिना षष्ठ्या लुगभाव । तेषामामुष्यायणस्तदामुष्यायण । तदीयस्य कस्यचित्पुत्र इत्यर्थ । देवदत्तस्य गुरुकुलमित्यत्रेवान्वय । तथाविधस्य तत्रभवत पूज्यस्य वाजपेययाजिनो वाजपेयेनेष्टवतो महाकवे पञ्चम पौत्र पौत्रस्य पौत्र । सुगृहीतनाम्न कीर्तनीयनामधेयस्य । 'स सुगृहीतनामा स्याद्य प्रात सुखद स्मृत' इति । भट्टगोपालस्य पौत्र । पवित्रकीर्तें पावनयशसो नीलकण्ठस्यात्मसभव पुत्र श्रीकण्ठपद लाञ्छनं नाम यस्य स । 'लाञ्छनं नामलक्ष्मणो' इति रत्नमाला । पितृकृतनामेदम् । पदवाक्यप्रमाणज्ञो व्याकरणतर्कमीमासाभिज्ञो भवभूतिर्नाम 'साम्बा पुनातु भवभूतिपवित्रमूर्ति' इति श्लोकरचनासतुष्टेन राज्ञा भवभूतिरिति ख्यापित । जतुकर्णीपुत्रो जतुकर्णीति मातुर्नाम तस्या पुत्र' । अस्माक मित्रधेयम् । मित्रमित्यर्थ । 'भागरूपनामभ्यो धेय' इति प्रकरणे 'मित्राच्च' इति मित्रशब्दात्स्वार्थे धेयप्रत्यय । इति विदाकुर्वन्तु । जानन्त्वित्यर्थ. । **श्रेष्ठ इत्यादि** । महर्षीणा महता सत्यवचसा अङ्गिरा यथाङ्गिरा इव । परमहंसानामुत्तमाश्रमिणा श्रेष्ठो यथार्थनामार्थानतिक्रान्तनामको ज्ञाननिधिर्यस्य गुरु । भवतीति शेष ॥ ५ ॥ **तेनेत्यादि** । तेन पूर्वोक्तेन भवभूतिना । धर्मद्रुह । द्वितीयान्तमिदम् । धर्मद्रोहिणा रावणादीना दमयितु । तृन्नन्तमिदम् । शासितु रघुनन्दनस्य रामस्य । वीरश्चासावद्भुतश्चासौ प्रियश्चेति विशेषणसमास. । तस्य भावो वीराद्भुतप्रियता तयोद्भूत जगत्त्रयस्य मन्युमूल दैन्यमूलं कोपमूलं वा येन तथोक्तम् । 'मन्युर्दैन्ये क्रतौ कुधि' इति विश्व । अस्तोको विपुलो वीरो वीररसो यस्मिंस्तथोक्तम् । गुर्वधिकं साहस भयंकरं कर्म यस्मिंस्तथोक्तम् । किच । अद्भुतमाश्चर्यकरं रघुनन्दनस्य चरितं जामदग्न्यजयप्रभृति रावणवधपर्यन्तं चरितं निबद्धम् । प्रबन्धेन प्रतिपादितमित्यर्थ ॥ ६ ॥ **परिपुनन्त्विति** । परिपुनन्तु परिशुद्धं कुर्वन्तु । श्रोत्रि-

प्राचेतसो मुनिवृषा प्रथमः कवीनां
यत्पावनं रघुपतेः प्रणिनाय वृत्तम् ।
भक्तस्य तत्र समरन्त ममापि वाच-
स्तासु प्रसन्नमनसः कृतिनो भजन्ताम् ॥ ७ ॥

(प्रविश्य ।)

नटः—कृतप्रसादाः पारिषदाः । कित्वपूर्वत्वात्प्रबन्धस्य कथाप्रदेशं समारम्भे श्रोतुमिच्छन्ति ।

सूत्रधारः—स तु भगवान्दीक्षिष्यमाणः कौशिको विश्वामित्र ऐक्ष्वाकस्य वसिष्ठपुरोधसो दशरथस्य गृहानुपेत्य स्वयमेव तपोवनं प्रत्यागतः । स च

विजयसहजमस्त्रैर्वीर्यमुच्छ्राययिष्य-
ञ्जगदुपकृतिबीजं मैथिली प्रापयिष्यन् ।
दशमुखकुलघातश्लाघ्यकल्याणपात्रं
धनुरनुजसहाय रामदेवं निनाय ॥ ८ ॥

यस्य समग्रवेदाध्यायिन पुत्रेण तेन भवभूतिनोक्तं च—**प्राचेतस इत्यादि** । प्रचेतसो वरुणस्यापत्यं मुनिवृषा मुनीन्द्र । 'कनिन्युवृषि–'इत्यादिना वृषशब्दो नकारान्तो व्युत्पादित । कवीना प्रथम क्रान्तदर्शिनामाद्यो वाल्मीकि. । पावनं पवित्रं रघुपते रामस्य यद्वृत्त चरित्र प्रणिनाय प्रबन्धेन प्रतिपादयामास । तत्र रामचरिते भक्तस्य भक्तिमतो ममाप्यतदर्हस्यापि मम वाच समरन्त सगता । 'समो गम्यृच्छिभ्या–' इति प्रकरणे 'अर्तिश्रुदृशिभ्यश्च' इति वार्तिकेनात्मनेपदम् । 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङ् । आगमशासनस्यानित्यत्वादाडागमाभाव । 'बहुलं छन्दसि' इति बहुलग्रहणादच्छन्दस्यप्याङ्विरहो वा । तासु भक्तिप्रेरितासु मद्वाक्षु प्रसन्नमनस सन्त सानुग्रहहृदया सन्त कृतिन पण्डिता भजन्ता प्रीतिमन्तो भवन्तु । 'प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते' इत्युक्ते ॥ ७ ॥ कृतप्रसादा कृतानुग्रहा पारिषदा । सता सन्मन्त्राणा समाज परिषत्तत्रभवा पारिषदा. । योगविभागात्परिषच्छब्दाण्णप्रत्यय. । अपूर्वत्वान्नूतनत्वात् । कथाया इतिवृत्तस्य प्रदेशमंशम् । समारम्भे प्रबन्धप्रारम्भे ॥ दीक्षिष्यमाण श्वोभूते यागदीक्षा प्रवेष्टा । ऐक्ष्वाकस्येक्ष्वाकोरपत्यस्य । 'दाण्डिनायन–' इत्यादिना टिलोप वसिष्ठ पुरोधा पुरोहितो यस्य स तस्य । स च विश्वामित्रश्च । **विजयेत्यादि** । विजयस्य शत्रुविजयस्य सहजं ज्येष्ठभ्रातृभूतं वीर्यमस्त्रैर्जृम्भकाद्यस्त्रैरुच्छ्राययिष्यन्नुत्तुङ्ग करिष्यन्, जगदुपकृतेर्भगवदवतारप्रयोजनभूतकण्टकोद्धारणादिलोकोपकारस्य बीजं कारणभूताम् । उक्तं च पराशरेण—'निजानपायिनी विष्णोर्जगतामुपकारिणी' इति । मैथिली सीताम् । रामदेवमित्यस्यापकर्ष. ।

निमन्त्रितस्तेन विदेहनाथः
स प्राहिणोद्भ्रातरमात्तदीक्षः ।
कुशध्वजो नाम स एष राजा
सीतोर्मिलाभ्यां सहितोऽभ्युपैति ॥ ९ ॥

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(तत प्रविशति रथस्थो राजा सूत कन्ये च ।)

राजा—आयुष्मत्यौ सीतोर्मिले, अद्य भगवान्विश्वामित्रः कौशिकः श्रद्धानेन चेतसा वत्साभ्यां प्रणन्तव्यः ।

कन्ये—जंह कणिट्ठतादो आणवेदि ।

---

१ यथा कनिष्ठतात आज्ञापयति ।

रामदेवं प्रापयिष्यन् । दशमुखकुलघातेन रावणवंशनाशनेन श्लाघ्यस्य कल्याणस्य मङ्गलस्य पात्र भाजनम् । धनुश्चानुजश्च धनुरनुजौ तौ सहायौ यस्य तथोक्तं रामदेवं निनाय प्रापितवान् । खतपोवनमिति शेष । अत्र कालप्रियानाथस्येत्यनेन देश, यात्रायामित्यनेन कालश्च निर्दिष्ट । महापुरुषसरम्भ इत्यादिना प्रयोज्यनिवेदनं कृतम् । अस्ति खलित्यादिना कवे., तेनेदमित्यादिना काव्यस्य च प्रशंसा कृता । तदुक्तम्—'निवेदन प्रयोज्यस्य निर्देशो देशकालयो । कविकाव्यनटादीना प्रशंसा च प्ररोचना ॥' इति ॥ ८ ॥ **निमन्त्रित इत्यादि** । स प्रसिद्ध । मैथिलीमिति पूर्वश्लोके मैथिलशब्देन प्रस्तुतो वा । आत्तदीक्षः स्वीकृतयागदीक्षो विदेहनाथो जनकस्तेन विश्वामित्रेण निमन्त्रित सन्नावश्यकयागकर्मणाद्भूत सन्भ्रातरमनुजभ्रातर प्राहिणोत्प्रेषयामास । 'दीक्षितो न ददाति न जुहोति—' इत्यादिशास्त्रेण दीक्षितस्यागमनादिप्रतिषेधादिति भावः । स जनकभ्राता कुशध्वजो नाम कुशध्वज इति प्रसिद्ध एष राजा पुरोवर्ती राजा सीतोर्मिलाभ्या सहितोऽभ्युपैति प्राप्नोति । रङ्गस्थलमिति शेष । अत्र प्रयोगातिशयो नाम प्रस्तावनाङ्गमुक्तम् । तदुक्तम्—'एषोऽयमित्युपक्षेपात्प्रयोगातिशयो मत' [इति] ॥ ९ ॥ इति निष्क्रान्तौ । नट सूत्रधारश्च रङ्गस्थलमिति शेष । **प्रस्तावनेति** । तल्लक्षण तु—'सूत्रधारो नटी ब्रूते मारिष वा विदूषकम् । स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥ प्रस्तावना वा तत्र स्यात्' इति ॥ अथाङ्क प्रस्तूयते । अङ्कलक्षणं तु—'प्रत्यक्षनेतृचरितो बिन्दुव्यक्तिपुरस्कृतः । अङ्को नानाप्रकारार्थसविधानरसाश्रय ॥' इति । **ततः प्रविशतीत्यादि** । तत सूत्रधारादिनिष्क्रमणानन्तरम् । कन्ये चेति प्रविशत इति शेष. । आयुष्मत्यौ आशासनीयातिशयितायुष्के । सीतोर्मिले सबोधनद्विवचनम् । श्रद्धानेन फलावश्यंभावनिश्चयरूपश्रद्धायुक्तेन प्रणन्तव्यो वन्दनीय ॥ **जह इत्यादि** । कनिष्ठतात पितुरनुजः । तथा-

राजा—

तुरीयो ह्येष मेध्याग्निराम्नायः पञ्चमोऽपि वा।
अथवा जङ्गमं तीर्थं धर्मो वा मूर्तिसचरः॥ १०॥

सूतः—सांकाश्यनाथ, एवमेतत्। न खलु विश्वामित्रादृषेर्महत्त्वेन कश्चिदपरः प्रकृष्यते। यस्य भगवतस्त्रैशङ्कवं शौनःशेपं रम्भास्तम्भनं चेत्यपरिमेयमाश्चर्यजातमाख्यानविद आचक्षते।

स्तिति शेष। अत्र श्रद्दधानेनेत्यनेन विश्वामित्रकर्तृकसीतारामपरिणयादिप्रयत्नरूपबीजन्यासादुपक्षेपो नाम मुखसन्ध्यङ्गमुक्तम्। 'बीजन्यास उपक्षेप' इति॥ **तुरीय इति**। एष विश्वामित्रस्तुरीयो मेध्याग्निश्चतुर्थोऽयं परिशुद्धाग्निः। त्रयोऽग्नयः प्रसिद्धाः, तेभ्योऽप्ययमतिशयितोऽग्निः। अखिलाभ्युदयहेतुत्वानभिभवनीयत्वतेजिष्ठत्वादिना निरूपणम्। इदं च त्रेताग्निमदभिप्रायेण। हिशब्द प्रसिद्धौ। अपि वा। किंचेत्यर्थः। एष विश्वामित्र पञ्चम आम्नायः। ऋगादयश्चत्वारो वेदाः प्रसिद्धाः, तेभ्योऽप्यतिशयितोऽयमाम्नायः। भ्रमप्रमादादिदोषरहित्येन नित्यं हितानुशासनाद्वेदत्वरूपणम्। इदं च भारतानाकलनेनेति मन्तव्यम्। अथवेति। एष विश्वामित्रो जङ्गमं तीर्थं सचरिष्णु पुण्यसलिलं पुण्यक्षेत्रं वा। 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु। अवतारर्षिजुष्टाम्भस्त्रीरज सु च विश्रुतम्॥' इत्यभिधानात्। यात्रादिनैरपेक्ष्येण स्वयमागत्याभ्युदयप्रदानाज्जङ्गमत्वनिरूपणं कृतम्। वेति। अथवेत्यर्थः। एष मूर्त्या सचरो मूर्तिसचरः। सपूर्वाच्चरते पचाद्यच्। 'कर्तृकरणे कृता बहुलम्' इति तृतीयासमासः। धर्मः फलाव्यवहितसाधनभूतो भावार्थनिष्पाद्यो लिङादिवाच्योऽपूर्वात्मको धर्मः। प्रसिद्धस्य हि धर्मस्य परोक्षत्वादनध्यवसायावस्कन्दितत्वान्मूर्तिमद्धर्मत्वरूपणं कृतम्। अत्र पूर्वार्धेऽनुभयरूपकद्वयम्। उत्तरार्धे त्वधिकरूपकद्वयमिति विवेकः। धर्मो हि निर्दोषप्रमाणेन बोधितोऽनुपादेयोपकारकेण देशादिनोपादेयोपकारकेणाग्निना चोपस्कृतः स्वयं साक्षादभ्युदयं साधयतीति सपरिकरधर्मसादृश्यं विश्वामित्रस्यास्तीति चत्वारि रूपकाण्युक्तानीति द्रष्टव्यम्॥१०॥ सकाशेन निर्वृत्तं साकाश्यम्। 'सकाशादिभ्यो ण्य' इति ण्यप्रत्ययः। तस्य नाथेति कुशध्वजं प्रति सबुद्धिः। **न खल्वित्यादि**। कश्चिदपरो महत्त्वेन पूज्यत्वेन विश्वामित्रादृषेर्न प्रकृष्यते खलु विश्वामित्रादधिको न भवतीति किल। यस्येत्यादि। यस्य विश्वामित्रस्य त्रिशङ्कोरिदं त्रैशङ्कवं वसिष्ठशापाच्चण्डलता प्राप्तस्य त्रिशङ्कोः सशरीरस्वर्गारोपणम्। शुनः शेप इव शेपो यस्य स शुनःशेपः। 'शेपपुच्छलाङ्गूलेषु शुनः' इति षष्ठ्या अलुक्। शुनःशेपस्येदं शौन शेपम्। पूर्वत्रात्र च 'तस्येदम्' इत्यण्। मातापितृभ्यामुपेक्षितस्य शुनःशेपस्य शरणागतस्य मन्त्रविशेषोपदेशेन प्राणपरित्राणम्। रम्भायास्तपोभङ्गार्थमागतायाः स्तम्भनं वैरूप्यापादनेन प्रतिघातश्चेत्यपरिमेयमपरिच्छेद्यमाश्चर्यजातं विस्मयनीयचरितसमूहमाख्यानविदः पुरावृत्तप्रतिपादकग्रन्थज्ञा आचक्षते वदन्ति। उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात्पू-

तदस्मिन्ब्रह्मावैस्त्रिदशगुरुभिर्नाथितशमे
तपस्तेजोधाम्नि स्वयमुपनतब्रह्मणि गुरौ ।
निवासे विद्यानामुपहितकुटुम्बव्यवहृति-
र्भवानेव श्लाघ्यो जगति गृहमेधी गृहवताम् ॥ ११ ॥

राजा—साधु । सूत, साधु । सूनृत भाषसे । प्रकृष्टकल्याणोदर्कसंगमा ह्येते भवन्ति भगवन्त. सत्यसधा. साक्षात्कृतब्रह्माणो महर्षयः ।

तमासि ध्वंसन्ते परिणमति भूयानुपशमः
सकृत्सवादेऽपि प्रथत इह चामुत्र च शुभम् ।
अथ प्रत्यासङ्गः कमपि महिमानं वितरति
प्रसन्नाना वाचः फलमपरिमेय प्रसुवते ॥ १२ ॥

वैवाक्येनास्यैकवाक्यत्वम् । **तदस्मिन्नित्यादि** । तत्तस्माद्ब्रह्मावैश्चतुर्मुखप्रभृतिभिस्त्रिदशगुरुभिर्देवश्रेष्ठैर्नाथितो याचित शम कोपनिवृत्तिर्यस्य स तथोक्तस्तस्मिन् । 'नाथृनाधृयाञ्ञोपताप–' इत्यादिना धातुपाठान्नाथतिर्याञ्ञार्थक । 'अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रक ' इति जगत्क्षोभप्रवृत्तस्य विश्वामित्रस्य प्रसादं ब्रह्मादयोऽर्यितवन्त इति पौराणिकी कथात्रानुसवेया। तपस कायशोषणात्मकनियमस्य तेजस पराभिभवनसामर्थ्यस्य च धात्रि स्थानभूते स्वय स्वीयतपोमूलकवसिष्ठवाक्येनोपनतं प्राप्तं ब्रह्म ब्राह्मण्य यस्य स तथोक्त । अस्मिन्गुरौ मन्त्रद्रष्टरि विद्याना वेदादीना चतुर्दशाना विद्याना निवासे निलयभूतेऽस्मिन्विश्वामित्र उपहिता निहिता कुटुम्बव्यवहृति कन्यादानादिगृहकृत्यव्यापारो यस्य स तथोक्त. । भवानेव जगति गृहवता गृहिणा मध्ये श्लाघ्यो गृहमेधी । प्रशसनीयो गृहस्थाश्रमनिष्ठ इत्यर्थ । गृहैर्दारैर्मेधते सगच्छत इति गृहमेधी । 'मेधृ सगमे' इत्यस्मात् 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनि· । 'गृहं गृहाश्च भूम्नि स्याद्वाविमौ गेहभार्ययो.' इति रत्नमाला । एष ऋषिप्रयत्नरूपबीजस्य बहूकरणात्परिकरो नाम सध्यङ्गमुक्तम् । यदुक्तम्—'बीजस्य बहूकरणं परिकर 'इति ॥११॥ सूनृतं सत्य प्रियं च भाषसे वदसि । प्रकृष्टमतिशयितं कल्याण मङ्गलमुदर्को भाविफल येन स तथोक्त । तथाविध सगम सबन्धो येषा ते तथोक्ता । 'एष्यतोः कालफलयोरुदर्क स्यात्' इति रत्नमाला । साक्षात्कृतं विशदतमज्ञानविषयीकृतं ब्रह्म परमात्मा यैस्ते तथोक्ता. । महान्तश्च ते ऋषयश्चेति विग्रहे कर्मधारय । 'ऋषयः सत्यवचस.' इति । अत्र साधु सूतेत्यादिना ऋषिप्रयत्नरूपबीजाङ्गीकरणरूपसमाधानं नाम सध्यङ्गमुक्तम् । तदुक्तम्—'बीजाङ्गीकरणं समाधानम्' इति । **तमांसीति** । एतेषा महर्षीणा सकृत्सवादेऽपि कदाचिदप्युक्तिप्रत्युक्तिकायामपि जनस्य तमास्यज्ञानहेतुभूतास्तमोगुणा ध्वसन्ते नश्यन्ति । किच भूयान्प्रचुर उपशमोऽन्तरिन्द्रियनिवृत्तिः परिणमति प्रवृद्धो भवति । किंचेह चामुत्र चास्मिल्लोके परस्मिल्लोके च शुभमगर्हितेष्टार्थसिद्धिः प्रथते प्रवृद्धं भवति । अथेति वाक्यान्तरारम्भे । एतेषा प्रत्यासङ्ग

सूतः—दृश्यते हरितपरिसरारण्यरमणीयं कौशिकीपरिक्षिप्तमायतनमृषेस्तस्य सिद्धाश्रमपदं नाम । किं बहुना । स एवायमात्मना—तृतीयः कुशिकनन्दनो नून भवन्तमेवाभ्युपैति ।

राजा—यद्येवमवतरामो रथात् । (कन्याभ्या सहावतीर्य ।) सूत, न केनचिदाश्रमाभ्यर्णभूमयोऽतिक्रमयितव्या इति ।

सूतः—यदाज्ञापयति । (इति निष्क्रान्त· ।)

(तत प्रविशति विश्वामित्रो रामलक्ष्मणौ च ।)

विश्वामित्रः—(खगतम् ।)

रक्षोघ्नानि च मङ्गलानि सुदिने कल्प्यानि दारक्रिया
वैदेह्याश्च रघूद्वहस्य च कुले दीक्षाप्रवेशश्च नः ।
आस्थेयानि च तानि तानि जगतां क्षेमाय रामात्मनो
दैत्यारेश्चरिताद्भुतान्यथ खलु व्यग्राः प्रमोदामहे ॥ १३ ॥

एकस्थानसहासिकादिससर्गविशेष· कमपि महिमानमनिर्वाच्य माहात्म्य वितरति ददाति । प्रसन्नानामकस्माद्धेतुतो वा प्रसादं प्राप्तानामेतेषा वाचो जनस्यापरिमेयमपरिच्छेद्यं·फलं सुख प्रसुवते जनयन्ति । अत्र महिमानं वितरतीति 'ब्रह्मणो महिमानमाप्नोति' इति श्रुति स्फोर्यते । अत्र बीजगुणवर्णनाद्विलोभनं नाम सध्यङ्गमुक्तम् ॥ १२ ॥ **हरितेत्यादि** । हरितो वृक्षादिना श्याम परिसरोऽभ्यर्णदेशो यस्य तत्तथोक्तम् । तथाविधेनारण्येन रमणीयम् । कौशिक्या नद्या परिक्षिप्तं परिवृतम् । सिद्धाश्रमपदं नाम सिद्धाश्रमस्थानमिति प्रसिद्धं तस्यर्षेर्विश्वामित्रस्यायतन स्थानं दृश्यते । आत्मनातृतीय । रामलक्ष्मणौ स्वयं चेति त्रयाणा सपत्त्या विश्वामित्रस्यात्मनातृतीयत्वम् । 'आत्मनश्च पूरणे' इति तृतीयाया अलुक् । कुशिकनन्दनो विश्वामित्र ॥ यद्येव विश्वामित्रश्चेत् । आश्रमाभ्यर्णभूमय आश्रमसमीपप्रदेशा· । नातिक्रमयितव्या न पदेन स्प्रष्टव्या । इति प्रसिद्धौ ॥ यदाज्ञापयति । तदस्त्विति शेष ॥ **रक्षोघ्नानीति** । सुदिने शोभनदिवसे राक्षसोपलक्षितानि प्रत्यूहशमनादीनि रक्षासि घ्नन्तीति रक्षोघ्नानि । 'अमनुष्यकर्तृके च' इति हन्तेष्टक् । मङ्गलान्यङ्गहितेष्टार्थसिद्धिहेतुभूतानि कर्माणि कल्प्यानि कर्तव्यानि । किच वैदेह्याश्च विदेहराजकन्यायाश्च रघूद्वहस्य च रघुश्रेष्ठस्य च दारक्रिया विवाह कल्प्या निष्पाद्या । कल्प्यानीत्यस्यानुषङ्ग स्त्रीलिङ्गैकवचनाभ्यां विपरिणामश्च । किच न कुलेऽस्माकं गृहे । 'गेहे देहे जनपदे सजातीयगुणेऽन्वये । कुलम्' इति रत्नमाला । दीक्षाप्रवेशो दीक्षाया यागकर्तव्यतासकल्पे प्रवेश प्राथमिकसबन्धो नः कल्प्यो मया कर्तव्य । पूर्ववदनुषक्तस्य पुंलिङ्गैकवचनाभ्या विपरिणाम· । न कल्प्य इत्यत्र 'कृत्याना कर्तरि वा' इति षष्ठी । अथवा दीक्षाप्रवेशो दारक्रियामङ्गलानि च न· कल्प्यानि इत्येकमेव वाक्यम् ।

(प्रकाशम् ।) संदिष्टं च मैथिलस्य राजर्षेरस्माभिः—'आचार इति यजमानोऽपि यज्ञे निमन्त्रितोऽसि । कुशध्वजस्तु सीतोर्मिलासहितः प्रेषितव्यः' इति । कृत च तत्प्रियसुहृदा ।

कुमारौ—भगवन्, कः पुनरय महात्मा यत्र भवन्तोऽप्येवमभ्युपगताः ।

विश्वामित्रः—श्रूयन्त एव निमिजनकसंभवा राजर्षयो विदेहेषु ।
तेषामिदानीं दायादो वृद्धः सीरध्वजो नृपः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥ १४ ॥

कुमारौ—यस्य तद्गृहेषु माहेश्वरं धनुः पूज्यते ।

कल्प्यानीत्यत्र 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकैकशेष । एकवद्भावविकल्पाद्बहुवचनम् । किंच तानि तानि नानाविधानि रामात्मनो दैत्यारे रामस्वरूपस्य भगवतो विष्णोश्चरिताद्भुतानि ताटकाताटकेयनिरसनादिवृत्तरूपाण्याश्चर्याणि जगता क्षेमाय लोकाना मङ्गलाय लब्धाशपरित्राणाय वा । 'क्षेममस्त्री स्यान्मङ्गले लब्धरक्षणे' इति रत्नमाला । आस्थेयान्यस्माभिरावश्यकत्वेन प्रतिज्ञातव्यानि । अत्रापि 'कृत्याना कर्तरि वा' इति षष्ठी । अथ खल्वथापि वयमहम् । 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् । व्यग्राः सन्त उक्तेषु कर्तव्येषु व्यापृता सन्तः । 'व्यग्रो व्यापृत आकुले' इति रत्नमाला । प्रमोदामहे प्रकृष्टहर्षवन्तो भवामः । प्रमोदामह इत्युक्तत्वेन वयमिति लभ्यते । अत्र बीजानुगुणप्रयोजनविभावनारूपा युक्तिर्नाम सध्यङ्गमुक्तम् ॥ १३ ॥ **संदिष्टमिति** । मैथिलस्य राजर्षेर्जनकं प्रत्यस्माभिर्मया सदिष्टं वाचिकं प्रेषितम् । किमित्यत्राह—**आचार इत्यादि** । यजमानोऽपि प्रारब्धापरिसमाप्तयागोऽपि । आगमनानर्होऽपीत्यर्थं । आचार इति यज्ञे निमन्त्रितोऽसि । निमन्त्रणं शिष्टाचारसिद्धमिति हेतो. । आरब्धयागस्त्वमागमनानर्होऽपि मद्यज्ञविषये मयागमनादौ प्रवर्तितोऽसीत्यर्थं । किंतु कुशध्वज. सीतोर्मिलाभ्या सहित सन्प्रेषितव्य इति सदिष्टं चेति पूर्वेण सबन्ध. । निमन्त्रणमात्रेण त्वया नागन्तव्यम्, किंतु त्वत्स्थाने सीतोर्मिलाभ्या सह कुशध्वज प्रेषितव्य इति जनकं प्रति मया सदिष्टमित्यर्थ । तत्सीतोर्मिलाभ्या सह कुशध्वजप्रेषणम् । प्रियसुहृदा जनकेन कुमारौ रामलक्ष्मणौ एवमभ्युपगता एवं प्रियसुहृत्त्वेनाभ्युपगममङ्गीकार प्राप्ता ॥ निमिजनकसभवाः । निमिजनकेति मूलपुरुषव्यपदेश. । विदेहेषु विदेहदेशेषु । **तेषामिति** । सीरध्वज. सीरध्वजाभिधानो वृद्धो ज्ञानवय शीलै प्रकृष्टस्तेषा दायादो निमिजनकसंभवाना राजर्षीणामपत्यभूतो नृप इदानीमस्मिन्काले । वर्तत इत्यर्थ. । यस्मै य सीरध्वजमुज्जीवयितुम् । 'क्रियार्थोपपदस्य च कर्मणि स्थानिन ' इति चतुर्थी । याज्ञवल्क्यो मुनि । ब्रह्मणो वेदस्य । शुक्लस्य यजुष इत्यर्थ. । पारायणं समग्राध्ययनं जगौ गीतवान् । उत्तरे यच्छन्दस्तच्छब्दं नापेक्षते ॥ १४ ॥ **यस्येति** । तत्प्रसिद्धं माहे-

विश्वामित्रः—अथकिम् ।

कुमारौ—श्रूयते किलान्यदपि तत्राश्चर्यं यदयोनिजा कन्येति ।

विश्वामित्रः—(विहस्य ।) तदप्यस्ति ।

अयं तु यजमानेन यक्ष्यमाणस्य मे गृहम् ।
प्रेषितस्तेन वात्सल्यादनुजन्मा कुशध्वजः ॥ १५ ॥

तदस्मिन्राजन्यश्रोत्रिये वत्साभ्यां प्रश्रयेण वर्तितव्यम् ।

कुमारौ—एवम् ।

राजा—(निर्वर्ण्य) ।

प्रकृत्या पुण्यलक्ष्मीकौ कावेतौ ज्ञायते त्विदम् ।
राजन्यदारकौ नूनं कृतोपनयनाविति ॥ १६ ॥
द्वितीयस्य च वर्णस्य प्रथमस्याश्रमस्य च ।
अहो रम्यानयोर्मूर्तिर्वयसो नूतनस्य च ॥ १७ ॥

श्वरं धनुः शैव धनुर्यस्य जनकस्य गृहेषु पूज्यते ॥ अथ किमित्यङ्गीकारे । 'अङ्गीकृतौ स्यादथकिम्' इत्यमरः ॥ **श्रूयत इति** । तत्र जनकगृहे । यदिति । अयोनिजा कन्येति यदिदमन्यदप्याश्चर्यं तत्र श्रूयत इत्यर्थः ॥ **अयं त्विति** । यजमानेन वर्तमानयागेन तेन सीरध्वजेनानुजन्मानुजोऽयं कुशध्वजो वात्सल्यान्मयि प्रीत्यतिशयात् । 'वत्साशाभ्या कामबले' इति लच्प्रत्ययान्ताद्वत्सलशब्दाद्ब्राह्मणादित्वाद्भावे ष्यञ् । यक्ष्यमाणस्य करिष्यमाणयागस्य मे गृहं प्रेषितः । प्रेषयतेर्द्विकर्मकत्वाद्गृहस्यापि कर्मत्वम् ॥ १५ ॥ **तदिति** । तस्मादस्मिन्सन्निहिते राजन्यश्रोत्रिये साङ्गवेदाध्येतरि । जातिवाचिनो राजन्यशब्दस्य 'पोटायुवति–' इत्यादिना श्रोत्रियशब्देन सह समानाधिकरणसमास । 'श्रोत्रियंश्छन्दोऽधीते' इति सूत्रेण छन्दोध्येतरि श्रोत्रियशब्दो निपातित । वत्साभ्या युवाभ्या प्रश्रयेण प्रियेण विनयेन ॥ एवमित्यङ्गीकारे ॥ निर्वर्ण्य निध्याय । 'निर्वर्णनं तु निध्यान दर्शनालोकनेक्षणम्' इत्यमरः ॥ **प्रकृत्येति** । प्रकृत्या स्वभावत । 'प्रकृत्यादिभ्य उपसख्यानम्' इति तृतीया । पुण्यलक्ष्मीकौ पुण्यश्रीकौ । 'उर प्रभृतिभ्य कप्' इत्युर.प्रभृतित्वात्कप् ॥ एतौ काविति स्वगता जिज्ञासा । तत्र लिङ्गात्स्वगत विशेषनिर्णयमाह—ज्ञायत इत्यादिना । कृतोपनयनौ राजन्यदारकाविति इदमेव नूनं ज्ञायते सभावनात्मकज्ञानविषयीक्रियते । तु-शब्दोऽवधारणे । मातापित्राद्यत्यन्तविशेषो न ज्ञायत इत्यर्थ ॥ १६ ॥ **द्वितीयस्येति** । अनयो. कुमारयोर्मूर्तिर्द्वितीयस्य वर्णस्य च । 'द्वेस्तीय' इति द्विशब्दात्पूरणार्थे तीयप्रत्यय. । क्षत्रियवर्णस्य च प्रथमस्याश्रमस्य च ब्रह्मचर्याश्रमस्य च नूतनस्य वयसश्च बाल्यस्य च रम्या । क्षत्रियवर्णादित्रितयप्रयुक्तसौभाग्यवतीत्यर्थः ।

तथा हि ।

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ॥ १८ ॥

कन्ये—सौम्मदंसणा[1] क्खु एदे ।

राजा—(उपसृत्य ।) भगवन्, अभिवादये ।

विश्वामित्रः—दिष्ट्या गर्भरूपं त्वां कुशलिनं राजर्षिं गृहानागतं पश्यामि । तत्परिष्वजस्व । (आलिङ्ग्य ।)

अपि प्रवृत्तयज्ञोऽसौ विदेहाधिपतिः सुखी ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १९ ॥

राजा—स एवार्यः सुखी सह पुरोधसा गौतमेन, यस्यैवं भवन्तः कुटुम्बवृत्तिमनुपतिताः ।

---

१ सौम्यदर्शनौ खल्वेतौ ।

अहो इति विस्मये ॥ १७ ॥ 'राजन्यदारकौ नूनं कृतोपनयनाविति' इति पूर्वोक्तार्थं लिङ्गमुपन्यस्यति—**तथा हीति । चूडेति** । चूडया चुम्बितानि सयुक्ताग्राणि कङ्कपत्राणि बाणपक्षा यस्मिंस्तथोक्त पृष्ठतोऽभित पृष्ठे । द्वयोर्भागयोरित्यर्थ. । तूणीद्वयं निषङ्गयुगलम् । भस्म भस्ममयं स्तोकं स्वल्प पवित्र पावनं लाञ्छनं पुण्ड् यस्य तथोक्तमुरो रौरवीमैणेयीं त्वच धत्ते । मौर्व्या मेखलया मौर्व्यात्मकरशनया नियन्त्रितं बद्धं माञ्जिष्ठकं मञ्जिष्ठया रक्त वासोऽध उरसोऽधस्तात्पाणौ कार्मुकं धनुरक्षसूत्रवलय जपमालिकावलयम् । अस्तीति शेष । 'अपरे पैप्पल.' इति पाठेऽपरे पाणावश्वत्थदण्ड इत्यर्थः । 'अपर पैप्पल' इति पाठे धनुर्दण्डादपरः । अन्य इत्यर्थ । अत्र 'ज्या राजन्यस्य मार्ञ्जिष्ठं राजन्यस्य रौरवी राजन्यस्य' इत्यापस्तम्बवचनम्, 'आश्वत्थपैप्पलौ' इति गौतमवचन च द्रष्टव्यम् । रौरवी राजन्यस्येत्यत्र 'रुरुर्बिन्दुमान्मृग.' इत्युज्ज्वलायामुक्तम् । अत कृतोपनयनौ राजन्यदारकाविति सभाव्यत इत्यर्थः ॥ १८ ॥ सौम्यदर्शनौ खल्वेतौ । एतौ रामलक्ष्मणौ ॥ अभिवादये । नमस्करणेनाशिषो वाचयामीत्यर्थ ॥ दिष्ट्येत्यानन्दे । 'दिष्ट्या समुपजोषं चेत्यानन्दे' इत्यमर. । गर्भरूपं गर्भवद्धरणीयम् । गृहानागतमस्मद्गृह प्राप्तं त्वा कुशलिनं पश्यामीत्यन्वयः । परिष्वजस्व मामालिङ्गेत्यर्थ. । **अपीत्यादि** । प्रवृत्तयज्ञः प्रारब्धयागोऽसावदूरविप्रकृष्टो विदेहाधिपति. सीरध्वजोऽपि सुखी । सुखवान्क्रमित्यर्थः । जनकाना पुरोहितो गौतमो गौतमपुत्र । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण्प्रत्यय । शतानन्दश्चापि सुखीत्यनुषज्यते ॥ १९ ॥ आर्यो ज्येष्ठभ्राता पुरोधसा

कन्ये—पणमामो[1] ।

राजा—

लाङ्गलोल्लिख्यमानाया यज्ञभूमेः समुद्गता ।
सीतेयमूर्मिला चेयं द्वितीया जनकात्मजा ॥ २० ॥

विश्वामित्रः—भद्रमस्तु ।

लक्ष्मणः—(जनान्तिकम् ।) आश्चर्यमियदद्भुतसूतिरार्य ।

रामः—

उत्पत्तिर्देवयजनाद्ब्रह्मवादी नृपः पिता ।
सुप्रसन्नोज्ज्वला मूर्तिरस्यां स्नेहं करोति मे ॥ २१ ॥

राजा—भगवन्,

कौ त्वामनुगतावेतौ क्षत्रियब्रह्मचारिणौ ।
प्रतापविक्रमौ धर्मं पुरस्कृत्योद्गताविव ॥ २२ ॥

---

१ प्रणमावः ।

पुरोहितेन गौतमेन सह स एव सुखी । सीरध्वज एव सुखातिशयवानित्यर्थः । 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संबन्धेऽस्तिविवक्षाया भवन्ति मतुबादयः ॥' इत्यतिशायने मतुप् । यस्य सीरध्वजस्यैवं पूर्वोक्तप्रकारेण कुटुम्बवृत्तिं गृहकृत्यव्याप्तिमनुपतिता । अनुप्राप्ता इत्यर्थः ॥ पणमामो प्रणमावो नमस्कुर्वः ॥ **लाङ्गलेति** । लाङ्गलेन सीराग्रेणोल्लिख्यमानायाः कृष्यमाणाया । यज्ञभूमेरिति पञ्चमी । या समुद्गता सा सीतेयमित्यर्थः ॥ २० ॥ **भद्रमस्त्विति** । एतदप्यनुग्रहरूपं बीजमुक्तम् ॥ **जनान्तिकमिति** । 'अर्थस्त्वेकेन विज्ञेयः पश्चाज्ज्ञाप्य प्रसङ्गतः । तज्जनान्तिकमित्युक्त्वा काव्यबन्धे निवेशयेत् ॥' इत्युक्त्या कुशध्वजविश्वामित्राभ्यविदितं राममात्रवेद्यं लक्ष्मण किंचिदाहेत्यर्थः । आर्यः पूज्यः । अद्भुतसूतिर्विस्मयनीयजन्मेतीयदाश्चर्यमेतावदेवाश्चर्यम् ॥ किमन्यदप्याश्चर्यमस्तीत्यर्थः । तदाह राम—**उत्पत्तिरित्यादिना** । देवा इज्यन्तेऽस्मिन्निति देवयजनं यज्ञक्षेत्रम् । तस्मादुत्पत्तिराविर्भावः । ब्रह्मवादी 'ब्रह्म परिवृढं सर्वतः' इत्युक्त्वेत्या सर्वप्रकारतोऽपि सर्वस्मादपि परिवृढस्य परमात्मन उपदेष्टा नृपः क्षत्रियवर्णोचितराज्यपरिपालनात्मककर्मयोगनिष्ठः सीरध्वजरूपः पिता । सुप्रसन्ना प्रसादातिशयवती मूर्तिर्ब्रह्मोऽस्या सीताया मे मम स्नेहं करोत्यौत्सुक्यं जनयति । उत्पत्तिरित्यादि वाक्यत्रयमिदम् । अत करोतीत्येकत्वमुपपन्नम् । अत्र गुम्भालंकारः । 'गुम्भः कारणमाला स्यात्' इति लक्षणात् । अत्र स्नेहं करोतीत्यनेनौत्सुक्यात्मकारम्भ उक्तः । तदुक्तम्—'औत्सुक्यमात्रमारम्भः फललाभाय भूयसे' इति । तथा च भद्रमस्तु स्नेह करोतीत्याभ्यां बीजारम्भसमन्वयान्मुखसन्धिरुक्तः ॥ २१ ॥ **कौ त्वामित्यादि** । प्रतापः स्थान एव स्थिता शत्रु-

विश्वामित्रः—रामलक्ष्मणौ दाशरथी ।

तौ—(सविनयमुपसृत्य ।) गुरो, अभिवादयावहे ।

राजा—दिष्ट्या महाराजदशरथप्रसूतिर्दृश्यते । (परिष्वज्य ।)

नान्यत्र राघवाद्वंशात्प्रसूतिरनयोः समा ।
दुग्धार्णवादृते जन्म चन्द्रकौस्तुभयोः कुतः ॥ २३ ॥

श्रुतपूर्वं ह्येतदस्माभिः कर्णामृतम् ।

प्राप्ताः कृच्छ्रादृष्यशृङ्गोपचारैः
पुण्यश्रीकाः कोसलेन्द्रेण पुत्राः ।
ये दीप्तस्य श्रेयसः पारकामा-
श्चत्वारोऽपि ब्रह्मचर्यं चरन्ति ॥ २४ ॥

तदत्रभवतोररिष्टतातिमाशास्महे । सिद्ध एव रघूणां प्रसूतेरुत्कर्षातिशयः ।

तापनशक्ति, विक्रमोऽभियानेन शत्रुपीडनम् । धर्मोऽलौकिकश्रेय साधनम् । धर्मं पुरस्कृत्योद्भूतौ प्रतापविक्रमाविव स्थितौ त्वा पुरस्कृत्योद्भूतौ क्षत्रियब्रह्मचारिणौ कौ कस्य पुत्रौ । किंनामधेयावित्यर्थं ॥ २२ ॥ तयोत्तरं रामलक्ष्मणौ । दाशरथी इति दशरथपुत्रौ । 'अत इञ्' । तौ रामलक्ष्मणौ । उपसृत्य । कुशध्वजमिति शेष ॥ **गुरो इति** । पितृसखत्वाद्गुरुत्वोक्तिः । श्वशुरस्याप्ययं व्यपदेश इति ध्वन्यते । भार्याया पिता स्वस्य पितेति स्मृतिसिद्धम् ॥ दशरथप्रसूतिर्दशरथापत्यम् । 'प्रसूतिर्जन्मतनयौ' इति रत्नमाला । **नान्यत्रेति** । अनयो रामलक्ष्मणयोः प्रसूतिरुत्पत्ती राघवाद्रघुसबन्धिनो वंशात्सतानादन्यत्र न समाननुरूपा । अनयो रघुवंशादुत्पत्तिरनुरूपेत्यर्थं । चन्द्रकौस्तुभयोर्जन्म दुग्धार्णवादृते कुतः क्षीरसमुद्रादन्यस्मात्कस्मात् । न कस्मादित्यर्थः । दृष्टान्तालंकार । 'चेद्विम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृति' इति लक्षणात् ॥ २३ ॥ **श्रुतेति** । एतद्वक्ष्यमाणं कर्णामृतं कर्णयोरमृतवद्भोग्यं श्रुतपूर्वं पूर्वमेव श्रुतम् । **प्राप्ता इत्यादि** । कोसलेन्द्रेण दाशरथेन कृच्छ्राद्दु खादृष्यशृङ्गस्योपचारै पूजाभिर्हेतुभिः पुण्यश्रीका पावनलक्ष्मीका पुत्राः प्राप्ता लब्धाः । चत्वारोऽपि ये पुनर्दीप्तस्य दीप्तियुक्तस्य । ज्ञानगर्भस्येत्यर्थं । श्रेयसो वेदरूपस्य पुरुषार्थसाधनस्य पुरुषार्थस्य वा पारकामा सन्त काष्ठाप्रेप्सव सन्तो ब्रह्मचर्यं वेदार्थाध्ययनार्थं व्रत चरन्त्यनुतिष्ठन्तीत्येतच्छ्रुतपूर्वमिति सबन्धः ॥ २४ ॥ **तदिति** । अत्रभवतोः कुमारयोररिष्टतातिं क्षेमहेतुम् । 'शिवशमरिष्टस्य करे' इत्यरिष्टशब्दात्तातिल् । 'क्षेमंकरोऽरिष्टाति शिवताति शिवंकर.' इत्यमर । 'रिष्टं स्यादशुभक्षेमनाशनिर्लिङ्गपाप्मसु' इति रत्नमाला । रिष्टमशुभं तद्विपरीतमरिष्टम् । तद्वेतुररिष्टाति । तमाशास्महे इच्छामहे । 'आङ. शासु इच्छायाम्' इति पठितात्प्रथमपुरुषबहुवचनम् । **सिद्ध इति** । रघूणा रघ्वपत्याना प्रसूतेरपत्यस्योत्कर्षातिशयो वीर्यादिगुणातिशयः

यान्मैत्रावरुणिः प्रशास्ति भगवानाम्नायपूते विधौ
शश्वद्येषु विशामनन्यविषयो रक्षाधिकारः स्थितः ।
सावित्रस्य मनोर्महीयसि कुले तेषामवाप्तात्मनां
राज्ञां वो महिमा न जातु वचनप्रज्ञानयोर्गोचरः ॥ २५ ॥

विश्वामित्रः—एवम् ।

अश्रान्तपुण्यकर्माणः पावनप्रायकीर्तयः ।
महाभाग्यविदस्तेषां यूयमेव स्तवक्षमाः ॥ २६ ॥

सिद्ध एव निष्पन्न एव । अतो नाशासनीय किञ्चिदस्तीति पूर्वोक्तार्थाक्षेपोऽयम् । उत्कर्षातिशयं विशिनष्टि—**यानित्यादिना** । मित्रावरुणयोरपत्यं मैत्रावरुणिर्वसिष्ठः । 'देवताद्वन्द्वे च' इत्यानङ् । बाह्वादित्वादिञ् । आम्नायेन वेदेन पूते शुद्धे निर्दोषे वेदबोधितत्वात्स्वयमेव निर्दोषे विधावनुष्ठेयकर्मणि यान्युष्मान्प्रशास्ति प्रकर्षेण हिताहिते ज्ञापयति । शश्वदिति पूर्वोत्तरगाभ्यामन्वेति । वसिष्ठो येषां वो नित्यपुरोहित इत्यर्थः । अन्यो विषय आश्रयो यस्य स तथोक्तोऽन्यविषयः, स न भवतीत्यनन्यविषयः । राजान्तरानाश्रित इत्यर्थः । विशां मनुष्याणां रक्षाया पालनेऽधिकारः । पारार्थ्यं रक्षणैकार्थतेत्यर्थः । येषु युष्मासु शश्वत्स्थितः । नित्यं वर्तत इत्यर्थः । यूयमेव प्रधानरक्षकाः । वयमन्ये च युष्मभ्यं करप्रदा इत्यर्थः । 'सर्वा पूर्वमियं येषामासीत्कृत्स्ना वसुंधरा' इति ह्युक्तम् । महीयसि पूज्यतमे सावित्रस्य सवितुरपत्यस्य मनोः कुले वंशेऽवाप्तात्मना लब्धशरीराणाम् । उत्पन्नानामिति यावत् । 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरः । राज्ञां वो निरुपाधिकराजत्ववतां युष्माकं महिमा निरतिशयगुणोत्कर्षो वचनप्रज्ञानयोर्वाङ्मनसयोर्जातु कदाचिदपि न गोचरः । न विषय इत्यर्थः । अत्र प्रथमपादेन विद्योक्ता । द्वितीयेन वृत्तमुक्तम् । तृतीयेनाभिजन उक्तः । एवमभिजनविद्यावृत्तोत्कर्षरूपो युष्माकं महिमायमप्रमेय इत्यर्थः ॥ २५ ॥

अश्रान्तेति । अश्रान्तान्यविच्छिन्नानि पुण्यकर्माणि नित्यनैमित्तिकादिसत्कर्माणि येषां तथोक्ताः । अश्रान्तेति काम्यव्यावृत्तिः । पुण्येत्यभिचारनिषिद्धयोर्व्यावृत्तिः । एतेन मोक्षसाधनकर्मानुष्ठान इति सिद्धम् । गीतं भगवता 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति । पावनप्राया पवित्रत्वप्रचुरा कीर्तिर्गुणवत्ताप्रथा येषां ते तथोक्ताः । प्रायशब्देन कीर्तेर्भोग्यत्वमप्यस्तीति लभ्यते । पावनत्वभोग्यत्वे हि सह प्रसिद्धे । तत्र कस्यचित्प्राचुर्योक्तावन्यस्यान्वयमात्रमनुक्तसिद्धम् । प्रियादपि हितमभ्यर्हितमिति पावनप्रायेत्युक्तम् । एतत्कीर्तिर्लोकानां दुरितहारिणी स्वयं भोग्या चेत्यर्थः । तेषां रघुकुलराजानां महाभाग्यं महाभागत्वं पूर्वोक्ताभिजनविद्यावृत्तोत्कर्षरूपभाग्यातिशयफलं विदन्ति जानन्तीति महाभाग्यविदः । महान्भागो भाग्यं येषां ते तथोक्ता महाभागाः । 'भागो भाग्ये रूपकार्धे चतुर्थांशैकदेशयोः' इति रत्नमाला । महाभागशब्दाद्ब्राह्मणादित्वात्ष्यञ् । एवंभूता यूयमेव तेषां रघुकुलराजानां स्तवक्षमाः । स्तुत्यर्हा इत्यर्थः । 'न जातु वचनप्रज्ञानयोर्गोचर' इति भवद्वचनं भवद्व्यतिरिक्तवि-

(सर्वे विश्रम्य कौशिकाश्रमसंस्थायमनुप्रविशन्ति।)

विश्वामित्रः—तदस्मिन्वैकङ्कतच्छाये मुहूर्तमासहे।

(इति परिक्रम्योपविशन्ति।)

(नेपथ्ये।)

जय जय जगत्पते रामचन्द्र।

(सर्वे साद्भुतमवलोकयन्ति।)

राजा—भगवन्, का पुनरियं देवता।

विश्वामित्रः—अहल्या नाम गौतमस्य महर्षेरौचथ्यस्य धर्मपत्नी। यस्या. शतानन्द आङ्गिरसोऽजायत। तामिन्द्रश्चकमे। तस्माद्गौतमदारावस्कन्दिनमहल्यायैजार इतीन्द्रं जानन्ति। अथ भगवान्मन्युमवाप। तस्याः पाप्मना शरीरमन्धतामिस्रमभ्ययात्। सेयमद्य रामभद्रतेजसा तस्मादेनसो निरमुच्यत।

षयमिति भाव ॥ २६ ॥ कौशिकाश्रमसंस्थाय कौशिकावाससंनिवेशम्। 'मुनिस्थाने मठे ब्रह्मचर्यादावाश्रमोऽस्त्रियाम्' इति रत्नमाला। 'सघाते संनिवेशे च संस्थाय' इत्यमर। वैकङ्कतस्य छाया वैकङ्कतच्छायम्। 'छाया बाहुल्ये' इति क्लीबत्वम्। तस्मिन्नासह उपविशाम। 'आस उपवेशने' लङुत्तम। यद्वा विकङ्कतस्येयं वैकङ्कती। 'तस्येदम्' इत्यण्। वैकङ्कती छाया यस्येति स तथोक्त। तथाविधेऽस्मिन्प्रदेश इत्यर्थ.। शेषं पूर्ववत् ॥ नेपथ्ये कुशीलववर्गस्थाने। तदुक्तम्—'कुशीलवकुटुम्बस्य स्थली नेपथ्यमिष्यते' इति। 'जय जय' इति आदराद्विरुक्ति ॥ **का पुनरिति।** तेजोऽतिशयेन देवतासादृश्यादेवतेत्युक्तम्। **अहल्येत्यादि।** उचथ्यस्यापत्यमौचथ्य। 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण्। अङ्गिरसोऽपत्यमाङ्गिरस। 'ऋष्यन्धक–' इत्यादिनाण्। तामहल्याम्। चकमे कामितवान्। 'आयादय आर्धधातुके वा' इत्युक्तेर्णिङभाव। तस्मादहल्याकामनावशाद्गौतमदारावस्कन्दिनं गौतमदारानवस्कन्दत्यपहरतीत्यर्थे अवपूर्वात् 'स्कन्दिर् गतिशोषणयो' इति पठितात्स्कन्दे 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनि। इन्द्रम्। अहल्यायैजार इति जानन्ति। 'अहल्यायैजार' इति श्रुत्यनुकरणम्। अहल्याया जार इत्यर्थः। जानन्तीत्यत्र वेदविद इति शेष। अथ दारावस्कन्दनानन्तर भगवान्गौतमो मन्युं कोपम्। तस्या अहल्याया पाप्मना परपुरुषोपभोगदुरितेन शरीरं कर्तृ अन्धतामिस्रमन्धतामिस्राख्यनरकविशेषानुभाव्यकाष्ठपाषाणादिभावम्। तथा च भागवते—'एवमेवान्धतामिस्रे यस्तु वध्वयित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्यमानमूलस्तदन्धतामिस्रं तमुपदिशन्ति' इति। सेयमहल्या तस्मादेनस पूर्वोक्तात्पापान्निरमुच्यत निर्मुक्ता

---

१ स्क. ५ अध्याय. २६.

राजा—कथमप्रमेयानुभावसामर्थ्य एष वैकर्तनकुलकुमारः ।

सीता—(सविस्मयानुराग निर्वर्ण्य । अपवार्य च ।) [1]सरीरनिम्माणसरिसो से अणुभावो ।

राजा—

रामाय पुण्यमहसे सदृशाय सीता
दत्तैव दाशरथिचन्द्रमसेऽभविष्यत् ।
आरोपणेन पणमप्रतिकार्यमार्य-
स्त्रैयम्बकस्य धनुषो यदि नाकरिष्यत् ॥ २७ ॥

(प्रविश्य ।)

तापसः—रावणपुरोहितः सर्वमायो नाम वृद्धराक्षसः संप्राप्तः । स किल राजकार्याद्वः पश्यति ।

---

१. शरीरनिर्माणसदृशोऽस्यानुभावः ।

मुचे कर्मकर्तरि यकि लङ् । कर्मणि वा यकि लङ् । रामभद्रतेजसा कर्त्रा पूर्वयोजनाया हेतुना ॥ **कथमित्यादि** । कथमिति विस्मये । अप्रमेयेऽपरिच्छेद्येऽनुभाव. प्रभावः सामर्थ्यं शक्तिश्च यस्य स तथोक्त । 'अनुभाव प्रभावे च' इत्यमर । विकर्तनस्य सूर्यस्येदं वैकर्तनम् । 'तस्येदम्' इत्यण् । तस्य कुलस्य कुमारो बाल. । राम इत्यर्थः ॥ **सविस्मयेति** । विस्मयोऽहल्याशापविमोचनात्, अनुरागः सौन्दर्यातिशयात् । निर्वर्ण्यालोक्य । अपवार्य विश्वामित्राद्यवेदनार्थं संवृत्य शरीरनिर्माणसदृशोऽस्यानुभाव शरीरनिर्माणस्य निरतिशयसौन्दर्ययुक्तशरीरसृष्टे· सदृशोऽनुरूपोऽस्य रामस्य ॥ **रामायेत्यादि** । आर्यो जनकोऽप्रतिकार्यमप्रतिनिवर्त्यं त्र्यम्बकस्येद त्रैयम्बकम् । 'तस्येदम्' इत्यण् । 'नद्यृताभ्या पदान्ताभ्या पूर्वौ तु ताभ्यामैच्' इत्यैजागम । तस्य धनुष आरोपणेन मौर्व्या सज्जनेन पणं धनम् । धनुरारोपणात्मक कन्यकाशुल्कधनमित्यर्थ. । नाकरिष्यद्यदि न कृतवाश्चेत् । तेनेतिशेष. । तेन जनकेन सीता पुण्यमहसे पावनतेजस्काय । चन्द्रमा इव दाशरथिर्दाशरथिचन्द्रमाः । उपमितसमास । तस्मै सदृशायानुरूपाय । तथा च सदृशाय रामात्मकाय पुण्यतेजस्काय चन्द्रतुल्याय दाशरथये दत्तैवाभविष्यत् । अत्राह्लादकरत्वरूपसामान्यधर्मस्यानुपादानादुपमितसमास । प्रधानस्य सापेक्षस्यापि समास इत्युक्ते । रामादिविशेषणाना दाशरथिपदार्थे तादात्म्येनान्वय. । अभविष्यदकरिष्यदित्यनयो. 'लिङ्निमित्ते लृङ्क्रियातिपत्तौ' इति लृङ् । तथा च रौद्रधनुरारोपणपणकरणाभावे रामात्मकदाशरथिसंप्रदानकसीताप्रदानहेतुरिति सिद्धेस्तादृशपणकरणं सीताप्रदानप्रतिबन्धकमिति पर्यवसितम् ॥ २७ ॥ तापसस्तप शीलः । शीलमित्यधिकारे 'छत्रादिभ्यो ण.' । सर्वा माया यस्य स तथोक्त. सर्वमायः । राजकार्याद्रावणकार्यनिमित्त वो युष्मान्पश्यति द्रष्टुमिच्छति ॥

कन्ये—[1]हुं, रक्खसो ।

कुमारौ—महत्कौतुकस्थानम् ।

राजविश्वामित्रौ—आगच्छतु ।

(तापसौ निष्क्रान्तौ ।)

(प्रविश्य ।)

राक्षसः—

मातामहेन प्रतिषिध्यमानः
स्वयंग्रहान्माल्यवता दशास्य· ।
अयोनिजां राजसुतां वरीतुं
मां प्राहिणोन्मैथिलराजधानीम् ॥ २८ ॥

दृष्टश्च तत्र यजमानः स राजा । तद्वचनात्कौशिककुशध्वजावनुगतोऽस्मि । (इति परिक्रामति ।)

रामलक्ष्मणौ—(सीतोर्मिले प्रति यथासंख्यमात्मगतम् ।) तत्किमियममृतवर्तिरिव मे चक्षुराप्याययति ।

सीतोर्मिले—(तथैव तौ प्रति ।) [2]किंत्ति सज्जइ इमस्सिं लोअणाणन्दे मे दिट्ठी ।

---

१. हुं, राक्षसः ।

२. किमिति सज्जतेऽस्मिंल्लोचनानन्दे मे दृष्टिः ।

हुं राक्षस । हुमिति वितर्के । किमर्थमिहागतो राक्षस इत्यर्थ ॥ कौतुकस्थान हर्षहेतु· ॥ **मातामहेनेति** । दशास्यो रावणो मातामहेन मातु पित्रा माल्यवता माल्यवन्नाम्ना दैत्येन प्रतिषिध्यमानो निवार्यमाण. सन्स्वयंग्रहाद्बलात्कारेण ग्रहणात् । 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी । बलात्कारेण ग्रहण विहायेत्यर्थः । अयोनिजा राजसुता सीता वरीतुमुद्वोढुम् । 'वृतो वा' इति इटो दीर्घ· । मैथिलराजधानीं सीरध्वजस्य नगरीं प्रति मा प्राहिणोत्प्रेषयामास ॥ २८ ॥ तत्र मैथिलराजधान्याम् । यजमान आरब्धयाग । स राजा सीरध्वज । तद्वचनात्सीरध्वजवचनादनुगतोऽस्म्यनुप्राप्तोऽस्मि· । इति परिक्रामति । इति वदन्नाट्येन परिक्रामतीत्यर्थ. ॥ **यस्थासंख्यमिति** । प्रथमनिर्दिष्टो राम प्रथमनिर्दिष्टा सीता प्रति द्वितीयनिर्दिष्टो लक्ष्मणो द्वितीयनिर्दिष्टामूर्मिला प्रतीत्यर्थ । आत्मगतं मनोगतं वक्ष्यमाणम् । अनुसंधत्त इत्यर्थः । तत्किमिति । केनापि तादृशेन हेतुनेत्यर्थ । अमृतवर्तिरिवामृताञ्जनरेखेव । 'वर्तिर्दीपदशागात्रालेपयोर्मणिरञ्जके । व्रणभेषजभेदे च नयनाञ्जनरेखयो·॥' इति रत्नमाला । इयं सीता ऊर्मिला चाप्याययति ॥ तथैव यथासख्यं सीता रामं

राक्षसः—(उपेत्य ।) इयं साद्भुताकृतिः सीता । स्थाने देवस्य यत्नः । ऋषे, नमस्ते । अप्यनामयं राज्ञः ।

तौ—स्वागतम् । इहास्यताम् ।

अपि प्रभोर्वः कुशलं तस्य यस्यार्चयत्यसौ ।
मूर्ध्ना स्खलत्किरीटेन शासनं पाकशासनः ॥ २९ ॥

राक्षसः—(उपविश्य ।) कुशलं स्वामिनः । संदिष्टं च वो महाराजेन—

'कन्यारत्नमयोनिजन्म भवतामास्ते वयं चार्थिनो
रत्नं चेत्क्वचिदस्ति तत्परिणमत्यस्मासु शक्रादपि ।
कन्यायाश्च परार्थतैव हि मता तस्याः प्रदानादह
बन्धुर्वो भविता पुलस्त्यपुलहप्रष्ठाश्च संबन्धिनः ॥ ३० ॥'

प्रत्यूर्मिला लक्ष्मणं प्रतीत्यर्थः । किमिति सज्जतेऽस्मिंल्लोचनानन्दे मे दृष्टि । किमिति कुतो हेतो सज्जते लग्ना भवति । अस्मिन्रामे लक्ष्मणे चानन्दहेतावानन्दत्वव्यपदेशः । तत्किमियमित्यादिना दृष्टिरित्यन्तेन द्वादशसु शत्रारावस्थासु चक्षु प्रीतिर्नाम प्रथमावस्थोक्ता ।*तदुक्तम्—'आदराद्वीक्षणं यत्तच्चक्षु प्रीतिर्भवेत्तु सा' इति ॥ सा बहुशोऽस्मामि श्रुतपूर्वाद्भुताकृतिर्विस्मनीयसौन्दर्या सीतेत्यन्वयः । देवस्य रावणस्य यत्नः स्वयंग्रहादिप्रवृत्त्युद्योग स्थाने । उचित इत्यर्थ । अनामयमारोग्यम् । 'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम्' इति स्मरणात् ॥ तौ राजविश्वामित्रौ । राक्षसं प्रतीति शेष· । स्वागतम्। तव सुखागमन किमित्यर्थ । इहास्यताम् । त्वयेति शेष·। **अपीत्यादि** । उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात्तस्येत्यस्य प्रसिद्धस्येत्यर्थ । वः प्रभोर्युष्माकं राज्ञो रावणस्यापि कुशलमित्यन्वयः । असौ पाकशासन इन्द्र· स्खलत्किरीटेन मूर्ध्ना यस्य रावणस्य शासनमाज्ञामर्चयति पूजयति ॥ २९ ॥ कुशलं स्वामिन । रावणस्य कुशलमित्यर्थ । महाराजेन रावणेन वो युष्माकं सदिष्टम् । मन्मुखेन किंचिद्वाक्यमित्यर्थ । चकार कुशलं समुच्चिनोति । सदेशं विशिनष्टि—**कन्येत्यादिना** । योनेर्जन्म यस्य तद्योनिजन्म । तन्न भवतीत्ययोनिजन्म कन्यारत्नम् । 'रत्नं मणौ च श्रेष्ठे च' इति रत्नमाला । भवता युष्माकमास्ते वर्तते । ततः किमित्यत्राह—**वयमित्यादि**। वयमहमर्थिनश्च तद्विषये स्वोद्देश्यकदानेच्छा युष्माकं प्रकटयन्तो भवामश्च । किंच रत्नं क्वचिदस्ति चेच्छ्रेष्ठवस्तु यत्र क्वचन विद्यते चेच्छक्रादपीन्द्रं विहायापि । 'ल्यब्लोपे पञ्चमी' । अस्मासु मयि । पूर्वत्रात्र च 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् । 'सविशेषणस्य प्रातषेध.' इति तु न विधेयविशेषणविषयम् । परिणमत्यन्ततो गत्वापि विश्राम्यति । 'रत्नहारी च पार्थिवः' इति हि प्रसिद्धम् । किंच कन्यायाः परार्थता परकीयतैव मता हि शास्त्रकृतामिष्टा हि । 'अर्थो

सीता—हद्धी हद्धी। रक्खसो मं अब्भत्थअदि।

ऊर्मिला—हो[1], कहं एदम्।

(राजविश्वामित्रौ चिन्तयत.।)

लक्ष्मणः—आर्य, निशाचरपतिर्देवीमिमां प्रार्थयते।

रामः—वत्स,

साधारण्यान्निरातङ्कः कन्यामन्योऽपि याचते।
किं पुनर्जगतां जेता प्रपौत्र. परमेष्ठिनः॥ ३१॥

लक्ष्मणः—अति हि सौजन्यमार्यस्य तस्मिन्नपि निसर्गवैरिणि निशाचरे बहुमान।

---

१ हा धिक् हा धिक्। राक्षसो मामभ्यर्थयते।

२. हा, कथमेतत्।

हि कन्या परकीय एव' इति हि प्रसिद्धम्। अत्र चायोनिजन्मेत्यनेन युष्माक शरीरसबन्धाभादाद्युष्माकमसाधारणत्वं न भवतीत्युक्तम्। क्षेत्रजत्वमात्रेण स्वत्वाभिमाने तु कैश्चिदर्थितत्वे तत्तेभ्योऽवश्यं दातव्यम्। तत्रापि याज्ञा दैन्यपराधीत्यर्थित्वगन्धविधुरेण मयार्थितत्वेऽवश्यं मह्य देयम्। अथापि 'मदभ्यर्थनोल्लङ्घने रत्नहारि' इति न्यायेन कथंचिदपि मदीयमेव तद्भवेत्। किच कन्याया परार्थत्वादवश्यं कस्मैचिद्दीयते। एवमेतैर्हेतुभिस्तस्या रत्नभूताया कन्याया 'दशैते राजमातङ्गास्तस्यैव हि तुरंगमा' इतिवद्वृत्त्येकदेशस्यापि तच्छब्देन परामर्श। प्रदानात्प्रार्थनापूर्वकत्वरूपप्रकर्षयुक्तदानेन हेतुनाहं प्रजापतिप्रपौत्रोऽह व क्षत्रियाणा युष्माक बन्धुर्भविता बन्धुर्भविष्यति (ष्यामि)। 'सुवर्ण कुण्डले भवत' इतिवद्विकृतिकर्त्रनुसारिणी तिङ्विभक्तिरिति भवतेर्लुटि प्रथमपुरुष। पुलस्त्यपुलहौ प्रष्ठावग्रगौ येषा ते तथोक्ता। 'प्रष्ठोऽग्रगामिनि' इति सूत्रेण निपातित। 'प्रष्ठस्त्रीष्वग्रगे वरे' इति रत्नमाला। सबन्धिनो भवितार इत्यनुषङ्गविपरिणामौ। भविष्यन्तीत्यर्थ॥ ३०॥ हा धिक् इति दुःखनिर्वेदयो॥ चिन्तयत। एतद्राक्षसाभ्यर्थनं चिन्तयतः। प्रतिवचनमिति शेषः॥ निशाचरपती रावणो देवीमिमा प्रार्थयते सीता याचते॥ **साधारण्यादिति।** साधारण्यात्साधारणत्वात्सर्वेषा साम्यात्। समानो धारणो यस्य स सधारण। सधारण एव साधारण.। तस्य भाव साधारण्यम्। ब्राह्मणादित्वात्ष्यञ्। कन्यामन्योऽपि रावणादन्योऽपि निरातङ्क. सन्निर्भय सन्याचते प्रार्थयते। परमेष्ठिनश्चतुर्मुखस्य प्रपौत्र पौत्रस्य पुत्रो जगता जेता जगद्विजयी रावण कन्यां याचत इति किं पुन। किमु वक्तव्यमित्यर्थ॥ ३१॥ सौजन्यं गुणाविष्कारहेतुभूतं सुजनत्वम्। अति ह्यतिशयितं हि। 'प्रकर्षे लङ्घनेऽप्यति' इत्यमर। निसर्ग स्वभावभूतं वैरं विद्वेषोऽस्यातिशयेनास्तीति निसर्गवैरी। निसर्गवैरिशब्दादतिशायनार्थ इनिप्रत्ययः।

यो नस्त्रयीपरिध्वंसात्क्षात्रं तेजोऽपकर्षति ।
अस्माकं यश्च राजानमनरण्यं किलावधीत् ॥ ३२ ॥

रामः—कामं शत्रुरिति वध्यः स्यात् । न पुनरतिवीर्यमप्रमेयतपसमप्राकृतं प्राकृतवदर्हसि व्यपदेष्टुम् ।

लक्ष्मणः—निरस्तवीरपुरुषाचारस्य का वीरता ।

रामः—वत्स, मा मैवम् ।

यद्विद्वानपि तादृशेऽप्यभिजने धर्म्यात्पथोऽपि च्युतः
किं ब्रूमोऽत्र तदन्यदेव न वसन्त्येकत्र सर्वे गुणाः ।
लीलानिर्जितषण्मुखाद्भगवतः श्रीजामदग्न्यादृते
निर्विघ्नप्रतिपन्नविश्वविजयो वीरस्तु कस्तादृशः ॥ ३३ ॥

न कर्मधारयादिति निषेधस्तु बहुव्रीहिणा तुल्यार्थतायाम् । नत्वतिशयादिविवक्षायाम् । तस्मिन्नपि रावणेऽपि बहुमान पूजा । निसर्गवैरमुपपादयति—**यो न इत्यादिना** । यो रावणस्त्रयीपरिध्वंसाद्वेदमार्गप्रणाशनान्नः क्षात्रं तेज क्षत्रसबन्धिपराभिभवनसामर्थ्यम् । 'तेजो बले प्रतापेऽग्नौ' इति रत्नमाला । अपकर्षत्यभिभवति । किंच यो रावणो राजानमस्माकमनरण्यमस्मत्कूटस्थमवधीत्किल जघानेति प्रसिद्धम् । एवं साधारणेनासाधारणेन चापकारेण निसर्गवैरातिशये रावणेऽपि बहुमानादार्यस्य सौजन्यमतिशयितमिति भाव ॥ ३२ ॥ कामं शत्रुरिति वध्य स्यात् । शत्रुत्वाद्धेतोस्तस्य वध्यत्वं मयाप्यनुज्ञातमित्यर्थः । 'स्मराभिलाषयो. कामोऽनुज्ञाया काममव्ययम्' इति रत्नमाला । किमत्रानुज्ञातमित्यत्राह—**न पुनरित्यादि** । अतिवीर्यमतिशयितपराक्रमम् । 'वीर्यं पराक्रमे शुल्के' इति रत्नमाला । अप्रमेयतपसमपरिच्छिन्नतपस्कम् । अप्राकृतमपृथग्जनं प्राकृतवत्प्राकृतेन तुल्यम् । 'विवर्णः पामरो नीच. प्राकृतश्च पृथग्जन ' इत्यमरः । व्यपदेष्टुं पुनर्वक्तुं नार्हसीत्यन्वय. ॥ निरस्तवीरपुरुषाचारस्य त्यक्तवीरपुरुषधर्मस्य ॥ मा मैवम् । एवं त्वदुक्तरीतिः मा मा । नैवेत्यर्थ. । **यदित्यादि** । अत्र रावण इत्यादि रावणो विद्वानपि ज्ञातापि तादृशेऽप्यभिजने लोकश्रेष्ठे । पुलस्त्यवंशे जातोऽपीति शेष. । धर्म्याद्धर्मादनपेतात् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः । अपि च्युतो गर्हणीयतया च्युतो भ्रष्ट । 'गर्हा समुच्चयप्रश्नशङ्कासभावनास्वपि' इत्यमर । विदुषोऽतिक्रमे दण्डभूयस्त्वमित्यभिप्रायेण विद्वानपीत्युक्तम् । आरूढपतनाभिप्रायेण 'तादृशेऽप्यभिजने' इत्युक्तम् । च्युत इति यदत्र किं ब्रूम किं वदाम । धर्ममार्गान्न च्युत इति न वदाम इत्यर्थः । धर्ममार्गाद्भ्रष्टत्वमन्यदेव । दोष एवेत्यर्थ. । सर्वे गुणा शौर्याचारादय एकत्र न वसन्ति । एकस्मिन्स्थाने न तिष्ठन्तीत्यर्थ. । दोषस्तिष्ठतु, गुण एवादरणीय इत्याह—लीलेत्यादिना । किं तु लीलानिर्जितषण्मुखादनायासनिर्जितस्कन्दाद्भगवत ऐश्वर्यादिगुणवतः श्रीजामदग्न्यादृते जमदग्नितनय परशुरामं विना निर्विघ्नप्रतिपन्नविश्वविजयो निर्विघ्न-

राक्षसः—ननु भोः, किमत्र चिन्त्यते ।

द्राङ्निष्पेषविशीर्णवज्रशकलप्रत्युप्तरूढव्रण-
ग्रन्थ्युद्भासिनि भग्नमोघमघवन्मातङ्गदन्तोद्यमे ।
भर्तुर्नन्दनदेवताविरचितस्रग्धाम्नि भूमेः सुता
वीरश्रीरिव तस्य वक्षसि जगद्वीरस्य विश्राम्यतु ॥ ३४ ॥

(नेपथ्ये कलकल ।)

राजा—भगवन्, यत एते यज्ञोपनिमन्त्रिताः पुत्रदारैः सह दिगन्तरेभ्यो महर्षयः संपतन्ति, तत एवमाक्रन्दकलिलः कलकलः ।

(सर्वे उत्तिष्ठन्ति ।)

लक्ष्मणः—भगवन्, का पुनरियम् ।

आन्त्रप्रोतबृहत्कपालनलककूरक्कणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।

प्राप्तसर्वविजयस्तादृशो रावणतुल्यो वीर क । न कोऽपीत्यर्थ । अनन्तरापत्येऽपि गोत्रव्यारोपणाज्जामदग्न्य इति यञ्प्रत्यय· ॥ ३३ ॥ किमत्र चिन्त्यते । मन्मुखेन मत्प्रभुसदिष्टेऽर्थे वक्ष्यमाणादन्यत्किं विमृश्यत इत्यर्थः । **द्रागित्यादि** । भूमे सुता जगद्वीरस्य जगति मुख्यवीरस्य तस्य भर्तु पाणिग्रहीत् रावणस्य इदं च वक्षसीत्यनेनान्वेति । द्राङ्झटिति निष्पेषेण सघट्टनेन विशीर्णस्य भग्नस्य वज्रस्य शकलै. खण्डैः प्रत्युप्तै खचितै रूढाना प्रादुर्भूताना व्रणाना ग्रन्थिभि पर्वभिः । 'ग्रन्थि पर्वगदान्तरे' इति रत्नमाला । तैरुद्भासिन्यत्यन्तद्योतमाने । पद्मरागमणितुल्येषु व्रणग्रन्थिषु लग्नानि दम्भोलिशकलानि हीरमणय इव खचिता दृश्यन्त इति भाव । भग्नः प्रारम्भ एव नष्टो मोघ प्रवृत्तोऽपि विफलो मघवन्मातङ्गदन्तानामुद्यमो व्यापारो यस्मिंस्तत्तथोक्त तस्मिन् । नन्दनदेवताभिरिन्द्रोद्यानपालिकाभिर्देवताभिर्विरचिताना गुम्फितानां स्रजा दाम्नां धाम्नि स्थानभूते । 'धाम जन्मप्रभास्थानप्रभावसुखसद्मसु' इति रत्नमाला । 'विरचितस्रग्दाम्नि' इति पाठे विरचितानि गुम्फितानि स्रजो माला दामानि प्रालम्बवैकक्ष्यकादीनि च यस्मिंस्तत्तथोक्तं तस्मिन्नित्यर्थो बोध्य । तस्य रावणस्य वक्षसि वीरश्रीरिव वीरलक्ष्मीरिव विश्राम्यतु । विश्रमं प्राप्नोत्वित्यर्थ. । अतोऽन्यत्किं चिन्त्यत इत्यर्थ । वीरश्रीरिवेत्युपमालंकार । 'द्राङ्निष्पेष–' इत्यादिना 'नन्दनदेवता' इत्यादिना च विशेषणद्वयेन वक्षसो विश्रमस्थानत्वौपयिकरत्नमालापुष्पमालालंकृतत्वोक्ति परिकरालंकारः । 'अलंकार परिकर साभिप्राये विशेषणे' इति तल्लक्षणात् ॥ ३४ ॥ यज्ञोपनिमन्त्रिता यज्ञार्थमाहूता । पुत्रदारै सह पुत्रकलत्रै सह । सपतन्ति समागच्छन्ति । आक्रन्देन शिशूना रोदनशब्देन कलिल कलुष ॥ **आन्त्रेत्यादि** । आन्त्रेषु पुरीतत्सु प्रोतानि गुम्फितानि बृहन्ति । नलकानीव घुटिका इव कपाला कपालनलकानि । यद्वा । कपालाश्च नलकानि चेति द्वन्द्वः । 'शङ्खास्थि नल-

पीतोच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लल-
द्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥ ३५ ॥

विश्वामित्रः—

सेय सुकेतोर्दुहिता भार्या सुन्दासुरस्य च ।
मारीचजननी घोरा ताटका नाम राक्षसी ॥ ३६ ॥

कन्ये—[1]तादं, भीसणा हदासा ।

राजा—मा भैष्टमायुष्मत्यौ ।

विश्वामित्रः—(रामं चिबुकप्रदेशे स्पृशन् ।) वत्स, हन्यतामियम् ।

सीता—[2]हद्धी हद्धी । एसो एव एत्थ णिउत्तो ।

रामः—भगवन्, स्त्री खल्वियम् ।

ऊर्मिला—[3]सुदं अज्जाए ।

सीता—(सविस्मयानुरागम् ।) [4]अण्णदोमुहो एव्व से चित्तभेदो ।

---

१. तात, भीषणा हताशा ।
२. हा धिक् हा धिक् । एष एवात्र नियुक्तः ।
३. श्रुतमार्यया ।
४. अन्यतोमुख एवास्य चित्तभेदः ।

कम्' इति हलायुध. । क्रूरं यथा भवति तथा क्वणन्ति ध्वनन्ति कङ्कणानि करभूषणानि । आन्त्रप्रोतबृहत्कपालनलकान्येव क्रूरक्वणत्कङ्कणानि तानि प्रायो बहूनि येषु तानि तथोक्तानि । तेषा प्रेङ्खितानां चलितानां भूरीणां प्रचुराणां भूषणानां रवै शब्दैरम्बरमाकाशमाघोषयन्ती समन्ताद्घोषयुक्त कुर्वती । पीतस्योच्छर्दितस्यातिमात्रलाद्दुर्द्वान्तस्य कर्दमस्य घनेन सान्द्रेण प्राग्भारेण समूहेन । प्राग्भारशब्द समूहे रूढ इति व्याख्यातार । घोरौ भयंकरावुल्लल्न्तावुत्पतन्तौ व्यालोलावभितश्चलन्तौ यौ स्तनौ तयोर्भारेण भैरवं भयकर वपुर्यस्या सा तथोक्ता । केय दर्पेणोद्धतमुदग्रं यथा तथा धावति शीघ्र गच्छति । 'सृ गतौ' इत्यस्य 'पाघ्राध्मास्थाम्नादाण्–' इत्यादिना शीघ्रगमने धावादेश । 'आन्त्रं पुरीतत्' इत्यमर । 'प्रायो वयोमृत्युतुल्यबाहुल्यानशनेषु ना । प्रायोऽव्ययं च बाहुल्ये' इति रत्नमाला ॥३५॥ **सेयमित्यादि ।** सुकेतो. सुकेतुनामकस्य यक्षस्य दुहिता सुता । सुन्दासुरस्य भार्या । मारीचस्य जननी माता । ताटका नाम घोरा भयावहा राक्षसीति पूर्वस्मादनुषङ्गः ॥ ३६ ॥ हताशा इति निन्दायाम् ॥ मा भैष्ट भीतिमत्यौ न भवेतम् । भैष्टमिति बिभेतेर्लुङ्मध्यमपुरुषद्विवचनम् । 'न माङ्योगे' इत्यडागमाभाव । 'अधस्ताच्चिबुकम्' इत्यमरः । अध-

रामः—साधु । सत्यमैक्ष्वाको रामभद्रः ।

राक्षसः—(खगतम् ।) अयं स रामो दाशरथिः, य एषः

उत्तालताटकोत्पातदर्शनेऽप्यप्रकम्पितः ।

नियुक्तस्तत्प्रमाथाय स्त्रैणेन विचिकित्सति ॥ ३७ ॥

विश्वामित्रः—त्वरस्व वत्स, किं न पश्यसि ब्राह्मणजनस्य संघात-मृत्युमग्रतः ।

रामः—एव भगवन्तो जानन्ति ।

सर्वदोषानभिष्वङ्गादाम्नायसमतां गता. ।

युष्माकमभ्युपगमाः प्रमाणं पुण्यपापयोः ॥ ३८ ॥

(इति निष्क्रान्त ।)

राधोदेशे राम स्पृशन्नित्यर्थ. । हन्यतामियम् । इयं ताटका हन्यतां वध्यताम् । त्वयेति शेष. ॥ एष एवातिपुकुमारो राम एवातिदुष्करेऽस्मिंस्ताटकावधे समाज्ञप्त ॥ भगवन्विश्वामित्र, इयं ताटका स्त्री खलु । अतो न वध्येत्यर्थ ॥ श्रुतमार्ययाग्रजया त्वया । स्त्री खल्वियमिति रामवाक्यं श्रुतं किमित्यर्थ. । अस्य रामस्य चित्तमेदोऽभिप्रायविशेष ॥ अन्यतो वधादन्यस्मिन्मुखमौन्मुख्य यस्य स तथोक्त ॥ ऐक्ष्वाक इक्ष्वाकुवंश्य । स्त्रीवधाज्जुगुप्समानत्वाद्रामभद्रस्येक्ष्वाकुवंश्यत्वं सत्यमित्यर्थः ॥ **अयमित्यादि** । एष उत्तालायास्तालमुद्गताया । 'अल्लादय क्रान्ताद्यर्थे द्वितीयया' इति समास. । ताटकाया उत्पातस्योत्पतनस्य ताटकात्मकदु खसूचकदुर्ग्रहस्य वा दर्शनेऽप्यप्रकम्पितोऽचलितस्तस्यास्ताटकाया प्रमाथाय वधाय नियुक्त आज्ञप्त । विश्वामित्रेणेति शेष । स्त्रैणेन स्त्रीत्वेन । 'स्त्रीपुसाभ्या नञ्स्नञौ भवनात्' इति स्त्रीशब्दाद्भावे स्नञ्प्रत्यय. । विचिकित्सति । हन्यता न हन्यता वेति सदेग्धीत्यर्थ । 'विचिकित्सा तु सशय.' इत्यमर । अय स इति सबन्ध ॥ ३७ ॥ त्वरस्व । हन्तुमिति शेष । सघातस्य मृत्यु सघातमृत्यु । एककाले बहूना मरणमित्यर्थ । ब्राह्मणजनस्य सघातमृत्युमिति देवदत्तस्य गुरुकुलमितिवदन्वय । अग्रत उत्तरदक्षिणेन । तथा च 'त्यजेदेकं कुलस्यार्थे' इति न्यायेन भूयिष्ठब्राह्मणजनव्यपेक्षयैकस्या दुष्टस्त्रियो वधो न दोषायेत्यर्थ ॥ भगवैन्त. 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्या च स वाच्यो भगवानिति ॥' इत्युक्तरीत्या भूतोत्पत्त्यादिवेदिनो यूयमेवं पूर्वोक्तप्रकारेण जानन्ति मन्यन्ते । **सर्वेति** । सर्वदोषाणा भ्रमप्रमादाविप्रलिप्सादिवकृदोषाणामनभिष्वङ्गादसबन्धाद्धेतोराम्नायसमता गता वेदतुल्यता प्राप्ता । युष्माक भवादृशामभ्युपगमा अङ्गीकारा पुण्यपापयो कृत्याकृत्ययोर्विषये प्रमाणं प्रमितिहेतव. । भवन्तीति शेष । अतो भवन्नियोगात्ताटका हनिष्यामीति भाव ॥ ३८ ॥ **निष्क्रान्त इति** । वधस्य 'दूराध्वान वध युद्धम्' इति प्रत्यक्षप्रयोगनिषेधात्ताट-

सीता—[1]अम्महे, परागदो एव्व । हद्धी हद्धी । उप्पादवादावली विअ सा हदासा महाणुभावं अहिद्दवदि ।

राजा—(धनुरास्फाल्य ।) आः पापे, तिष्ठ तिष्ठ ।

ऊर्मिला—[2]अए, सअं एव्व तादो पत्थिदो ।

लक्ष्मणः—(विहस्य ।) पश्यन्तु भवन्तस्ताटकाम् ।

हृन्मर्मभेदिपतदुत्कटकङ्कपत्र-
सवेगतत्क्षणकृतस्फुटदङ्गभङ्गा ।
नासाकुटीरकुहरद्वयतुल्यनिर्य-
दुद्बुद्बुदध्वनदसृक्प्रसरा मृतैव ॥ ३९ ॥

कन्ये—[3]अच्चरिअं अच्चरिअम् । पिअं णो पिअं णो ।

राजा—अहो दृढप्रहारिता राजपुत्रस्य ।

राक्षसः—भो आर्ये ताटके, किं हि नामैतत् । अम्बुनि मज्जन्त्य-लाबूनि, ग्रावाणः प्लवन्ते ।

---

१. अहो, परागत एव । हा धिक् हा धिक् । उत्पातपातावलिरिव सा हताशा महानुभावमभिद्रवति ।

२. अये, स्वयमेव तातः प्रस्थितः ।

३. आश्चर्यमाश्चर्यम् । प्रियं नः प्रियं नः ।

कावधार्थं रामो रङ्गस्थलान्निष्क्रान्त इत्यर्थ ॥ उत्पातवातावलिरनर्थसूचिका चक्रवाता । हताशा दुष्टाशया ॥ धनुरास्फाल्य धनुष्टंकृत्य । आ इति कोपे । 'आस्तु स्यात्कोपपीडयो' इत्यमर ॥ तात कुशध्वज । **हृन्मर्मेति** ॥ हृदो हृदयस्य वक्ष स्थलस्य मध्यं भिन्दन्तीति हृन्मर्मभेदिन । तथाविधै पतद्भिर्गच्छद्भिरुत्कटैरुदग्रै कङ्कपत्रै । 'कङ्कपत्र शिलीमुख' इत्यमर । सवेगेन सभ्रमेण तत्क्षणे पतनक्षणे कृतो जनित स्फुटता दलतामङ्गाना भङ्गो नाशो यस्या सा तथोक्ता । 'समौ सवेगसभ्रमौ' इत्यमर । हखा कुटी कुटीर. । 'कुटीशमीशुण्डाभ्यो र' इति रप्रत्यय । नासैव कुटीरो नासाकुटीर । तस्य कुहरयो रन्ध्रयो । 'कुहर सुषिरं बिवरं बिलम्' इत्याद्यमर । द्वयाद्युग्मात्तुल्यं युगपन्निर्यन्निर्गच्छन्नुद्बुद्बुदोऽतिशयितबुद्बुदयुक्तो ध्वनञ्शब्दयुक्तश्चासृजा रक्ताना प्रसर. प्रवाहो यस्याः सा तथोक्ता मृतैव । ताटकेति शेष ॥ ३९ ॥ आदराद्विरुक्ति.—प्रियं न प्रियं न इति ॥ दृढप्रहारिता निष्ठुरप्रहारकर्तृता । आहो । विस्मयनीयेत्यर्थः ॥ **आर्ये इति** । स्वयं वृद्धो राक्षस स्वापेक्षयापि कालज्यैष्ठ्यात्ताटकामार्ये इति सबोधयति । एतन्मानुषान्मरणम् । अलाब्वा फलान्यलाबूनि । 'फले लुक्'

नन्वद्य राक्षसपतेः स्खलितः प्रताप·
प्राप्तोऽद्भुतः परिभवोऽद्य मनुष्यपोतात् ।
दृष्टः स्थितेन च मया स्वजनप्रमारो
दैन्य जरा च निरुणद्धि कथं करोमि ॥ ४० ॥

विश्वामित्रः—(स्वगतम् ।) एष तावदोंकार· सकलराक्षससंहारनिगमाध्ययनस्य ।

राक्षसः—अयि भोः, किमस्मासु वः प्रतिवचनम् ।

इति विकारप्रत्ययस्य लुक् । 'तुम्ब्यलाबूरुमे समे' इत्यमर । तानि हि शुष्काणि लाघवातिशयाज्जले प्रक्षिप्तानि प्लवनस्वभावानि भवन्ति । प्राषाण शिला अम्बुनि प्लवन्ते तरन्ति । ते हि गुरुत्वातिशयाज्जले प्रक्षिप्ता मज्जनस्वभावा भवन्ति । तेषामुभयेषामपि प्रतिनियतस्वभावविपर्यासो यथात्यन्तासभाव्य , तथैवात्यन्तासभाव्योऽप्ययं मानुषराक्षसयो स्वभावविपर्यासोऽद्य कालदोषात्सभावित इत्यर्थ । मानुषस्य राक्षसवध्यत्वं स्वभाव , राक्षसस्य तु मानुषघातकत्वम् । इति स्वभावप्रतिनियमेऽप्यनयोरद्य वध्यघातकभावो विपर्यस्त इति भाव । उक्त च—'मानुषान्नन्ति राक्षमा ' । 'अप्सु प्लवन्ते पाषाणा ' इति रूपकातिशयोक्तिरियम् । उपमानभूतेनालाबुमज्जनादिनोपमेयस्य मानुषकर्तृकराक्षसवधस्य निगरणात् 'रूपकातिशयोक्ति स्यान्निगीर्याध्यवसानत ' इति लक्षणात् । उपमान चेहासभावितमित्यसभावितोपमा व्यज्यते । 'चन्द्रबिम्बादिव विषं चन्दनादिव चानल । परुषा वागतो वज्रादित्यसभावितोपमा ॥' इति ह्युक्तम् । **नन्वित्यादि** । राक्षसपते रावणस्य प्रताप शत्रुतापनस्वभावोऽद्य स्खलितो ननु । अद्य भ्रष्ट एवेत्यर्थ । 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमर· । अद्भुतो विस्मयनीयो मनुष्यपोतान्मनुष्यशिशो परिभवस्तिरस्कारो राक्षसपतेरित्यनुषङ्ग । रावणस्याद्यागत इत्यर्थ । किच स्थितेन स्वामिकार्यार्थं स्थितवता मया स्वजनप्रमारो राक्षसवधो दृष्ट । दैन्य याच्ञया क्षीणसत्त्वता जरा वयोहानिश्च निरुणद्धि प्रतिचिकीर्षुर्मा निवर्तयति । कथं करोमि । कि करोमीत्यर्थ ॥ ४० ॥ एष ताटकावध सकलराक्षससहार एव सुबाहुप्रभृतिरावणपर्यन्तसर्वराक्षसवध एव निगमाध्ययनं स्वाध्यायाध्ययनं तस्य 'निष्कारणं षडङ्गो वेदोऽध्येय ' इति नित्यत्वात्पुरुषार्थसाधनत्वाच्च स्वाध्यायाध्ययनस्य राक्षससहारोऽपि क्षत्रियस्य रामस्य नित्य पुरुषार्थसाधनभूतश्चेति बोधयितु त्रस्य निगमाध्ययनरूपणं कृतम् । ॐकार प्रणवोच्चारणरूप । 'ब्रह्मण प्रणव कुर्यादादावन्ते च नित्यश । स्रवत्यनोकृत ब्रह्म परस्ताच्च विशीर्यते ॥' इत्युक्तरीत्या प्रणवो यथा स्वाध्यायाध्ययनप्रारम्भभूतोऽध्ययनप्रतिष्ठापनश्च भवति, तद्वत्ताटकावधोऽपि करिष्यमाणसर्वराक्षसवधप्रारम्भभूतस्तत्प्रतिष्ठापकश्च भवतीति तस्योंकारत्वरूपणं कृतम् ॥ अस्मासु मयि मत्स्वामिनि च । द्वित्वे बहुवचनम् ॥

विश्वामित्रः—

अत्र सीरध्वजो वेत्ता कनिष्ठो हि कुशध्वजः ।
अस्या पिता स कन्यायाः कुलज्येष्ठः प्रभुश्च सः ॥ ४१ ॥

राक्षसः—सोऽप्याह कुशध्वजो जानाति कौशिकश्चेति ।

विश्वामित्रः—(स्वगतम् ।) अस्यायमवसरो दिव्यास्त्रमङ्गलानां दानस्य वर्तते मङ्गल्यो मुहूर्तः । (प्रकाशम् ।) सखे कुशध्वज, यानि हि भगवतः कृशाश्वाद्वरुचर्याव्रतैरधीतस्य सरहस्यजृम्भकप्रयोगसंहारस्य दिव्यास्त्रमन्त्रपारायणस्य विद्यातत्त्वबीजानि, तानि मत्प्रसादादर्थतः शब्दात्मना च रामभद्रस्य संप्रति प्रकाशन्ताम् ।

अत्रेति । अत्र कन्यारत्नमित्यादिस्वदुक्तरावणसदेशे विषये सीरध्वजो जनको वेत्ता । प्रतिवचनमिति शेषः । 'विद ज्ञाने' इत्यस्माद्वृद् प्रथमपुरुष । कुशध्वजोऽस्य प्रतिवक्तुमित्यत्राह—कनिष्ठ इति । कुशध्वज. कनिष्ठ इति त्वमपि जानास्येवेत्यर्थ । भ्रात्रो सत्पुष्टत्वात्कनिष्ठोऽपि वक्तित्वत्यत्राह—अस्या इति । स सीरध्वजोऽस्या कन्याया पिता । कन्यादाने हि पितुरेवाधिकारो न पितृव्यादेरिति भाव । कन्येयं तस्यानौरसी । क्षेत्रलब्धत्वप्रयुक्तप्रत्यासत्तिस्तूभयोरपि स्निष्टेत्यत्राह—कुलेति । स सीरध्वज कुले वंशे ज्येष्ठ. कालतो गुणतश्चाधिक । स एव प्रभु स्वामी च भवति। क्षत्रियेषु ज्येष्ठस्यैव भूमिस्वाम्यात्क्षेत्रलब्धापीयं तेनैव प्रतिपादेयेति भावः ॥ ४१ ॥ सोऽपि सीरध्वजो जानाति प्रतिवचनमिति शेष । अतस्तदनुमते कुशध्वज प्रतिवक्तव्येवेति राक्षसाभिप्राय ॥ इदानी विश्वामित्र· प्रकारान्तरेण प्रतिवचनस्य चिरयति—**अस्येत्यादि** । दिव्यास्त्राण्येव जृम्भकास्त्राण्येव मङ्गलानि तेषा दानस्यास्य रामस्यायमवसर प्राप्तकाल । मङ्गले साधुर्मङ्गल्य । 'तत्र साधु' इति यत्प्रत्यय । यानीत्यादि । भगवतो ज्ञानादिपूर्णात्कृशाश्वात्कृशाश्वनाम्नो मुने । 'आख्यातोपयोगे' इति पञ्चमी । गुरोश्चर्या गुरुचर्या काष्ठोदकाद्याहरणानि गुरो कर्माणि ता एव व्रतान्यवश्यानुष्ठेयधर्मास्तैरधीतस्य प्राप्तस्य । रहस्यमुपदेशैकगम्य कवचपञ्जरादिकम् । प्रयोग प्रेषणम् । सहार प्रत्यावर्तनम् । जृम्भकास्त्राणा प्रयोगसहारौ जृम्भकप्रयोगसंहारौ । रहस्यं च जृम्भकास्त्रप्रयोगसहारौ च रहस्यजृम्भकप्रयोगसहारा । तै. सहितस्येत्यर्थ । दिव्यास्त्रमन्त्राणा दिव्यास्त्रप्रकाशकोपनिषद्भागविशेषाणा पारायणस्यादित आरभ्यान्तादविच्छेदेनाध्येयसमुदायस्य यानि विद्यातत्त्वबीजानि विद्यातत्त्वस्य विद्यावस्तुनो बीजानि बीजशक्तिकीलकादिषु मन्त्रशास्त्रपरिगणितेषु मन्त्राङ्गेषु बीजरूपाण्यङ्गानि । भवन्तीति शेष । तानि मत्प्रसादान्मदनुग्रहात् । गुरुचर्याव्रताभावेऽपीत्यर्थ. । अर्थतो वाच्यभूततत्तद्देवतात्मना शब्दात्मना च वाचकशब्दस्वरूपेण च प्रकाशन्ता प्रत्यक्षीभवन्तु । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इत्यनेन विधौ लोट् ।

ब्रह्मादयो ब्रह्महिताय तत्त्वा
पर'सहस्रं शरदस्तपांसि ।
एतान्यदर्शन्गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि ॥ ४२ ॥

राजा—अनुगृहीतं रघुकुलम् ।

लक्ष्मणः—दिष्ट्या देवदुन्दुभिध्वनिः पुष्पवृष्टिश्च ।

राक्षसः—(आत्मगतम् ।) दिवौकसोऽपि राजविरुद्धमनुतिष्ठन्ति ।

लक्ष्मणः—कथम् ।

झटित्येवोत्तप्तद्रुतकनकसिक्ता इव दिशः
पिशङ्गत्वात्संध्यान्तरित इव निर्भाति दिवसः ।
ज्वलत्केतुव्रातस्थगितमिव दिव्यास्त्रनिचितं
नभो नैरन्तर्यप्रचलिततडित्पिञ्जरमिव ॥ ४३ ॥

ब्रह्मादय इति । पुराणा पुरातना गुरवो विद्योपदेष्टारो ब्रह्मादयश्चतुर्मुखादयो ब्रह्महिताय वेदहिताय ब्राह्मणहिताय वा पर सहस्रं सहस्रात्परम् । सुप्सुपेति समासः । पारस्करादित्वात्सुट् । राजदन्तादित्वात्परनिपात । 'विंशत्याद्या. सदैकत्वे' इत्येकत्वम् । सहस्रसख्याधिकसख्याका शरद· सवत्सरान् । 'सवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा' इत्यमर । अत्यन्तसयोगे द्वितीया । यद्यपि 'अपवर्गे तृतीया' इति फलप्राप्तौ विवक्षितायामत्यन्तसयोगे तृतीयया भवितव्यम्, तथापि यत्र तृतीययैव फलप्राप्तिर्विवक्षिता तत्रैव सा । यथा 'अह्ना क्रोशेन वानुवाकोऽधीत' इत्यादौ । अत्र शब्दान्तरेण फलप्राप्तेर्विवक्षितत्वादत्यन्तसयोगमात्रे द्वितीयैव । तपासि कायशोषणानि कर्माणि तत्त्वा कृत्वा । पाकं पचतीतिवन्निर्देश । तपोमयानि तपस आगतानि । 'तत आगत' इत्यधिकारे 'मयट् च' इति मयट् प्रत्यय । स्वानि स्वकीयानि तेजासि बलान्येतानि जृम्भकास्त्राणि । विधेयविशेषणमिदम् । अदर्शन्नपश्यन् । कार्यकारणभावात्तपसामस्त्राणा चामेददर्शनम् । 'दृशिर् प्रेक्षणे' । लुङ्लादङ् । 'ऋदृशोऽडि गुण' इति गुणः । तपोमयानीत्यत्र स्वार्थिको मयट् ॥४२॥ दिष्ट्येत्यानन्दे । देवदुन्दुभीना ध्वनि । 'भेरी स्त्री दुन्दुभि. पुमान्' इत्यमर. । दिवीति शेष· । पुष्पवृष्टिश्च । देवानामिति शेष· । पूर्वत्र श्रूयत इति, अपरत्र पततीति क्रियापदमध्याहर्तव्यम् । राजविरुद्धं रावणानभिमतं दुन्दुभिताडनादिकमनुतिष्ठन्ति कुर्वन्ति ॥ कथमिति विस्मये । **झटितीत्यादि** । दिश उत्तप्तेनात्यन्तानलसयुक्तेनात एव द्रुतेन द्रवत्वगुणवता कनकेन स्वर्णेन सिक्ता इव क्षरिता इव झटित्येवास्मिन्नेव क्षणे । भवन्तीति शेष । दिव्यास्त्रदेवताकान्तिभिरावृतत्वाद्दिशामेवविधत्वम् । दिवसः पिशङ्गत्वात्कपिलत्वात् । 'कडार. कपिल. पिङ्गपिशङ्गौ' इत्यमर । संध्यया संध्या-

अपि च ।

तेजोभिर्दिशिदिशि विश्वतः प्रदीप्तै-
रादित्यद्युतिमपविध्य विस्फुरद्भिः ।
पर्यायत्वरितगृहीतविप्रमुक्तः
सामर्थ्यं रहयति नायनो मयूखः ॥ ४४ ॥

कन्ये—[1]समन्तदो पज्जलिदविज्जुप्पुञ्जपिञ्जरेण उब्भमन्ति विअ लोअणाइ प्पहापरिप्पन्देण ।

राक्षसः—अहो, दुरासदं दिव्यास्त्रतेज. स्त्यायति । येन रावणपुरंदरद्वन्द्वसंरम्भं स्मारितोऽस्मि ।

सर्वप्राणप्रवणमधवन्मुक्तमाहत्य वक्ष-
स्तत्सघट्टाद्विघटितबृहत्खण्डमुच्चण्डरोचिः ।
एवं वेगात्कुलिशमकरोद्व्योम विद्युत्सहस्रै-
र्भर्तुर्वक्त्रज्वलनकपिशास्ते च रोषाट्टहासा. ॥ ४५ ॥

---

१. समन्ततः प्रज्वलितविद्युत्पुञ्जपिञ्जरेणोद्भ्रमत इव लोचने प्रभापरिस्पन्देन ।

रागेणान्तरित एव तिरोहित एव निर्भाति प्रकाशते । अत्रापि दिव्यास्त्रदेवताकान्तयोऽभिप्रेता. । दिव्यास्त्रैर्दिव्यास्त्रदेवताभिर्निचितं व्याप्तं नभोऽन्तरिक्षं ज्वलद्भिर्दीप्तैः केतुव्रातैर्ध्वजसमूहैः स्थगितमिव च्छादितमिव । किंच नैरन्तर्येण नीरन्ध्रतया प्रचलिताभिस्तडिद्भि. पिञ्जरमिव पिशङ्गवर्णयुक्तमिव । 'पिञ्जरं कनके क्लीबं पीते त्रिषु हये पुमान्' इति रत्नमाला ॥ ४३ ॥ भवतीति शेष. । **तेजोभिरित्यादि** । दिशिदिशि सर्वासु दिक्षु विश्वत सर्वस्मिन्देशे । 'सार्वविभक्तिकस्तसि' इति सप्तम्यर्थे तसिः । प्रदीप्तै प्रकाशमानैरादित्यद्युतिं सूर्यकान्तिमपविध्य प्रतिहत्य विस्फुरद्भि प्रकाशमानै. । 'स्फुरतिस्फुलत्योर्निर्निविभ्य' इत्यनेन षत्वम् । तेजोभिर्दिव्यास्त्रतेजोभिर्हेतुभि पर्यायेण क्रमेण त्वरितं यथा तथा गृहीतो ग्रस्तो विप्रमुक्तो विसृष्टश्च । खञ्जकुब्जादिवद्विशेषणसमास. । नायनो नेत्रसबन्धी । शैषिकोऽण्प्रत्यय. । मयूखो रश्मि सामर्थ्यं पदार्थग्रहणशक्तिं रहयति त्यजति । 'रह त्यागे' चौरादिक. ॥ ४४ ॥ प्राकृते द्विवचनाभावात्तत्स्थाने बहुवचनम् 'सिद्धिर्लोकाच्च' इति प्राकृतव्याकरणसिद्धम् ॥ दुरासदं दुष्प्रापम् । स्त्यायति सघातीभवति । 'स्त्यै शब्दसघातयो.' इत्यतो लट् प्रथमपुरुष. । येन तेजसा द्वन्द्वसरम्भ द्वन्द्वयुद्धोद्योगम् । **सर्वेत्यादि** । सर्वेण समस्तेन प्राणेन बलेन प्रवण यथा तथा प्रह्वं यथा तथा । 'देहान्तरनिले प्राणो जीवात्मपरमात्मनो. । आयुरिन्द्रियसत्त्वेषु' इति रत्नमाला । 'प्रवणं क्रमनिम्नोर्व्या प्रह्वे' इत्यमर ।

विश्वामित्रः—अभिवन्दस्व रामभद्र, दिव्यास्त्राणि ।

ब्रह्मेन्द्रद्रविणेशरुद्रवरुणप्राचीनबर्हिर्मरु-
त्कालाग्निव्यतिरेकिणां भगवतामाम्नायमन्त्रात्मनाम् ।
एतेषां तपसामिवाप्रतिहतैस्तेजोभिरुत्कर्षिणा-
मेकैकस्य जगत्त्रयप्रमथनत्राणावधिर्योग्यता ॥ ४६ ॥

(नेपथ्ये ।)

एष ब्रह्मोऽस्मि भगवन्नेषा विज्ञापना च नः ।
दिव्यास्त्रसंप्रदायोऽयं लक्ष्मणेन सहास्तु मे ॥ ४७ ॥

विश्वामित्रः—रामभद्र, तथास्तु ।

लक्ष्मणः—अहो प्रसादः ।

झटित्युन्मीलितप्रज्ञमप्रतर्क्यं च शक्तिभिः ।
ज्योतिर्मयमिवात्मानं मन्ये विद्याप्रकाशनात् ॥ ४८ ॥

मघवतेन्द्रेण मुक्तम् । कुलिशविशेषणमिदम् । वक्षो रावणवक्षः कर्म । आहत्य सताड्य तत्सघट्टाद्रावणवक्ष समर्दाद्विघटिता विशकलिता बृहन्त स्थूला खण्डाः शकलानि यस्य तं तथोक्तमुच्चण्डं करालं रोचिस्तेजो यस्य तथोक्तम् । कुलिशं कर्तृ । विद्युत्सहस्रै स्वशकलात्मकतडित्सहस्रै करणै । व्योम नभ कर्म । एवं दिव्यास्त्रतेज.-पिञ्जरितमिवाकरोत् । किंच ते पूर्वानुभूता वक्त्रज्वलनेन मुखाग्निना कपिशा धूम्रा भर्तू रावणस्य रोषेण कोपेनाट्टहासा शुष्कहासा । 'अट्टस्त्वट्टालके पूरे भृशशुष्के त्रय त्रिषु' इति रत्नमाला । व्योम कर्म एवमकुर्वन् । अकरोदित्यस्यानुषङ्ग , विपरिणामश्च । अतो द्वन्द्वसरम्भं स्मारितोऽस्मीति सबन्ध ॥ ४५ ॥ अभिवन्दस्वाभिवादयस्व । 'वदि अभिवादनस्तुत्यो' । **ब्रह्मेति** । ब्रह्मा चतुर्मुख , इन्द्र उपेन्द्र इन्द्रो वा, द्रविणेश कुबेर , रुद्र ईश , वरुण प्रचेता , प्राचीनबर्हि सुरेन्द्र । यद्वा प्राचीनबर्हिर्नाम प्रजापति । तदुक्त पुराणरत्ने—'प्राचीनबर्हिर्भगवान्महानासीत्प्रजापति·' इति । मरुद्वायुः, कालो यम , अग्निरनल , इत्येतेभ्यो व्यतिरेकिणामधिकाना भगवता ज्ञानशक्त्यादिपूर्णानामाम्नायमन्त्राणामाथर्वणवेदमन्त्राणामात्मना प्राणभूतानामप्रतिहतैरकुण्ठितैस्तेजोभिर्दीप्तिभिर्बलैर्वा तपसामिवैतद्धेतुभूततपोवदुत्कर्षिणामतिशयवतामेतेषामस्त्राणां मध्य एकैकस्यैकस्यैकस्य योग्यता सामर्थ्य जगत्त्रयस्य प्रमथनं विध्वंसनं त्राण रक्षणमित्येतेऽवधि· काष्ठा यस्याः सा तथोक्ता । भवतीति शेष ॥ ४६ ॥ **एष इति** । ब्रह्मोऽस्मि प्रणतोऽस्मि । दिव्यास्त्रसंप्रदायो दिव्यास्त्राणा प्राथमिकं दानम् । उपदेश इति यावत् । लक्ष्मणेन सहास्तु । ममेव लक्ष्मणस्याप्यस्त्विति भाव ॥ ४७ ॥ **झटितीति** । आत्मानम् । मामित्यर्थः । विद्याया अस्त्रविद्याया प्रकाशनात्साक्षात्काराज्झटिति शीघ्रमुन्मीलिता निखिलवस्त्ववगहिनी

(नेपथ्ये ।)

राम राम महाबाहो वयं त्वयि यतामहे ।
विश्वामित्राभ्यनुज्ञानात्सह भ्रात्रा प्रशाधि नः ॥ ४९ ॥

कन्ये—अंहो, देवदाओ मन्तेन्ति । **अच्चरिअं अच्चरिअम्** ।

(नेपथ्ये ।)

भगवन्तो दिव्यास्त्रनिकायाः,
विश्वामित्रात्प्राप्य विश्वस्य मित्रा-
त्पुण्यैर्युष्मानद्य रामः कृतार्थः ।
ध्यातैर्ध्यातैः सनिधेयं भवद्भिः
स्वं स्वं स्थानं यात यूयं नमो वः ॥ ५० ॥

---

१ अही, देवता मन्त्रयन्ते । आश्चर्यमाश्चर्यम् ।

प्रज्ञा प्रकटं ज्ञानं यस्य स तथोक्तस्तम् । शक्तिभिर्दुष्करकार्यनिर्वाहकै सामर्थ्यैरप्रतर्क्य-मितरसजातीयतया चिन्तयितुमनर्हम् । किंच ज्योतिर्मयमिव प्रकाशप्रचुरमिव । 'तत्प्रकृतवचने मयट्' इति प्राचुर्ये मयट् । विधेयविशेषणानीमानि । मन्ये । निश्चिनोमीत्यर्थः ॥ ४८ ॥ **राम रामेति** । 'वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु' इति प्रीत्यतिशये द्विरुक्ति । विश्वामित्राभ्यनुज्ञानाद्विश्वामित्रानुमतेर्हेतोर्वयं त्वयि यतामह आयतामहे । त्वदधीना भवाम इत्यर्थः । 'अधीनो निम्न आयत्तः' इत्यमरः । अभ्यनुज्ञापदेन दिव्यास्त्राणा रामायत्तत्वं स्वारसिकमिति गम्यते । सह भ्रात्रेति पूर्वोत्तरान्वयि । भ्रातरि त्वयि चायत्ता इत्यर्थः । सह भ्रात्रा प्रशाधि नः । अस्मास्वव भ्राता लक्ष्मण कर्तव्यान्याज्ञापयतु । त्वमपि कर्तव्यान्याज्ञापयेत्यर्थः । 'शासु अनुशिष्टौ' इत्यस्मात्प्रपूर्वकाल्लोण्मध्यम ॥ ४९ ॥ देवता मन्त्रयन्त इत्याश्चर्यम् । 'मत्रि गुप्तभाषणे' इति चौरादिक आत्मनेपदी ॥ **भगवन्त इति** । भगवन्तो ज्ञानशक्त्यादिपूर्णा दिव्यास्त्रनिकाया दिव्यास्त्रसमूहा इति सबोधनम् । पुण्यैः सुकृतैर्युष्मान्विश्वस्य मित्रात्सर्वसुहृदो विश्वामित्रात्कौशिकात् । विश्वस्य मित्र विश्वामित्र । 'मित्रे चर्षौ' इति पूर्वपदस्य दीर्घ । शब्दस्वभावात्पुस्त्वम् । 'आख्यातोपयोगे' इति पञ्चमी । विश्वस्य मित्रमित्यवयवार्थो व्युत्पत्तिमात्रोपयोगी प्रयोगस्थलेषु वैवक्षिक । यथा 'सप्तसप्तर्षयो माला' इति सप्तत्वस्य पृथग्विवक्षया सप्तेति पृथक्प्रयोगः । अत एव 'गमेर्डोस्' इति गच्छतीत्यर्थे व्युत्पन्नस्य गोपदस्य गच्छतीत्यनेन पौनरुक्त्यं तिष्ठतीत्यनेन व्याघातश्च नेत्याचार्यचरणा । इह च विश्वेषामस्माकं चामित्रो विश्वामित्र इति प्रतिपक्षजनाभिमतव्युत्पत्तेर्व्यावृत्त्यर्थ । प्राप्य लब्ध्वा । रामोऽद्य कृतार्थः । रामवचनमिदम् । अहमद्य लब्धसर्वपुरुषार्थ इत्यर्थः । भवद्भि सर्वप्रकारपूज्यैर्युष्माभिर्ध्यातै सद्भिस्तदा तदा सनिधानार्थ चिन्तितै सद्भिः सनिधेयं सनिधिः कार्यं । अकर्मकत्वाद्भावे यत् । 'नित्यवीप्सयो' इति वीप्सायां

लक्ष्मणः—आर्यवचनादन्तरितान्यस्त्राणि ।

राजा—भगवन्महाद्भुतनिधे कुशिकनन्दन, नमस्ते ।

ज्वलिततपसस्तेजोराशेर्जगत्यमितौजस-
स्तव निरवधौ माहाभाग्ये कृतस्तुतिसाहसः ।
प्रमितिविषयां शक्तिं विन्दन्न वाचि न चेतसि
प्रतिहतपरिस्पन्दः स्तोता विपद्य घृणीयते ॥ ५१ ॥

तत्स्पृहयामि युष्मदनुगृहीतरामभद्रालंकृताय दशरथाय राज्ञे । वयं पुनरार्येण वञ्चिता यदीदृशेन जामात्रा न संयुज्यामहे ।

द्विरुक्ति । वीप्सा च व्यापकत्वं व्याप्तिश्च । कालिकतया यदा यदा मया ध्यान क्रियते तदा मम युष्माभि सनिधानं कार्यमित्यर्थं । यूयं स्वं स्वं स्थानं यात गच्छत । 'या प्रापणे' इत्यस्माल्लोण्मध्यमबहुवचनम् । वो युष्मभ्यं नम । 'नमःस्वस्ति–' इत्यादिना चतुर्थी ॥ ५० ॥ आर्यवचनादामवचनात् । अन्तरितान्यन्तर्हितानि ॥ महाद्भुतनिधे महाश्चर्यनिधे । **ज्वलितेति** । ज्वलितानि प्रकाशमानानि तपासि कृच्छ्रादीनि यस्य स तथोक्तस्तस्य तेजसा पराभिभवनसामर्थ्यना राशे समुदायभूतस्यामितान्यसख्यातान्योजासि ज्ञानानि बलानि यस्य स तथोक्तस्तस्य । 'ओज शब्दगुणे ज्ञाने बले गर्वप्रकाशयो' इति रत्नमाला । तव निरवधावपरिच्छिन्ने माहाभाग्ये महाभागत्वे विषये कृतं स्तुतिसाहस स्तुतिविषयसाहसप्रवृत्तिर्येन स तथोक्त. । अविमृश्य स्तुतौ प्रवृत्त इत्यर्थ । स्तोता स्तुतिकर्ता वाचि प्रमितिविषया स्तुत्यनुगुणयथार्थज्ञानसंबन्धिनी शक्तिं समर्थता न विन्दन्नलभमानश्चेतसि च मनसि च प्रमितिविषया शक्तिं न विन्दन्सन्प्रतिहत परिस्पन्द किंचित्प्रवृत्तिरपि यस्य स तथोक्तश्च सन् । यद्वा प्रतिहत परिस्पन्दो रचना यस्य स तथोक्त । 'रचना स्यात्परिस्पन्दः' इत्यमर । विपद्य विपदं प्राप्य जगति लोके घृणीयते घृणा प्राप्नोति । 'घृणा जुगुप्सा कृपयो' इति रत्नमाला । यद्वा मामसमीक्ष्यकारिणमिति स्वात्मानं गर्हते । विषयप्रभावमपर्यालोच्य वराकोऽयं स्तुतौ प्रवृत्तो दु ख्यतीति विशेषज्ञै कृपाविषयीक्रियन्त इति वार्थ । 'घृणिङ् रोषणे लज्जाया च' इत्यस्मात् 'कण्ड्वादिभ्यो यक्' इति यकि दीर्घे च सति डिलादात्मनेपदे च घृणीयत इति रूपम् । धातूनामनेकार्थत्वाज्जुगुप्साकृपयोर्वृत्ति. ॥ ५१ ॥ **तदिति** । तस्माद्युष्माभिरनुगृहीतेन दिव्यास्त्रप्रदानहेतुभूतविषयीकृतेन रामभद्रेणालंकृताय शोभिताय । युक्तायेति यावत् । राज्ञे दशरथाय स्पृहयामि दशरथविषयकस्पृहावान्भवामि । 'स्पृह ईप्सायाम्' चुरादौ कथादि । 'स्पृहेरीप्सित.' इति संप्रदानसंज्ञाया चतुर्थी । वय पुनर्वय त्वार्येण सीरध्वजेन वञ्चिता अपहृतपुरुषार्था । भवाम इति शेष । ईदृशेनाप्रतिमप्रभावेन जामात्रा पुत्रीपतिना न संयुज्यामहे । यदि संयुक्ता न भवामश्चेद्दुष्करधनुरारोपणपणकरणेन हेतुना सीरध्वजेन वयं वञ्चिता इति संबन्ध । 'युज समाधौ' इति दैवादिकाल्लुङुत्तमबहुवचनम् ।

विश्वामित्रः—किमद्याप्यसंभावनेयमस्मासु ।

राजा—नहि नहि ।

विश्वामित्रः—

शंभोर्वरादनुध्यानमात्रोपस्थानदायि वः ।
रामभद्रस्य पुरतः प्रादुर्भवतु तद्धनुः ॥ ५२ ॥

राजा—एवमस्तु । (ध्यात्वा प्रणमति ।)

राक्षसः—(स्वगतम् ।) एभिरन्यदेव किमपि प्रस्तुतम् । (प्रकाशम् ।) प्रभो कुशध्वज, कियच्चिरमनादृतोऽस्मि ।

राजा—उक्तमेतत्सीरध्वजो जानातीति ।

(नेपथ्ये कलकल· ।)

स्फूर्जद्वज्रसहस्रनिर्जितमिव प्रादुर्भवत्यग्रतो
रामस्य त्रिपुरान्तकृद्विषदा तेजोभिरिद्धं धनुः ।

सीता—(स्वगतम् ।) [१]सपदं संसइदम्मि ।

राजा—

शुण्डारः कलभेन यद्वदचले वत्सेन दोर्दण्डक-
स्तस्मिन्नाहित एव—

---

१. साम्प्रत सशयिताऽस्मि ।

समित्युपसर्गवशाच्च सयोगार्थकत्वम् ॥ अद्यापि ताटकावधजृम्भकास्त्रोपदेशानन्तरमपीयं यदि न सयुज्यामह इति पूर्ववाक्यप्रस्तुतासभावनास्थानसभावना उत्कटैककोटिकसशयरूपा सभावना । अस्मासु मयि रामलक्ष्मणयोश्च ॥ नहि नहि । असंभावनेत्यनुषङ्ग ॥ **शंभोरिति** । शंभोर्वराद्वरावाद्वो युष्माकम् । अनुध्यानमात्रेण चिन्तनमात्रेणोपस्थानदायि गमनदायि । अनुचिन्तनमात्रेण सनिधानशीलमित्यर्थ । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनि । तस्य शंभोर्वनु· कर्तृ, रामभद्रस्य पुरत प्रादुर्भवतु सनिधत्ताम् ॥ ५२ ॥ एवमस्तु भवदुक्तं स्यात् ॥ एभिर्विश्वामित्रादिभिरन्यदेवास्मद्विरुद्धमेव प्रस्तुत प्रक्रान्तम् । कियच्चिर कियन्तं दीर्घकालम् । अनादृतोऽस्मि प्रतिवचनानुक्त्या परिभूतोऽस्मि ॥ एतत्प्रतिवचनम् ॥ **स्फूर्जदिति** । दिविषदा देवताना तेजोभिः प्रभावैः कान्तिभिर्वा । 'तेज. प्रभावे दीप्तौ च' इत्यमर । इद्धं दीप्तम् । 'णिइन्धी दीप्तौ' इत्यस्मात्कर्तरि क्त. । त्रयाणा पुराणा समाहारस्त्रिपुर तस्यान्त नाश करोतीति त्रिपुरान्तकृत् । रौद्रत्वादिति भाव । धनु· कर्तृ । स्फूर्जता शब्दता वज्राणा दम्भोलीना सहस्र निर्जितं तिरस्कृतं येन तथोक्तम् । आहिताग्न्यादेराकृतिगणत्वान्निर्जितशब्दस्य परनिपात. । 'निर्मितमिव' इति पाठे सृष्टमिव ।

ऊर्मिला—[1]अवि णाम एदं भवे ।

राजा—

गर्जितगुणं कृष्टं च—

ऊर्मिला—(हृष्टा लज्जिता सीतामालिङ्ग्य ।) [2]दिट्ठिआ वड्ढामो ।

राजा—(साद्भुतम् ।)

भग्नं च तत् ॥ ५३ ॥

राक्षसः—(स्वगतम् ।) अहो, दुरात्मनो रामहतकस्य सर्वकषः प्रभावः।

लक्ष्मणः—

दोर्लीलाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्यस्तकपालसंपुटमितब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥ ५४ ॥

---

१. अपि नामैतद्भवेत् ।

२. दिष्ट्या वर्धामहे ।

स्थितमित्यर्थः । रामस्याग्रत प्रादुर्भवति रामस्य पुरत प्रकाशते ॥ एतच्छ्रुत्वा सीता-वाक्यम्—साम्प्रत सशयितास्मीति । रामस्तदारोपयिष्यति न वेति सदेहवत्यस्मि ॥ अनन्तर राजवाक्यम्—कलभेन गजपोतेन शुण्डार करिहस्त । 'शुण्डा करिकरे मते' इति वैजयन्ती । 'अल्पे' इत्यनुवर्तमाने 'कुटीशमीशुण्डाभ्यो र ' इति शुण्डाशब्दाद्रप्रत्यय । अल्पा शुण्डेत्यर्थः । 'त्रयं शुण्ड च शुण्डा च शुण्डारश्चेति कथ्यते' इति त्रिरूपकोशः । अचले यद्वत्पर्वत इव वत्सेन रामेण बालेन दोर्दण्डकोऽल्पो दोर्दण्डः । 'अल्पे' इति कन्प्रत्यय । तस्मिन्धनुष्याहित एव निहित एव ॥ एतच्छ्रुत्वोर्मिला वाक्यम्—अपि नामैतद्भवेदिति । एतद्धनुषि रामभद्रेण दोर्दण्डनिधानम् ॥ पुना राजवाक्यम्—**गर्जितेति** । तद्धनुर्गर्जित शब्दयुक्तो गुणो मौर्वी यस्मिन्कर्मणि तद्यथा तथा कृष्टं च । मौर्व्यारोपणेनाकृष्टमित्यर्थः । एतच्छ्रुत्वा पुनरप्यूर्मिलावाक्यम् । हृष्टा रामाय स्वप्रदानात्, लज्जिता मौग्ध्यात् । दिष्ट्येत्यानन्दे । वर्धामहे वृद्धिं प्राप्नुम ॥ पुनरपि राजवाक्यमेतत्—तद्धनुर्भग्नं चामर्दितम् । वत्सेनेत्यनुषङ्ग । उपमानं कलभ । उपमेयं वत्स । तदनुसारेण शुण्डारो दोर्दण्डक इत्यल्पार्थप्रत्ययौ प्रयुक्तौ । इद चाश्चर्यातिशयख्यापनार्थम् ॥ ५३ ॥ सर्व कषतीति सर्वकष । 'सर्वकूलाभ्रकरीषेषु कष ' इति खच्प्रत्ययः । प्रभावस्तेज । ताटकानिरसनरुद्रधनुर्भङ्गाभ्या सर्वकषत्वम् । **दोर्लीलेति** । दोष्णोर्बाह्वोर्लीलयानायासव्यापारेणाञ्चिताद्प्रापिताच्चन्द्रशेखरधनुर्दण्डावभङ्गादुद्यत उत्पन्न आर्यस्य रामस्य बालचरिताना प्रस्तावनाया प्रादुर्भवस्य डिण्डिमस्तत्सूचकवाद्यविशेषकध्वनिभूतः । द्राग्झटिति पर्यस्तस्य विघटितस्य कपाल-

रामः—(सहर्षोन्माद इव ।)

एह्येहि वत्स रघुनन्दन रामभद्र
चुम्बामि मूर्धनि चिराय परिष्वजे त्वाम् ।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥ ५५ ॥

(प्रविश्य)

रामः—कथमतिवात्सल्यादतिक्रामति प्रसङ्ग. ।

विश्वामित्रः—राजन्, गुरुर्भवान् । गर्भरूपश्च ते वत्सो रामभद्रः ।

राजा—(प्रणम्य ।) भगवन्,

रामेण पत्या सीताया पूर्णा युष्माकमाशिषः ।
अस्मिन्नेवोत्सवे दत्ता लक्ष्मणाय मयोर्मिला ॥ ५६ ॥

कन्ये—(साध्वसम् ।) अहो[1], दिण्णं ह्म ।

राक्षसः—दृष्टं चैतद्द्रष्टव्यम् ।

विश्वामित्रः—सुष्ठुतरं बहुमन्यामहे । वक्तव्यशेषस्त्वस्ति ।

---

१. अहो, दत्ते स्वः ।

सपुटमितस्य कपालसपुटसदृशस्य कपालसपुटवत्स्वल्पस्य मितस्य वा । ध्वन्याधिक्यापेक्षया मितत्वोक्तिः । ब्रह्माण्डलक्षणभाण्डस्योदरे मध्ये भ्राम्यन्, अत एव पिण्डितचण्डिमा पुञ्जीभूतक्रूरभावष्टंकारध्वनिष्टंकारात्मकशब्दोऽपि व्यवहितकालोऽपि न विश्राम्यति न विरमति । अहो इति विस्मये । कथमिति वैयाकुल्यमित पर किंचित्कालमयं ध्वनिरविरतश्चेत्प्रपञ्चप्रलयो भवितेति व्याकुलत्वम् ॥ ५४ ॥ हर्षोऽनुरूपवरलाभात् । उन्मादो दुर्घटत्वाच्चित्तविभ्रम । **एह्येहीति** । आदराद्विरुक्ति । चरणपुष्करकद्वयमल्पयोश्चरणपङ्कजयोर्द्वयम् । 'अल्पे' इति कन्प्रत्यय । वत्स रघुनन्दनेति सबुध्यनुगुणं चुम्बनमित्यादिकम् । रामभद्रेति सबुध्यनुगुणमुद्वहामीत्यादिकम् । 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि । इति रामपदेनासौ पर ब्रह्माभिधीयते ॥' इति रामपदनिरुक्ते । अत्र हर्षान्मूर्ध्नि चुम्बनादिकम्, उन्मादाच्चरणोद्वहादिकम् । सुप्ताना कुपिताना स्वभावज्ञानं दृष्टमिति हि प्रसिद्धम् ॥ ५५ ॥ अतिवात्सल्यादतिस्नेहात् । 'वत्सासाभ्या कामबले' इति लच्प्रत्ययान्ताद्वत्सलशब्दाद्ब्राह्मणादित्वाद्भावे ष्यञ् । प्रसङ्ग. प्रकृतो वाग्व्यापार । अतिक्रामति सीमानमिति शेष. ॥ गुरु पितृभूत इत्यर्थ. । गर्भरूप पुत्रभूत ॥ **रामेणेति** । रामेण पत्या रामात्मकेन भूभर्त्रा हेतुना सीताया युष्माकमाशिष. पूर्णा । समग्रा इत्यर्थ. । अस्मिन्नेवोत्सवे रामाय सीताप्रदानहेतुभूतधनुरारोपणात्मकोत्सवे मयोर्मिला लक्ष्मणाय दत्ता ॥ ५६ ॥ एतद्रामाय सीताप्रदानरूपम् ॥ सुष्ठुतर समीचीनतरम् । 'अवदुःसुषु स्थ'

राजा—नन्वाज्ञापय ।

विश्वामित्रः—दुहितरौ माण्डवी श्रुतकीर्तिश्च ते च भरतशत्रुघ्नाभ्यामभ्यर्थये ।

राक्षसः—(स्वगतम् ।) तपस्यतो वनेचरस्य सतः क्षत्रियकुटुम्बवैयात्यं ब्राह्मणस्य ।

राजा—किमत्र किंचिद्विचार्यमस्ति । कि त्वत्र वस्तुनि परवानस्मि ।

विश्वामित्रः—केन ।

राजा—एकेन तावद्भगवतैव ।

विश्वामित्रः—अथान्येन केन ।

राजा—आर्यसीरध्वजेन गौतमेन शतानन्देन च ।

विश्वामित्रः—सीरध्वजशतानन्दयोरहमावेदयिता ।

राजा—भवानिदानीं जानाति ।

जनकानां रघूणां च संबन्धः कस्य न प्रिय. ।
यत्र दाता ग्रहीता च कल्याणप्रतिभूर्भवान् ॥ ५७ ॥

इति सुशब्द उपपदे स्थाधातोस्तरप्प्रत्यय. । 'सुषामादिषु च' इति षत्वम् । रामाय सीताप्रदानं सुष्ठु । लक्ष्मणायोर्मिलाप्रदानं सुष्ठुतरमिति समर्थं । वक्तव्यशेषोऽन्यत्किंचिद्वक्तव्यम् । 'शेषोऽनन्तो हरि· शेपं त्रिष्वन्यदुपयुक्तत ' इति रत्नमाला । विद्यते ह्रीति शेष ॥ **ते चेति** । ते इति द्वितीयान्तम् । भरतशत्रुघ्नाभ्यामिति चतुर्थी ॥ तपस्यतस्तपश्चरत । तपसधातोः कण्ड्वादेर्यक् ॥ वनेचरस्य 'हलदन्तात्सप्तम्या सज्ञायाम्' इति सप्तम्या अलुक् ॥ क्षत्रियकुटुम्बे क्षत्रियाणा गृहकृत्ये वैयात्यं धृष्टता । वियातशब्दाद्भावे कर्मणि वा ष्यञ् । 'धृष्टे धृष्णुर्वियातश्च' इत्यमर ॥ विचार्यं विमर्शनीयम् । अत्र वस्तुनि भरतशत्रुघ्नाभ्या माण्डवीश्रुतकीर्त्यो· प्रदानरूपेऽर्थे परवानस्मि । 'परतन्त्र पराधीन परवान्नाथवानपि' इत्यमर ॥ **केनेति** । परवानित्यनुषङ्ग. ॥ तावच्छद· क्रमार्थकः । प्रथमं भगवतैव । युष्माभिरित्यर्थ ॥ अथेत्यानन्तर्ये ॥ गौतमेन गौतमपुत्रेण । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण् । अहमावेदयिता । अस्मिन्नर्थे युवाभ्या न विमतिः कार्येति तयोरह प्रतिबोधयिता भवामीत्यर्थ ॥ इदानीं जानाति । अर्थस्थितिमिति शेष ॥ **जनकानामिति** । जनकाना कर्मयोगनिष्ठानां जनकवश्याना रघूणा ज्ञानयोगनिष्ठाना रघ्वपत्याना च सबन्धोऽपत्यसबन्ध कस्य न प्रिय । सर्वस्यापि प्रिय इत्यर्थ. । विस्तरस्तत्सत्कृतायामुत्तररामचरितव्याख्याया तलस्पर्शिनीसमाख्यायामनुसधेय । यत्र यस्मिन्सबन्धे कल्याणस्य प्रतिभूर्मध्यस्थ ' कल्याणो मङ्गलकर· प्रतिभूरिति वा । 'भुव सज्ञान्तरयो.' इति क्विप् । 'धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभू ' इति शाब्दिका । 'स्युर्लग्नका. प्रतिभुव ,

विश्वामित्रः—(आकाशे ।) वत्स शुनःशेप, अयोध्यां गत्वा ब्रूहि भगवन्तमस्मद्वचनाद्वसिष्ठम् ।

एताश्चतुर्भ्यो रघुनन्दनेभ्यो
निमेर्गृहे राजसुताश्चतस्रः ।
वसिष्ठवद्गौतमवच्च भूत्वा
दत्ताः प्रतीष्टाश्च समं मयैव ॥ ५८ ॥

तदुपमन्त्र्य सर्वान्ब्रह्मर्षीन्महाराजदशरथानुयातो वैदेहनगरीमागच्छ । राज्ञो यज्ञपरिसमाप्तौ विततगोदानमङ्गलाः कुमाराः परिणेष्यन्तीति ।

कुमारौ—प्रियात्प्रियतरं नः ।

कन्ये—[1]दिट्ठिआ अविप्पवासो दाणिं भइणीआणं भविस्सदि ।

राक्षसः—अद्यापि भो', शृणुत धर्माक्षराणि । अनर्थ एष यत्कन्येयमन्यस्मै दीयत इति ।

---

१ दिष्ट्या अविप्रवास इदानी भगिनीना भविष्यति ।

इति चामर । भवान् । त्वमित्यर्थ ॥ ५७ ॥ **आकाश इति** । 'अप्रविष्टे सहालापे भवत्याकाशभाषितम्' इत्युक्ते । शुन.शेपपात्रस्याप्रविष्टत्वादाकाश इत्युक्तम् । अस्मद्वचनान्मद्वचनमुच्चार्य । त्यब्लोपे पञ्चमी । वचनप्रकारमाह—**एता इत्यादिना** । मयैव कर्त्रा निमेर्गृहे सीरध्वजस्य गृह एताश्चतस्रो राजसुता· सीतोर्मिलामाण्डवीश्रुतकीर्तयश्चतुर्भ्यो रघुनन्दनेभ्यो रामलक्ष्मणभरतशत्रुघ्नेभ्य सम युगपद्गौतमवद्भूत्वा दत्ता जनककुलपुरोहितेन गौतमपुत्रेण शतानन्देन तुल्यं भूत्वा दत्ता· । वसिष्ठवच्च भूत्वा प्रतीष्टाश्च रघुकुलपुरोहितेन वसिष्ठेन भूत्वा प्रतिगृहीताश्च । अभूवन्निति शेष ॥ 'इषु इच्छायाम्' इत्यस्मात्प्रतिपूर्वात्कर्मणि क्त । उपसर्गवशेन च प्रतिग्रहार्थत्वम् । 'प्रतीच्छ चैना भद्र ते' इति प्रतिग्रहे प्रयोगः ॥ ५८ ॥ तत्तस्मात् । उपमन्त्र्याहूय । राज्ञ सीरध्वजस्य । विततं विस्तृतं गोदानमेव मङ्गलं येषा ते तथोक्ता । गावो लोमानि दीयन्ते खण्ड्यन्तेऽस्मिन्निति गोदानम् । 'दो अवखण्डने' । परिणेष्यन्ति विवाह करिष्यन्ति । इत्यस्मद्वचनाद्ब्रूहीति पूर्वेण सबन्ध ॥ कुमारौ रामलक्ष्मणौ । प्रियादाप्याभ्या सीतोर्मिलयोर्दानात्प्रियतरमतिशयितप्रियम् । भरतशत्रुघ्नाभ्या माण्डवीश्रुतकीर्त्योः प्रदानमाचार्यतातपादामन्त्रणं चेत्यर्थ ॥ अविप्रवासो विदेहस्थितिविरह । एकगृहे भ्रातृणा भार्यात्वादित्यर्थ ॥ अद्यापि वाग्दानकालेऽपि । धर्माक्षराण्यनर्थपरिहारकत्वात्केवलधर्मार्थमनृशसेन मया प्रत्युक्तान्यक्षराणि । यद्वा वाग्दत्ताया अपि सप्तमपदात्पूर्वमन्यस्मै दानस्य धर्मत्वात्तद्बाधकानि मदक्षराणीत्यर्थः । इयं कन्या सीतान्यस्मै दीयत इति यदेषोऽनर्थ । प्रयोजनविपरीतमित्यर्थः । अनर्थ इति विधेयप्राधान्यादेष इति पुंलिङ्गम् । कन्येयमित्यनेनोर्मिलादिष्वनपेक्ष इति ध्वनि·

पौलस्त्यो विनयेन याचत इति श्लाघ्येऽपि योऽनादरः
संबन्धे सति यत्र लोकपतिना सौख्य न तत्र स्पृहा ।
गन्तव्या पुनरन्यथैव नियतं लङ्का च यत्सीतया
तन्माभूदिह वः पुरंदरपुरीबन्दीप्रसक्तो विधिः ॥ ५९ ॥
(नेपथ्ये कलकल ।)

रामः—

तत्कावकालपर्जन्यभीमौ वृन्देन धावतः ।

विश्वामित्रः—

एतौ सुबाहुमारीचौ पुत्रौ सुन्दोपसुन्दयोः ॥ ६० ॥
तद्वत्सौ, हन्यतामेष यज्ञप्रत्यूहः ।

कुमारौ—यदाज्ञापयति । (इति विकटं परिक्रामत. ।)

कन्ये—एत्थ दाणिं कहम् ।[1]

राक्षसः—

हन्त साध्विव संपन्नं विपर्यस्तो विधिर्भवेत् ।
तद्वीक्ष्य कार्यपर्यन्तं माल्यवत्युपवेदये ॥ ६१ ॥

---

१. अत्रेदानी कथम् ।

तम् । इति धर्माक्षराणि शृणुतेति पूर्वेण सबन्ध । **पौलस्त्य इति** । पौलस्त्यः पुलस्त्यपौत्रो रावणो विनयेनानौद्धत्येन याचत इति प्रार्थयत इत्यस्मिन्नर्थे श्लाघ्येऽप्यभिनन्दनार्हेऽपि योऽनादर आदराभाव परिभवो वा । यत्र यस्मिल्लोकपतिना रावणेन सबन्धे सति जामातृश्वशुरभावसबन्धे सति सौख्यं सुखं भवति । तत्र स्पृहा न तस्मिन्सबन्धे स्पृहाविरह । किंच सीतयान्यथा रावणाय प्रदानाभावेऽपि लङ्का नियतं गन्तव्या । नियतमिति सभावनायाम् । प्राप्तव्यैवेत्यर्थः । 'रत्नहारी च पार्थिव' इति ह्युक्तमिति भाव । इति यत्तत्तेभ्यो हेतुभ्य । 'वचनेषु च सर्वेषु यत्र त्र्येति तदव्ययम्' इत्युक्तत्वाद्बहुत्वलाभ । अनादरात्स्पृहाविरहात्स्पृहयालुतया गन्तव्यत्वाच्च हेतो सभाव्यमान इत्यर्थ । पुरदरपुर्यास्तत्स्थानामप्सरसा बन्द्या. कारायाः । निरोधार्थमिति यावत् । प्रसक्तो विधिर्बलात्कारो वो युष्माकमिह सीताया माभून्न भवेदिति च धर्माक्षराणीति पूर्वेण सम्बन्ध ॥ ५९ ॥ इमौ कौ । किनामकौ कस्य पुत्राविति चार्थ. । एताविति तस्योत्तरम् ॥ ६० ॥ यज्ञप्रत्यूहो यज्ञविघ्न । विघ्नहेतोर्विघ्नत्वव्यदेह । हेत्वलंकार । 'हेतुहेतुमतोरैक्यं हेतु केचित्प्रचक्षते' इति तल्लक्षणात् ॥ विकट विषमम् ॥ ताटका हि स्त्रीत्वान्मृता । पुसो सुबाहुमारीचयोर्विषये कथमित्यर्थ. ॥ **हन्तेति** । साधुसपन्नमिवासदनुकूलं सपन्नमिति सभावयामि । विधिस्ताटकावधधनुर्भङ्गसीताप्रदानरूपोऽनुष्ठीयमानो व्यापारो विपर्यस्तो भवेदन्यथा

राजा—(धनुरास्फालयन् ।) वत्स रामभद्र, वत्स लक्ष्मण, अप्रमत्तः प्रमत्तं विजयस्व । अयमहं परागत एव ।

विश्वामित्रः—(विहस्य ।)

राजन्नितो ह्येहि सहानुजस्य रामस्य पश्याप्रतिमानमोजः ।
ब्रह्मद्विषो ह्येष निहन्ति सर्वानाथर्वणस्तीव्र इवाभिचारः ॥ ६२ ॥

(इति निष्क्रान्ता सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते प्रथमोऽङ्कः ।

भवेत् । सुबाहुमारीचाभ्या रामस्य पराभवे पूर्वोक्तं सर्वमन्यथा भवेदित्यर्थं । यद्वा विधिर्भाग्यमन्यथा भवेदित्यर्थं । अथवा विधि कालोऽन्यथा भवेदित्यर्थं । यद्वा विधिश्चतुर्मुखोऽन्यथा भवेदित्यर्थ. । 'विधिर्विधाने नियतौ काले पद्मोद्भवेऽपि च' इति रत्नमाला । तत्तस्मात्कार्यमिष्टानिष्टरूपं पर्यन्तो विधिर्यस्मिंस्तथोक्तं वीक्ष्य माल्यवति भर्तुः कनिष्ठमातामह उपवेदये निवेदयिष्ये । अत्र माल्यवत्युपवेदय इत्यनेनोत्तराङ्कादौ प्रवेक्ष्यतो माल्यवत्पात्रस्य सूचितत्वादङ्कमुखं नामार्थोपक्षेपकमुक्तं भवति । यथोक्तम्—'अङ्कान्तपात्रेणार्थस्य उत्तराङ्कस्य सूचनात्' इति ॥ ६१ ॥ अप्रमत्तोऽवहित प्रमत्तमनवहित विजयस्वाभिभूया । 'जि अभिभवे' इत्यस्मात् 'विपराभ्यां जे' इत्यात्मनेपदम् । पूर्व सुबाह्वभिप्रायेण हन्यतामेष इति विश्वामित्रेणोक्तम्, इदानीं मारीचाभिप्रायेण प्रमत्तं विजयस्वेत्युक्तं कुशध्वजेन । परागत एव सहानुगत एव ॥ हे राजन्कुशध्वज, इतो ह्येह्यत्रागच्छ । यद्यपि भवान्राजैव तथापि न भवतोऽत्रावकाश. । अतस्त्वं तत्र मा गा इत्यर्थ । सहानुजस्यानुजसहितस्य । 'वोपसर्जनस्य' इति सहस्य सो वैकल्पिक । रामस्याप्रतिमान निस्तुलम् । 'प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना' इत्यमर । ओज पराक्रमं पश्य । हि यस्मादेष राम सर्वान्ब्रह्मद्विष समस्तानपि ब्राह्मणशत्रून्सुबाह्वादीन् । कर्म । आथर्वणोऽथर्वणोक्तस्तीव्र उग्रोऽभिचार इव हिंसकाकल्प इव निहन्ति । हिनस्तीत्यर्थ. । पञ्चसहितात्मको ह्यथर्वणवेद । यथाह वायु —'नक्षत्रकल्पो वेदाना सहिताना तथा विधि । चतुर्थोऽङ्गिरसा कल्प शान्तिकल्पश्च पञ्चम । श्रेष्ठास्त्वथर्वणामेते सहिताना विकल्पका. ॥' इति । नक्षत्रकल्पो ज्योतिषाश । वेदकल्पो ब्रह्मयज्ञादिविधि । सहिताकल्पो मन्त्रभागविधि । आङ्गिरस कल्पोऽभिचारविधि । शान्तिकल्पोऽष्टादशमहामारीशान्त्यादिविधिरित्यर्थ. । इति ब्रह्मद्विष इत्यनेनाभिचारविधेर्वैदवैदिकविरोधिनिबर्हणमेव प्रयोजनमित्युक्तं भवति ॥ ६२ ॥ इति निष्क्रान्ता सर्वे । रङ्गस्थलादिति शेष ॥ इति प्रथमोऽङ्कः । प्रथमोऽङ्कः समाप्त इत्यर्थ । 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः ॥

यो महीसारवास्तव्यो वाधूलो वीरराघव. ।
स महावीरचरिते व्यवृणोदङ्कमादिमम् ॥

इत्यण्णाप्पङ्गार्यनामधेयेन वाधूलवीरराघवेण विरचितायां महावीरचरितव्याख्यायां भावप्रद्योतिनीसमाख्यायां प्रथमोऽङ्कः ॥

द्वितीयोऽङ्कः ।

(तत प्रविशत्युपविष्ट सचिन्तो माल्यवान् ।)

माल्यवान्—यतः प्रभृति सर्वमायात्सिद्धाश्रमवृत्तान्तमश्रौषम्, तदारभ्य—

दूराद्वीयो धरणीधराभं
यस्ताटकेयं तृणवद्व्यधूनोत् ।
हन्ता सुबाहोरपि ताटकारिः
स राजपुत्रो हृदि बाधते माम् ॥ १ ॥

तदनुप्लवानां भूयसां लक्ष्मणेनैकेन वध इति किमेतदाश्चर्यम् ।

वीर्योत्कर्षैर्यदमृतभुजां निर्ममे पद्मयोनि-
स्तस्य द्वैधं व्यधित धनुषः शांभवीयस्य रामः ।
दिव्यामस्त्रोपनिषदमृषेर्यः कृशाश्वस्य शिष्या-
द्विश्वामित्राद्विजयजननीमप्रमेयः प्रपेदे ॥ २ ॥
प्रसह्य रावणद्विष्टमसद्दूतस्य पश्यतः ।
अस्त्रदानाद्भुतं काले प्रौढेन मुनिना कृतम् ॥ ३ ॥

इदानीमङ्कान्तरमारभमाणस्तदीयविष्कम्भमाह—**ततः प्रतिशतीत्यादिना** । विष्कम्भलक्षणं तु—'वृत्तवर्तिष्यमाणाना कथाशानां निदर्शक । संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजित· ॥' इति ॥ यत प्रभृति यस्मात्कालादारभ्य । सर्वमायात्सर्वमायनाम्न । सिद्धाश्रमवृत्तान्तं ताटकावधादिकम् । तदारभ्य । तदिति पञ्चम्यन्तमव्ययम् । तत आरभ्येत्यर्थ । **दूरादिति** । धरणीधराभ पर्वतसदृशं ताटकेयं ताटकापत्यं मारीचम् । 'स्त्रीभ्यो ढक्' । तृणवत्तृणेन तुल्यं दूरादपि दवीयानत्यन्तदूरो यस्मिन्कर्मणि तद्यथा भवति तथा तत्तथोक्तम् । यद्वा दवीय इत्यव्ययम् । दूरादतिदूर इत्यर्थ· । व्यधूनोत्प्राक्षिपत् । स ताटकारि सुबाहोरपि हन्ता राजपुत्रो मां हृदि बाधते ॥ १ ॥ तदनुप्लवाना तस्य मारीचस्य सहायानाम् । 'अनुप्लव सहायश्च' इत्यमरः । **वीर्येति** । पद्मयोनिश्चतुर्मुखोऽमृतभुजा देवाना वीर्योत्कर्षैर्वीर्यातिशयै· करणैर्यद्धनुर्निर्ममे सृष्टवान् । अमृतभुजामिति सामिप्रायम् । अमृतं हि बलातिशयहेतु । तस्य सर्वदेववीर्यातिशयात्मकस्य । शंभोरिद शाभवीयम् । 'वा नामधेयस्य वृद्धसज्ञा वक्तव्या' इति शंभुशब्दस्य वृद्धसज्ञाया 'वृद्धाच्छ' इति छप्रत्यय· । शभुसबन्धिन इत्यर्थ । धनुषो द्वैधं द्विधाभावम् । 'द्वित्र्योश्च धमुञ्' इति धमुञ्प्रत्यय । रामो व्यधित कृतवान् । विपूर्वाद्दधातेर्लुङि सिच कित्त्वेन 'स्थाघ्वोरिच्च' इतीत्वे 'हखादङ्गात्' इति सिचो लोप । अप्रमेयोऽचिन्त्यो यो राम· कृशाश्वस्य ऋषेः सत्यवचनस्य । 'ऋषय सत्यवचस' इत्यमर । शिष्याद्विश्वामित्राद्विजयजननी विजयप्रदा दिव्या प्रशस्तामस्त्रोपनिषदमन्त्रमन्त्रात्मकरहस्यवेदभागं प्रपेदे प्राप्तवान् ॥ २ ॥ **प्रसह्येति** । प्रौढेन

सीताबन्दीग्रहपरिभवस्तस्य राज्ञो निरस्तो
नीतं चासान्प्रति शिथिलतामैकमुख्यं सुराणाम् ।
नान्दीदानप्रभृति हि कृतं मङ्गलं तैस्तदानीं
सर्वैः प्रायो भजति विकृति भिद्यमाने प्रतापे ॥ ४ ॥

कथं वत्सापि शूर्पणखा प्राप्ता ।

(प्रविश्य ।)

शूर्पणखा—जेदु[1] कणिट्ठमादामहो ।

माल्यवान्—वत्से, आस्यताम् । राजसंनिधौ का वार्ता ।

शूर्पणखा—णिव्वुत्ताइं[2] किल तहिं पाणिग्गहमङ्गलाइं । अगत्थिअमहेसिणा रामं मङ्गलोवहारीकिद माहेन्द धणुवरं अणुप्पेसिदम् ।

माल्यवान्—परार्ध्यान्यायुधानि तानि रामे ब्रह्मर्षिभ्यः परिणमन्ति ।

(सचिन्तम्)

---

१. जयतु कनिष्ठमातामहः ।

२. निर्वृत्तानि किल तत्र पाणिग्रहमङ्गलानि । अगस्त्यमहर्षिणा रामाय मङ्गलोपहारीकृतं माहेन्द्र धनुर्वरमनुप्रेषितम् ।

प्रगल्भेन । 'प्रादूहोढोढ्येषैष्येषु' इत्यनेन वृद्धि । मुनिना विश्वामित्रेण काले ताटकावधानन्तरयोग्यकाले पश्यतोऽस्मदूतस्य पश्यन्तमस्मदूतमनादृत्य । 'षष्ठी चानादरे' इति षष्ठी । प्रसह्य निषेधाक्षराण्युपलक्ष्य रावणद्विष्ट रावणानिष्टमन्त्रदानाद्भुतमन्त्रदानात्मकमाश्चर्यं कृतम् । रामायेति शेष ॥ ३ ॥ **सीतेति** । तस्य राज्ञ सीरध्वजस्य सीताया बन्दीग्रहेण बलात्कृत्यग्रहणेन प्रसक्त. परिभवो निरस्तोऽगणित । किंच सुराणा देवानामस्मान्प्रत्येकमुख्यमस्मान्प्रति गुणभाव । शिथिलता नीतं प्रापितम् । इदानी द्वैराज्यमासीदिति भाव । हि यस्माद्दाक्षा सुरैश्च तदानी नान्दीदानप्रभृति । 'विवाहे नान्दीमुखं कुर्यात्' इति नान्दीश्राद्धादिकम् । प्रभृतिशब्दादेवदुन्दुभिध्वन्यादिकं विवक्षितं कृतम् । तस्मात्सीताबन्दीत्यादिना पूर्वेण सबन्ध । सर्वे शक्तोऽशक्तोऽपि वा प्रतापे पराक्रमे भिद्यमाने सति पूर्वावस्थातो वैलक्षण्य प्राप्नुवाने सति विकृतिं पूर्वावस्थाविपरीतावस्था प्रायो बाहुल्येन भवति प्राप्नोति । प्राय इति सभावनाया वा । 'मन्ये शङ्के ध्रुवं प्राय ' इत्याद्युक्ते· ॥ ४ ॥ वत्सा दौहित्रीत्वात् । शूर्पवन्नखा यस्या· सा तथोक्ता । 'नखमुखात्सज्ञायाम्' इति ङीषो निषेधे टाप् । 'पूर्वपदात्सज्ञायाम्' इति णत्वम् ॥ राजसनिधौ सीरध्वजसमीपे का वार्ता को वृत्तान्त । 'वृत्तिमन्त्रीरुजोर्वार्त त्रिषु चारोग्यफल्गुनो । स्त्रियामुदन्तो वार्ताके कृष्यादौ वर्तनेऽपि च ॥' इति रत्नमाला ॥ निर्वृत्तानि निष्पादितानि । तत्र मैथिलनगरे । मङ्गलकाले उपहारीकृतमित्यर्थ । माहेन्द्रं महेन्द्रसबन्धि ॥ परार्ध्यानि श्रेष्ठानि । 'परार्ध्याप्रप्रा-

अमोघमस्त्रं क्षत्रस्य ब्राह्मणानामनुग्रहः ।
दुरासदं च तत्तेजः क्षत्र यद्ब्रह्मसंयुतम् ॥ ५ ॥

शूर्पणखा—माणुसमेत्तए एत्तिआ चिन्ता ।

माल्यवान्—वत्से, मा मैवम् ।

उत्पत्त्यैव हि राघवः किमपि तद्भूतं जगत्यद्भुतं
मर्त्यत्वेन किमस्य यस्य चरितं देवासुरैर्गीयते ।
वस्तुष्वादधते च शक्तिमृषयो देवाश्च तर्कोत्तरा
मार्त्यादेव वरप्रदानसमये ब्रह्माभय नो जगौ ॥ ६ ॥
निसर्गेण स धर्मस्य गोप्ता धर्मद्रुहो वयम् ।
आर्यो विरोधः शक्तेन जातो नः प्रतियोगिना ॥ ७ ॥

---

१. मानुषमात्र एतावती चिन्ता ।

ग्रहर–' इत्यादमर । ब्रह्मर्षिभ्यो रामे परिणमन्ति पर्यवस्यन्ति । **अमोघमिति** । क्षत्रस्यास्त्रं क्षत्रासाधारणमस्त्रं ब्राह्मणानामनुग्रहश्चामोघ । अव्यभिचरितकार्यकरमित्यर्थः । अमोघश्चामोघं चेति सहोक्तौ 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इत्येकवद्भाव । किंच यत्क्षत्रं ब्रह्मसयुतं ब्राह्मणानुगृहीत तस्य क्षत्रस्य तेज पराभिभवनसामर्थ्यं दुरासदं दुर्धर्षम् । मानुषमात्रे केवलमानुषे । 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमर ॥ **उत्पत्त्येति** । राघवो जगति लोक उत्पत्त्यैव स्वभावत एव । 'प्रकृत्यादिभ्य उपसख्यानम्' इति तृतीया । अद्भुतमाश्चर्यकर किमप्यनिर्वाच्य तत्प्रसिद्ध भूतं निरुपाधिकसत्तायोगि पर ब्रह्म । अत्र 'महद्भूतमनन्तमपार वा तस्य ह वा एतस्य महतो भूतस्य' इति च श्रुति स्फोर्यते । अस्यैवविधस्य रामस्य मर्त्यत्वेन मनुष्यत्वेन हेतुना किम् । न किंचिदप्यवहीयत इत्यर्थ । यस्य रामस्य चरितं देवासुरैर्गीयते । किंच तर्कोत्तरा. कार्याकार्यविषये तर्केणोहापोहात्मकज्ञानेनोत्तरा अधिका देवा ऋषयश्च वस्तुषु सत्तामात्रयोगिषु पदार्थेषु शक्तिं दुष्करकार्यनिर्वाहसामर्थ्यमादधते निष्पादयन्ति । तथा च सहजशक्तियोगिन्याधेयशक्तियोगोऽतिशयितकार्यकर इति भाव । ब्रह्मा चतुर्मुख. । वरप्रदानसमये रावणादिभ्योऽपेक्षितार्थप्रदानकाले मर्त्यादेव त्वया मनुष्यमात्र इत्यनादृतान्मनुष्यादभयं भयाभावं नो जगौ नोक्तवान् । 'गै शब्दे' लिट् । देवादिभ्य एव रावणस्यावध्यत्व दत्तवानित्यर्थ । यद्वा ब्रह्मा चतुर्मुखो नोऽस्माकं रावणादेरित्यर्थ । पक्षैक्येनास्मच्छब्दप्रयोग । मर्त्यादेव भयं भीतिं जगो गीतवान् । देवादिभ्य एवावध्यत्वप्रदाने पारिशेष्यान्मनुष्याद्वध्यत्वमेव दत्तवानित्यभिप्राय । तस्मान्मनुष्यमात्र इति मावादीरिति पूर्वेण सबन्ध ॥ ६ ॥ तर्हि प्रबलेन तेन रामेण सह सख्यमेव कियतामित्यत्राह—**निसर्गेणेति** निसर्गेण स्वभावेन । प्रकृत्यादित्वात्तृतीया । धर्मस्य त्रयीबोधितस्यालौकिकश्रेय साधनस्य गोप्ता रक्षक ।

शूर्पणखा—[1]को सदेहो। जह दसमुहो विं ईसिमुउलेहि दिट्ठिविसेसेहि ओअरिअमाणलोअणो णमन्तवअणो वट्टेदि, तह जाणामि दारुणो से हिअअदुम्माणो एव्वं ण विरमदि त्ति।

माल्यवान्—अहो नु खलु भोः,

वन्द्या विश्वसृजो युगादिगुरवः स्वायंभुवाः सप्त ये
वैदेहस्य वयं च ते च किमहो संबन्धिनो न प्रियाः।
तन्नामास्तु दुरासदेन तपसा दीप्तस्य दीप्तश्रियः
पौलस्त्यस्य जगत्पतेरपि कथं जाता हृदि न्यूनता॥ ८॥

---

१. कः सदेहः। यथा दशमुखोऽपीषन्मुकुलैर्दृष्टिविशेषैरपह्रियमाणलोचनो नमद्वदनो वर्तते, तथा जानामि दारुणोऽस्य हृदयदुर्मान एवं न विरमतीति।

भवतीति शेष। वय रावणादयो वयं निसर्गेण धर्मद्रुह पूर्वोक्तधर्मद्रोहिण। भवाम इति शेष। अत. शक्रेन बलवता प्रतियोगिना प्रतिपक्षिणा रामेण सहार्थो वस्तुस्वभावप्रयुक्तो विरोधो नाश्यनाशकभावो नोऽस्माकं जात उत्पन्न। अयमाशयः। 'द्रुह जिघासायाम्' इति धातोर्द्रोह। जिघासा च ध्वसेच्छा। 'गुपू रक्षणे' इत्यस्माद्धातोर्गोपन रक्षणम्। तच्च प्रतियोग्यात्मनो ध्वंसप्रागभावस्य स्थापनम्। तथा च ध्वंसतत्प्रागभावयोर्नाश्यनाशकभावो वस्तुस्वभावप्रयुक्त। तद्वारा तत्प्रयोजकयोरप्यावयोर्नाश्यनाशकभावो वस्तुस्वभावप्रयुक्त, नत्वौपाधिक.। प्रागभावस्थापनस्य सभवतीति प्रतियोगिजनककारणध्वंसनरूपताया· प्रसिद्धत्वात्। अतस्तेजस्तिमिरयोरिव सख्यं न। उक्तं च कामन्दकेन—'राज्यस्त्रीस्थानदेशाना ज्ञातीना च धनस्य च अपहारो मदो मान पीडा वैषयिकी तथा॥ ज्ञानार्थशक्तिधर्माणा विघातो दैवमेव च। मित्रार्थस्यावमानश्च तथा बन्धुविनाशनम्। भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम्। ऐकार्थ्यमिनिवेशित्वमिति विग्रहयोनयः॥' इति। अत्र च धर्मविघातप्रयुक्तो विरोध उक्तो भवति॥ ७॥ दृष्टिविशेषैश्चक्षुर्व्यापारविशेषैरपह्रियमाणलोचनोऽन्तर्नीयमानलोचनो न विरमतीति जानामीति पूर्वेण सबन्ध। रावणो दुर्मानवशादपि विग्रहमेव कुर्यादिति भाव। अत्र मानो नाम विरोधहेतुरुक्त·॥ **वन्द्या इति**। वन्द्याः पूज्या ये विश्वसृजो जगत्स्रष्टारो युगाना कृतादीनामादौ गुरव पितरो हितोपदेष्टारो वा। स्वयंभुवोऽपत्यानि स्वायंभुवा। 'तस्यापत्यम्' इत्यण्। सज्ञापूर्वकविधेरनित्यत्वेन गुणाभावाद्वुवङ्। भवन्तीति शेष·। ते च वैदेहस्य विदेहराजस्य सबन्धिन सन्तः किं कुतो हेतोर्न प्रिया। प्रिया न भवन्तीत्यर्थ। अहो इति विस्मये। वयं चाहं कुम्भकर्णादयश्च किं कुत सबन्धिनो न प्रिया कुत सबन्धित्वेन नेष्टा भवाम। अत्र 'मरीचिमत्र्यङ्गिरसौ पुलस्त्य पुलहं क्रतुम्। वसिष्ठं च महातेजा योऽसृजत्सप्त मानसान्॥' इति वचनमनुसधेयम्। तद्विश्वसृजामस्माकं च सबन्धिताया अनिष्टत्वमस्तु नाम कथंचिद्भवतु। दुरासदेन दुष्करेण तपसा कायशोषणात्मकनियमेन

अथवा ।

आर्थित्वे प्रकटीकृतेऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन्दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया ।
उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः
स्त्रीरत्नं च जगत्पतिर्दशमुखो दस्रः कथं मृष्यते ॥ ९ ॥

(नेपथ्यार्धप्रविष्ट ।)

प्रतीहारः—यः परशुरामस्य युष्माभिर्वार्ताहरः प्रेषितस्तेनैतत्तमालरसविन्यस्ताक्षरं तालीपत्रमुपनीतम् । (उपक्षिप्य निष्क्रान्त. ।)

माल्यवान्—(गृहीत्वा वाचयति ।) 'स्वस्ति । महेन्द्रद्वीपात्परशुरामो लङ्कायाममात्यं माल्यवन्तमभ्यर्हयति—'

शूर्पणखा—कधं पहुवदं दुस्सिलिट्ठक्कमं लिहिदम् ।

---

१. कथ प्रभुपद दुःश्लिष्टक्रम लिखितम् ।

दीप्तस्य जाज्वल्यमानस्य दीप्तश्रियो जाज्वल्यमानलक्ष्मीकस्य जगत्पतेर्जगतामेकातपत्राधिपत्यवत. पौलस्त्यस्य रावणस्यापि न्यूनता कन्यकाप्रदानाभावहेतुभूतमभिजनतपोरूपैश्वर्यवैकल्यज्ञानं हृदि मनसि कथ जाता । कथमुत्पन्नेत्यर्थः ॥ ८ ॥ अथवेति पूर्वोक्ताक्षेपे । **आर्थित्व इति** । प्रभो शक्तस्य स्वामिनो रावणस्यार्थित्वे कन्यकार्थित्वे प्रकटीकृतेऽपि कदाप्यप्रकटिते सर्वमायमुखादद्य प्रकटिते सत्यपि फलप्राप्तिर्न भवति सीतारूपफललाभो न भवति । अनेनावमानो नाम विरोधहेतुरुक्त । प्रत्युतेति पूर्वोक्तविरुद्धे द्रुह्यन्सयूथ्याना ताटकादीना वधेनापकुर्वन्विरुद्धचरितो रावणानिष्टधर्मस्थापनरूपचरितयुक्तो दाशरथी रामस्तया रावणप्रार्थितया कन्यया सीतया युक्त· सगत । अत्र द्रुह्यन्नित्यनेन बन्धुविनाशरूपो विरोधहेतुरुक्त । तया कन्यया युक्त इत्यनेनैकार्थाभिनिवेशरूपविरोधहेतुरुक्त । किच जगत्पतिर्दस्रो दशमुखः परस्य शत्रोर्मानस्य पूजायाश्चित्तसमुन्नतेर्वा यशसो गुणवत्ताप्रथायाश्चोत्कर्षमतिशय चात्मन स्वस्य मानयशसोर्विस्रंसनं च शैथिल्यं च परस्य स्त्रीरत्नं शत्रुसात्कृत स्त्रीरत्नं च कथं मृष्यते । कथं सहत इत्यर्थ । 'मृष तितिक्षायाम्' दैवादिक उभयपदी । अत्र दस्र इति मदरूपविरोधहेतुर्मानयशसोरिति मानरूपो विरोधहेतुश्चोक्त ॥ ९ ॥ नेपथ्यार्धप्रविष्ट । रङ्गस्थल इति शेष । प्रतीहार. । द्वारनियुक्त पुरुष इत्यर्थ । 'द्वारि द्वा'स्थे प्रतीहार' इत्यमर. । वार्ताहर प्रवृत्तिहर· । वार्तामाहरतीत्यर्थे 'आडि ताच्छील्ये' इति ह्रतेरच्प्रत्ययः । तेन वार्ताहरेण तमालरसेन तमालपत्रद्रवेण । 'रसो रागे द्रवे हर्षे' इति कोश । तालीपत्रं तद्धि ववलम् । तत्र तमालरसस्य नीलस्य परभागातिशय इति भाव । उपक्षिप्य समीपे निक्षिप्य ॥ वाचयति पठति । 'वच परिभाषणे' इत्यस्माच्चुरादे स्वार्थे णिच् । **स्वस्तीति** । महेन्द्रद्वीपान्महेन्द्रपर्वतोपलक्षितद्वीपेऽवस्थाय । 'ल्यब्लोपे कर्मण्यधिकरणे च' इति

माल्यवान्—अत्रैव परं माहेश्वरं लङ्केश्वरमभिनन्द्य ब्रवीति—'विदितमेतद्वो यदस्माभिर्दण्डकारण्यतीर्थोपासकेभ्यः प्रतिज्ञातमभयम् । तत्र विराधदनुकबन्धप्रभृतयः केऽप्यतिचरन्तीति श्रुतम् । तत्तान्प्रतिषिध्यास्माक युष्मत्स्थितां च माहेश्वरप्रीतिमनुरुध्यन्तां भवन्तः ।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥ १० ॥

इति ।'

शूर्पणखा—[1]'ईसिमसिणावट्टम्भगम्भीरगुरुओ उवण्णासो ।

---

१. ईषन्मसृणावष्टम्भगम्भीरगुरुक उपन्यासः ।

पञ्चमी । अभ्यर्हयति सभावयति ॥ प्रभुपद प्रभुविषयक वाक्यम् । 'पदं व्याजाङ्कितचिह्नस्थानत्राणाश्रुलक्ष्मसु । व्यवसाये सुसिद्धन्ते सायके वस्तुवाक्ययो ॥' इति रत्नमाला । दु श्लिष्टक्रमं त्यक्तपरिपाटीकम् । 'शक्तौ चरणविक्षेपे परिपाट्यामपि क्रम' इति रत्नमाला । महाराजविषयकं लिखितामात्यविषय लेखनीयम् । अत्र रावणं विहाय मात्यवतो लेखनाल्लेख्यपरिपाटी परित्यक्तेति भाव. ॥ अत्रैव मा प्रति प्रेषिते लेख्य एव । महेश्वरो भजनीयोऽस्येति माहेश्वर । 'सोऽस्य भक्ति·' इत्यण् । लङ्केश्वरं रावणमभिनन्द्य श्लाघित्वा ब्रवीति । वाक्य प्रयुक्तवानित्यर्थ । अमात्याभ्यर्हणे राजाभ्यर्हण कैमुतिकम् । किच साक्षाल्लेख्ये नामनिर्देशाद्व्यक्कारो भवेत् । अतो रावणं विहाय मामेव लिखितवानिति भावः । लेख्यार्थप्रकारमाह—**विदितमित्यादिना** । अस्माभिर्मया दण्डकारण्यतीर्थाना दण्डकारण्यस्थिताना पुण्यभूमीना पुण्यसलिलाना वोपासकेभ्य. सेवकेभ्य । चतुर्थ्यन्तमिदम् । 'जलावतारो गुरुयोन्युपायशास्त्राणि यज्ञो मुनिजुष्टतोयम् । मन्त्रादयोऽष्टादश पुण्यभूमि. पात्रं जलं स्त्रीकुसुम च तीर्थम् ॥' इति रत्नमाला । अभयं भयनिवर्तन प्रतिज्ञातम् । कर्तव्यतयाङ्गीकृतमिति यावत् । एतद्वो विदितमिति पूर्वेण सबन्ध । तत्र दण्डकारण्यतीर्थोपासकेष्वतिचरन्त्यस्मत्प्रतिज्ञातार्थविरुद्धमाचरन्ति । तान्विराधप्रभृतीन्प्रतिषिध्य निवर्त्यास्माकं युष्मासु स्थिता माहेश्वरप्रीतिमनुरुध्यन्ता कामयन्ताम् । 'अनो रुध कामे' इत्यस्माद्दैवादिकात्कर्तरि लोटि श्यन् । विराधाद्यनिवर्तने युष्मदिष्टास्मत्प्रीतिर्विहन्येतेति भाव । **ब्राह्मणेति** । ब्राह्मणेष्वतिक्रमस्यापराधस्य त्यागो निवृत्तिर्भवतामेव भूतये युष्माकमेव श्रेयसे । भवतीति शेष· । नास्माक क्षेमायैव ब्राह्मणातिक्रमत्यागो भवद्भि· कार्य । किंतु भवतामात्महितकामनयापि कार्य इति भाव. । किच जामदग्न्य परशुरामो वो युष्माकमेवं सत्येव मित्रं भवेत् । चकाराद्युष्मद्भूतिरेव मुख्यफलम्, अस्मन्मैत्री त्वानुषङ्गिकीति भाव. । अन्यथैवमपि ब्राह्मणातिक्रमे जामदग्न्यो दुर्मनायते दुष्टमनस्को भविष्यति । क्रुद्धो भविष्यतीत्यर्थ । दुर्मन शब्दाद्वहुव्रीहे· 'कर्तु क्यङ् सलोपश्च' इति क्यङ् । सकारलोपो दीर्घश्च ॥ १० ॥ ईषन्मसृणेन किंचिच्छ्लक्ष्णेनावष्टम्भेन कार्कश्येन गम्भीरो

माल्यवान्—अहो, किमुच्यते । जामदग्न्यः खल्वयम् ।

अभिजनतपोविद्यावीर्यक्रियातिशयैर्निजै-
रुपचितमदः सर्वत्यागान्निरीहतया स्थितः ।
व्यपदिशति नः शैवप्रीत्या कथंचिदनास्थया
प्रभुरिव पुन कार्ये कार्ये भवत्यतिकर्कश. ॥ ११ ॥

(इति चिन्तयति ।)

शूर्पणखा—किं[1] दाणि चिन्तीअदि ।

माल्यवान्—वत्से,

यदि प्रपद्येत धनु प्रमाथी
शिष्यस्य शंभोर्न तितिक्षते सः ।
आयोधने चेदुभयोर्निघातः
संरम्भयोगादति हि प्रियं नः ॥ १२ ॥

---

१. किमिदानीं चिन्त्यते ।

गहनो गुरुको महाश्चोपन्यासो वाक्यसदर्भ । दौर्मनस्यप्रतियोगिनो मैत्रस्यानुषङ्गिकत्वोक्ति भूतेर्मुख्यत्वोक्तेश्च किंचिच्छ्लक्ष्णत्वम् ॥ खल्विति प्रसिद्धम् । वक्ष्यमाणविशेषै प्रसिद्ध इत्यर्थ । **अभिजनेति** । निजै स्वीयै । 'निजौ स्वीयाविनाशिनौ' इति रत्नमाला । अभिजनस्य वशस्य तपस कायशोषणादेर्विद्याया वेदादिकाया वीर्यस्य पराक्रमस्य क्रियाया यागयुद्धादिकाया अतिशयैरुत्कर्षैरुपचितमद प्रवृद्धर्हगर्व । अर्हेक्त । 'गजदानं गर्वहर्षरेतोमृगमदा मदा.' इति रत्नमाला । तथापि सर्वेषामभिजनादीना त्यागात्पराभिभवहेतुतयानादर्तव्यत्वज्ञानान्निरीहतया परावमानविषये निश्चेष्टतया स्थितो विद्यमानोऽसौ जामदग्न्य शैवप्रीत्या शिवभक्तताप्रयुक्तप्रीत्या कथंचित्केनापि प्रकारेण । पूर्वोक्तरीत्या मुख्यानुषङ्गिकभावविपर्ययेणेत्यर्थ । अनास्थया तत्परताविरहेण । 'आस्था प्रतिज्ञातात्पर्यगोष्ठीयत्नोपलम्भने' इति रत्नमाला । नोऽस्माकं व्यपदिशति 'ब्राह्मणातिक्रमत्याग ' इत्यादिकं वदति । कार्ये कार्ये पुनः स्वाभिमतेषु तु प्रभुरिवातिकर्कशो भवति । 'हसन्निव नृपो हन्ति' इत्युक्तरीत्या राजवदतितीक्ष्णदण्डधरो भवतीत्यर्थः । यद्वानास्थया प्रभुरिवेत्यत्र अप्रभुरिव इति छेद । कार्ये कार्य इत्यत्र च 'कार्ये अकार्ये' इति छेद । तथा चायमर्थ —अनास्थया कथचिदप्रभुरिवाशक्त इव व्यपदिशति । 'अकार्ये न अकार्ये पुनर्ब्राह्मणातिक्रमादिस्थानभिमतकार्येऽस्माभि· कर्तव्ये त्वतिकर्कशो भवतीत्यर्थ ॥ ११ ॥ **यदीत्यादि** । शंभोर्धनु.प्रमाथी रुद्रधनुर्भङ्गकरो राम शंभो शिष्यस्य शंभुशिष्यस्य जामदग्न्यस्य प्रपद्येत यदि ज्ञायेत चेत् । शिष्यस्येति शेषे षष्ठी । शिष्यसबन्धिज्ञानविषयो भवेच्चेदित्यर्थ । शंभुशिष्यो जामदग्न्यो न तितिक्षते न क्षमते । 'तिजे क्षमायाम्' इति स्वार्थे सन् । गुरुपरिभवं न क्षमिष्यत इत्यर्थ । आयोधने युद्धे सरम्भस्य सक्रोधोद्यमस्य योगात्सबन्धादुभयो-

अन्यतरविजयेऽपि क्षत्रियान्तकश्चेद्राजपुत्रं विजयेत । यतः, नैनमनभिहत्यास्य मन्युर्विरमेत् । एवं च सिद्धं नः समीहितं रामनिधनम् । ऐक्ष्वाकश्चेद्विजयमानो ब्रह्मण्यो ब्रह्मर्षिं नाभिहन्यात् । निःश्रेयसापन्नोऽयमपविद्धमपि शस्त्रं न प्रणिदध्यात् । ततश्च नोऽनिष्टं स्यात् ।

शूर्पणखा—[१]को विसेसो ।

माल्यवान्—जामदग्न्यस्तावदारण्यकव्रतः । स हत्वापि रामं पुनस्तादृश एव । स श्लाघ्यस्तु राजपुत्रः पुनरुत्थातुकामस्तं चेत्प्रकृष्टतममुत्साहशक्तिसंपदा धर्मविजयिनं च विजयते सर्वे त विजयिनं निर्जरा जानीयुः । तदैव रावणपराक्रान्तिनिभृततूर्या देवाः प्रसह्यैनमधिकुर्युः । नित्यानुषक्तो ह्यसुरविजयिनामवमानत प्रकृतिकोपः ।

---

१. को विशेषः ।

जामदग्न्यदाशरथ्योर्निर्घात. सुन्दोपसुन्दवन्मिथो वध. स्याच्चेत्, तदा नोऽतिप्रियमत्यन्तमिष्टम् । स्यादिति शेष. ॥ १२ ॥ अन्यतरविजयेऽप्येकैकस्यैकैकेन विजयेऽपि क्षत्रियान्तक. परशुरामो राजपुत्रं राम विजयेत चेदभिभूयाच्चेत्, एन राजपुत्रमनभिहत्याहत्या समीहितमभिलषितं सिद्धं निष्पन्नम् । ऐक्ष्वाक इति चेदिति पूर्वोक्तपक्षातिरिक्ते पक्षे । 'पक्षान्तरे चेद्यदि च' इत्यमर. । विजयमानोऽभिभवन्ब्रह्मण्यो ब्राह्मणहित ऐक्ष्वाको रामो ब्रह्मर्षिं भार्गवं नाभिहन्याद्धन्तुं नार्हं । नि श्रेयसापन्नो मुक्तप्रायोऽयं जामदग्न्योऽपविद्धमपि कुण्ठितमपि शस्त्रमायुध न प्रणिदध्यान्न चिन्तयेत् । रामापरिभवेन शस्त्रसन्यासात्तपोभ्युपगमाच्च नि श्रेयसापन्नत्व मन्तव्यम् ॥ ततो भार्गवस्य रामात्पराजये सति को विशेष । उभयोरायोधने निखातस्येष्टत्वेन शत्रुत्वाविशेषादिति भाव ॥ तावत्प्रथममारण्यकानामरण्यस्थमनुष्याणा व्रत नियमो यस्य स तथोक्त । 'अरण्यान्मनुष्ये' इति वुञ् । पुनस्तादृश एव पुनरप्यारण्यकव्रत एव । रामवधमात्रेण चरितार्थो नास्माकमपि चिकीर्षेदिति भाव । **स इति** । चेदिति पक्षान्तरे । श्लाघ्यो गुणादिभि श्रेष्ठो राजपुत्रस्तु रामस्तु पुनरुत्थातुकामो भार्गववधानन्तरमप्युत्थातुकाम उत्कृष्टं प्रामुकाम. सन् । 'सतुष्ट क्षत्रियस्तथा' इत्युक्तत्वादिति भाव । उत्साहशक्तेराफलान्तस्थिरप्रयत्नशक्ते । 'स्थेयान्प्रयत्न उत्साह' इति ह्युक्तम् । सपदातिशयेन प्रकृष्टतममतिशयेन प्रकृष्टम् । रावण. प्रकृष्टः, कार्तवीर्य प्रकृष्टतर, जामदग्न्यः प्रकृष्टतम, इति विषयनिर्धारणे विहितस्य तमप. प्रयोग । धर्मेण विजयिनम् । अनेन कूटयोधित्व व्युदस्यते । त भार्गवं विजयते चेत्सर्वे निर्जरा देवास्तं रामं विजयिन सर्वोत्कृष्टं जानीयुरवगच्छेयु । रावणपराक्रान्त्या रावणस्य पराक्रमेण निभृततूर्या निर्व्यापारयुद्धतूर्या निर्व्यापारयुद्धवाद्यविशेषा । 'निभृतक्रुद्धा.' इति च पाठ । एन रावणं प्रसह्य बलात्कृत्याधिकुर्युः व्याप्रियेरन् । हि यस्मादसुरविजयिना

पौलस्त्यापजयप्रचण्डचरिते यः कार्तवीर्ये मुनिः
सर्वक्षत्रकथासमापनविधे· प्राज्मङ्गलं प्राकरोत् ।
तस्मिन्नप्युपनीतयुक्तदमनः स्यादुज्झितास्मद्भय·
सामर्थ्ये सति धर्मसौम्यचरितो विश्वस्य रामः पतिः ॥ १३ ॥

शूर्पणखा—तंदो एत्थ किं णिच्चिदम्[1]

माल्यवान्—परशुरामोत्तेजनं कर्तव्यमिति ।

शूर्पणखा—पक्खन्तरे[2] महादोसो ।

माल्यवान्—तत्रापि शक्तितः प्रतिविधास्यते । किंतु
तान्येव यदि भूतानि ता एव यदि शक्तयः ।
ततः परशुरामस्य न प्रतीमः पराभवम् ॥ १४ ॥

---

१. ततोऽत्र किं निश्चितम् ।

२. पक्षान्तरे महादोषः ।

देवानामवमानतस्तिरस्काराप्रकृतिकोपो राष्ट्रकोपः । 'अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चम । एता प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृता ॥' इति कामन्दक· । नित्यानुषक्तो नित्यानुवृत्तस्तस्मात्प्रसह्याधिकुर्युरिति सबन्ध· । **पौलस्त्येति** । यो मुनिर्भार्गव पौलस्त्यस्य रावणस्यापजयेन पराभवेन प्रचण्डचरिते तीक्ष्णव्यापारे कार्तवीर्ये कृतवीर्यस्यापत्येऽर्जुने विषये सर्वक्षत्रस्य क्षत्रियसामान्यस्य कथाया· शब्दस्य समापनं नाशनं तदेव कथासमापनं प्रबन्धसमाप्तिनिष्पादन तदेव विधिर्विहितधर्मानुष्ठानं तस्य प्राज्मङ्गलमविघ्नेन परिसमाप्त्यर्थमादौ कर्तव्यमङ्गलम् । मध्यान्तमङ्गलेऽपि हि स्तस्तद्यावृत्तये प्रागिति पदम् । निर्विघ्नसमाप्त्यर्थमङ्गलस्थानीय वधं प्राकरोत्प्रस्तुतवान् । कर्मणोऽधिकरणत्वविवक्षया कार्तवीर्ये इति सप्तमी । तस्मिन्नपि तादृशे जामदग्न्येऽप्युपनीत प्रापितं युक्त योग्यम् । ब्राह्मणस्य वधानर्हत्वाच्छक्त्याकर्षणरूपमित्यर्थ । दमनं क्षिण येन स तथोक्त· । सामर्थ्ये सति शक्तौ सत्यामुज्झितास्मद्भयस्यक्तास्मद्धेतुकानर्थशङ्को धर्मेणानृशंस्यादिना सौम्यं रम्यं चरितं वृत्त यस्य स तथोक्त । सौम्य पुमान्बुधे विप्रे त्रिषु स्यात्सोमदैवते । रम्येऽनुप्रे च' इति रत्नमाला । रामो विश्वस्य पति· स्यादेकच्छत्राधिपतिर्भवितुमर्ह इत्यर्थ ॥ १३ ॥ अत्रास्मिन्सदेहे ॥ परशुरामस्योत्तेजन निशातनं वैरसधुक्षणम् ॥ पक्षान्तरे रामेण जामदग्न्यस्य जये महादोष । पूर्वोक्तो महाननर्थ इत्यर्थ ॥ तत्रापि तस्मिन्पक्षेऽपि रामेण जामदग्न्यस्य जयेऽपि शक्तित· शक्त्यनुसारेण प्रतिविधास्यते प्रतीकार· करिष्यते । अस्माभिरिति शेष । वचनया दण्डकारण्यप्रस्थापनसीताहरणादिरूप प्रतीकारं करिष्य इत्यर्थ· । परशुरामोत्तेजनमिति द्वितीयतृतीययोरङ्कयोरर्थ· प्रतिविधास्यत इति चतुर्थाङ्कस्य चार्थ· सूचित· । किंत्विति द्वितीयपक्षपरित्यागेन प्रथमपक्षपरिग्रह· । **तान्येवेति** । अत्र रामस्येत्यादि । रामस्य तान्येव भूतानि यदि लोकसाधारणानि

तदुत्तिष्ठ । मिथिलाप्रस्थापनाय जामदग्न्यमुत्तेजयितुं महेन्द्रद्वीपमेव गच्छावः । द्रष्टव्यश्च तत्र भार्गवः ।

गभीरो माहात्म्यात्प्रशमशुचिरत्यन्तसुजनः
प्रसन्नः पुण्यानां प्रचय इव सर्वस्य सुखदः ।

देहारम्भकाणि पृथिव्यादिभूतानि यदि । 'युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु' इत्यमरः । ता एव शक्तयो यदि लोकसाधारणानि सामर्थ्यानि च यदि । ततो रामात्परशुरामस्य पराजयं न प्रतीमो न निश्चिनुम । अयं भाव —रामस्य विग्रहारम्भकाणि वीरपुरुषान्तरसाधारणानि शक्तयश्च सर्ववीरपुरुषसाधारण्यश्चेद्रामात्परशुरामस्य पराजयो न भवेदेव । परतु 'न भूतसघसस्थानो देहोऽस्य परमात्मन । न तस्य प्राकृता मूर्ति,' 'परास्य शक्तिर्विविधैव श्रूयते' इत्यादिशास्त्रोक्तरीत्या रामस्य लोकविलक्षणविग्रहशक्तियोगाद्रामात्परशुरामस्य पराभव शङ्कनीय एवेति । यद्वा परशुरामस्य तान्येव भूतानि यदि पूर्वावस्थावस्थितानि यद्यनाकृष्टानि । अक्षराणीत्यर्थ । ता एव शक्तयो यदि । शक्तयोऽप्यनाकृष्टाश्चेदित्यर्थ । ततो रामादित्यादि । अयमाशय —रामेण परशुरामस्य विग्रहसारशक्तयो नाकृष्टाश्चेद्रामात्तस्य पराजयो न भवेत् । रामेण ता यद्याकृष्टा भवेयुस्तदा रामात्तस्य पराजयो भवेदेवेति । किंच तान्येवेत्यादि । रामस्य देहारम्भकाणि भूतान्येव परशुरामस्य देहारम्भकाणि । रामनिष्ठा एव शक्तयः परशुरामनिष्ठाश्च भवन्ति खलु । उभयोरपि भगवदवतारत्वेन धर्मैक्यात् । अतः परशुरामस्य पराजयं न प्रतीम । 'नहि स्वस्मात्स्वस्य पराजय' इति युक्तिसभवोऽस्तीत्यपि ध्वन्यते ॥ १४ ॥ तत्तस्मान्मिथिलाप्रस्थापनाय जामदग्न्यस्य मिथिलाप्रस्थापनं कर्तुमुत्तिष्ठेत्यन्वयः । जामदग्न्यमुत्तेजयितुमुद्भूतक्रोधं कर्तुं महेन्द्रद्वीपमेव गच्छाव इति सबन्ध । तत्र महेन्द्रद्वीपे भार्गवो भृगोरपत्यं परशुरामो द्रष्टव्यश्च प्रकृतनिमित्तेनाप्यभ्युदयार्थं द्रष्टव्य एवेत्यर्थं. । **गभीर इति** । माहात्म्यान्महाप्रयत्नवत्त्वान्महाधैर्यवत्त्वान्महामनस्त्वादभिजनतपोऽतिशयप्रभृतिमहास्वभाववत्त्वात्परमात्मांशत्वान्महाज्ञानवत्त्वान्महाशरीरवत्त्वाच्च गभीरो दुर्ज्ञेय ।'आत्मा यत्नधृतिक्षान्तस्वभावपरमात्मसु । जीवबुद्धिशरीरेषु'इति रत्नमाला । प्रशमेन प्रकृष्टेनान्तरिन्द्रियनिग्रहेण शुचिरनघोऽत्यन्तसुजनोऽतिशयितसौजन्यवान् । सौजन्यमानृशंस्यादिपूर्णत्वम् । सर्वस्य जनस्य पुण्यानां सुकृताना प्रसन्न प्रचय इव फलप्रदानोन्मुखातिशय इव. सर्वस्य जनस्य सुखदः सौख्यहेतुरसौ जामदग्न्यो दृष्ट सन्प्राणिभि साक्षात्कृत सन्प्रभुत्वस्योत्कर्षाज्जगदेकस्वामित्वात्सर्वकार्यनिर्वहणानुगुणसामर्थ्यातिशयाद्वा । तपसा कायशोषणादीना परिणत्या परया काष्ठया या विशुद्धिरनघत्वं ततो हेतोश्च सर्वस्य प्राणिन सत्त्वं बल सत्त्वगुणं साधुता वा । 'सत्त्वं द्रव्ये पिशाचादौ व्यवसायस्वभावयो । गुणप्राणबलस्वान्तसत्तास्वस्त्री तु जन्तुषु ॥' इति रत्नमाला । प्रबलयति वर्धयति । पाप नुदति चानिष्टहेतुदुरितं नाशयति च । अतो द्रष्टव्य इति पूर्वेण सबन्धः । अत्र प्रभुत्वस्योत्कर्षात्

प्रभुत्वस्योत्कर्षात्परिणतिविशुद्धेश्च तपसा-
मसौ दृष्टः सत्त्वं प्रबलयति पापं च नुदति ॥ १५ ॥

(उत्थाय परिक्रम्य निष्क्रान्तौ ।)

मिश्रविष्कम्भः ।

(नेपथ्ये ।)

भो भो विदेहनगरीनिर्गता राजकुलचारिणः, कथयन्तु भवन्तः कन्यान्तःपुरगताय रामाय—

'कैलासोद्धारसारत्रिभुवनविजयौर्जित्यनिष्णातदोष्णः
पौलस्त्यस्यापि हेलापहृतरणमदो दुर्दमः कार्तवीर्यः ।
यस्य क्रोधात्कुठारप्रविघटितमहास्कन्धबन्धस्थवीयो-
दोःशाखादण्डषण्डस्तरुरिव रहितः कुल्यकन्दैः पुराभूत् ॥ १६ ॥
सोऽय त्रि.सप्तवारानविकलविहितक्षत्रतत्त्रप्रमारो
वीरः क्रौञ्चस्य भेदात्कृतधरणितलापूर्वहसावतारः ।

'सत्त्वं प्रबलयति' इत्यनेन 'महान्प्रभुर्वै पुरुष सत्त्वस्येष प्रवर्तक' इति श्रुत्यर्थोऽनुसहित । 'पापं च नुदति' इत्यनेन 'ते पुनन्त्युरुकालेन दर्शनादेव साधव' इति स्मृत्यर्थोऽनुसहित ॥ १५ ॥ मिश्रविष्कम्भ संस्कृतप्राकृतात्मको विष्कम्भ ॥ राजकुलेषु राजगृहेषु चरन्तीति राजकुलचारिण । **कैलासेति** । कैलासोद्धारस्य कैलासपर्वतोद्धारणस्य सारेण तद्धेतुभूतबलेन । 'सारो बले स्थिराशेऽर्थे न्याय्ये क्लीबं वरे त्रिषु । क्लीबमम्बुनि' इति रत्नमाला । त्रयाणा भुवनाना समाहारस्त्रिभुवनम् । पात्रादित्वात्क्लीबत्वम् । तस्य विजयस्य स्ववशीकरणस्यौर्जित्येन । ऊर्जितो बलिष्ठ । 'ऊर्ज बलप्राणनयो' इत्यस्मात् 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' इति कर्तरि क्त । तस्य भाव और्जित्यम् । ब्राह्मणादेराकृतिगणत्वाद्भावे ष्यञ् । तेन निष्णात सर्वकार्यनिपुणो दोर्बाहुर्यस्य स तथोक्तस्तस्य पौलस्त्यस्यापि रावणस्यापि । इयं षष्ठी मद इत्यनेनान्वेति । हेलयानासेनापहृतो रणमदो युद्धदर्पो येन स तथोक्त. । दुर्दमो दुर्निग्राह्य कार्तवीर्यो यस्य परशुरामस्य क्रोधात्कुठारेण परशुना प्रविघटिताच्छिन्ना महान्त पृथुला स्कन्धा एव स्कन्धा । श्लिष्टरूपकम् । तेषा बन्धा बन्धनानि यासा तथोक्ता स्थवीयस्योऽतिस्थूला दो शाखा एव बाहुलक्षणा शाखा एव दण्डषण्डानि दण्डसमूहा यस्य स तथोक्त सन्कन्दैरिव कुल्यैरस्थिभि । 'अस्थि कुल्य स्यात्' इति रत्नमाला । रहित शून्यस्तरुरिव वृक्ष इव पुराभूत्पूर्वमभूत् ॥ १६ ॥ **सोऽयमिति** । सोऽयं त्रि सप्तवारानेकविंशत्यवसरान् । 'निवहावसरौ वारौ' इत्यमर । अत्यन्तसयोगे द्वितीया । 'द्वित्रिचतुर्भ्यं सुच्' इति त्रिशब्दात्सुच् । अविकलं समग्र यथा तथा विहित कृत क्षत्राणा क्षत्रियाणा तत्त्रमनेककर्मकारकेष्वेककिया-

जेता हेरम्बभृङ्गिप्रमुखगणचमूचक्रिणस्तारकारे-
स्त्वां पृच्छञ्जामदग्न्यः स्वगुरुहरधनुर्भङ्गरोषादुपैति ॥ १७ ॥'

(तत प्रविशति सवैर्यसभ्रमो राम सीता सख्यश्च ।)

रामः—

माहाभाग्यमहानिधिर्भगवतो देवस्य दग्धुः पुरा-
मान्नायेन विशुद्धसत्त्वचरितः शिष्यो भृगूणां पतिः ।

व्यक्तिरूप प्रकृष्टो मारो मरणं येन स तथोक्त. । तत्र ह्यनेकप्रधानोद्देशेन क्रियाया· सकृदनुष्ठानम् । यथा—दर्शादिक्रियोद्देशेन प्रयाजादीना सकृदनुष्ठानम् । एतच्चाध्वरमीमासायामेकादशाध्याये भगवता जैमिनिना निरूपितं तत्र द्रष्टव्यम् । इह त्वेकेनैवोद्यमेन बहूना क्षत्रियाणा वधमिति तत्रशब्दप्रयोग । 'तन्त्रं स्वराष्ट्रचिन्तायां तन्तुवाये परिच्छदे । यागप्रयोगे सिद्धान्ते शास्त्रमन्त्रौषधेषु च ॥ एकस्यैवोभयार्थत्वे कुटुम्बव्याप्तावपि ॥' इति रत्नमाला । 'मारो ना मरणे कामे मारी चण्ड्या जनक्षये' इति च रत्नमाला । वीर शूर । क्रौञ्चस्य क्रौञ्चपर्वतस्य भेदाद्दारणात्कृतो धरणितलेऽपूर्वो नूतनो हसानामवतारोऽवरोहण येन स तथोक्त । पूर्वं हि हंसा मानससरस्येव स्थिता भूमौ नावरोहन्ति स्म । तदनन्तर भगवता परशुरामेण क्रौञ्चपर्वते सरन्ध्रीकृते सति तेभ्यो रन्ध्रेभ्यो हंसा मानससरसो भूतलमवतरन्तीति पौराणिकी प्रसिद्धिरत्र द्रष्टव्या । हेरम्बो विनायकः, भृङ्गी भृङ्गीनामको रुद्रपरिवारविशेषः, तौ प्रमुखौ प्रधानौ येषां ते तथोक्तास्तेषा गणाना प्रमथानाम् । 'सघाते प्रमथे गण ' इत्यमर । चमूना सेनाना चक्राणि समूहाः सन्त्यस्येत्यस्मिन्नर्थे चक्रशब्दात् 'अत इनिठनौ' इति मत्वर्थीय इनिप्रत्यय । 'चक्र चये जलावर्ते रथाङ्गे राष्ट्रसैन्ययो । घटसाधनभेदे च क्लीबे कोके तु पुस्ययम् ॥' इति रत्नमाला । तारकारे स्कन्दस्य जेताभिभविता । पुरा खलु शस्त्रकलहे स्कन्दं परशुरामो जितवानिति पौराणिकी प्रसिद्धि । जामदग्न्यः परशुराम स्वगुरोर्हरस्य रुद्रस्य धनुषो भङ्गेन रोषात्त्वा पृच्छन्सन्नुपैति प्राप्नोति ॥ ॥ १७ ॥ **सीतेति** । प्रविशतीत्यनुषङ्गः । सख्यश्च प्रविशन्तीति विपरिणामश्च ॥ **माहाभाग्येति** । माहाभाग्यस्य महाभागताया महानिधिर्निधयो नव प्रसिद्धास्तेभ्योऽप्यतिशयितो निधिर्भगवतो देवस्य पुरा दग्धु शिवस्य शिष्य आम्नायेन वेदाभ्यासेन विशुद्धान्यनघानि सत्त्व व्यवसायश्चरितानि वृत्तानि यस्य स तथोक्त· । भृगूणां भृगुवंशप्रभवाणा पति श्रेष्ठ परशुरामो द्रष्टव्य । मयेति शेष । स च मा दिदृक्षु सोऽपि मा द्रष्टुमिच्छु । भवतीति शेष. । तथा तद्दर्शनं ममाभ्युदयहेतुस्तद्वत्तद्दृष्टिविषयत्वमपि ममाभ्युदयहेतुरिति भाव । यथोक्तम्—'यस्यानुभावपर्यन्ता दृष्टिस्तत्त्वे प्रतिष्ठिता । तद्दृष्टिगोचरा· सर्वे मुच्यन्ते सर्वकिल्बिषै ॥' इति । अपिचेत्यादिपूर्वोक्तार्थविरोधद्योतकोऽपिचेत्यव्ययसंघात । मुग्धया । 'उदयद्यौवना मुग्धा

द्रष्टव्यः स च मां दिदृक्षुरपि च त्यक्त्वा ह्रियं मुग्धया
संत्रासादयमाभिजात्यनिभृतस्नेहो मयि द्योत्यते ॥ १८ ॥

सीता—संहिओ[1], कहं एदम् ।

सख्यः—कुमार[2], अलं दाव तवराए ।

रामः—नोत्सवाः परावधीरणावैरस्यमर्हन्ति ।

सख्यः—वारंवारं[3] णिक्खत्तीकिदसमत्तजीअलोओ णिवट्टिअविसअव्ववसाओ परसुरामो सुणीअदि ।

रामः—किमेकदेशेन महाज्ञाननिधेर्माहात्म्यमपह्नियते । य एषः

उत्खातक्षितिपालवंशगहनान्निःसप्तकृत्वो दिशः
कृत्वा विश्रुतकार्तिकेयविजयश्लाघ्यश्च बाह्वोर्बलात् ।

---

१. सख्यः, कथमेतत् ।

२. कुमार, अलं तावत्त्वरया ।

३. वारवार निःक्षत्रीकृतसमस्तजीवलोको निवर्तितविषयव्यवसायः परशुरामः श्रूयते ।

लज्जाविजितमन्मथा' इत्युक्तमुग्धालक्षणलक्षितया सीतया सत्रासाद्भयातिशयाद्ध्रियं लज्जा त्यक्त्वाभिजात्येन परमप्रकृष्टजनकवंशप्रसूतत्वेन हेतुना निभृत स्थिरमतोऽयं स्नेहोऽस्थानातिशङ्काहेतु प्रीतिविशेषो मयि परशुरामं दिदृक्षौ तेन च दिदृक्षिते मयि द्योत्यते मुखभङ्गीविशेषेण सूच्यते । मम तद्दर्शनेच्छाविरुद्धो मयि स्नेहस्थितया सूच्यत इत्यर्थ ॥ १८ ॥ एतत्परशुरामदर्शनम् ॥ परशुरामदर्शनत्वरयालम् । साध्यं नास्तीत्यर्थ । 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' इति तृतीया ॥ उत्सवा विवाहादय. । परैरवधीरणया परप्रयुक्तपरिभवेन वैरस्यं स्वादुताविरहं नार्हन्ति । किंतु परावधीरणापरिहारेणैवोत्सवाना रस्यत्वमित्यर्थः ॥ वारवारमवसरेऽवसरे । 'कालाध्वनोरत्यन्तसयोगे' इति द्वितीया । निवर्तितो निष्पादितो विषयव्यवसाय क्षत्रियरुधिरेण पितृतर्पणसकल्पो येन स तथोक्त । ब्राह्मणस्य क्षत्रियवधो ह्यकृत्यकरणमिति भाव ॥ एकदेशेन महति गुणसमुदायेऽन्तर्गतेनैकेन दोषेण महाज्ञाननिधे. सर्वदोषानभिष्वङ्गहेतुभूततत्त्वज्ञानपूर्णस्य माहात्म्य सर्वाभ्यर्हणत्वमपह्नियते नाश्यते । 'तेजीयसा न दोषाय वह्ने सर्वभुजो यथा' इति ह्युक्तम् । 'एको हि दोषो गुणसंनिपाते निमज्जतीन्दो किरणेष्विवाङ्क' इति न्याय शास्त्रे द्रष्टव्य । य एष य परशुरामः । **उत्खातेति** । दिश. कर्म । त्रिःसप्तकृत्व एकविंशतिवारान् । 'सख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्', 'द्वित्रिचतुर्भ्यः सुच्' इति सूत्राभ्या सप्तन्शब्दात्कृत्वसुच्प्रत्ययस्त्रिशब्दात्सुच्प्रत्ययश्च । उत्खातान्युन्मूलितानि क्षितिपालाना राज्ञा

सद्वीपामथ काश्यपाय मुनये दत्त्वाश्वमेधे महीं
शस्त्रव्यस्तसमुद्रदत्तविषयं लब्ध्वा तपस्तप्यते ॥ १९ ॥
(नेपथ्ये ।)
सत्त्वभ्रंशविषादिभिः कथमपि त्रस्तैः क्षणं वेत्रिभि-
र्दृष्टो दृष्टिविघातजिह्मितमुखैरव्याहृतप्रक्रमः ।
रामान्वेषणतत्परः पुरजनैरुन्मुक्तहाहारवः
कन्यान्तःपुरमेव हा प्रविशति क्रुद्धो मुनिर्भार्गवः ॥ २० ॥

रामः—नन्वेत एव शिष्टाचारपद्धतेः प्रणेतारः । तत्कथमयं विद्वान्प्रमाद्यति । भवतु । उपसर्पामि । (सधैर्यविकटं परिक्रामति ।)

सख्यः—अह्मो, समन्तदो एव्व 'हा देव चन्दमुह रामचन्द, हा

---

१. अहो, समन्तत एव 'हा देव चन्द्रमुख रामचन्द्र, हा जामातृक' इति

वंशा एवान्वया एव वंशा वेणव । श्लिष्टरूपकम् । तेषा गहनानि वनानि यासा तास्तथोक्ता । वंशगहनपदेन 'न खान्येव कुलानि केवलमिदं सर्वं दहेयुर्वनम्' इति न्यायेन राज्ञा दुष्टत्वं सूचितम् । विधेयविशेषणम् । कृत्वा विद्यमान इति शेष । विश्रुत. प्रसिद्ध कार्तिकेयस्य कृत्तिकानामप्यस्य स्कन्दस्य । 'स्त्रीभ्यो ढक्' । विजयो यस्य स तथोक्तः । किंच बाह्वोर्बलाच्छ्लाघ्यो य एष परशुराम. । अश्वमेधे काश्यपाय मुनये सद्वीपां महीमष्टादशद्वीपयुक्ता भूमिमथ दत्त्वा कात्स्न्र्येन दत्त्वा । 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इत्यमरः । शस्त्रेण परशुना व्यस्तेनोत्सारितेन समुद्रेण दत्तमनुमतं विषयं निवासदेशं लब्ध्वा प्राप्य तपस्तप्यते तपश्चरति । पाकं पचतीतिवत् । 'तप ऐश्वर्ये वा' इति श्यन्तडौ । अस्य महाज्ञाननिधेरित्यादिपूर्वेण सबन्धः ॥ १९ ॥ **सत्त्वेति** । सत्त्वभ्रंशेन दर्शनमात्रेण बलहान्या विषादिभिर्दुःखितैस्त्रस्तैरुद्विग्नैर्दृष्टिविघातेन तेजोतिशयप्रयुक्तचक्षु प्रसरप्रतिघातेन जिह्मितानि कुटिलितानि मुखानि येषा ते तथोक्तैर्वेत्रिभि· कन्यान्त पुराधिकृतैर्वेत्रधारिभि पुरुषै कथमप्यतिप्रयासेन क्षणं दृष्टोऽव्याहतोऽकुण्ठित प्रक्रम प्रारम्भो यस्य स तथोक्त । तदेव परमुत्कृष्टमिष्टं यस्य तत्पर. । रामान्वेषणे तत्परो रामान्वेषणतत्पर । 'सप्तमी' इति योगविभागात्समास । अतएव पुरजनैर्मिथिलानगरस्थितजनैरुन्मुक्त उच्चैर्मुक्तो हाहारवो यस्मिन्स तथोक्त· । क्रुद्धो भार्गवमुनिःकन्यान्त पुरमेव प्रविशति रामाध्युषितं कन्यान्तःपुरमेव प्रविशति । हाशब्दो विषादे । 'हा विषादशुगर्तिषु' इत्यमर । अत्र बिन्दुर्नामार्थप्रकृतिरुक्त । यथोक्तम्—'अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणम्' इति ॥२०॥ नन्वित्यवधारणे । एत एव एतादृशा एव शिष्टाचारपद्धते शिष्टाचारपरिपाट्या.प्रणेतार. कल्पसूत्रकाराः । भवन्तीति शेष. । तत्तस्मादयं परशुरामो विद्वान्धर्माधर्मविशेषज्ञः सन्प्रमाद्यत्यनवधानं प्राप्नोति । धर्मविस्मरणेन मह्य नापकुर्यादित्यर्थः । उपसर्पामि समीपं

जामादुए'त्ति परिदेवणमुहरकाअरुव्विग्गसमत्तपरिअणं पलाइद अम्मरा-अउलम्। भट्टदारिए, सअं एव्व विण्णवेहि भट्टारम्।

सीता—तेणं[1] हि तुवरन्तिओ संभावेम्ह वेअपत्थिअं अज्जउत्तम्। (इति परिक्रामति।)

सख्यः—कुमार[2], कुमार, पेक्ख दाव तुवराविसिङ्घलमरालवहुब्भन्तगमण भट्टिदारिअम्।

रामः—(सप्रेमानुकम्पं परिवृत्य) कातरेयमत्रभवद्भिरेव पर्यवस्थापयितव्या।

सख्यः—सहि[3], ससुरासुरसमत्ततेलोक्कमङ्गलं तुङ्गजयलच्छीलल्छिअं ईसिविब्भमविसट्टणेत्तकन्दोट्टसोहाविहरन्तमुहपुण्डरीअवित्थारिदसिणेह-

---

परिदेवनमुखरकातरोद्विग्नसमस्तपरिजनं पलायितमस्मद्राजकुलम्। भर्तृदारिके, स्वयमेव विज्ञापय भर्तारम्।

१. तेन हि त्वरमाणाः संभावयेम वेगप्रस्थितमार्यपुत्रम्।

२. कुमार कुमार, प्रेक्षस्व तावत्त्वराविश्रृङ्खलमरालवधूभ्रान्तगमना भर्तृदारिकाम्।

३. सखि, ससुरासुरसमस्तत्रैलोक्यमङ्गलं तुङ्गजयलक्ष्मीलाञ्छितमीषद्विभ्रम-

---

गच्छामि। विषयं यथा तथा॥ **जामातृकेति**। अनुकम्पनीयो जामाता जामातृकस्तस्य सबुद्धिः। 'अनुकम्पायाम्' इति कन्। परिदेवनेन रोदनशब्देन मुखरा शब्दायमाना, कातरा भीता, उद्विग्ना अतिशयेन कम्पिता। 'ओविजी भयचलनयो.' इत्यस्मात् 'गत्यर्थाकर्मक–' इत्यादिना कर्तरि क्त। 'ओदितश्च' इति निष्ठातकारस्य नकार। समस्ता परिजना यस्य स तथोक्त राजकुलं राजवृन्दं पलायितमपसर्पितम्। 'अय पय गतौ'इत्यस्मात्कर्तरि क्त। 'उपसर्गस्यायतौ' इति पराशब्दरेफस्य लकार। भर्तृदारिके राजपुत्रि। 'राजा भट्टारको देवस्तत्सुता भर्तृदारिका' इत्यमर॥ तेन राजकुलस्यापि पलायनेन। प्राकृत आत्मनेपदाभावात् 'तुवरन्तिओ' इति परस्मैपदम्। सभावयेम। परशुरामसमीपगमनप्रतिषेधेन वर्धयाम इत्यर्थः। विधिलिङ्गयुक्तमपुरुषवहुवचनम्। त्वरया वेगेन विश्रृङ्खला धावन्ती मरालवधूमिव हसीमिवोद्भ्रान्तगमनामनवस्थितगमनाम्। 'भ्रमु अनवस्थाने'॥ प्रेम स्नेह। अनुकम्पा दया। कातरा भीरु। पर्यवस्थापयितव्या निर्भया कर्तव्या॥ त्रैलोक्यमङ्गलं त्रैलोक्यमङ्गलकरम्। ईषद्विभ्रमेण मुग्धस्वभावात्स्वल्पेन विलासेनोपलक्षितम्। विस्रस्तस्य नेत्रकुवलयस्य। प्राकृते कुवलयशब्दस्य कन्दोट्टादेश। शोभया विहरता विलसता मुखपुण्डरीकेण विस्तारितौ प्रकाशितौ स्नेहसभ्रमौ यया सा तथोक्ता॥ स्वस्था सती स्वे स्वभावे

संभमा सव्वदा अह्मपुरदो वण्णेसि । ता किंति विअआहिमुहे कुमारे उक्कम्पितासि ।

सीता—सव्वक्खत्तिअसंदावआरी[1] परसुरामो त्ति ।

रामः—प्रिये, स्वस्था सती निवर्तस्व ।

आतङ्कश्रमसाध्वसव्यतिकरोत्कम्प. कथं सह्यता-
मङ्गैर्मुग्धमधूकपुष्परुचिभिर्लावण्यसारैरयम् ।
उन्नद्धस्तनयुग्मकुड्मलगुरुश्वासावभुग्नस्य ते
मध्यस्य त्रिवलीतरङ्गकजुषो भङ्गः प्रिये मा च भूत् ॥ २१ ॥

(नेपथ्ये ।)

भो भो. परिष्कन्दा', क्व रामो दाशरथि. ।

सीता— सो एव्व वाहरइ[2] ।

रामः—तस्यानरालसाहसप्रचण्डकर्मण· पुष्कलावर्तकस्तनितमांसलो

विम्बस्तनेत्रकुवलयगोभाविहरन्मुखपुण्डरीकविस्तारितस्नेहसभ्रमा सर्वदास्मत्पुरतो वर्णयसि । तत्किमिति विजयाभिमुखे कुमार उत्कम्पितासि ।

१ सर्वक्षत्रियसतापकारी परशुराम इति ।

२ स एव व्याहरति ।

स्थिता सती । यथा पुनर्निर्भया सतीत्यर्थ । **आतङ्केति** । मधूकस्य गुडपुष्पवृक्षस्य । 'मधूके तु गुडपुष्पमधुद्रुमौ' इत्यमर । पुष्पाणा रुचिरिव कान्तिरिव रुचि कान्तिर्येषा तानि तथोक्तानि तैः । लावण्येन कान्तिविशेषेण सारैर्वरै । 'सारो बले स्थिराशे च न्याय्ये क्लीबं वरे त्रिषु' इत्यमर । लावण्यस्वरूपं तु—'भूयिष्ठं तेज एवाद्भिर्बहुलाभिर्मृदूकृतम् । चक्षुरानन्दजननं लावण्यमिति कथ्यते ॥' इत्यनुसधेयम् । अङ्गै कर्तृभि । अयमीदृशो वाचामगोचर आतङ्क सज्वर· । 'आतङ्क सज्वरे रोगे साध्वसे मुरजध्वनौ' इति रत्नमाला । श्रम आयास. साध्वस भयमेतेषा व्यतिकरेण मेलनेनोत्कम्पो वेपथु कथं सह्यताम् । एभिरङ्गैरयमुत्कम्पो दु सह इत्यर्थ । किच हे प्रिये, उन्नद्धाभ्यामुद्बुद्धाभ्या कुड्मलाविव स्तनयुग्म स्तनयुग्मकुड्मलौ ताभ्या गुरुभिर्दीर्घै· श्वासैश्चावभुग्नस्य कुटिलितस्य । त्रिधा वल्यस्त्रिवल्य । शाकपार्थिवादिवदुत्तरपदलोप । 'वलिर्वली चाप्युदररेखाचामरदण्डयो' इति रत्नमाला । अल्पास्तरङ्गास्तरङ्गका. । त्रिवल्य एव तरङ्गकास्त्रिवलीतरङ्गकास्तान्जुषते भजतीति त्रिवलीतरङ्गजुट् तस्य ते मध्यस्य भङ्गो मा भून्न भवेत् । अतो निवर्तस्वेति पूर्वेण सबन्ध ॥ २१ ॥ परिष्कन्दा परिचारका । 'नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः । पराचितपरिष्कन्दपरजातपरैधिता.' इत्यमर । 'परेश्च' इति वैकल्पिक षत्वम् ॥ स एव व्याहरति परशुराम एव वदतीत्यर्थ ॥ तस्य परशुरामस्यानरालेनाकुटिलेन साहसेन शीघ्रप्रयत्नेन

वाड्निर्घोषः कर्णविवरमाप्याययति । (इति परिक्रामति ।)

सीता—[1]का गई । (धनुषि धारयन्ती ।) अज्जउत्त, ण दाव तुह्मेहिं गन्तव्व जाव तादो णाअच्चइ ।

सख्यः—[2]उव्वत्तिअं दाणिं पिअसहीए रसन्तरेण लज्जालुत्तणम् ।

रामः—जितं स्नेहेन । तर्हि मुक्त्वा धनुर्गच्छामि ।

(नेपथ्ये 'भो भो· परिष्कन्दा' इत्यादि पठति ।)

सीता—[3]तदो बलादो एव्व धारइस्सम् ।

रामः—हन्त हन्त ।

उत्सिक्तस्य तप पराक्रमनिधेरस्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोन्मादश्च मा कर्षतः ।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥ २२ ॥

---

१. का गतिः । आर्यपुत्र, न तावद्युष्माभिर्गन्तव्यं यावत्तातो नागच्छति ।
२ उद्वर्तितमिदानीं प्रियसख्या रसान्तरेण लज्जालुत्वम् ।
३. ततो बलादेव धारयिष्यामि ।

प्रचण्डकर्मण क्रूरक्रियस्य पुष्कलावर्तकस्य महामेघविशेषस्य स्तनितवद्गर्जितवन्मासल· स्फीतो वाड्निर्घोषो वर्णाभिव्यञ्जकध्वनि कर्णविवर कर्णरन्ध्रमाप्याययति तर्पयति । 'प्यायी वृद्धौ' इत्यस्मात् 'हेतुमति च' इति णिच् ॥ धनुषि धारयन्ती । चापे राममवलम्बमाना सतीत्यर्थ ॥ रसान्तरेण स्नेहातिशयेन । बाहुलकात्कञ्प्रत्ययो रालुच् ॥ जित स्नेहेन । लज्जापेक्षया स्नेहो बलवानित्यर्थ । तर्हि त्वया धनुषो दृढधारणे सति धनुर्मुक्त्वा गच्छामीत्यन्वय ॥ भो भो इत्यादि व्याख्यातम् ॥ हन्तेति हर्षेऽनुकम्पाया च । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमर । **उत्सिक्तस्येति** । उत्सिक्तस्य वीर्येण गर्वोत्तरस्य तपस· कायशोषणादे पराक्रमस्य बलस्य च निधेरस्य परशुरामस्यागमादागमनाद्धेतो सत्सङ्गप्रियता च परशुरामरूपसत्पुरुषससर्गेण प्रियता च वीररसे यो रभसो हर्षः । 'रभसो वेगहर्षयो' इति कोश । तेन य उन्मादश्चित्तविभ्रमप्रायो दशाविशेषः स च मामेकत एकस्मिन्पार्श्वे कर्षत आकर्षत । द्विवचनान्तमिदम् । आनन्द्यानन्दहेतु । आनन्दयतेर्णिजन्ताण्यिनि । हरिचन्दनवदिन्दुवच्च शिशिर शीतल· स्निग्धो मसृण एष वैदेहीपरिरम्भश्चैतत्सीतालिङ्गन च मुहुश्चैतन्यं ज्ञानमामीलयन्समोहयन्सन् । अन्यतोऽन्यस्मिन्पार्श्वे रुणद्धि । निवृत्तगमन करोतीत्यर्थ । 'रुधिरावरणे' इत्यस्मात् 'रुधादिभ्य श्नम्' ॥ २२ ॥ हा इति दु खे । एष ।

सख्यः—हा, एसो दिप्पन्तदिणअरालोअदुप्पेक्खजठरदेहप्पहापरिक्खेवभासुरो ज्जलन्तं सुणिसिदं परसुं धारअन्तो विसङ्कलुव्वेल्लहुअवहसिहासहस्ससदेहिदजडाप्पहाडामरो सुदूरविक्खेवाविद्धविअटोरुदण्डणिब्भराभिघादविहुलिअवसुन्धरो परागदो एव्व सअलक्खत्तिअमहारक्खसो ।

रामः—

अयं स भृगुनन्दनस्त्रिभुवनैकवीरो मुनि-
र्य एष निवहो महानिव दुरासदस्तेजसाम् ।
प्रतापतपसोरिव व्यतिकरस्फुरन्मूर्तिमा-
न्प्रचण्ड इव पिण्डतामुपगतश्च वीरो रसः ॥ २३ ॥

---

१. हा एष दीप्यमानदिनकरालोकदुष्प्रेक्ष्यजठरदेहप्रभापरिक्षेपभासुरो ज्वलन्तं सुनिशित परशु धारयन्विशङ्कलोद्वेलहुतवहशिखासहस्रसदिग्धजटाप्रभाडामरः सुदूरविक्षेपाविद्धविकटोरुदण्डनिर्भराभिघातविह्वलितवसुधरः परागत एव सकलक्षत्रियमहाराक्षसः ।

भार्गव इत्यर्थ । दिनकरालोक सूर्यतेज । प्रभापरिक्षेप प्रभापरिवेष । 'द्वयो कुठार. परशु ' इत्यमरोक्त्या परश्विति न नपुंसकलिङ्गम् । जटाप्रभाभिर्हेतुभिर्डामर.।डामरे विप्लवे कुशलः 'कृतलब्धकीतकुशला 'इति कुशलेऽण्प्रत्यय । भयंकर इत्यर्थ । सुदूरविक्षेपार्थमाविद्धयोर्दीर्घप्रसारितयोर्विकटोरुदण्डयोर्विषमोरुकाण्डयोर्निर्भराभिघातेन दृढाभिघातेन विह्वलितवसुंधर प्रकम्पितभूमि. परागत एव प्राप्त एव सकलक्षत्रियाणा महाराक्षसो महाहिंसक ॥ **अयमिति** । अयं पुरोवर्ती व्यक्तिविशेष । त्रिभुवने लोकत्रय एकेषु मुख्येषु वीरयते विक्रम करोतीति त्रिभुवनैकवीर । 'वीर विक्रान्तौ' इति पठितादागवीयाद्वीरयते कर्तरि पचाद्यच्प्रत्यय । एको वीर इति विग्रहे तु वीरैक इति स्यात् । स भृगुनन्दनो मुनि । प्रसिद्धो भृगुपुत्रो मुनिरित्यर्थ । य एष योऽयं भार्गवो मुनिर्महानपरिच्छिन्नो दुरासद समीपगमनानर्ह । तेजसा निवह इव समूह इव । भवतीति शेष. । किच मूर्तिमान्वपुष्मान्स्फुरन्प्रकाशमानः प्रतापस्य शत्रुतापनशक्तेस्तपसः कायशोषणादिनियमस्य च व्यतिकर इव मिलितावस्थानमिव भवति । किच पिण्डता सघातभावमुपगत प्राप्त प्रचण्डोऽत्यन्तं तीक्ष्णो रस । सामाजिकैश्चर्व्यमाणतया सूत्रशाकटन्यायेन भाविनीं वृत्तिमाश्रित्य रसशब्दवाच्य वीर इव शत्रुकृतापराधादिना मन प्रज्वलनात्मकक्रोध इव । भवतीति शेष. । सनिधिमात्रेण विरोधिनिरसने प्रथमोपमा । सबन्धविशेषेण विरोधिनिरसने द्वितीया । कायिकव्यापारेण विरोधिनि-

पुण्योऽपि भीमकर्मा निधिर्व्रतानां चकास्त्यमितशक्तिः ।
मूर्तिमभिरामघोरां बिभ्रदिवाथर्वणो निगमः ॥ २४ ॥

अयं हि ।

कल्पापायप्रणयि विदधत्कालरुद्रानलत्वं
संरब्धस्य त्रिपुरजयिनो देवदेवस्य तिग्मः ।
ब्रह्मच्छद्मा निखिलभुवनस्तोमनिर्माथयोग्यो
राशीभूतः पुनरिव समुत्थाय सामर्थ्यसारः ॥ २५ ॥

(विहस्य ।) अहो स्वाच्छन्द्यवैचित्र्यमत्रभवतः ।

रसने तृतीयेति विवेक ॥ २३ ॥ **पुण्य इति** । य एष इति पूर्वस्मादनुषङ्ग । व्रताना तपसा निधी रक्षणस्थानविशेष· । अमितेष्वनन्तेषु कार्येषु शक्ति सामर्थ्य यस्य स तथोक्त । यद्वा अमिता शक्तयो यस्य स तथोक्तः । पुण्योऽपि धर्मिष्ठोऽपि । 'धर्माम्बुपुष्पस्वर्णेषु पुण्यं धर्मवति त्रिषु' इति रत्नमाला । भीमकर्मा भयकरव्यापारो य एष भृगुनन्दनोऽभिरामघोरा प्रियंकरा भयकरा च । खड्गकुब्जादिवद्विशेषणसमास । मूर्तिं शरीरम् । आनुपूर्वीमिति यावत् । बिभ्रद्धारयन् । अथर्वणा प्रोक्तो वेदोऽथर्वा तमधीत आथर्वणिक । वसन्तादिलाट्ठक् । दाण्डिनायनादिसूत्रे निपातनाट्टिलोपाभाव· । आथर्वणिकस्याम्नाय आथर्वग । 'चरणाद्धर्मान्नाययो' इति प्रकरणे 'आथर्वणिकस्येकलोपश्च' इत्यनेनाण्प्रत्यय इकलोपश्च । आम्नायस्तु प्रत्ययस्य वाच्यकोटौ न निविशत अतो नाथर्वणो वेद इत्यादौ पौनरुक्त्यम् । निगम इवाम्नाय इव चकास्ति प्रकाशते । 'चकासृ दीप्तौ' इत्यस्माल्लट् । उपमेये प्रणतानुग्रहात्पुण्यत्व प्रत्यर्थिनिग्रहाद्भीमकर्मत्वम् । उपमाने स्वरतो वर्णतश्चाभिरामत्व वाच्येनाभिचारविधिना घोरत्वमिति विभाग ॥ २४ ॥ **अयं हीति** । अयं भार्गव । अस्य चोत्तरत्रान्वय· । **कल्पेति** । कल्पस्य ब्रह्मदिनोपहितस्य प्रपञ्चस्य । 'कल्पस्तु प्रलये न्याये शास्त्रे ब्रह्मदिने विधौ' इति रत्नमाला । अपाये नाशने प्रणयि प्रीतिमत्कालरुद्रानलत्वं सर्वमृत्युभूतरुद्रात्मकत्राग्निभाव विदधत्कुर्वाण· । 'नाभ्यस्ताच्छतु' इति नुम्निषेध । तिग्मस्तीक्ष्ण । निखिलभुवनस्तोमस्य सकलजगतसमूहस्य निर्माथे ध्वंसने योग्योऽनुकूल कृतसमुत्थान· सन् । 'परमात्मतपो वेदे ब्रह्म ब्रह्माब्जजे द्विजे' इति रत्नमाला । राशीभूतः सघातीभूत· । शक्तेरमूर्तत्वेन राशित्वायोगादभूततद्भावे च्विप्रत्यय । देवदेवस्य त्रिपुरपीडितैरिन्द्रादिभिः स्तुतस्य । अतएव सरब्धस्य सक्रोधोद्यमवत । त्रयाणां पुराणा समाहारस्त्रिपुरम् । पात्रादिलात्स्त्रीत्वाभाव· । तस्य जयिनो जेतु रुद्रस्य । 'जि अभिभवे' इति पाठिताज्जयतेः 'जिदृक्षिविश्यर्तीण्वमाव्यधाभ्यमपरिभूप्रसूभ्यश्च' इति कर्तरीनिप्रत्यय । सामर्थ्यांना सहारशक्तीना सार इवोत्कर्ष इव । भवतीति शेष । उत्प्रेक्षालंकारः । ब्रह्मच्छद्मेत्यत्र छपह्नवविशेषोऽलकारः ॥ २५ ॥ स्वाच्छन्द्यस्य स्वाभिप्रायेण वर्तमानस्य । 'अभिप्रायश्छन्द आशय' इत्यमर । स्व आ-

ज्योतिर्ज्वालाप्रचयजटिलो भाति कण्ठे कुठार-
स्तूणीरोऽसे वपुषि च जटाचापचीराजिनानि ।
पाणौ बाणः स्फुरति वलयीभूतलोलाक्षसूत्रं
वेष. शोभां व्यतिकरवतीमुग्रशान्तस्तनोति ॥ २६ ॥

प्रिये, एते गुरवः । तदपसृत्य कृतावगुण्ठना भव ।

सीता—हंद्धि हद्धि । परागदो एव्व । (अञ्जलिं बद्ध्वा ।) अज्जउत्त, परित्ताअहि साहसिअ ।

रामः—अयि प्रिये,

मुनिरयमथ वीरस्तादृशस्तत्प्रियं मे
विरमतु परिकम्प· कातरे क्षत्रियासि ।

---

१. हा धिक् हा धिक् । परागत एव । आर्यपुत्र, परित्रायस्व साहसिक ।

त्मीयश्छन्दोऽभिप्रायो न तु लोकशास्त्रव्यपेक्षा यस्य स स्वच्छन्दस्तस्य कर्मेत्यर्थे ब्राह्मणादेराकृतिगणत्वात्स्वच्छन्दशब्दाद्भावे ष्यञ् । तस्य वैचित्र्यं वैविध्यं विस्मयनीयमित्यर्थ । **ज्योतिरिति** । अत्रभवत इत्यनुषज्यते । अत्रभवत. परशुरामस्य कण्ठे ज्योतिषा तेजसा ज्वालानां निर्गताशाना प्रचयेन समूहेन जटिलो जटावानिति । पिच्छादेराकृतिगणत्वाज्जटाशब्दान्मत्वर्थीय इलच् । कुठार परशुर्भाति । किंच अंसे भुजशिखरे तूणीर इषुधिः । भातीत्यनुषङ्ग । किंच वपुषि शरीरे जटाचापचीराजिनानि भातीत्यस्यानुषङ्गो बहुवचनान्ततया विपरिणामश्च । तेन भान्तीति लब्धम् । वपुषीति सामान्योक्तावपि सामर्थ्याज्जटाया शिरसि चापस्य वामपाणौ चीरस्य कव्यामजिनस्योरसि च भानमनुसधेयम् । किंच वलयीभूत लोलमक्षसूत्र रुद्राक्षग्रोतसूत्र यस्मिन्स तथोक्तस्तस्मिन् । पाणौ दक्षिणकरे बाण स्फुरति प्रकाशते । यत एव तत उग्रशान्तो भयंकर प्रियकरश्च । खञ्जकुब्जादिवद्विशेषणसमास । पूर्वोक्तकुठारादिभिर्निष्पादित कृत्रिम आकारो व्यतिकरवती वीररसशान्तिरसयोर्मेलनवती शोभा चारुता तनोति । विस्तारयतीत्यर्थः । अत्र कुठारतूणीरचापबाणैरुग्रत्वं जटाचीराजिनाक्षसूत्रैः शान्तत्वमिति विवेक ॥ २६ ॥ एत इति पूजाया बहुवचनम् । गुरव । वसिष्ठसनाभित्वाच्छ्वशुरकुलसमाधिना गुरुत्वोक्ति । अवगुण्ठनमाच्छादनम् ॥ परागत एव । भार्गव समीप गत एवेत्यर्थ । आर्य श्वशुरस्य पुत्रो भर्तेति भर्तुर्व्यपदेशोऽयमार्यपुत्र इति । परित्राणमिह परशुरामसमीपगमनाभावरूपं विवक्षितम् ॥ **मुनिरिति** । अयं परशुरामो मुनि· परमात्ममननशीलो भवति । अथेति गुणान्तरप्रस्तावे । अयं परशुरामस्तादृशो वीरो लोकोत्तरो वीरो भवति । इति यत्तन्मुनित्वमहावीरत्वमेलनं मे प्रियम् । यत एवं ततो हे कातरेऽधीरे परिकम्पो वेपथुर्विरमतु नश्यतु । 'व्याङ्परिभ्यो रम·' इति परस्मैपदम् । किंच कातरे, त्वं क्षत्रियासि । क्षत्रियजातीयासी-

तपसि वितततकीर्तेर्दर्पकण्डूलदोष्णः
परिचरणसमर्थो राघवक्षत्रियोऽहम् ॥ २७ ॥

(तत प्रविशति क्रुद्ध परशुराम·।)

परशुरामः—हुम्। अहो, दुरात्मनः क्षत्रियबटोरनात्मज्ञता।

न त्रस्तं यदि नाम दूतकरुणासंतानशान्तात्मन-
स्तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः।

त्यर्थ·। अतोऽपि परिकम्पो न युक्त इति भाव। 'अर्यक्षत्रियाभ्या वा स्वार्थे' इति वैकल्पिकढीषानुगागमयोरभावे क्षत्रियशब्दाद्योपधाट्टाप्। तत्प्रिय मे इत्युक्तं विवृणोति **—तपसीत्यादिना**। राघवक्षत्रियोऽहं रघुवशज. क्षत्रियोऽहम्। तपसि कायशोषणादितयोविषये विततकीर्तेर्विस्तृतयशसो दर्पेण शौर्यगर्वेण कण्डूलौ निर्घर्षणसापेक्षत्वरूपकण्डूलप्रचुरौ। सिध्मादौ 'क्षुद्रजन्तूपतापाच्च' इति कण्डूशब्दाल्लच्। दोषौ भुजौ यस्य स तथोक्तस्यात्रभवत परशुरामस्य परिचरणे शुश्रूषणे समर्थ.। शक्तो भवामीत्यर्थ। अत्र तपसीत्यादिविशेषणद्वय परिचरणकर्मकारके परशुरामे प्रयुक्तम्। राघवक्षत्रिय इति परिचरणकर्तृकारके स्वस्मिन्विशेषणद्वयं प्रयुक्तम्। अस्यायमाशय। लङ्घतेर्नलोपश्च 'वालमूललघ्वङ्गुलीनां वा लो रत्नमापद्यते' इति सूत्रवार्तिकाभ्या 'लघि गतौ' इत्यस्माद्रघुशब्दो निपातित। 'गत्यर्था बुध्यर्था' इति गत्यर्थाना बुध्यर्थत्वाल्लङ्घते जानाति सर्वमिति रघुरिति ज्ञानाधिकत्वं रघुपदप्रवृत्तिनिमित्तं भवति। उक्त च कालिदासेन—'श्रुतस्य यायादयमन्तमर्भक' इति। तथा च मम ज्ञानाधिकरघुवंशजन्मानुगुणं तपोनिष्ठमहनीयविषये परिचरणसामर्थ्यम्। क्षत्रियत्वानुगुण तु दर्पकण्डूलदोष्कतादृशविषये परिचरणसामर्थ्यम्। परिचरणं हि नाम महनीयविषये तदभिप्रायानुसारेण संप्रीणनव्यापारम्। तच्च पादसवाहनादिरूप युद्धरूप वा भवतीत्युभयविधपरिचरणविषयत्वयोग्ये परशुरामे तादृश उभयविधपरिचरणकर्तृत्वयोग्यो भवामीति मम तत्समागम. प्रिय इति। यद्वा उक्तरीत्या ज्ञानाधिकरघुवंशजत्वाज्ज्ञानप्रधानतपोनिष्ठपरशुरामविषये परिचरणसमर्थं शुश्रूषायोग्योऽहम्। क्षत्रियत्वाद्दर्पकण्डूलदोष्कतद्विषयपरितोषणसमर्थश्च भवामीत्यर्थ.। 'कुगतिप्रादय.' इत्यत्र प्रादिग्रहणेनैव सिद्धे कुग्रहणं प्रादिसमासस्य क्वचित्कता ज्ञापयतीति वैयाकरणोक्त्या परीत्यस्य न समासः। 'पर्यभिभ्या च' इत्यत्र वाग्रहणानुवृत्तेस्तसिलभावश्च। परिचरणसमर्थ इति पदत्रयं बोध्यम्। श्लेषोऽलंकार ॥ २७ ॥ दुरात्मनो दुर्बुद्धे. क्षत्रियबटोः क्षत्रियबालकस्यानात्मज्ञता स्वस्वभावज्ञानशून्यता। विस्मयनीयेत्यर्थ। **न त्रस्तमिति**। धनुश्चापं व्यारुजता भग्न कुर्वता। 'रुजो भङ्गे' इति तौदादिकादारुजतेर्लट शतरि तुदादिभ्य शस्य डित्त्वाद्गुणाभाव। तेन क्षत्रियबटुना रामेण कर्त्रा भगवत. षाड्गुण्यपूर्णाद्देवात्सर्वाराध्याद्भूतेषु करुणाया कृपाया सतानेनाविच्छिन्नप्रवाहेन। 'सताना स्युरवच्छित्तिवंशापत्यप्ररुहा.' इति रत्नमाला। शान्त.

तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथवा शिष्यः कथं न श्रुतः ॥२८॥
एष एव मे प्रशमस्य कर्कशः परिणाम. ।
यत्क्षत्रियेष्वपि पुनः स्थितमाधिपत्यं
तैरेव संप्रति धृतानि पुनर्धनूंषि ।
उन्माद्यतां भुजमदेन मयापि तेषा-
मुच्छृङ्खलानि चरितानि पुनः श्रुतानि ॥ २९ ॥

रामः—

अकलिलतपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदध्माते रोषान्मुनावभिधावति ।

क्रोधादिरहित आत्मा हृदयं यस्य स तथोक्तस्तस्माद्भवानीपते पार्वतीपते । भवस्य पत्नी भवानी । 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' इति ङीषानुगागमश्च । तस्या पति शिवस्तस्मात् । 'भीत्रार्थाना भयहेतु.' इति पञ्चमी । न त्रस्तं नाम यदि त्रासाभाव सभाव्यते यदि । 'गत्यर्थाकर्मक–'इत्यादिना त्रस्यतेर्भावे क्त । 'नाम प्राकाश्यसभाव्यक्रोधोपगमकुत्सने' इत्यमर. । परदु खदु खित्वरूपदयावता परदु खानुत्पादात्तदधीनानर्थशङ्काविरह सभावितोऽपि यदीत्यर्थ । तेनेत्यनुषज्यते । तेन रामेण तत्पुत्रस्तस्य भवानीपते पुत्रो मदेन गर्वेणान्धस्य कृत्याकृत्यविवेकविरहितस्य तारकस्य तारकासुरस्य वधाद्धेतोर्विश्वस्य समस्तस्य प्राणिनो दत्तोत्सव. कृतानन्दजनकव्यापार । ददातीत्यत्र करोतीत्यर्थो लाक्षणिक इति विश्वशब्दान्न चतुर्थी । स्कन्दस्तु पूर्वोक्तकारुणिकभवानीपत्यपेक्षया सेनापतित्ववृत्तिप्रयुक्ततीक्ष्णत्वातिशययुक्त स्कन्द । 'तु स्याद्धेदेऽवधारणे' इत्यमर । कथं न श्रुत । एतादृशं स्कन्द श्रुत्वा रौद्रचापभङ्गाद्राम· कथं न निवृत्त इति भाव । अथवा स्कन्दाद्भयाभावे स्कन्द इव भवानीपते प्रिय इष्टस्ततोऽपि बलाधिक्यादिति भाव । शिष्यो भवानीपतेरधीतविद्योऽहं स्कन्दादपि बलिष्ठ· कथं न श्रुत । स्कन्दाधिकबलत्वादहं नाशक्त । किंच 'यथाशक्ति निगृह्णीत देवतागुरुनिन्दकान्' इति न्यायेन गुरुतिरस्कारो ममावश्यं परिहार्यः । अत कथं मामनाकलयन्नस्मद्गुरोश्चापमर्दितवानिति भावः ॥ २८ ॥ प्रशमस्य क्रोधविरते. कर्कशोऽनर्थरूपः परिणाम फलपर्यवसायिता । **यदिति** । क्षत्रियेष्वप्यतदर्हेषु क्षत्रियेष्वाधिपत्यं प्रभुत्वं पुनर्मया सर्वक्षत्रियविध्वंसनानन्तरमपि स्थितं तिष्ठति । किंच तैरेवातदर्हैः क्षत्रियैरेव सप्रति मज्जीवनकाले धनूंषि पुनर्धृतानि । किंच भुजमदेन भुजगर्वेणोन्माद्यता विभ्रान्तचित्ताना तेषा क्षत्रियाणामुच्छृङ्खलान्युन्मर्यादानि चरितानि वृत्तानि मया पुन श्रुतानीति यदेष एव मे प्रशमस्य परिणाम इति पूर्वेण सबन्ध. ॥ २९ ॥ **अकलिलेति** । कलिलो दोषमिश्रो न भवतीत्यकलिल. । 'सलिकल्यनिमहिभडिभण्डिश-

अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात्पाणिः पादोपसंग्रहणाय च ॥ ३० ॥

किंत्वविषयस्तावदाचारस्य ।

जामदग्न्यः—भो भोः परिष्कन्दाः, क्व रामो दाशरथिः ।

रामः—अयमहं भोः । इत इतो भवान् ।

जामदग्न्यः—साधु राजपुत्र, साधु । सत्यमैक्ष्वाकः खल्वसि ।

अन्विष्यतः प्रमथनाय ममापि दर्पा-
दात्मानमर्पयसि जातिविशुद्धसत्त्वः ।
गन्धद्विपेन्द्रकलभः करिकुम्भकूट-
कुट्टाकपाणिकुलिशस्य यथा मृगारेः ॥ ३१ ॥

ण्डिपिण्डितण्डिकुकीभूभ्य इलच्' इति कलतेरिलच्प्रत्यये सति कलिलशब्दो निष्पन्न.। कलिल इति मित्रो गहनश्चेति वैयाकरणा । तपस कायशोषणादेस्तेजसो माहात्म्यस्य वीर्यस्य बलस्य च प्रथिमा प्रभुत्व यस्य स तथोक्तस्तस्मिन् । 'पृथ्वादिभ्य इमनिज्वा' इति भाव इमनिच् । 'रक्ऋतो हलादेर्लघो' इति ऋकारस्य रेफश्च । यशस पूर्वोक्त-गुणवत्ताप्रथाया निधावक्षयस्थानेऽवितथेन पूर्वोक्ताना तप प्रभृतीना हेतूना सद्भावा-द्वस्तुभूतेन मदेन गर्वेण ध्माते परिपूरिते मुनौ परशुरामे रोषादभिधावति सति शीघ्र-मागच्छति सति पाणिर्मम हस्तोऽभिनवयाद्यैव गृहीतया । प्रमोषरहितयेत्यर्थ. । धनु-र्विद्यया धनुर्विषयकज्ञानातिशयेन यो दर्पो गर्वस्तस्य क्षमायानुगुणाय कर्मणे च युद्धाय च पादयोरुपसग्रहणायाभिवादनेन स्पर्शनाय च रभसाद्धर्षाद्वेगाद्वा स्फुरति प्रवर्तते । अत्र तपस्तेजोभ्या परशुरामस्य पादोपसग्रहण वीर्यमदाभ्या युद्धं च योग्यमिति भाव । पाणिरिति जातावेकवचनम् ॥ ३० ॥ **किंत्विति** । आचारस्य चिकीर्षि-तस्य युद्धपादोपसग्रहणयोरन्यतरानुष्ठानस्याविषयोऽनवसर । अयुध्यमाने युद्धे दोष स्यात् । युयुत्सो पादग्रहणेऽपि शालीनत्वरूपो दोष स्यात् । अतो यथाभिलषितमनु-ष्ठानमद्य न युज्यत इत्यर्थ. ॥ भो भो इत्यादि व्याख्यातम् ॥ अयमहं भो इत्यादि स्पष्टोऽर्थ ॥ **अन्विष्यत इति** । जाल्योत्पत्त्या विशुद्धसत्त्वः परिशुद्धहृदयस्त्वं प्रम-थनाय विशसनायान्विष्यतोऽपि मृगयमाणस्यापि मम मह्यं दर्पाद्वीर्यगर्वादात्मान स्वं गन्धद्विपेन्द्रस्य मदगन्धयुक्तगजजातिविशेषश्रेष्ठस्य कलभ. पोतक । 'कलभ. करि-शावक.' इत्यमरः । करिणा गजाना कूटानीव गिरिशृङ्गाणीव । 'कूटोऽस्त्री गिरिशृङ्गे यन्त्रे राशावयोधने व्याजे । अनृते मायायामपि सीराङ्गे निश्चले च पापे च ॥' इति रत्नमाला । कुम्भा शिर.पिण्डा । 'कुम्भौ तु पिण्डौ शिरस.' इत्यमर । तेषा कुट्टाक छेदनकरम् । 'कुट्ट च्छेदने' इत्यस्मात् 'जल्पभिक्षकुट्टलुण्टवृन्द षाकन्' इति षाकन्प्रत्यय । पाणिरेव कुलिशं यस्य स तथोक्तस्य मृगारेः सिंहस्यात्मानं यथा स्वात्मानमिवार्पयसि । प्रापयसीत्यर्थ. । 'ऋ गतौ' इत्यस्माण्णिच् । 'अर्तिह्वीक्ली-

स्त्रियः—सन्तं पावं सन्तं पावम् । पडिहदं अमङ्गलम् ।

जामदग्न्यः—(निर्वर्ण्य । स्वगतम् ।) रमणीयक्षत्रियकुमार आसीत् ।

चञ्चत्पञ्चशिखण्डमण्डनमसौ मुग्धप्रगल्भं शिशु-
गंम्भीरं च मनोहरं च सहजश्रीलक्ष्म रूपं दधत् ।
द्राग्दृष्टोऽपि हरत्ययं मम मनः सौन्दर्यसारश्रिया
हन्तव्यस्तु तथापि नाम धिगहो वीरव्रतक्रूरताम् ॥ ३२ ॥

(प्रकाशम् ।)

प्रागप्राप्तनिसुम्भशांभवधनुर्द्वैधाक्रियाविर्भव-
त्क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणम् ।

---

१. शान्तं पाप शान्तं पापम् । प्रतिहतममङ्गलम् ।

क्रूयीक्ष्माय्याता पुङ् णौ' इति पुक् । 'पुगन्तलघूपधस्य च' इति गुण । अत सत्यमैक्ष्वाकोऽसीति पूर्वेण सबन्धः ॥ ३१ ॥ **शान्तं पापमिति** । परशुरामप्रयुक्तेनानिष्टवचनेन रामस्य दुरितं शाम्यतामित्यर्थं । 'आशसाया भूतवच्च' इति निष्ठा । प्रतिहतममङ्गलम् । पूर्वोक्तपापहेतुक मङ्गलविपरीतं प्रतिहन्यतामित्यर्थं । अत्रापि पूर्ववन्निष्ठा ॥ **स्वगतमिति** । रहस्यार्थस्य स्वयमनुसधाने स्वगतशब्द । तदुक्तम्—'सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम्' इति । **चञ्चदिति** । 'वञ्चुचञ्चुतञ्चुलञ्चु-म्लुञ्चुम्लुञ्चुम्रुचुम्लुचु गत्यर्था.' इति चञ्चतिर्गत्यर्थं पठित । पञ्चशिखण्डा शिखामण्डनं भूषण यस्य तत्तथोक्तम् । 'शिखण्ड· पिच्छचूडयो' इति रत्नमाला । मुग्ध नवम् । बाल्ययुक्तमित्यर्थं । प्रगल्भ प्रभावत प्रौढम् । 'मुग्ध सौम्ये नवे मूढे' इति रत्नमाला । विशेषणसमास । गम्भीर च निपुणैरप्यपरिच्छेद्यस्वभावं च मनोहर च रमणीयं च । सहजानि स्वाभाविकानि श्रीलावण्यलक्ष्माणि सामुद्रिकशास्त्रप्रसिद्धानि महापुरुषलक्षणानि यस्मिंस्तत्तथोक्त रूपमाकारम् । 'रूप स्वभावे शुक्लादौ सौन्दर्ये नाटकेऽपि च । ग्रन्थाकृत्यो' इति रत्नमाला । दधद्दहन्नसौ शिशुरारब्धयौवनो रामो द्राग्दृष्टोऽप्यद्यैव मयावलोकित सन्नपि सौन्दर्यसारस्य सौन्दर्यश्रेष्ठस्य श्रिया समृद्ध्या मम मन आततायिनोऽपि मे हृदय हरति स्ववशं नयति । प्रीतिकरो भवतीत्यर्थः । तथाप्येवं प्रीतिकरत्वेऽप्यसौ हन्तव्यस्तु नाम मया हन्तव्य एवेत्यभ्युपगम्यते । 'तु स्याद्धेदेऽवधारणे' इति, 'नामप्राकाश्यसभाव्यक्रोधोपगमकुत्सने' इति चामर· । वीराणां व्रतस्य युद्धकर्तव्यतानियमस्य क्रूरता धिक् । क्रूरता निन्द्येत्यर्थं । 'धिगुपर्यादिषु त्रिषु' इति द्वितीया । 'धिङ् निर्भर्त्सननिन्दयो' इत्यमरः ॥ ३२ ॥ **प्रागिति** । प्राक्पूर्वम् । प्राप्तमनुभूतं निसुम्भ प्रहारो येन तत्तथोक्तम् । निसुम्भशब्दस्ताडने रूढः । तथाविधस्य शाभवधनुषो रौद्रचापस्य । शंभुशब्दात् 'तस्येदम्' इत्यण् । द्वेधाक्रियया द्विधाकरणेन । खण्डद्वयकरणेनेति यावत् । 'एधाच्च' इति द्विश-

सज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥ ३३ ॥

स्त्रियः—हद्धी हद्धी । पज्जलिदो क्खु एसो ।

रामः—(सधैर्यबहुमानं निर्वर्ण्य ।) अयं स किल यः सपरिवारकार्ति-केयविजयावर्जितेन भगवता नीललोहितेन सहस्रपरिवत्सरान्तेवासिने तुभ्य प्रसादीकृतः परशुः ।

---

१. हा धिक् हा धिक् । प्रज्वलितः खल्वेषः ।

ब्दादेधाच्प्रत्यय । आविर्भवताधिकमुत्पद्यमानेन क्रोधेन कोपेन प्रेरितस्य भीमस्य भयकरस्य भार्गवस्य परशुरामस्य भुजस्तम्भेन स्तम्भसदृशभुजेनापविद्ध क्षिप्त स-ज्वालो ज्वालासहितोऽशिथिलो दृढ परशु कुठारस्त्वत्कण्ठ एव पीठमासनम् । 'कण्ठो वाचकशब्दे स्यात्सनिधाने गले ध्वनौ' इति रत्नमाला । अतिथि· क्षण भवतु । अति-थिर्ह्यासन उपविष्टो भवति तद्वदयं परशुस्त्वत्कण्ठे क्षण तिष्ठत्वित्यर्थ । येन पूर्वोक्त-नानेन पुरोवर्तिना परशुना देवोऽपि जिगीषुर्हरो रुद्रो जगत्सु लोकेषु खण्डपरशु· ख्याप्यते खण्डपरशुनाम्ना प्रसिद्ध क्रियते । 'ख्याप्रकथने' इत्यस्माण्णिचि पुगागमे कर्मणि लटि यक् । खण्डयत्यहितानिति खण्ड । खण्डः परशुर्यस्येति विग्रह । 'भूतेश खण्डपरशु' इत्यमर· । उत्तरयच्छब्दस्य तच्छब्दनिरपेक्षत्वात्तच्छब्दो न प्र-युक्त । यद्वा सज्वाल इत्यत्र 'स ज्वाल' इति पदद्वयम् । ज्वलतीति ज्वाल । 'ज्वलि-तिकसन्तेभ्यो ण' इति कर्तरि णप्रत्यय । येन ख्याप्यते स परशुरित्यादि योजयि-तव्यम् । अत्र 'जृम्भितं तद्धनुर्दृष्ट्वा शैव विष्णुपराक्रमै' इति श्रीमति रामायणे स्थितम् । कालिदासेनापि 'विद्धि चात्तबलमोजसा हरेरैश्वर धनुरभज्ञि यत्त्वया । खातमूलमनिलो नदीरयै पातयत्यपि मृदुस्तटद्रुमम्' इत्युक्तम् । भोजराजेनापि 'जीर्णचापात्तकीर्ते' इत्युक्तम् । प्रकृते तु "प्रागप्राप्तनिसुम्भशाभवधनु' इत्युक्तम् । अनयोर्विरोधस्त्वित्थं शमयितव्य । विष्णोरन्येन केनाप्यभग्नपूर्वमिदं धनुर्भञ्जितव-त्त्वत्व कण्ठे कुठारोऽयं पतत्विति । अथवा प्रागप्राप्तनिसुम्भेति सबुद्ध्यन्तं रामवि-शेषणम् । पूर्वमननुभूतप्रहार हे राम, शाभवं धनुरित्यादि योजयितव्यम् ॥ ३३ ॥ एष परशुराम· । क्रोधेनेति शेष· ॥ **अयमिति** । यः सपरिवारस्य ससैन्यस्य कार्ति-केयस्य स्कन्दस्य विजयेनाभिभवेन हेतुनावर्जितेन वशीकृतहृदयेन नीललोहितेनार्ध-नारीश्वरेण । नीलत्व नार्यंशे, लोहितत्वं स्वांशे । सहस्रस्य परिवत्सराणा समाहारः सहस्रपरिवत्सरम् । पात्रादित्वात्क्लीबत्वम् । सहस्रपरिवत्सरमन्तेवासीति विग्रह । अत्यन्तसयोगे द्वितीया । सुप्सुपेति समास· । अन्ते वसतीत्यन्तेवासी । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनि· । 'शयवासवासिष्वकालात्' इति सप्तम्या अलुक् । 'छात्रान्तेवासिनौ शिष्ये' इत्यमर । प्रसादीकृत । प्रसादशब्दोऽनुग्रहवाचको लक्ष-णया तत्पूर्वके देये वर्तते । तस्मादभूततद्भावे च्वि, कृञोऽनुप्रयोग । अय किलायं

सख्यः—भट्टिदारिए, पेक्ख पेक्ख । हिअअणिव्वत्तिदबहुमाणो णिक्कम्पधीरगुरुअत्तणेण ओअहसदि विअ भअवदो भग्गवस्स आउहं भट्टिदारओ ।

(सीता सविस्मयास्यं पश्यति ।)

जामदग्न्यः—(स्वगतम् ।) आश्चर्यम् । अन्य एवायं प्रकारः । किमपि चैतदसंविज्ञातनिबन्धनं माहात्म्यं सौजन्यं चोत्साहसंरम्भगम्भीरश्च पौरुषावष्टम्भः । (प्रकाशम् ।) आं दाशरथे, स एवायमाचार्यपादानां प्रियः परशुः ।

सख्यः—क्खणं तु पसण्णरोसस्स विअ आलावो ।

जामदग्न्यः—

अस्त्रप्रयोगखुरलीकलहे गणानां
सैन्यैर्वृतोऽपि जित एव मया कुमारः ।

---

१. भर्तृदारके, प्रेक्षस्व प्रेक्षस्व । हृदयनिर्वर्तितबहुमानो निष्कम्पधीरगुरुकत्वेनापहसतीव भगवतो भार्गवस्यायुध भर्तृदारकः ।

२. क्षण तु प्रशान्तरोषस्येवालापः ।

स इति सभाव्यते । 'वार्तासंभाव्ययो. किल' इत्यमर ॥ हृदयनिर्वर्तितबहुमानो मनसा बहु मानयन् । निष्कम्पश्चासौ धीरश्चासौ गुरुकश्चेति विग्रहे खञ्जकुब्जादिवत्समास. । तस्य भावस्तत्त्व तेनापहसति । प्रयासानुरूपफलाभावादपहास. । भर्तृदारको राजपुत्र ॥ विस्मयो रामधैर्यादिना । अस्त्रमेवमपहासे कि भविष्यतीति दु खेन । अन्य एवाय प्रकार । कार्तवीर्यस्कन्दहेरम्बादिषु दृष्टाद्विलक्षण इत्यर्थ. । **किमपीत्यादि** । असविज्ञातनिबन्धन दुर्निरूपाकारकमेतन्माहात्म्यं महापुरुषत्वं च सौजन्यं च गुणग्राहिलादिसुजनधर्मश्च किमपि । अनिर्वाच्यमित्यर्थ । किचोत्साहेन स्थेयसा प्रयत्नेन सरम्भेण क्रोधेन च गम्भीरो दुर्ज्ञेय पौरुषस्य पुरुस्यावष्टम्भ स्थैर्यम् । 'अवाचालम्बनाविदूर्ययो' इति स्तम्भे षत्वम् । आ दाशरथे । आमेवमित्यर्थ. । 'आमेवम्' इत्यमर. । आचार्यपादानाम् । 'उत्तमाना स्वरूप तु पादशब्देन पठ्यते' । अस्मद्गुरो. । शिवस्येत्यर्थः ॥ प्रसन्नरोषस्य प्रशान्तकोपस्य ॥ **अस्त्रेति** । अस्त्रप्रयोगस्य खुरल्या लक्ष्यप्रबन्धनस्य । 'खुरली लक्ष्यबन्धनम्' इति केशव । कलहेऽन्योन्यसघर्षे । गणाना प्रमथानाम् । सैन्यभेदे समूहे च सख्याया प्रमथे गण.' इति रत्नमाला । सैन्यै सेनासमवेतैर्वृतोऽपि कुमार एव स्कन्द एव । 'कुमारो ना सुते स्कन्दे युवराजे श्वपाचके' इति रत्नमाला । मया जित कुमार एवेत्यनेन न त्वन्यः प्रबल

एतावतापि परिरभ्य कृतप्रसादः
प्रादादिमं प्रियगुणो भगवान्गुरुर्मे ॥ ३४ ॥

रामः—(स्वगतम् ।) कथमेतावतापीत्याह । अहो गर्वगौरवस्याभोगः । (प्रकाशम् ।) अतश्च भगवन्, द्यावापृथिव्योर्विततस्ते वीरवाद. ।

येनैव खण्डपरशुर्भगवान्प्रचण्ड-
श्चण्डीपतिस्त्रिभुवनेषु गुरुः प्ररूढः ।
तेनैव तारकरिपोर्विजयार्जितेन
दीप्तिं गता परशुराम इति श्रुतिस्ते ॥ ३५ ॥

किंच ।

उत्पत्तिर्जमदग्नितः स भगवान्देवः पिनाकी गुरुः
शौर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत्कर्मभिः ।
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधि.
क्षत्रब्रह्मतपोनिधेर्भगवतः किं वा न लोकोत्तरम् ॥ ३६ ॥

इत्यपरितोषो व्यज्यते । प्रियगुणो गुणपक्षपाती भगवान्षाड्गुण्यपूर्णो मे गुरु शिव एतावताप्यल्पेनाप्यनेन स्कन्दविजयरूपेण निमित्तेन कृतप्रसाद कृतानुग्रह सन्परिरभ्याश्लिष्येमं परशु प्रादादत्तवान् । ददातेर्लुङ् । 'गातिस्थाघुपाभूभ्य सिच परस्मैपदेषु' इति सिचो लुक् ॥ ३४ ॥ **कथमित्यादि** । स्कन्दविजयस्य कथमल्पतामाहेत्यर्थं । गर्वगौरवस्य गर्वाधिक्यस्याभोगो वैपुल्यं सनिवेशो वा । अत एतस्माद्धेतोः परशो प्रदानाद्वीरवादो वीर इति वाद शब्दो द्यावापृथिव्योर्दिवि भुवि च । द्यौश्च पृथिवी चेति विग्रहे द्वन्द्वे 'दिवसश्च पृथिव्याम्' इति चकाराद्दिवो द्यावादेश. । विततं । विस्तृत इत्यर्थं । **येनेत्यादि** । येन परशुना भगवान्गुरुः प्रचण्डस्तीक्ष्णश्चण्ड्या पार्वत्या पतित्रिभुवनेषु त्र्यवयवकेषु भुवनेषु । शाकपार्थिवादेराकृतिगणत्वादुत्तरपदलोप । यद्वा समाहारबहुत्वाद्बहुवचनम् । खण्डपरशु प्ररूढ· खण्डपरशुरिति प्रसिद्धस्तारकरिपो· स्कन्दस्य विजयार्जितेन विजयसपादितेन तेनैव परशुनैव ते परशुराम इति श्रुतिः परशुराम इत्याख्या दीप्तिं गता । प्रसिद्धिं गतेत्यर्थं ॥ ३५ ॥ **उत्पत्तिरिति** । भगवत· पूज्यस्य तव जमदग्नितो जमदग्ने सकाशादुत्पत्तिर्जन्म । किंच क्षत्रब्रह्मण क्षत्रियवेदस्य । धनुर्वेदस्येति यावत् । तपसश्च निधेराधारभूतस्य भगवत· पूज्यस्य तव स प्रसिद्धो भगवान्षाड्गुण्यपूर्णो देवो दीप्तिशील पिनाकी शिवो गुरुर्धनुर्विद्योपदेष्टा । किंच यत्तव शौर्यं तद्गिरा पथि न भवति । वाचामगोचर भवतीत्यर्थः । तच्छौर्यस्य वाचामगोचरत्वं कर्मभि स्कन्दविजयादिव्यापारैर्व्यक्त हि प्रसिद्धं हि । नन्वित्यवधारणे । किंच भगवतस्त्यागः स्वद्रव्याणा वीरेभ्य प्रतिपादनम् । सप्तानां समुद्राणा समाहारः सप्तसमुद्रम् । पात्रादित्वात्क्लीबत्वम् । तेन मुद्रितायां

सख्यः—जाणादि महाभाओ गुरुसु रमणिज्जं मन्तिदुम् ।

जामदग्न्यः—

राम राम नयनाभिरामता-
माशयस्य सदृशी समुद्वहन् ।
अप्रतर्क्यगुणरामणीयकः
सर्वथैव हृदयंगमोऽसि मे ॥ ३७ ॥

हेरम्बदन्तमुसलोल्लिखितैकभित्ति
र्वक्षो विशाखविशिखव्रणलाञ्छितं मे ।
रोमाञ्चकञ्चुकितमद्भुतवीरलाभा-
त्सत्यं ब्रवीमि परिरब्धुमिवेच्छति त्वाम् ॥ ३८ ॥

---

१. जानाति महाभागो गुरुषु रमणीय मन्त्रयितुम् ।

आवृताया मह्या भूमेर्निर्व्याज ख्यात्यादिनिरपेक्षं दानं काश्यपाय प्रतिपादनमवधिः सीमा यस्य स तथोक्त । भवतीति शेष । 'अवधाने परिच्छेदे सीम्नि काले बलेऽवधि' इति रत्नमाला । यत एव क्षत्रब्रह्मतपोनिधेर्भगवतस्तव किं वा पूर्वोक्तेष्वभिजनविद्यावृत्तेषु किं वा लोकोत्तर न भवति । सर्वमेव लोकश्रेष्ठ भवतीत्यर्थ । किमिति सामान्ये नपुसकम् । उत्पत्तिरित्यभिजन उक्तः । भगवानिति विद्योक्ता । शौर्यमिति त्याग इति चाभिजनविद्यानुगुणमुभयविधं वृत्तमुक्तमिति द्रष्टव्यम् ॥ ३६ ॥ रमणीयं हृद्यं यथा तथा मन्त्रयितुम्। 'मन्त्रि गुप्तपरिभाषणे' इति धातुपाठः। **रामा रामेति ।** राम राम । संबुद्धौ द्विरुक्तिः । आशयस्य गुरुद्विजभक्त्यादिरूपस्य मनोव्यापारस्य सदृशीमनुरूपा नयनाभिरामता चक्षु प्रियता समुद्वहन्बिभ्राणोऽप्रतर्क्यमचिन्त्यं गुणान्तर रूपादिविग्रहगुणाना ज्ञानशक्त्याद्यात्मगुणाना च रामणीयक रमणीयत्व यस्य स तथोक्त । रमणीयशब्दात् 'योपधाद्गुरूपोत्तमाद्वुञ्' इति भावे वुञ्प्रत्यय । सर्वथा रूपगुणादिभि सर्वैं प्रकारैर्मे हृदयंगमोऽसि । शत्रोरपि मम हृद्योऽसीत्यर्थ । खच्प्रकरणे 'गमे सुपि वाच्य' इति वार्तिकेन हृदयशब्दोपपदे गमे खच्प्रत्यये हृदयशब्दस्य मुमागमे च सति हृदयंगमशब्दो निष्पन्नः ॥ ३७ ॥ **हेरम्बेति ।** राम रामेति पूर्वस्मादनुषज्यते । हेरम्बस्य विघ्नेश्वरस्य दन्तमुसलेन मुसलसदृशदन्तेनोल्लिखितैकभित्तिरेकपार्श्वो यस्य तत्तथोक्तम् । भित्तिशब्दोऽत्र भित्तिसदृशपार्श्ववाची । 'एकभक्ति' इति पाठ उल्लिखितैकभागमित्यर्थः । 'भक्ति. स्याद्भागसेवयो' इति रत्नमाला । हेरम्बस्यैकदन्तत्वादेकभागस्योल्लिखितत्वम् । विशाखस्य स्कन्दस्य । 'विशाखः शिखिवाहन' इत्यमर । विशिखानां बाणाना व्रणैर्लाञ्छित चिह्नित मे वक्ष कर्तृ । अद्भुतस्याश्चर्यकरस्य वीरस्य लाभात्प्राप्त्या रोमाञ्चै पुलकै कञ्चुकित सजातकञ्चुकं स त्वा परिरब्धुमिच्छल्यालिङ्गितुमिच्छति । सत्यं ब्रवीमि यथार्थं वदामि । इवशब्दो

सख्यः—भट्टिदारिए, पेक्ख पेक्ख भत्तुणो सोहग्गम्। तुमं क्खु णिच्च परिमुही अत्ताणं वञ्चेसि।

(सीता साश्रु निःश्वसिति।)

रामः—भगवन्, परिरम्भणं प्रस्तुतप्रतीपमेतत्।

सीता—धीरसिणो माहप्पसोहिदो से विणओ।

जामदग्न्यः—(स्वगतम्।) अहो, परगुणोत्कर्षतत्त्वेऽपि परिमाणग्राहि सौजन्यपूतमन्तःकरणमस्य राजन्यपोतस्य। पारमार्थिकविनयदुर्विभाव्यो निपुणबुद्धिग्राह्यो महानहंकारग्रन्थिः।

---

१. भर्तृदारिके, प्रेक्षस्व प्रेक्षस्व भर्तुः सौभाग्यम्। त्वं खलु नित्यं परिमुख्यात्मानं वञ्चयसि।

२. धीरमसृणो माहात्म्यशोभितोऽस्य विनयः।

वाक्यालंकारे ॥ ३८ ॥ सुभगस्य भाव सौभाग्यम्। सुभगशब्दाद्भावे ष्यञ्। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इति पूर्वोत्तरपदवृद्धि। शत्रुणापि हि श्लाघ्यत इति भाव। मुग्धात्वेन लज्जातिशयात्पराङ्मुखी सत्यात्मान स्वमीदृशसौभाग्यानुभवविमुखं करोषीत्यर्थः। परिशब्दो वर्जनार्थक। कर्मप्रवचनीयाना समासनिषेधस्त्वनित्य। यद्वा सर्वतोभावे परिशब्द। यतो यतो भर्तुर्मुखं ततस्ततोऽभिमुखमुखी सत्यपीत्यर्थ॥ **सास्रमिति**। एतावन्तं कालं मौग्ध्येन हतास्मि। इत पर परशुरामेणेति दुःखाद्वाष्पोदयः। प्रस्तुतस्य प्रकृतस्य प्रमथनस्य प्रतीपं प्रतिकूलम्॥ परशुरामोक्तपरिरम्भस्यात्यन्ताप्रतिषेधाद्विनय। प्रस्तुतप्रतीपत्वोक्त्यात्यन्तानभ्युपगमात्तस्य धीरत्वं मसृणत्वं किंचिदस्फुटत्वं च। अशक्तस्य च विनयोऽनुगुण इति तस्य माहात्म्याच्छोभितोक्तिरिति द्रष्टव्यम्। अस्य राजन्यपोतस्य राजन्यबालकस्य रामस्य। 'पोत पाकोऽर्भको डिम्भ पृथुक शावक शिशु' इत्यमर। अन्तःकरणं मन परस्य गुणानां शौर्यादीनामुत्कर्षातिशयस्य तत्त्वेऽपि याथार्थ्यविषयेऽपि परिमाणं पराकाष्ठा ग्राहयतीति परिमाणग्राहि। णिजन्ताद्ग्रहाते 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः। तेन सौजन्येन सुजनभावेन पूतं निर्दोषम्। भवतीति शेषः। यद्वा परेषा सर्वातिशायिना गुणानामुत्कर्षस्यातिशयस्य तत्त्वेऽपि वस्तुभूतत्वेऽपि परिमाणग्राहिणा काष्ठा प्राप्तेन। तत्र केवलाद्ग्रहातेर्णिनिः। सौजन्येत्यादे पूर्ववदर्थ। ईदृशशौर्यादिगुणातिशयवता सौजन्यं दुर्लभमिति भावः। परमार्थ एव पारमार्थिक। विनयादेराकृतिगणत्वात्स्वार्थे ठक्। यद्वा परमार्थाय प्रभवति पारमार्थिक। अर्थक्रियाकारीत्यर्थः। 'तस्मै प्रभवति सतापादिभ्य' इति ठक्। अनारोपित इत्यर्थ। तथाविधेन विनयेनानौद्धत्येन दुर्विभाव्योऽभिभूतो मन्दमतिभिर्दुर्ज्ञेयो निपुणबुद्धिभिर्दुरवगाहार्थावगाहनपटुमतिभिः पुरुषैर्ग्राह्यो ज्ञेयो महान्विपुलोऽहंकारस्य शौर्यातिशयादिनिबन्धनचित्तसमुन्नतेर्ग्रन्थिः पर्वः। 'ग्रन्थिः पर्वगदान्तरे' इति रत्नमाला। भवतीति शेषः।

अप्राकृतस्य चरितातिशयस्य भावै-
रत्यद्भुतैर्मम हृतस्य तथाप्यनास्था ।
कोऽप्येष वीरशिशुकाकृतिरप्रमेय-
सामर्थ्यसारसमुदायमयः पदार्थः ॥ ३९ ॥
सभाव्यसप्तभुवनाभयदानपुण्य-
सभारमस्य वपुरत्र हि विस्फुरन्ति ।
लक्ष्मीश्च सात्त्विकगुणज्वलित च तेजो
धर्मश्च मानविजयौ च पराक्रमश्च ॥ ४० ॥

अप्राकृतेति । अप्राकृतस्य प्राकृतजनस्वभावविजातीयस्य । 'प्राकृतस्तु पृथग्जन.' इत्यमर । चरितातिशयस्य वृत्तोत्कर्षस्याद्भुतैरत्याश्चर्यकरैर्भावै. स्वभावैः । 'भावः पदार्थे सत्ताया क्रियाचेष्टात्मयोनिषु । विद्वद्धीलास्वभावेषु भूत्यभिप्रायजन्तुषु ॥' इति रत्नमाला । हृतस्य वशीकृतस्य मम तथापि वशीकृतत्वेऽप्यनास्था । एतावन्त काल-मीदृशाहङ्कारग्रन्थिग्रहणे तात्पर्य नासीत् । अद्य तु तद्ग्रहण सम्यग्जातमिति भाव । तद्ग्रहणममिनीय वदति—कोऽप्येष इत्यादिना । वीरशिशुकाकृती रामात्मना भास-मान एष कोऽप्यनिर्वाच्य पदार्थोऽप्रमेयाना दुर्ज्ञेयानामपरिच्छिन्नाना सामर्थ्याना दुर्घटार्थसघट्टनशक्तीना ये सारा उत्कृष्टाशास्तेषा समुदायमय. । सघातस्वरूप इत्यर्थ. । स्वार्थे मयट् । समुदायादागत , समुदायस्य विकार , समुदायप्रचुरो वेत्यर्थः । 'हेतु-मनुष्येभ्योऽन्यतरस्या रूप्य.', 'तस्य विकार ', 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः', 'तत्प्रकृतवचने मयट्' इति च मयट् ॥ ३९ ॥ **सभाव्येति** । अस्य रामस्य वपुः शुभाकार । 'वपु काये शुभाकारे' इति रत्नमाला । सभाव्यो निश्चेयः । सप्तानां भुवनाना समाहार. सप्तभुवनम् । तस्मै यदभयदान भयसर्गाभावनिर्वहणं तदेव पुण्य धर्मस्तस्य सभारोऽतिशयो येन तत्तथोक्तम् । तथाविध भवतीति शेष. । 'रूप-मेवास्यैतन्महिमान व्याचष्टे' इति श्रुतिरत्रानुसधेया । अत्र रामवपुषि लक्ष्मीश्च लाव-ण्यात्मकशोभा च । 'लक्ष्मी सपद्मा शोभा' इति रत्नमाला । सत्त्वं सत्त्वगुणस्तत्र भवै । अध्यात्मादित्वाट्ठक् । गुणैर्निर्मलत्वप्रकाशवत्त्वनिरामयत्वसुखसङ्गित्वज्ञानसङ्गित्वा-दिभिर्ज्वलितं विशद तेजश्च । 'ब्रह्मविद इव सौम्य ते मुख भाति' इति श्रुतिप्रसिद्ध-दीप्तिविशेषश्च । सत्त्वगुणस्य ह्युक्तगुणहेतुत्वं भगवतैव गीतम्—'तत्र सत्त्वं निर्मल-त्वात्प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥' इत्यादिना । यद्वा सत्त्वं बलं तत्र भवाः सात्त्विका । 'सत्त्वं द्रव्ये पिशाचादौ व्यवसायस्वभावयोः । गुणप्राणबलस्वान्तसत्ताखड्गी तु जन्तुषु ॥' इति रत्नमाला । तथाविधैर्गुणैर्धैर्यादिभि-र्ज्वलितं प्रकाशितं तेजश्च । 'अधिक्षेपावमानादे प्रयुक्तस्य परेण यत् । प्राणात्ययेऽ-प्यसहनं तत्तेज समुदाहृतम् ॥' इत्युक्तलक्षणं तेजश्च धर्मश्च श्रौतस्मार्तोभ्युदयसाध-नगुणविशेषश्च । यद्वा धर्मो न्याय., अहिंसा वा धर्मः । 'अथ धर्मोऽस्त्री पुण्ये सामा-

अयं हि

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै ।
सामर्थ्यानामिव समुदयः संचयो वा गुणानां
प्रादुर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥ ४१ ॥

हे भवत्यः, प्रविशत्वियं वधूरभ्यन्तरमेव ।

रामः—(स्वगतम् ।) एवमेव ।

न्यभावयो । चापन्यायाध्वराहिंसायज्वाचारयमेषु ना ॥' इति रत्नमाला । मानो गर्वश्चित्तसमुन्नतिर्वा । 'मान स्त्रीणा कोपभेदे गर्वे चित्तोन्नतावपि' इति रत्नमाला । यद्वा मानं श्रुतिस्मृत्यादिजन्यं प्रमितिरूपं ज्ञानम् । 'मानं प्रमाणे प्रस्थादौ' इति रत्नमाला । विजय पराभिभवनं विशिष्टपरावधिकोत्कर्षश्च । 'जि जये', 'जि अभिभवे' आभ्यां भावे 'एरच्' इत्यच्प्रत्यय. । तौ च पराक्रमश्च शक्तिश्च । 'शक्ति. पराक्रम· प्राणः' इत्यमर । विस्फुरन्ति विशेषेण प्रकाशन्ते । 'यशो विधातु कथयन्ति खण्डितम्' इत्यत्रेव सुवर्थसख्याया अधिकत्वात्साधुत्वम् । 'स्फुरतिस्फुलत्योर्निर्निविभ्य ' इति वैकल्पिकं षत्वम् । हिशब्द प्रसिद्ध्यर्थकोऽस्यार्थस्य दुरपह्नवत्वं व्यञ्जयति ॥ ४० ॥ अय हि रामो हि । **त्रातुमिति** । लोकान्सप्तलोकान् । 'लोकस्तु भुवने जने' इत्यमर । त्रातु पालयितुम् । 'त्रैङ् पालने' इत्यस्मात् 'तुमुण्ण्वुलौ क्रियाया क्रियार्थायाम्' इति तुमुन् । कायवान्परिणतः शरीरवत्तारूपपरिणाममवस्था प्राप्तोऽस्त्रमन्त्र इव जृम्भकाद्यस्त्रदेवताप्रकाशकवेदभाग इव । भवतीति शेष । मन्त्रब्राह्मणरूपभागद्वयात्मके वेदे मन्त्रभाग 'तच्चोदकेषु मन्त्राख्ये'ति भगवता जैमिनिना लक्षित । अहितनिरसनादिरत्र साधारणधर्म । ब्रह्मकोशस्य ब्रह्माण्डस्य । 'पेशी कोशो द्विहीनेऽण्डम्' इत्यमर । गुप्त्यै रक्षणाय । 'गुप्ति स्याद्धुव्युदासेऽपि कारावेश्मनि रक्षणे' इति रत्नमाला । तनु मूर्तिम् । 'स्त्रिया मूर्तिस्तनुस्तनू ' इत्यमर । श्रित प्राप्त क्षत्र क्षत्रवर्णसबन्धी धर्म इव । 'शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥' इत्युक्तस्वभाव इव । भवतीति शेष । सामर्थ्यानामिति । तनु श्रित इत्यनुषज्यते । तनुं श्रित सामर्थ्याना सर्वकार्यफलौपयिकशक्तीना समुदय इव गण इव । 'समुदाय समुदयः समवायश्चयो गण ' इत्यमर । भवतीति शेष. । गुणाना ज्ञानाद्यात्मगुणाना सौन्दर्यादिविग्रहगुणाना च संचयो वा समूह इव भवति । 'वा स्याद्विकल्पोपमयो ' इत्यमर । अत्रापि तनु श्रित इत्यनुषज्यते । प्रादुर्भूय प्रत्यक्षीभूय स्थित । पुण्यैर्निर्मीयन्त इति पुण्यनिर्माणानि । पुण्यफलानीत्यर्थ । 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् । 'भोजना शालय.' इतिवज्जगता पुण्यनिर्माणानि जगत्पुण्यनिर्माणानि तेषा राशिरिव पुञ्ज इव भवति । 'स्यान्निकाय पुञ्जराशी' इत्यमर· । अत्र सर्वत्रोत्प्रेक्षालंकारः । तदुक्तम्—'यदायमुपमानाना लोकतः सिद्धिमिच्छति । तदोत्प्रेक्षैव येनैव शब्दः सभावनापर. ॥' इति वाशब्दस्येवशब्द-

(नेपथ्ये।)

सीरध्वजो धनुष्पाणिरित एवाभिवर्तते ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ ४२ ॥

सख्यः—[1]भट्टिदारिए, परागदो जेव्व तादो । ता एहि । पविसह्म ।

सीता—[2]भअवदि, सङ्गामसिरी एसो दे अञ्जली ।

(इति निष्क्रान्ता. स्त्रिय. ।)

जामदग्न्यः—

स एष राजा जनको मनीषी
पुरोहितेनाङ्गिरसेन गुप्तः ।
आदित्यशिष्यः किल याज्ञवल्क्यो
यस्मै मुनिर्ब्रह्म परं विवव्रे ॥ ४३ ॥

सद्वृत्त एषः । तथापि क्षत्रिय इति शिरःशूलमुत्कोपयति ।

(तत प्रविशति सभ्रान्तो जनक शतानन्दश्च ।)

शतानन्दः—राजन्, किमत्र युक्तम् ।

---

१. भर्तृदारिके, परागत एव तातः । तदेहि । प्रविशामः ।
२. भगवति, सङ्गामश्रीरेष तेऽञ्जलिः ।

पर्यायत्वादुत्प्रेक्षाद्योतकत्वमविरुद्धम् । अस्त्रमन्त्रादेरुपमानस्य कायवत्त्वेन परिणामादिसिर्विशेषणैर्लोकप्रसिद्धत्वात्पञ्चस्वपि वाक्येषूत्प्रेक्षा । सा च स्वरूपोत्प्रेक्षेति द्रष्टव्यम् ॥ ४१ ॥ वधू स्नुषा वसिष्ठसनाभितया परशुरामः स्वस्य सीता प्रति श्वशुरदेशीयत्वमभिसधाय सीता वधूरिति निर्दिशति । अभ्यन्तर गृहमध्यम् ॥ एवमेव । सीताया गृहाभ्यन्तरप्रवेशो ममापीष्ट इत्यर्थ ॥ **सीरध्वज इति** । सीरध्वजो जनक । धनुश्चाप पाणौ यस्य स तथोक्तस्तथाविध सन् । 'प्रहरणार्थेभ्य परे निष्ठासप्तम्यौ' इति सप्तम्यन्तस्य पाणिशब्दस्य परनिपात । इत एवाभिवर्तते । अत्रैवायातीत्यर्थ । शिष्ट प्रागेव व्याख्यातप्रायम् ॥ ४२ ॥ प्रविशाम । अभ्यन्तरमिति शेष ॥ **स एष इति** ॥ मनीषी प्राज्ञ आङ्गिरसेनाङ्गिरसोऽपत्येन । पौत्रादिरप्यपत्यमिति पक्ष एव मुख्य इत्यङ्गिर शब्दात् 'तस्यापत्यम्' इत्यण्प्रत्यय । पुरोहितेन शतानन्देन गुप्त पालित एष जनको राजा । उद्देश्यसमर्पकमिदम् । यस्मै याज्ञवल्क्यस्तन्नामादित्यशिष्य सूर्यशिष्यो मुनि पर ब्रह्म परमात्मानं विवव्रे विवृतवान्स इति विधेयविशेषणतया योजनीयम् । अत्र 'जनको ह वैदेह आसाचक्रे । अथ ह याज्ञवल्क्य आवव्राज तम्' इत्यादि बृहदारण्यकसदर्भो द्रष्टव्य ॥ ४३ ॥ सद्वृत्त. साधुशील । क्षत्रिय इति क्षत्रियत्वाद्धेतोः । शिर शूलं शिरोरोगविशेषम् । 'शूलमरुयायुधे रोगे स्याद्दुष्टवधकीलके । उपरागादिदोषे च' इति रत्नमाला । उत्कोपयति प्रकोपयति ।

स त्वं नूतन एव कङ्कणधरः श्रीमान्प्रियश्चेतसो
हन्तव्यः परिभूतवान्गुरुमिति प्रागेव दूयामहे ॥ ४५ ॥

रामः—भार्गव, ज्ञायते मामनुकम्पस इति ।

सुखानि मिलितानि । क्षणपरिमितरामविग्रहालोकनसुखसमानरेखारूढानि भवन्तीत्यर्थः । अत्र च 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यर्थः सूचित । यद्वा यत्र त्वय्यालोकपथावतारिणि सति सुखानि चेतसि संभूय परमन्यं भूमानमातन्वते । सृजन्तीत्यर्थ. । अय भावश्छान्दोग्ये भूमविद्यायाम्—'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतम्' 'स्वे महिम्नि प्रतिष्ठित स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणत. स उत्तरत. स एवेद४सर्वं स वा एष एवपश्यन्नेवंमन्वान एवंविजानन्नात्मरतिरात्मक्रीड आत्ममिथुनआत्मानन्द ' इत्यादिसार्वात्म्यादिसर्वकल्याणगुणनिरवद्यसत्यपुरुषादिशब्दाभिधेयपरमात्मलक्षणो निःसङ्ग नित्यमुक्तानुभाव्यनिरवग्रहनिरतिशयानन्दरूप. कोऽपि भूमा प्रतिपादितो 'भूमा सप्रसादात्' इत्यादिना ब्रह्मसूत्रेण निरूपितश्च । ततोऽप्यधिक पूर्व कमपि भूमान रामदर्शनसुखानि मम मनसि निर्मान्तीति । अत्र च—'अखण्डैकरसानन्दतारकब्रह्मवाचक । रामायेति सुविज्ञेय सत्यानन्दचिदात्मक ॥' इत्युपनिषदर्थं सूचित । रतिमिति यत्रालोकपथावतारिणीत्येतन्मध्यमणिन्यायेनोत्तरत्राप्यन्वेति । यत्र त्वय्यालोकपथावतारिणि सति नेत्रोत्सवो नेत्रानन्द । कार्ये कारणवाचकशब्द. । आनन्दजनकव्यापारोऽप्युत्सव । रति स्वक्चन्दनादिजन्या प्रीतिं प्रस्तौति निष्पादयति । पूर्वोक्तभूमविद्यागतात्मक्रीडादेरुपलक्षणमिदम् । स्वक्चन्दनादिजन्या प्रीती रति , उद्यानादिजन्या प्रीतिः क्रीडा, स्त्रीसभवा प्रीतिर्मिथुनम्, मतिजन्या प्रीतिरानन्द इत्युपनिषद्व्याख्यातार । अत्र च भूमानमित्यनेन भूमवाक्यं रतिमित्यनेनात्मरतिरित्यादिवाक्यं च स्फोरितम् । परमित्यनेन भगवत परत्वावस्थातोऽपि रामावतारावस्थैव भोग्येति सूच्यते । उक्तं च हनूमता—'स्नेहश्च परमो राजस्त्वयि नित्यं प्रतिष्ठित । भक्तिश्च नियता वीरभावो नान्यत्र गच्छति ॥' इति । सोऽयमखिलवेदान्तपरमरहस्यार्थो जामदग्न्यवाक्यमुखेन कविनाविष्कृत —स त्वमिति । स तथाविधो नूतन. कङ्कणधरोऽद्यैव वैवाहिकप्रतिसर धारयमाणः । नूतनत्वं कङ्कणधरत्वेनेति । श्रीमास्तेजस्वी भोग्यसमृद्धिरूपसपत्तिमान्वा वेषरचनावान्वा । 'श्रीर्वेषरचनाशोभासपत्सरलशाखिषु' इति रत्नमाला । चेतस प्रिय इष्टोऽस्मद्गुरु रुद्रं परिभूतवान्धनुर्भङ्गेन तिरस्कृतवान्स त्वं हन्तव्य इति हेतोः प्रागेव हननपूर्वमेव दूयामहे। 'दुड् परितापे' इत्यस्मादिवादिलाच्छयन् । अत्र गुरुपरिभवो हननहेतु । कङ्कणधरत्वादिकं परितापहेतु । पूर्व वीरव्रतेन हन्तव्यत्वमुक्तम् । अद्य तु परिभवेन हन्तव्यत्वमिति हेतुभेदादपौनरुक्त्यम् ॥ ४५ ॥ भार्गवेति । मामनुकम्पस इति मयि दयावानिति ज्ञायते । मयेति शेष । 'कृपा दयानुकम्पा स्यात्' इत्यमर । अत्र मामनु मन्निमित्तं कम्पसे वेपस इति ज्ञायत इति च विवक्षितम् । 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' इत्यनुशब्दस्य कर्मप्रवचनीयत्वात् 'कर्मप्रवचनीययुक्ते द्वितीया' ।

जामदग्न्यः—अरे, किमुद्भ्रान्तोऽसि ।

अमृताध्मातजीमूतस्निग्धसंहननस्य ते ।
कुठारः कम्बुकण्ठस्य कष्टं कण्ठे पतिष्यति ॥ ४६ ॥

रामः—आः, सत्यमेव करुणया परिक्षिप्तोऽसि ।

जामदग्न्यः—मय्येव भ्रुकुटीधरः संवृत्तः । अरे क्षत्रियडिम्भ, त्वं किल शिशुर्नववधूटिकापरिग्रहः सुन्दर इत्यपूर्वमुपतप्यतेऽस्माभिः ।

सुप्रसिद्धः प्रवादोऽयमितिहेतीह गीयते ।
जामदग्न्यः स्वयं रामो मातुर्मूर्धानमच्छिनत् ॥ ४७ ॥

अपि च । रे मूढ,

उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसंतानरोषा-
दुद्दामस्यैकविंशत्यवधि विधमतः सर्वतो राजवंश्यान् ।

दयस इत्यनुक्ता मामनुकम्पस इत्युक्तिरर्थान्तरामिप्रायिकेत्युपलक्ष्य भार्गव आह— **अरे, किमुद्भ्रान्तोऽसीति** । निर्भये भयग्रहणाद्भ्रान्ति । तस्य बहि कथनादुद्भ्रान्ति । **अमृतेति** । अमृतेन सुधयाध्मात पूरितो जीमूतो मेघ इव स्निग्धं शीतललचाकचक्यादियुक्त सहनन वपुर्यस्य स तथोक्तस्तस्य । 'गात्रं वपु· संहननम्' इत्यमर । कम्बुरिव शङ्ख इव कण्ठो यस्य स तथोक्तस्तस्य । 'शङ्ख स्यात्कम्बुरस्त्रियाम्' इत्यमर । यद्वा कम्बु स्त्रीवलय शङ्ख स इव कण्ठो यस्य स तथोक्तस्तस्य । 'कम्बु स्त्रीवलये शङ्खे सख्याया जलशुक्तिषु' इति रत्नमाला । 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' इति हलायुधश्च । तव कण्ठे कुठार पतिष्यति । स्पष्टोऽर्थ ॥ ४६ ॥ आ, करुणया परिक्षिप्तोऽसि । आ इति कोपे । परिक्षिप्तोऽसि परिवृत्तोऽसि । सत्यमेवेत्यनेन व्यतिरेको व्यजते । त्वया मम दु खोत्पादने हि परदु खासहिष्णुत्वलक्षणा करुणा प्रस्तावमर्हति । तदेव तु तव दु शक्यमिति भाव । कि चेयं दया पूर्वकराजेषु क्व गतेति भाव ॥ भ्रुकुटीधर कोपेन विकृतभ्रूर्जात । क्षत्रियडिम्भ क्षत्रियशिशो, नवो नूतनो वधूटिकाया अयोनिजात्वेन मातापितृरहिततया दयनीयाया बालिकाया· परिग्रहो येन स तथोक्त । 'वयसि प्रथमे' इति ङीपि वधूटीशब्दः । तस्मादनुकम्पाया कनि हस्वे च वधूटिकाशब्द । 'जीवद्भर्त्री कुलस्था या वधूटी सा स्नुषा·सिनी' इति त्रिकाण्डशेष· । सुन्दरो मनोज्ञ. । न विद्यते पूर्वो यस्मिन्कर्मणि तथोक्तम् । उपतप्यते दु ख्यते । पूर्वे राजानो हि नैवंविधास्ततस्ते निरुत्तापेन मया हता । अद्य त्वीदृशे त्वयि मम करुणा जायत इत्यर्थ. । **सुप्रसिद्ध इति** । जामदग्न्यो रामो मातुर्मूर्धान स्वयमच्छिनदित्यय सुप्रसिद्ध. प्रवादो लोकवाद इह जगति इतिह पारम्पर्येण गीयते शब्द्यते । 'कै गै शब्दे' इति पठिताद्गयते कर्मणि लटि यकि 'घुमास्थागापाजहातिसा हलि' इतीत्वम् । 'अनन्तावसथेतिहभेषजा ञ्य' इति सूत्रे इतिहेति निपातसमुदाय पारम्पर्ये वर्तत इति वैयाकरणाः । 'पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम्' इत्यमर ॥ ४७ ॥ **उत्कृत्येति** । सर्वभूतै· सर्वप्राणिभि· कर्तृभिः

पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमान-
क्रोधाग्नेः कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः ॥४८॥

रामः—नृशंसता हि नाम पुरुषदोषः । तत्र का विकत्थना ।

जामदग्न्यः—आः निर्भय क्षत्रियबटो, अति नाम प्रगल्भसे ।

प्रहर नमतु चापं प्राक्प्रहारप्रियोऽहं
मयि तु कृतनिघाते किं विदध्यात्परेण ।

क्षत्रसताने क्षत्रवंशे रोषात्कोपाद्गर्भानप्यकिंचित्करान्गर्भपिण्डानप्युत्कृत्योत्कृत्य पौन.पुन्येन छित्त्वा । 'कृती छेदने' इत्यस्माच्छयप् । शकलयत पुनरपि खण्डयत उद्दामस्योद्दीर्णस्य सर्वतोऽखिलदेशेषु राजवंश्यान्राजवशभवान् । सर्वान्राजवशान्वा । आद्यादिलात्तसि । एकविंशतिरेकविंशोऽवधिश्चरमो यस्मिंस्तद्यथा तथा । विधमनक्रियाविशेषणम् । एकविंशतिशब्दो लक्षणयैकविंशपर । यथा त्रिविष्टपशब्दे त्रिशब्दस्त्रितीयपरस्तद्वत् । अथवैकविंशत्या सख्ययावधि परिच्छेदो यस्मिन्कर्मणि तत्तथोक्तम् । 'विंशत्याद्या. सदैकत्वे सर्वा सख्येयसख्ययो । सख्यार्थे द्विबहुत्वे स्त.' इत्यमर. । 'अवधाने परिच्छेदे सीम्नि काले बलेऽवधि ' इति रत्नमाला । विधमतो नाशयत । 'ध्मा शब्दाग्निसयोगयो ' इत्यस्माल्लट शतरि 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदा पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदा ' इति धमादेश । उपसर्गवशेन च नाशनार्थकत्वम् । तेषा राजवश्याना रक्तै पूर्णे । 'कर्तृकरणे कृता बहुलम्' इति समास । ह्रदेऽगाधजलाधारे । 'जलाशया जलाधारास्तत्रागाधजलो ह्रद ' इत्यमर । सवनेन स्नानेन । 'सवनं सोमनिष्पेषे जननस्नानयोरपि' इति रत्नमाला । यो महानन्द· प्रचुरसुखम् । मोक्षतुल्यानन्दाभिमानेन वा महानन्दोक्ति· । 'मुक्तिमोक्षे महानन्द ' इत्यभिधानात् । तेन मन्दायमानोऽल्पीभवन्क्रोध एवाग्निर्यस्य स तथोक्त । तस्य पित्र्यं पितृकर्म । 'वाव्वृतुपित्रुषसो यत्' इति यत् । कुर्वत. । तद्रक्तेनेति शेष । मे स्वभाव । क्षत्रियगर्भोत्कर्तनादिरूपो न विदित इति न । 'द्वौ नञौ प्रकृतार्थं बोधयत ' । विदित एवेत्यर्थ. । खलुशब्द. प्रसिद्धौ ॥ ४८ ॥ नृशंसता घातुकता पुरुषदोष पुरुषस्य हेयतापादक. । अतएव हि 'आनृशंस्यं परो धर्म ' इति शास्त्रम् । तत्र नृशसताया का विकत्थना का श्लाघा ॥ क्षत्रियबटो क्षत्रियबालक । 'बालो बटुर्माणवकः' इति कोश । अति प्रगल्भसे प्रकर्षेण धृष्टो भवसि । 'गल्भ धाष्टर्ये' इति धातु । अनुपसर्गा अपि प्रादय सन्ति तेन मध्ये हिशब्दः प्रयुक्त । 'प्रकर्षे लङ्घनेऽप्यति' इत्यमर । **प्रहरेति** । प्रहर ताडयस्व । मामिति शेष । चापं धनु कर्तृ । 'भयामृतशकृद्वस्त्रचापाभरणलाञ्छनम्' इति नपुंसकशेषेष्वमरोक्तेश्चापशब्दस्य नपुंसकत्वमिति । नमतु शरनि सारणार्थ नतं भवतु । अन्तर्भावितण्यर्थस्य नमते. कर्मण कर्तृत्वविवक्षया कर्तरि लोट् । यद्यपि 'कर्मवत्कर्मणा तुल्यक्रिय.' इति प्राप्तयोर्यगात्मनेपदयोर्मध्ये 'न दुहस्नुनमा यक्चिणौ' इति यको निषेधेऽप्यात्मनेपद दुर्वारम्, यथा 'नमते दण्ड ' इत्यादौ,

झटिति विततवह्न्युद्गारभास्वत्कुठार-
प्रविघटितकठोरस्कन्धबन्धः कबन्धः ॥ ५९ ॥

जनकशतानन्दौ—वत्स रामभद्र, विश्वस्य तावदास्स्व ।

रामः—कष्टम् । अभ्यनुज्ञापेक्षः संवृत्तोऽस्मि ।

जामदग्न्यः—आङ्गिरस, अपि सुखम् ।

शतानन्दः—विशेषतस्त्वद्दर्शनात् । अपि च ।

त्वं नः पूज्यतमोऽतिथिर्यदि ततः सज्जातिथेया वयं

जामदग्न्यः—त्व पुरोहितः सुचरितो गृहमेधी याज्ञवल्क्यशिष्यः । तदत्र सर्वं युज्यते । किंतु नाहमातिथ्यकामः ।

शतानन्दः—

कन्यान्तःपुरमक्रमात्प्रविशता सदूषितान्तःस्थितिः ।

तथापि 'निरङ्कुशा. कवय' इत्युक्तत्वादात्मनेपदाभाव । यद्वा मामित्यध्याहार । चाप कर्तृ । मा नमयत्वित्यर्थ । एव च परशुरामनमने चापस्य करणत्वात्तस्य कर्तृत्वविवक्षायाम् 'असिश्छिनत्ति' इत्यत्रेव कर्तरि लकार, परस्मैपदं च । अथवा चापं कर्तृ नमतु । विस्फारशब्द करोत्वित्यर्थ । 'णमु प्रह्वत्वे शब्दे च' इति णमति. शब्दार्थक । अद्य तु मुख्यमेव कर्तृत्वम् । यद्वा मा प्रहर । मयि चापं कर्म नम । नमयेत्यर्थ. । तुशब्दश्चार्थक प्रहार समुच्चिनोति । तुशब्दोऽवधारणार्थको वा । नमयैवेत्यर्थ । अह प्राक्प्रहारप्रिय । शत्रुणा प्राक्प्रहारमिच्छामीत्यर्थ । स्वयं प्राक्प्रहारे तु शत्रोरपुनरङ्कुरत्वात्तेन मम प्रहारो दुर्लभ इति भाव । तदाह—**मयि त्वित्यादिना** । मयि तु सर्ववीरजनोत्तीर्णे मयि कृतनिघाते सति कृतप्रहारे सति परेण । अनन्तरकालवाचिन परशब्दात् 'एनबन्यतरस्यामदूरेऽपञ्चम्या' । झटिति शीघ्र विततैर्विस्तृतैर्वह्न्युद्गारैरग्न्युद्गमनैर्हेतुभिर्भास्वता तेजस्विना कुठारेण प्रविघटितो वियोजितः कठोर पूर्ण । 'कठिचकिभ्यामोरन्' इति सूत्रे कठोरशब्द पूर्णतायामपीति शाब्दिकोक्ते. । स्कन्धस्यासस्य । 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः । बन्धो यस्य स तथोक्त. । कबन्धोऽपमूर्धदेह । 'कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्' इत्यमर. । किं विदध्यात्किं कुर्यात् । शकि लिङ् ॥ ४९ ॥ विश्वस्य परशुराम जेतुं शक्त इति निश्चेय । सबुध्यन्तमेतत् । आस्स्व तावत् । अद्य किंचित्कालं निर्व्यापारस्तिष्ठेत्यर्थ ॥ अभ्यनुज्ञा गुरुजनानुमतिरपेक्ष्यापेक्षणीया येन स तथोक्त । 'गुरोश्च हलः' इति कर्मण्यकारप्रत्यय ॥ **त्वं न इति** । सज्ज सभृतमातिथेयमतिथिषु साधु विष्टरार्घ्यपाद्यादिक यैस्ते तथोक्ता. । 'सज्जौ सभृतसनद्धौ' इति रत्नमाला । अतिथिशब्दात् 'तत्र साधु' इत्यधिकारे 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ् ॥ सुचरितः सुवृत्त ॥ अक्रमात्सहसा कन्यान्त पुर प्रविशता । त्वयेति शेष । अन्तः-

जामदग्न्यः—अरण्यवासी ब्राह्मणोऽहमनभिज्ञः परमेश्वरगृहव्यवहारस्य ।

रामः—(स्वगतम् ।) शोभत एव दत्तभुवनैकदक्षिणस्य सामन्तेष्वहंकारोल्लकाश ।

जनकः—

पापं वाञ्छसि कर्म राघवशिशावस्मत्सनाथे कथं
(प्रविश्य ।)

कञ्चुकी—

देव्यः कङ्कणमोचनाय मिलिता राजन्वरः प्रेष्यताम् ॥५०॥

जनकशतानन्दौ—वत्स रामभद्र, श्वश्रूजनस्त्वामाह्वयति । तद्गम्यताम् ।

रामः—जामदग्न्य, एवमादिशन्ति गुरवः ।

जामदग्न्यः—क्रियता लोकधर्मः । पश्यन्तु त्वां ज्ञातयः । किंतु

स्थितिरन्त पुरमर्यादा । 'स्थानमर्यादयो स्थिति' इति रत्नमाला । सदूषिता विकलिता ॥ परमेश्वराणा प्रभूणा गृहस्यान्त पुरादेर्व्यवहारस्य क्रमेण प्रवेशादिव्यापारस्यानभिज्ञ । अज्ञ इत्यर्थ. ॥ अहंकारस्य गर्वस्योत्प्रकाशो व्यञ्जको मर्मोद्घाटनहासविशेषः ॥ अस्मत्सनाथेऽस्मत्परतन्त्रे राघवशिशौ रामे पापं कर्म कुठारप्रेरणरूप कथं वाञ्छसीच्छसि । कुठारप्रेरण हि रामस्यास्मत्सनाथत्वाच्छिशुत्वाच्च दु शक पापं चेति कथं तदिच्छसीत्यर्थ ॥ कञ्चुकी सौविदल्ल । कङ्कणमोचनाय वैवाहिकप्रतिसरविस्रंसनाय । 'निर्वृत्ते खथ कल्याणे नरो नद्ध च कौतुकम् । प्राप्ते निशामुखे तत्तन्मन्त्रेणाथ ततस्त्यजेत् ॥' इति वचनमत्र द्रष्टव्यम् । मिलिता सगताः । प्रतीक्षन्त इति शेष । वरो जामाता राम । 'देवप्रसादे वरणे जामातरि वर पुमान्' इति रत्नमाला ॥ ५० ॥ आदिशन्त्याज्ञापयन्ति ॥ लोकधर्मो लोकैरनुष्ठीयमानधर्म । ज्ञातयो बन्धव· पश्यन्तु त्वाम् । इत पर मया युद्धे कं द्रक्ष्यन्तीति भाव । जनपदेषु देशेषु न परिक्षेप्तव्यो नातिवाहयितव्य ॥ **प्रविश्येति** । इतरे जनक शतानन्दो भार्गवश्च ॥ गुरुवचनाद्वसिष्ठविश्वामित्रवचनात् ॥ पूर्वाङ्केऽस्मिन्नङ्के च मुखसधि प्रतिमुखसधिश्चोक्त· । तत्स्वरूप तु—'मुखं बीजसमुत्पत्तिर्नानार्थरससभवा । अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥ उपक्षेप परिकरः परिन्यासो विलोभनम् । युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥ उद्भेदभेदकरणानि' इति दशरूपकादावुक्तम् । तत्र 'भद्रमस्तु' 'स्नेहं करोति' इति बीजारम्भसमन्वय उक्त । बीजारम्भलक्षणं तु 'स्तोकोद्दिष्टः कार्यहेतुर्बीजं विस्तार्यनेकधा । औत्सुक्यमात्रमारम्भ· फललाभाय भूयसे ॥' इत्युक्तम् । तत्रोपक्षेपादिकं तत्तदवसर एव लिखितम् । शिष्टमत्र

जनपदेषु न चिरमारण्यकास्तिष्ठन्ति । गन्तुकामोऽस्मि । अतो न कालः परिक्षेतव्यः ।

रामः—एवम् । (इति निष्क्रान्तः ।)

(प्रविश्य ।)

सुमन्त्रः—भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः ।

इतरे—क्व भगवन्तौ ।

सुमन्त्रः—महाराजदशरथस्यान्तिके ।

इतरे—गुरुवचनाद्गच्छामः ।

(इति निष्क्रान्ता सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते द्वितीयोऽङ्कः ।

लिख्यते—'अरिष्टतातिमाशास्महे' इति बीजमुखागमरूपप्राप्तिरुक्ता । 'कथमप्रमेय–' इत्यत्र बीजविषय आश्चर्यावेशरूपपरिभावनोक्ता । 'रामाय पुण्यमहसे' इत्यत्र बीजमुखदुःखहेतुरूपं विधानमुक्तम् । 'वत्स, हन्यताम्' इत्यत्र बीजानुगुणप्रोत्साहनरूपभेद उक्त. । 'अस्यायमवसर.' इत्यादौ बीजानुगुणप्रस्तुतकार्यारम्भरूपकरणमुक्तम् । एवमन्यदपि स्वयं द्रष्टव्यम् । अनन्तर प्रतिमुखसधिः । तत्स्वरूपं तु—'लक्ष्यालक्ष्यस्य बीजस्य व्यक्ति प्रतिमुखं मतम् । बिन्दुप्रयत्नाभिगमादज्ञान्यस्य त्रयोदश ॥ विलासः परिसर्पश्च विधूतं शर्मनर्मणी । नर्मद्युतिप्रगमन निरोध पर्युपासनम् ॥ वक्र पुष्पमुपन्यासो वर्णसहार इत्यपि ॥' प्रथममप्रथममलक्ष्यस्य धनुर्भङ्गदिव्यास्त्रदानादिना लक्ष्यस्य च बीजस्य व्यक्तिरूप प्रतिमुखम् । तत्र च बिन्दुप्रयत्नौ वक्तव्यौ । तत्स्वरूप तु—'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् । प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वित ॥' इति । अत्र भार्गवप्रवेशो बिन्दु । अवान्तरविच्छेदहेतुत्वेऽप्युत्तरत्र धनुर्दानादिभिरच्छेदकारणत्वात् । 'तपस्यते–' इत्यादिषु प्रयत्न स्पष्ट । तत्राङ्गानि लिख्यन्ते । 'सख्य —कथयत तत्' इत्यत्र दृष्टनष्टपदार्थानुसरणरूप परिसर्प उक्त । 'नोत्सवा—' इत्यादावनिष्टवस्तुविक्षेपरूपविधूननमुक्तम् । 'किमेकदेशेन–' इत्यादिना रत्युपशमनरूपं शर्मोक्तम् । 'कुमार प्रेक्षस्व' इत्यादिनानुरागोद्घटनार्थप्रीतिरूपद्युतिरुक्ता । 'सखि, समुरासुर–' इत्यादिना चानुरागप्रकाशवचनरूप पुष्पमुक्तम् । 'आतङ्कश्रम—'इत्यादिना चानुरागहेतुवाक्यरचनारूपन्यास उक्त ।'धनुषि धारयन्ती' इत्यादिना च छद्मना हितागमनिरोधनरूपनिरोध उक्त. । 'उत्सिक्तस्य' इत्यादिना च सभोगविषयमनोरथरूपविलास उक्त । 'आर्यपुत्र' इत्यादिना चेष्टजनानुनयरूपपर्युपासनमुक्तम् । 'अन्विष्यत' इत्यादिना च प्रमुखनिष्ठुरवचनरूपं वज्रमुक्तम् । 'अयं स किल' इत्यादिना परिहासवचनरूपं नर्मोक्तम् । 'राम राम नयनाभिरामताम्' इत्यादिना चोत्तरोत्तरवाक्यैरनुरागबीजप्रकाशनरूप प्रगम उक्त. । एवमन्यदपि यथासभव द्रष्टव्यम् ॥

कविना तेन महता प्रायशोऽस्मिन्निबन्धने ।
दशरूपकनिर्दिष्ट क्रमोऽङ्कानामनाश्रित ॥
अथवा तत्क्रमोऽप्यत्र कथंचिल्लिखितुं क्षम· ।
स्फुटप्रतीतिमाश्रित्य क्रमत्याग उदीरितः ॥
यो महीसारवास्तव्यो वाधूलो वीरराघवः ।
स महावीरचरिते द्वितीयाङ्क व्यवीवरत् ॥

इत्यण्णाप्पङ्कार्यनामधेयेन वाधूलवीरराघवेण विरचितायां महावीरचरितव्याख्यायां भावप्रद्योतिनीसमाख्यायां द्वितीयोऽङ्कः ॥



तृतीयोऽङ्कः ।

(तत प्रविशत उपविष्टौ वसिष्ठविश्वामित्रौ जामदग्न्यशतानन्दौ च ।)

वसिष्ठविश्वामित्रौ—(जामदग्न्य प्रति ।)

इष्टापूर्तविधेः सपत्नशमनात्प्रेयान्मघोनः सखा
येन द्यौरिव वज्रिणा वसुमती वीरेण राजन्वती ।
यस्यैते वयमग्रतः किमपरं वंशश्च वैवस्वतः
सोऽयं त्वां तनयप्रियः परिणतो राजा शमं याचते ॥ १ ॥

तद्विरम शुष्ककलहात् । इद चास्तु ।

अथ कविना तृतीयाङ्क प्रस्तूयते—**ततः प्रविशत उपविष्टावित्यादिना** । जामदग्न्यशतानन्दौ चेति । प्रविशत इत्यनुषङ्ग । वसिष्ठविश्वामित्रौ जामदग्न्य प्रतीति । आहतुरिति शेष । **इष्टापूर्तेति** । अत्र य इत्यध्याहार उत्तरत्र येनेत्यादि यच्छब्द-युक्तवाक्यशैलीदर्शनात् । यो दशरथ इष्टं दर्शपूर्णमासज्योतिष्टोमाश्वमेधराजसूयादि-याग । 'यज देवपूजायाम्' इत्यस्माद्भावे क्त । पूर्तं देवालयतटाकारामादिकरणम् । 'क्रतुकर्मेष्ट पूर्त खातादि कर्म यत्' इत्यमर । इष्टं च पूर्तं चेति विग्रहे समाहार इत-रेतरयोगो वा द्वन्द्व । पृषोदरादित्वादिष्टशब्दस्य दीर्घ । तयोर्विधेरनुष्ठानात्सपत्नाना शत्रूणा शमनान्निरसनात् । 'रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृद ' इत्यमर. । मघोन इन्द्रस्य प्रेयानतिशयेन प्रिय सखा मित्र भवति । वीरेण येन दशरथेन वज्रिणेन्द्रेण द्यौरिव स्वर्ग इव । 'सुरलोको द्योदिवौ द्वे' इत्यमर । वसुमती भूमी राजन्वती शोभ-नेन राज्ञा युक्ता भवति । 'राजन्वान्सौराज्ये' इति निपातिताद्राजन्वच्छब्दात् 'उगि-तश्च' इति स्त्रिया ङीप् । एते वयमहं विश्वामित्रादयश्च यस्य दशरथस्याग्रत पुरतः । भवाम इति शेष । हितानुशासनार्थं नित्य सन्निहिता इत्यर्थ । अपर वक्ष्यमाणा-दन्यत्किम् । वक्तव्यमिति शेष । वंशश्च यस्येति वर्तते । यस्य दशरथस्य वंश कुल च वैवस्वत सूर्यसबन्धी । विवस्वच्छब्दात् 'तस्येदम्' इत्यण् । तनयप्रिय प्रियपुत्र. । 'वा प्रियस्य' इति परनिपात । परिणतो वृद्धो राजा मुख्यराजन्यवान् । 'मुख्यस्य निर्विशेषेण शब्दोऽन्येषा विशेषत ' इत्युक्तेः । सोऽयं दशरथ शम भवत क्रोधनि-वृत्तिं याचते । भवन्तमिति शेषः । 'तस्मादपि वध्यं प्रपन्न प्रति प्रयच्छति' इति श्रुत्या शरणागतव्यापादोऽत्यन्तदुष्ट इत्यर्थ । येनेत्यादि वैवस्वत इत्यन्त योजयित्वा सोऽयं मघोन सखा तनयप्रिय परिणतो राजा शमं याचत इत्यनध्याहारेण वा योज्यम् । एतदुत्तराङ्कस्य पूर्वाङ्कार्थानुसगतत्वादङ्कावतरणम् । यथोक्तम्—'यत्र स्यादु-त्तराङ्कार्थ पूर्वाङ्कार्थानुसगत. । असूचिताङ्कपात्रं तदङ्कावतरण मतम् ॥' इति ॥ १ ॥ **तदिति** । तत्तस्माद्धेतो शुष्ककलहान्निष्प्रयोजनाद्धेतो । 'कलहास्फोटसयुगा.' इत्यमर । 'जुगुप्साविरा-' इत्यादिना पञ्चमी । विरम निवृत्तो भव । 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । इद वक्ष्यमाणार्थरूपम् । चकार. कलहविरामं समुच्चिनोति ।

संज्ञप्यते वत्सतरी सर्पिष्यन्नं च पच्यते ।
श्रोत्रिय श्रोत्रियगृहानागतोऽसि जुषस्व नः ॥ २ ॥

जामदग्न्यः—अत्र वो विज्ञापयामि किं न क्षमे यदि रामः प्रकृष्ट-वीर्यो न स्यात् । पश्यन्तु भवन्तः ।

रामः कर्मभिरद्भुतै. शिशुरपि ख्यातस्ततो भार्गवः
कस्मात्प्राप्य तिरस्क्रियामसहनोऽप्यस्थादिति प्रस्तुते ।
को विद्याद्गुरुगौरवादिति भवेज्ज्ञातापि वक्ता पुन-
र्नैत्वेवास्ति तथास्थितस्य सुलभद्वेषं हि वीरव्रतम् ॥ ३ ॥

संज्ञप्यत इति । वत्सतरी द्वितीय वय प्राप्ता गौ. । 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' इति वत्सशब्दात्तरच् । ष्वित्त्वान्ङीष् । 'दम्यवत्सतरौ समौ' इत्यमर· । तृतीयं वयः प्राप्ता गौरित्यन्ये । सज्ञप्यते विशस्यते । 'मारणतोषणनिशामनेषु ज्ञा' इति मित्त्वात् णौ 'मिता ह्रस्व' इति ह्रस्व । णिजन्तात्कर्मणि यक् । युगान्तरेष्वतिथीना मास-कल्पो विहितस्तदभिप्रायेणेत्थमुक्तम् । किच सर्पिषि घृतेऽन्न पच्यते सस्क्रियते । हे श्रोत्रिय साङ्गवेदाध्यायिन्, श्रोत्रियगृहान्साङ्गवेदाध्यायिनो गृहाञ्जनकस्य गृहम् । 'गृहा पुंसि च भूम्येव' इत्यमर । आगतोऽसि प्राप्तोऽसि । नोऽस्माकम् । वत्सतर्यादा-तिथ्यमिति शेष । जुषस्व सेवस्व । 'जुषी प्रीतिसेवनयो' इत्यस्मान्निमन्त्रणे लोट् । यद्वा श्रोत्रिय श्रोत्रियेति समतौ द्विरुक्ति. । नोऽस्माकं गृहानागतोऽसि जुषस्व । प्रीयस्वे-त्यर्थः । संबुद्ध्यैक्याभिसधिना नेत्युक्ति ॥ १ ॥ **अत्रेति** । अत्रास्मिन्नर्थे कलहविर-त्यातिथ्यान्नग्रहणरूपे भवदुक्तार्थे । यदि राम प्रकृष्टवीर्योऽधिकबलो न स्यात्किं न क्षमे । किमर्थं । क्रोधनिवृत्तिं न प्राप्नुयामित्यर्थ. । पश्यन्तु निरूपयन्तु । **राम इति** । राम· शिशुरप्यद्भुतैस्ताटकाताटकेयनिरसनाद्याश्चर्यैः कर्मभि. ख्यातः प्रसिद्ध । असह-नोऽपि क्षान्तिरहितोऽपि न विद्यते सहनं यस्येति विग्रह । भार्गवस्ततस्तस्माद्रामा-त्तिरस्क्रिया गुरुवनुभङ्गरूपं परिभवं प्राप्य कस्माद्धेतोरस्थादप्रतिकुर्वन्स्थितः । तिष्ठते-र्लुङ् । 'गातिस्था–' इत्यादिना सिचो लुक् । इत्यस्मिन्नर्थे प्रस्तुते प्रकृते सति गुरुषु वसिष्ठादिषु गौरवात्तद्वचनानतिलङ्घनहेतुतदीयमहत्त्वाद्धेतोरप्रतिकुर्वन्भार्गव स्थित इति को विद्याज्ज्ञातुमर्हं । अर्हे लिङ् । ज्ञाता गुरुगौरवादप्रतिकुर्वन्स्थित इति ज्ञानवान्क-श्चिद्भवेदपि । 'विस्तीर्णा पृथिवी जनाश्च विविधा' इति न्यायेन सभवतु नाम । अपीति सभावनायाम् । 'सभावनेऽलमिति चेत्सिद्धाप्रयोगे' इति लिङ् । वक्ता पुन-र्गुरुगौरवादस्थात् भार्गव इति वक्ता तु न त्वेवास्ति नैवास्ति । परपरिवादरसिकत्वा-ल्लोकस्येति भाव· । विस्तीर्णन्यायप्रवृत्तिशङ्कानिरासकस्तुशब्द । अत्यन्तायोग्यत्वादत्र नवा प्रवृत्तिरिति भाव· । यस्मादेवं तस्मात्तथास्थितस्य गुरुगौरवादप्रतिकुर्वन्स्थित इति लोके वेत्तुं वक्तुं चाविषयतया स्थितस्य । ममेति शेष. । वीराणां व्रतं परिभवासहन-प्रयुक्तप्रतिकारकर्तव्यतानियमः सुलभद्वेषं न्याय्यकलह हि । हिशब्द. प्रतियोग्यभ्युप-

अपि च ।

यशसि निरवकाशे विश्वतः श्वेतमाने
कथमपि वचनीयं प्राप्य यत्किंचिदेव ।
कृतवितातिरकस्मात्प्राकृतैरुत्तमानां
विरमति न कथंचित्कश्मला किंवदन्ती ॥ ४ ॥

वसिष्ठः—अयि वत्स, किमनया यावज्जीवमायुधपिशाचिकया । श्रोत्रियोऽसि जामदग्न्य । पूतं भजस्व पन्थानम् । आरण्यकश्चासि । तत्प-

---

गम सूचयति । 'अवाच्यवादान्–' इति न्यायेन लोकेष्ववाच्यवादपरिहारार्थत्वान्नाय शुष्ककलह इति भवद्भिरेवोपगन्तव्य भवतीति भाव ॥३॥ **यशसीति** । विश्वतो विश्वस्मिन्देशे । आद्यादित्वात्तसि । श्वेतमाने धावल्य प्राप्नुवति । 'श्विता वर्णे' इत्यस्माल्लट शानच् । शपो मुगागम । कीर्ते श्वैत्यवर्णनं कविसमयसिद्धम् । निरवकाशे परिवादप्रवेशार्हरन्ध्रशून्य उत्तमाना श्रेष्ठाना यशसि वीर्यशौर्यादिगुणवत्ताप्रथाया कथमपि कृच्छ्रेण प्रयत्नेन 'ज्ञातहेतुविवक्षायामप्यादिकथमव्ययम् । कथमादितथाप्यन्तं यत्नगौरवबाढयो ॥' इत्युत्पलमालायाम् । यत्किंचित्स्वल्पं वचनीयं गर्ह्यम् । 'गर्ह्याधीनौ च वक्तव्यौ' इत्यमर । तत्पर्यायत्वाद्वचनीयशब्दोऽपि तदर्थक । प्राप्य लब्ध्वा । प्राकृतै पृथग्जनै । 'प्राकृतश्च पृथग्जन' इत्यमर । कृता वितातिर्विस्तारो यस्या सा तथोक्ता । वृद्धिं प्रापितेत्यर्थ । 'तनु विस्तारे' भावे क्तिन्, अनुनासिकलोपश्च । कश्मला मूर्च्छाकरी । हेयेति यावत् । 'मूर्च्छा तु कश्मलं मोह' इत्यमर । मत्वर्थीयोऽच्प्रत्यय. । तत स्त्रिया टाप् । किंवदन्ती लोकवाद । 'तृभूवहिवसि–' इत्यादि झच्प्रकरणे बाहुलकाद्वदेरप्यौणादिके झच्प्रत्यये झस्यान्तादेशे झच्प्रत्ययस्य वित्त्वातिदेशात् 'षिद्गौरादिभ्यश्च' इति ङीषि किंवदन्तीति रूपम् । 'किंवदन्ती जनश्रुति' इत्यमर । कथंचित्केनापि प्रकारेण बहुकालातिक्रमेऽप्यकस्मान्निष्कारण प्रतीकाररूपकारणेन विना न विरमति न नश्यति । अतोऽपि नायं शुष्ककलह इति भाव ॥ ४ ॥ एवं गुरुपरिवादपरिहारार्थत्वाद्रामेण सह मया कलह. कार्य इत्यभिप्रायवन्तं भार्गवं वसिष्ठ आह—**अयि वत्सेति** । ब्राह्मणानर्हत्वेनागन्तुकत्वादवद्यावहत्वाच्च पिशाचिकात्वनिरूपणं कृतम् । यावज्जीवं जीवनकालमभिव्याप्य 'यावत्तावच्च साकल्ये' इत्यमर. । 'धातुसबन्धे प्रत्यया' इत्यधिकारे 'यावति विन्दजीवो', इति णमुल् । गुरूपदिष्टविद्याया एवावद्यावहत्वेन त्याज्यत्वादद्य गुरुपरिवादपरिभवो नावश्यक इति भाव. । अथ यावज्जीवमाश्रयणीया विद्या प्रस्तौति—**श्रोत्रियोऽसीत्यादिना** । आभ्या विशेषणाभ्या शस्त्रविद्यानधिकारोऽध्यात्मविद्याया सामान्यातीताधिकारश्चोक्तौ । श्रोत्रिय इति वैदुष्यं जामदग्न्य इति शास्त्रापर्युदासश्चोक्त. । पूतमनवद्यं पन्थानं नि.श्रेयसोपायं भजस्व । अनेन शस्त्रग्रहणमार्गस्यापूतत्वं व्यञ्जितम् । तथा चापस्तम्ब.—'परीक्षार्थोऽपि ब्राह्मण आयुधं नादियेत' इति । आरण्यकश्चास्यरण्ये

रिचिनु चित्तप्रसादनीश्चतस्रो मैत्र्यादिभावनाः । प्रत्यासीदति हि ते विशोका ज्योतिष्मती नाम योगवृत्तिः । तत्प्रसादजं ऋतंभराभिधानं

भवोऽसि । अनेनाध्यात्मविद्याया विशेषाधिकार उक्त । 'ये चारण्ये श्रद्धातप उपासते' इति श्रूयते । तत्तस्मात् । सामान्यतो विशेषतश्चाधिकारसद्भावादित्यर्थ । चित्तप्रसादनीश्चित्तनैर्मल्यकारिणी । 'चित्तप्रसाधनी.' इति पाठे चित्तपरिकर्मकरी-रित्यर्थ । 'परिकर्म प्रसाधनम्' इत्यमर । मैत्री आदिर्यासा तास्तथोक्ता भावना सस्कारान्परिचिनु परिशीलय । आदिपदेन करुणा मुदिततोपेक्षा च गृह्यन्ते । तत्र पुण्यकृत्सु मैत्री, दु खिषु करुणा, सुखिषु मुदितता, पापिषूपेक्षा च मनोमलहारिण्य इति योगशास्त्रप्रक्रिया प्रत्यासीदति । ते पूर्वोक्ताधिकारसपत्तियुक्तस्य तव विशोका शोकापहा ज्योतिष्मती । द्रष्टव्यतया ज्योति पर ज्योतिरस्यास्तीति ज्योतिष्मती । नामेति योगशास्त्रप्रसिद्धिरुच्यते । योगश्चित्तवृत्तिनिरोधस्तद्रूपा मनोवृत्तिर्योगवृत्ति । तथा च पातञ्जलसूत्रम्—'योगश्चित्तवृत्तिनिरोधलक्षण ' इति । प्रत्यासीदति प्रत्यासन्ना भवति । अचिरसिद्धिमती भवतीत्यर्थ । क्रमेणैकादिद्वादशपर्यन्तसवत्सरसाध्यान्सिद्धिविशेषाञ्शीघ्रमेव तव साधयतीत्यर्थ । तथा च योगशास्त्रे—'प्रथमे हृतरुक्च सर्वलोकप्रिय एवाथ च वत्सरे द्वितीये । कविता कुरुते सुपर्ववाण्या भुजगाद्यैर्न च बध्यते तृतीये ॥ चतुर्थकेनातुरतापिपासानिद्रादिना तर्जितवर्जित स्यात् । दूरश्रव· पञ्चमवत्सरे वाक्सिद्धि परेषा तनुषु प्रवेश ॥ षष्ठे स वज्रैरपि यो न विध्यते ततोऽतिवेगी च सुदूरदर्शन । भवेद्बुध· सप्तमवत्सरेऽष्टधा विभूतयोऽस्य प्रभवेयुरष्टमे ॥ गगनचरो दिग्विचरो नवमेऽब्दे यस्तु वज्रकाय स्यात् । स मनोगो दशमे स्यादत्रेच्छा तत्र गच्छति प्रमना. ॥ एकादशके वर्षे सर्वज्ञ सिद्धिमान्भवेद्योगी । द्वादशके शिवतुल्यो हर्ता कर्ता स्वयं भवति ॥' इति ॥ **तत्प्रसादेति** । तस्या ज्योतिष्मतीयोगवृत्ते प्रसादात्प्रत्ययान्तरसवलनेनानाविलत्वाज्जायत इति तत्प्रसादजम् । 'पञ्चम्यामजातौ' इति ड । ऋत परमार्थं बिभर्तीति ऋतभरम् । 'सज्ञाया भृतृ–' इत्यादिना खच्प्रत्यय· । ऋतपदस्य मुमागमश्च । ऋतंभरमित्यभिधानं यस्य तत्तथोक्तम् । नाम प्रसिद्धौ । बहि सावनैर्योगातिरिक्तलौकिकवैदिकसाधनैरुपधेय सनिधार्प्य तत्र भवतीत्यबहि साधनोपधेय सर्वार्थेषु सर्वप्रयोजनेषु सामर्थ्यं यस्मिन्नस्तीति तथोक्तम् । अपविद्धा प्रध्वसिता विप्लवा क्लेशमोहमात्सर्यादय उपरागा कामलोभमदादयोऽविद्यास्मितादयश्च येन तत्तथोक्तम् । ऊर्जस्वलं बलिष्ठमनपायि । अन्तर्ज्योतिषो हृदयान्तर्वर्तिन परस्य ज्योतिष परमात्मनो दर्शन साक्षात्कार । भवतीति शेषः । तदुक्त योगशास्त्रे—'ज्योति पुञ्ज निराकारं लक्षयेन्मुक्तिद भवेत् । ज्योति स्वरूपममलं हृदि बाह्यहीनं पश्यन्ति ये त इह सयमिन कृतार्था.' । इति सर्वार्थशब्देन 'सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगै । तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥' इत्यारभ्य 'उपासकस्य मामेवं योगधारणया मुने । सिद्धय· पूर्वकथिता उपतिष्ठन्त्यशेषत ॥' इत्यन्त भागवतगतभगवद्वचनमनु-

नामाबहिःसाधनोपधेयसर्वार्थसामर्थ्यमपविद्धविप्लवोपरागमूर्जस्वलमन्त-
र्ज्योतिषो दर्शनम् । यतः प्रज्ञानमभिसंभवति तच्चाचरितव्यं ब्राह्म-
णेन, तरति येनापमृत्युं पाप्मानम् । अन्यत्र ह्यभिनिविष्टोऽसि । पश्य ।

परिषदियमृषीणामत्र वीरो युधाजि-
त्सह नृपतिरमात्यै रोमपादश्च वृद्धः ।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामद्रुहो याचकास्ते ॥ ५ ॥

जामदग्न्यः—एवमेतत् । किंतु

सधेयम् । अबहि साधनोपधेयेत्यत्र 'जनौषधितपोमन्त्रैर्यावतीरिह सिद्धय । योगेना-
प्नोति ता सर्वा नान्यैर्योगगतिर्व्रजेत् ॥' इति वचनं द्रष्टव्यम् । अपविद्धविप्लवेत्यत्र
'क्लेशाना तु क्षयकर योगादन्यन्न विद्यते' इत्यादिकं पराशरवचनमनुसधेयम् । **यत
इति** । येन प्रज्ञानेन करणेनापमृत्युमकालमृत्युवत्प्राणहर परमात्मानुभवलक्षणप्राण-
सबन्धहानिकरं पाप्मान पापफलभूतससारम् । 'अस्त्री पङ्क पुमान्पाप्मा' इत्यमर ।
तरति लङ्घते । ससारान्मुक्तो भवतीत्यर्थ । तादृशं प्रज्ञानं फलतोऽनुषङ्गतो विषय-
तश्च प्रकृष्ट ज्ञान यतो यस्मादभिसभवति सम्यगुपपद्यते तत्प्रज्ञानसाधनदुश्चरितविरत-
त्वादिकं ब्राह्मणेनाचरितव्यम् । हिशब्दो वैदिकप्रसिद्धिं सूचयति । तथाच श्रुति·—
'नाविरतो दुश्चरितान्नाशान्तो नासमाहित । नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नु-
यात् ॥' इति । अन्यत्र प्रज्ञानसाधनादन्यत्र ब्राह्मणस्य शास्त्रेन प्रतिषिद्धे शस्त्रपरि-
ग्रहादावभिनिविष्टोऽसि बद्धश्रद्धोऽसि । 'एष्वर्थेष्वभिनिविष्टानाम्' इति समर्थसूत्रे
भाष्यप्रयोगात् 'अभिनिविशश्च' इति कर्मसज्ञाविरहादन्यत्रेति सप्तमी । **परिष-
दिति** । ऋषीणामियं परिषद्गोष्ठी । 'समज्या परिषद्गोष्ठी' इत्यमर । वीरो युधाजि-
त्कुशध्वजो रोमाणि पादयोर्यस्य स तयोक्तो वृद्ध स्थविर. । अतिवार्धके हि पादेषु
रोमाणि रोहन्तीति लोकप्रसिद्धि । अमात्यै सिद्धार्थादिभिर्मन्त्रिभि सह नृपति-
र्दशरथोऽविरतयज्ञ संततानुष्ठीयमानमोक्षार्थदर्शपूर्णमासज्योतिष्टोमादियज्ञ पुराण-
श्चिरंतनो ब्रह्म परमात्मान वदतीति ब्रह्मवादी । ताच्छील्ये णिनि । अयं जनकाना
प्रभुरपि सीरध्वजोऽपीत्येतेऽद्रुह सन्त । न द्रुह्यन्तीत्यद्रुह । 'मत्सूद्विषद्रुहदुह-'
इत्यादिना कर्तरि क्विप् । लक्ष्यनपराधिन एव सन्तस्ते तव याचका । याचन्त इति
याचका । कर्तरि ण्वुल् । शममिति शेष । कृतापराधैरपि याचनायामनुग्रह.
कार्य. । 'प्रसादं पितृहन्तृणामपि कुर्वन्ति साधव.' इति हि शास्त्रम् । किं पुनर-
कृतापराधैरुत्तमैर्याच्ञायामिति भाव । यद्वा ते तवाद्रुहो द्रोहाभावस्य । 'द्रुह जिघा-
सायाम्' भावे क्विप् । याचका भवन्ति । तव रामविषये जिघासानिवृत्तिं याचन्त
इत्यर्थः ॥ ५ ॥ एतद्भवद्भिरुच्यमान सर्वम् । किंत्विति पूर्वोक्तार्थव्यतिरेके ।

शत्रुमूलमनुत्खाय न पुनर्द्रष्टुमुत्सहे ।
त्र्यम्बकं देवमाचार्यमाचार्यानीं च पार्वतीम् ॥ ६ ॥

विश्वामित्रः—यदि गुरुष्वनुरुध्यसे चेतयस्वेमावपि ततः किंचित् ।

हिरण्यगर्भादृषयो बभूवु-
र्वसिष्ठभृग्वङ्गिरसस्त्रयो ये ।
सोऽयं वसिष्ठो भृगुनन्दनस्त्व-
मेषोऽपि तस्याङ्गिरसः प्रपौत्रः ॥ ७ ॥

शत्रुमूलमिति । शत्रूणा मूल पुन प्ररोहहेतुत्वान्मूललरूपणं, क्षत्रियत्वात्त्वं प्रति शत्रुमूलत्वं, धनुर्भञ्जकत्वात्त्वाचार्य प्रति शत्रुत्वमिति भावः । अनुत्खायानुद्धृत्य । 'खनु अवदारणे' इत्यस्माल्लयपि 'ये विभाषा' इत्यात्त्वम् । त्र्यम्बकं त्र्यक्षमाचार्य धनुर्विद्योपदेष्टारमाचार्यस्त्रीमाचार्यानी पार्वतीं च । 'आचार्योदणत्वं च' इति ङीषानुरागमौ णत्वाभावश्च । पुनर्द्रष्टुं नोत्सहे न व्यवस्यामि । 'उत्साहो व्यवसाय स्यात्' इत्यमर· । यद्यपि तौ कारुणिकौ तथापि नाहं तदपराधिनमहत्वात् तद्दर्शनार्हं इति भाव· ॥ ६ ॥ गुरुष्वनुरुध्यसे स्नेहवान्भवसि यदि । 'अनो रुध कामे' इति दिवादिः । ततस्तस्माद्गुर्वनुरोधाद्धेतोरिमावपि वसिष्ठशतानन्दावपि किंचिच्चेतयस्व । अनुरोद्धव्यत्वेन क्षण जानीहीत्यर्थ । 'चिती सज्ञाने' चुरादि· । गुरुत्वमुपपादयति—**हिरण्यगर्भादिति** । ये त्रयो वसिष्ठभृग्वङ्गिरस ऋषयो हिरण्यगर्भाच्चतुर्मुखाद्बभूवुरुत्पन्ना । तेष्वित्यध्याहार । पूर्वयच्छब्दस्य तच्छब्दनियतत्वात् । प्रसिद्धो हि यत्तदोर्नित्यसबन्ध । अय तेषु स वसिष्ठ । तेषा मध्ये प्रसिद्धो वसिष्ठ इत्यर्थ । त्वं तेषु भृगुनन्दन । तेष्वन्यतमस्य भृगोर्वंश्य इत्यर्थ । एषोऽपि शतानन्दोऽपि तेषु तस्याङ्गिरस प्रपौत्रस्तेष्वन्यतमस्याङ्गिरस पौत्रस्य पुत्र· । स त्वं तस्याङ्गिरस इति तच्छब्दयच्छब्दौ प्रतिनिर्देशौ न भवत । भृगुविषये तच्छब्दादर्शनात् । तन्मात्रविषयतच्छब्दाध्याहारे तु भृगुनन्दन इति समासो न स्यादतस्तेष्वित्यध्याहार आवश्यक इति द्रष्टव्यम् । अत्र 'अथाभिध्यायत· सर्ग दश पुत्रा प्रजज्ञिरे । भगवच्छक्तियुक्तस्य प्रजासतानहेतव ॥ मरीचिरत्र्यङ्गिरसौ पुलस्त्य पुलह क्रतुः । भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारद· ॥' इति भागवतवचनमनुसधेयम् । 'प्राणाद्वसिष्ठः सजातो भृगुस्त्वग्ज करात्क्रतु· । अङ्गिरा मुखतोऽक्ष्णोऽत्रि ' इत्येतदपीह विवक्षितम् । हिरण्यगर्भात्कूटस्थादङ्गिरास्तस्मादुचथ्यस्तस्माद्गौतमस्तस्माच्छतानन्द । एवं कूटस्थाद्धिरण्यगर्भाद्भृगुर्भृगोर्धाता विधाता च । तत क्रमेणचीकस्तस्माज्जमदग्निस्तस्मात्परशुराम । एवं सख्याधिक्ये तत्स्थानेनावरं परशुरामं प्रति शतानन्द स्थानेनाधिक· । वसिष्ठस्तु कनिष्ठप्रपितामहत्वाद्वृद्धत्वाच्च स्थानवयोभ्यामधिक इति तयोः परशुरामं प्रति गुरुस्थानीयत्वम् । किच शतानन्दो ज्येष्ठस्य श्रेष्ठावयवभवस्याङ्गिरसो-

जामदग्न्यः—

प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥ ८ ॥
यतो विमुक्तेरपि मानरक्षणं
प्रियं निसर्गेण तथा च पश्य मे ।

ऽपत्यत्वादपि परशुराम प्रति गुरुस्थानीय इति तावप्यनुरोद्धव्याविति भाव· ॥ ७ ॥ **प्रायश्चित्तमिति** । अत्र विश्वामित्रेति संबुद्ध्यन्तमुपस्कार्यम् । हे विश्वामित्र, पूज्याना गौरव्याणा वो युष्माकं व्यतिक्रमात्प्रातिलोम्यकरणान्निमित्ताद्युष्मद्याचितशमाकरणनिमित्तात्प्रायश्चित्तं प्रत्यवायपरिहारकं कर्म चरिष्यामि । शस्त्रग्रह एव महाव्रतं महाबलसाधनम् । अवश्यकर्तव्यत्वेन सकल्पितधर्म तु नैव दूषयिष्यामि नैव लोपयिष्यामि । 'दुष वैकृत्ये' इत्यस्माण्णिच् । 'दोषो णौ' इति दीर्घ । अत्र पूर्वोक्तरीत्या परशुरामं प्रति वसिष्ठशतानन्दयो पूज्यत्व विश्वामित्रस्य तु परशुराम प्रति पितुर्मातुलत्वाच्च पूज्यत्वमिति द्रष्टव्यम् । 'प्राय पाप विजानीयाच्चित्तं तस्य विशोधनम्' इति स्मरणात्प्रायश्चित्तशब्द प्रत्यवायनिवर्तकधर्मवाचक· । 'प्रायस्य चित्तिश्चित्तयो·' इति सुडागमः । अत्र 'पुत्रादिजनकं ज्येष्ठं गुरु चापि न पीडयेत् । एकशब्देन नामोक्त्वा त्वंकार हुंकृतिं च वा ॥ तद्दोषपरिहारार्थ नाचिकेतव्रत चरेत् । कृच्छ्रान्द्वादशरात्रं चरित्वा सचैलस्नातो गुरुप्रसादात्पूतो भवति' इति स्कान्दवचनमभिप्रेतम् । पीडयेदित्यनिष्टकरणमिष्टाकरण च विवक्षितम् । यद्यपि 'नास्तिक्यं प्रति लोपश्च' इति याज्ञवल्क्यस्मृत्या शस्त्रग्रहव्रतत्यागे सत्युपपातकं व्रजति, तथापि गुरुवचनात्तत्त्यागे गुरुव्यतिक्रमप्रयुक्तप्रत्यवायो न भवति । 'अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पय· । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥' इति स्मरणाद्व्रतलोपदोषश्च न भवेत् । अतो गुरुवचनानुरोधाच्छस्त्रग्रह एव त्याज्य इतीमा शङ्का निवर्तयितुं तुशब्द शस्त्रग्रहव्रतपरिपालने महतस्तत्फलस्यावाप्तिरिति तदेव परिपालनीयम् । गुरुव्यतिक्रमदोषस्तु प्रायश्चित्तेनैव निवर्तयितुं शक्य इति भाव । किंचोक्तरीत्या वसिष्ठादयो जन्मनैव गुरव , भगवान्स त्र्यम्बकस्तु जन्मना विद्यया च गुरु , सोऽपि हिरण्यगर्भान्मरीच्यादिभि पूर्वमेव जात । तदुक्तं भागवते—'विया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापते । सद्योऽजायत तन्मन्यु स रुद्रो नीललोहित ॥' इति । 'अथो वेदोपदेशाच्च विद्यया गुरु' इत्युभयप्रकारगुरोस्त्र्यम्बकस्यानुरोधापेक्षया जन्मनैव गुरूणा युष्माक व्यतिक्रमोऽकिंचित्कर इत्यभिप्रायेण महाव्रतमिति महच्छब्द । तथा चोक्तरीत्या गुरुलघुविचारे फलाफलविचारे च गुरुत्वात्फलवत्त्वाच्च शस्त्रग्रहव्रतमेव परिपालनीयम् । लघुत्वात्प्रत्यवायपरिहारातिरिक्तफलशून्यत्वात्प्रत्यवायस्य प्रायश्चित्तेनाप्यपनोदयितुं शक्यत्वाच्च वसिष्ठानुरोधस्त्याज्य इति परशुरामस्याभिप्राय· ॥ ८ ॥ भवत्वेवम्, तथापि पूर्वोक्तयोगानुष्ठानेन ससारतरणलक्षणनिरतिशयफले यतस्व । शस्त्रग्रहव्रतफलं हि तदपेक्षयाल्पमेव तथा च मोक्षोपायाङ्गतया शमादिसपादकत्वेन शस्त्रग्रहत्याग एव कियतामित्यत्राह—**यत इति** । यतो येन निसर्गेण स्वभावविशे-

सनाभयो यूयमयं च कर्कशः
शरासनज्याकिणलाञ्छनो भुजः ॥ ९ ॥

विश्वामित्रः—(स्वगतम् ।)

संपूजितं हि माहात्म्यमुद्विरन्त्यः पदे पदे ।
अपि मर्माविधो वाचः सत्यं रोमाञ्चयन्ति माम् ॥ १० ॥

जामदग्न्यः—भगवन्कुशिकनन्दन,

ब्रह्मैकतानमनसो हि वसिष्ठमिश्रा-
स्त्वं ब्रूहि वीरचरितेषु गुरुः पुराणः ।

षेण । 'ससिद्धिप्रकृती त्विमे । स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमर । विमुक्तेर्मोक्षात् । अपिशब्देन बन्धुभ्यो युष्मच्च । 'पञ्चमी विभक्ते' इति पञ्चमी । मानस्य शौर्यविजयाद्युत्कर्षप्रयुक्तपूजातिशयस्य रक्षणं परिपालन मे प्रियमिष्टं भवति तथा न्याभूतं स्वभावं पश्य । विमुक्ते स्वत सुन्दरत्वेऽपि न केवलं वस्तुसौन्दर्यमिच्छाया हेतु, किंतु 'अन्न भोज्यं मनुष्याणाममृत तु दिवौकसाम्' इति देवमनुष्यत्वादिस्वभावभेदेन भोज्यव्यवस्थानेन भोगादृष्टसहकृतभोक्तृस्वभावोऽपि । तत्र कारण निरूपयत्येति भाव । किंच यूयं मानविध्वंसनार्थिनो भवन्त सनाभय । 'सपिण्डास्तु सनाभय' इत्यमर । 'ज्योतिर्जनपद–' इत्यादिना समानस्य सभाव. । शरीरघटितपरम्परासबन्धेन सबन्धिनो बहिरङ्गा', शरासनज्यायाश्चापमौर्व्या. । 'ज्या मौर्वी-भूमिमातृषु' इति रत्नमाला । किणानि व्रणपदानि लाञ्छनानि यस्य स तथोक्त । कर्कश. साहसिक । 'स्यात्कर्कशः साहसिक' इत्यमर । भुजो बाहुर्मानरक्षणार्थयोजनो बाहुरयं शरीरत्वात्साक्षात्सबन्धी सन्नन्तरङ्ग इत्यर्थ । तथा च 'अन्तरङ्गबहिरङ्गयोरन्तरङ्गो बलीय.' इति भुजाभिमतमानरक्षणमेव प्रबलम् । तत्तु भवदभिमतमानविध्वसनमिति भाव । पूर्वोक्तो मम निसर्गश्च । मम भुजलाञ्छनैरेव वामिविशद इति चाभिप्राय ॥ ९ ॥ **संपूजितमिति** । सपूजितं प्रशस्तं माहात्म्यं वृतिमत्त्वादिप्रकर्ष पदे पदे स्थाने स्थाने सुलभद्वेषं हि वीरव्रतं शत्रुमूलमनुत्खाय नत्वेव दृष्यिष्यामि । विमुक्तेरपि मानरक्षण प्रियमिति बहुषु स्थलेष्वित्यर्थ । उद्विरन्त्य प्रकाशयन्त्यो वाच परशुरामवचनानि मर्माणि हृदयानि खल्पेन हेतुनापि मरणहेतुभूतानि शरीरस्थानानि । म्रियते 'सर्वधातुभ्यो मनिन्' इति मनिन्प्रत्यय । विध्यन्ति घ्नन्तीति मर्माविध । कर्तरि क्विप् । 'नहिवृति–' इत्यादिना पूर्वपदस्य दीर्घश्च । रामभद्रव्यापारादगर्भत्वाद्धु खहेतुभूता सत्योऽपीत्यर्थ । मा वीरवासनावासितं मा रोमाञ्चयन्ति रोमाञ्चवन्तं कुर्वन्ति । 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति रोमाञ्चवच्छब्दाण्णिच्, मतुपो लोपश्च । उक्तिप्रत्युक्तिसौष्ठवेन वीररसोद्गारेण च वीरवासनावासितं मां हर्षयन्तीति सत्यमित्यर्थः ॥ १० ॥ **ब्रह्मेति** । वसिष्ठमिश्राः । मिश्रशब्दो बहुवचनं च पूजायाम् । तथा च पूज्यो वसिष्ठ इत्यर्थ. । ब्रह्मणि ब्राह्म-

वंशे विशुद्धिमति येन भृगोर्जनित्वा
शस्त्रं गृहीतमथ तस्य किमत्र युक्तम् ॥ ११ ॥

वसिष्ठः—(स्वगतम्।)

कामं गुणैर्महानेष प्रकृत्या पुनरासुरः।
उत्कर्षात्सर्वतोवृत्तेः सर्वाकारं हि दृप्यति ॥ १२ ॥

विश्वामित्रः—वत्स, एतद्ब्रवीमि।

एकव्यक्त्यपराधकोपविकृतस्त्वं क्षत्रजातेरपि
प्रागाधारनिरन्वयप्रमथनादुच्छेदमेवाकरोः।

ण्योचितशमदमादिष्वेकतानमनन्यवृत्ति मनो येषा तथोक्ता भवन्ति। 'एकतानोऽनन्यवृत्ति' इत्यमर। युद्धादिषूदासीना इत्यर्थ। हिशब्द प्रसिद्धौ। वीराणा चरितेषु मानरक्षणादिषु पुराणश्चिरतनो गुरुरुपदेष्टा त्वं ब्रूहि वद। वक्ष्यमाणार्थनिर्णयमिति शेष। येन मया विशुद्धिमति दृढव्रतत्वादिशुद्धिभूयिष्ठे भृगो। भर्जयत्यनिष्टमिति भृगुरिति व्युत्पत्त्यानिष्टतापनैकस्वभावस्य भृगोर्वंशे जनित्वा शस्त्रं गृहीतं तस्य मे। अत्र शस्त्रग्रहणतत्सन्यासविषये कि युक्तम्। अथशब्द प्रश्नार्थक। कि युक्तं पृच्छयत इत्यर्थ। वंशभावादपि शस्त्रग्रहव्रतं पालनीयमिति भाव। 'प्रथिम्रदिभ्रस्जा सप्रसारणं मलोपश्च' इति भ्रस्ज्यते. कुप्रत्यय सप्रसारणं मलोपो न्यङ्क्वादित्वात्कुत्व च। 'भृज्जति तपसा भृगु' इति शाब्दिका। 'भ्रस्जो पाके' इति धातुपाठ ॥ ११ ॥ **काममिति**। एष परशुरामो गुणैर्वीर्यशौर्यदृढव्रतत्वादिभिर्महानतिशयित। काममित्यनुज्ञायाम्। अस्य गुणमहत्त्व मामनुमतमेवेत्यर्थ। 'स्मराभिलाषयो. कामोऽनुज्ञाया काममव्ययम्' इति रत्नमाला। पुन शब्दस्तुशब्दार्थक। 'पुनरप्रथमे भेदे' इत्यमर। किंतु प्रकृत्या स्वभावत। 'प्रकृत्यादिभ्य उपसख्यानम्' इति तृतीया। असुर एवासुर। प्रज्ञादेराकृतिगणत्वात्स्वार्थेऽण्प्रत्यय। असुरस्वभावभूयिष्ठ इत्यर्थ.। तत्र हेतुमाह—उत्कर्षादिति। हि यस्मात्सर्वत सर्वेषु प्रकारेषु वृत्तिर्वर्तनं यस्य स तथोक्तस्तस्मादुत्कर्षातिशयाद्धेतो सर्वे आकारा मानसत्ववाचिकत्वकायिकत्वादयः प्रकारा यस्मिन्कर्मणि तत्तथोक्तं यथा तथा दृप्यति गर्ववान्भवति। 'दर्पोऽहंकारकस्तूर्यो.' इति रत्नमाला। 'दृप हर्षमोहनयो' इति दिवादि। शौर्यवीर्याभिजात्यातिशयप्रयुक्तदर्पाद्धेतोरेष आसुरप्रकृतिरित्यर्थ। दर्पो ह्यासुरस्वभाव। तथा च भगवता गीतम्—'दम्भो दर्पोऽभिमानश्च क्रोध पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥' इति दम्भादय स्वभावा इत्यर्थ ॥ १२ ॥ **वत्सेति**। भगिनीपौत्रत्वाद्वत्सेत्यामन्त्रणम्। एतद्वक्ष्यमाणं ब्रवीमि वदामि। त्व ब्रूहीति। त्वयोक्तोऽहमिद ब्रवीमीत्यर्थ.। **एकव्यक्तीति**। त्वं प्राक्पूर्वकाल एकया व्यक्त्या क्षत्रियत्वजात्याश्रयेण केनचिदपराधाद्धोमधेनुहरणादिरूपानिष्टाचरणाद्यः कोपस्तेन विकृत सन्विकृतिं प्राप्त सन्नाधाराणां क्षत्रियत्वजा-

त्रिःसप्तावधि विप्रशुक्रजमपि क्षत्रं तथैवोद्धृतं
वृद्धैः स्वैश्च्यवनादिभिर्नियमितः क्रोधाद्व्यरंसीर्ननु ॥ १३ ॥

जामदग्न्यः—व्यरंसिषमेव पितृवधप्रयुक्तात्क्षत्रवधमहाधिकारात् । किमत्र निह्नवः ।

परशुरशनिचण्डः क्षत्रघातं विहाय
प्रियमपि समिदिध्मत्रश्चनः किं न जातः ।
निभृतविशिखदंष्ट्रश्चापदण्डोऽपि धत्ते
प्रशमितविषवह्नेः साम्यमाशीविषस्य ॥ १४ ॥

त्याधारभूतव्यक्तीना निरन्वयप्रमथनान्निरन्वयविनाशजननादपुन प्ररोहार्हध्वसोत्पादनात् । नाशो द्विविध —सान्वयविनाश , निरन्वयविनाशश्चेति । तत्र दीपादेरुत्तरोत्तरज्वालोदयशिरस्क पूर्वज्वालाविनाश सान्वयविनाश. । निर्वापणादिना सजातीयज्वालोदयानर्हविनाशस्तु निरन्वयविनाश । तथाविधनिरन्वयविनाशजननात्क्षत्रजातेः क्षत्रियत्वजातेरुच्छेदमेव सर्वदेशसर्वकालेषु विलयमेवाकरो· कृतवानसि । एकव्यक्त्येकाश्रिताया जातेर्व्यक्तिनाशे निराधारस्थित्यसभवादुच्छेद एवेति फलितार्थ. । किंच विप्रशुक्रजमपि क्षत्रं विप्रेभ्य क्षत्रियासूत्पन्ना अपि क्षत्रिया । 'शुक्र तेजोरेतसी च' इत्यमर । त्रि सप्तावधीति पूर्वोत्तरान्वयि । त्रि सप्तावध्युच्छेदमकरो । त्रि सप्तावध्युद्धृतमित्यन्वेतव्यम् । सप्त सप्तत्वसख्यावधि परिच्छेदिका यस्या उद्धरणक्रियाया इति क्रियाविशेषणमिदम् । सप्तशब्द सप्तत्वसख्यापर. शक्त्या लक्षणया वेति पक्षद्वयमपि शाब्दिकैः सूचितम् । त्रिरिति सुच्प्रत्ययान्तम् । तदर्थश्चोद्धरणक्रियाया सप्तत्वावच्छेदेनान्वेतीत्येकविंशतिकृत्व इति लभ्यते । सुजर्थस्य क्रियैकान्वयित्वस्वाभाव्येन सनिहितेनापि सप्तत्वेनान्वयासंभवात् । तथैव साक्षात्क्षत्रियवदेवोद्धृतम् । ध्वंसिता इत्यर्थ । त्वयेत्यनुषङ्गविपरिणामौ । किच । वृद्धै स्थानवय प्रभृतिनाधिकैश्च्यवनादिभि स्वैर्ज्ञातिभि । 'स्वोऽस्त्री धने पुमाञ्ज्ञातौ त्रिष्वात्मीये स्वमात्मनि' इति रत्नमाला । नियमित सन्नियन्त्रित सन्क्रोधात्पूर्वोक्तैकव्यक्त्यपराधकोपजनितात्क्रोपाद्व्यरसीर्विरतोऽभूरित्येतद्भवीमीति पूर्वेणान्वय । पूर्वमेव शस्त्रग्रहव्रतस्य समापितत्वात्पूर्वोक्तफलाफलविचारोऽत्रानवसरग्रस्त इति भाव. । व्यरसीरित्यत्र 'व्याङ्परिभ्यो रम ' इति परस्मैपदम् । 'यमरमनम–' इत्यादिना सगिटौ ॥ १३ ॥

व्यरंसिषमिति । पितृवधप्रयुक्तात्तन्मूलकात्क्षत्रियाणा वधविषयकमहाधिकाराद्व्यरंसिषं विरतोऽभूवम् । तथा च निमित्तभेदात्पुन. कोपः शस्त्रग्रहणं चाद्य न्याय्यमेवेति भाव । अत्र पितृवधप्रयुक्तकोपविरामे निह्नवोऽपलाप । 'अपलापस्तु निह्नव.' इत्यमर. । **परशुरिति** । अशनिवच्चण्डस्तीक्ष्णः परशु प्रियमपि क्षत्रघातं क्षत्रियवधं विहाय त्यक्त्वा समिधां प्रादेशपरिमिताना पलाशादिदण्डखण्डानामिध्मानां तद्विगुणाना पलाशादीन्धनखण्डाना व्रश्चनश्छेदनकरणं न जात. किम् । जात एवे-

एवं मया नियमितश्च्यवनादिवाक्यैः
कोपानलश्च परशुश्च पुनर्यथैतौ ।
देवस्य सम्प्रति धनुर्मथनेन सत्य-
मुत्थापितौ रघुसुतेन तथा प्रसह्य ॥ १५ ॥
एकस्य राघवशिशोः कृतचापलस्य
कृत्त्वा शिरो मयि वनाय पुनः प्रयाते ।
स्वस्थाश्चिराय रघवो जनकाश्च सन्तु
माभूत्पुनर्बत कथंचिदतिप्रसङ्गः ॥ १६ ॥

शतानन्दः—आः, शक्तिरस्ति कस्य वा विदेहराजन्यस्य राजर्षे-र्याज्यस्य मे प्रेयसश्छायामप्यवस्कन्दितुम्, किं पुनर्जामातरम् ।

त्यर्थ । 'त्रश्च छेदने' इत्यस्मात् 'करणाधिकरणयोश्च' इति ल्युट् । यद्यप्यमरेण समिदिध्मशब्दयो 'इध्ममेधः समित्स्त्रियाम्' इति पर्यायत्वमुक्त तथापि 'समित्पवित्रमेवश्च त्रय. प्रादेशसमिता. । इध्मं तु द्विगुण कार्य त्रिगुण परिधि स्मृत ॥'[3] इति स्मृत्यनुरोधादपर्यायत्वमिति द्रष्टव्यम् । चापदण्डोऽपि धनुर्दण्डश्च । निभृता निश्चला विशिखा एव बाणा एव दंष्ट्रा यस्य स तथोक्तः सन्प्रशमितो निर्वापितो विषमेव वह्निर्यस्य स तथोक्तस्तथाविधस्याशीविषस्य सर्पस्य साम्यमौपम्यं न धत्ते किम् । धत्त एवेत्यर्थ । किनशब्दयोरनुषङ्ग । अतोऽत्र कि निह्नव इति पूर्वेण सबन्धः । यद्यपि विशिखदष्ट्रेति रूपक प्रकम्य साम्यं धत्त इत्युपमाया समापितम्, तथापि रूपकोपमयोरनत्यन्तभेदान्न दोष. । तदुक्तम्—'उपमैव तिरोभूतभेदो रूपकमिष्यते' इति ॥ १४ ॥ **एवमिति** । श्लोकद्वयमेकवाक्यम् । च्यवनादीना वाक्यैर्हेतुभि । मया कर्त्रा । एवं पूर्वश्लोकोक्तप्रकारेण नियमितो निवर्तित कोपानलश्च परशुश्चेत्येतौ रघुसुतेन रामेण सम्प्रति देवस्य रुद्रस्य धनुषो मथनेन भङ्गेन पुन सत्य याथार्थ्येन यथोत्थापितौ येन प्रकारेणोत्थापितौ भगवतस्तथा तेन प्रकारेण कृतं चापलं दुर्विनीतत्व येन स तथोक्तस्य । 'चपल पारदे कीशे पुमान्स्त्रीषु तु चञ्चले । दुर्विनीते द्रुते नीचे' इति रत्नमाला । एकस्य राघवशिशो रामस्य शिर प्रसह्य हठात् 'प्रसह्य तु हठार्थकम्' इत्यमर । कृत्त्वा छित्त्वा । 'कृती च्छेदने' आगमशास्त्रनित्यत्वादिडागमाभाव. । मयि वनाय । 'क्रियार्थ–' इत्यादिना चतुर्थी । वनं गन्तुं पुन प्रयाते सति रघवो जनकाश्च स्वस्था निरुपद्रवाश्चिराय चिर सन्तु । अतिप्रसङ्गो गुरुतिरस्कारादिदुर्विनयप्रस्ताव पुन कथंचिन्माभून्न भवेत् । अत्रैकस्य जनका रघवश्चेत्यनेन 'त्यजेदेकं कुलस्यार्थे' इति न्याय सूचित. ॥ १५ ॥ १६ ॥ **आः, शक्तिरित्यादि** । 'आस्तु स्यात्कोपपीडयो' इत्यमर । परमपुरुषार्थभूतभगवद्विषयविद्वेषिषु 'कोपः सर्वात्मना कार्य' इत्ययमर्थोऽत्र कविना शतानन्दादिमुखेनाविष्कृत इति द्रष्टव्यम् । याज्यस्य याजयितुमर्हस्य । यजेर्ण्यन्तात् 'अचो यत्'

वयमिव यथा गृह्यो वह्निस्तथैव चिरं स्थिताः
सुचरितगुरुस्तम्भाधारे गृहे गृहमेधिनाम् ।
यदि परिभवस्तत्रान्यस्मादुपैति धिगस्तु त-
त्प्रियमपि तपो धिग्ब्राह्मण्यं धिगङ्गिरसः कुलम् ॥ १७ ॥

विश्वामित्रः—साधु गौतम वत्स, साधु । कृतकृत्य एष राजा सीरध्वजस्त्वया पुरोहितेन ।

न तस्य राष्ट्रं व्यथते न रिष्यति न जीर्यति ।
त्वं विद्वान्ब्राह्मणो यस्य राष्ट्रगोपः पुरोहितः ॥ १८ ॥

इति यत्प्रत्यय । प्रेयसोऽतिशयेन प्रियस्य च्छायामप्यनातपमपि । समीपदेशमपीति यावत् । अवस्कन्दितुमाक्रमितुं कस्य शक्तिरस्तीत्यन्वय । 'स्कन्दिर् गतिशोषणयोः' इत्यस्मात्तुमुन् । जामातरमवस्कन्दितुं कस्य शक्तिरिति किं पुनर्वक्तव्यमित्यर्थ । 'जामाता दुहितु पति' इत्यमर । **वयमिति** । सुचरितान्येव श्रुतिस्मृत्याचारप्रमाणकानि सत्कर्माण्येव गुरव स्तम्भा महत्य स्थूणा आधारा पतनप्रतिरोधका यस्य तत्तथोक्त तस्मिन् । 'स्तम्भौ स्थूणाजडीभावौ' इत्यमर । अत्र 'शत्रुभङ्गः सुवृत्तता' इत्येतदभिप्रेत गृहमेधिना जनकदशरथादिगृहस्थाश्रमनिष्ठाना गृहे गेहे । 'गृह ग्रहाश्च भूम्नि स्याद्वाविमौ गेहभार्ययो' इति रत्नमाला । वयमिवाहं वसिष्ठादयश्चैव वह्नि गृह्यो वश्य । पक्षिमृगवद्गृहासक्तो वा भवतीति शेष । 'कर्मावबोधके गृह्यमर्यं स्ववशगे त्रिषु । गृह्य शाखापुर गृह्या गृहासक्ता मृगा खगा ॥' इति रत्नमाला । 'पदास्थैरिवाह्यापक्ष्येषु च' इति गृह्यास्तेः क्यप् । किंच वय तथा चिर स्थितास्तथैव वह्निश्चिर स्थित । तत्र 'गृहमेधिना गृहे घटोऽस्ति तमानय' इत्यत्रेव तच्छब्द. पूर्वपरामर्शी । अन्यस्मात्परिभवोऽन्यहेतुकतिरस्कारो यद्युपैति प्रसक्तश्चेत्तत्तदा प्रियमपि प्राणेभ्योऽपीष्टं तप उपवासादि नियमजातम् । 'नियमेषु तप-शब्द.' इत्यापस्तम्ब । धिगस्तु । तप कर्मिका निन्दा स्यादित्यर्थः । धिक्शब्दार्थस्यास्तिक्रियाया कर्तृत्वम् । यद्वास्तित्वस्व्ययमसूयार्थकम्, असूया च तप प्रभृतिष्वकिंचित्करत्वाभिसधिना क्रियत इति द्रष्टव्यम् । 'असूयोपगमेऽस्तु च' इत्यमर । ब्राह्मण्यं वेदाध्ययनाद्युपयुक्तं ब्राह्मणवर्ण धिक् । अङ्गिरस कुल धिक् । 'अङ्गिरा मुखतो जज्ञे' इति विधिष्य ब्रह्मणो मुखजातस्याङ्गिरस कुल धिक् । अभिजनविद्यावृत्तानि विगित्यर्थ ॥ १७ ॥ गौतम गौतमपुत्र । कृतानि कृत्यानि येन स तथोक्त । स्वय फलार्थव्यापाररहितोऽपि स्वदीयव्यापारेण फलभागित्यर्थ । **नेति** । ब्राह्मणो मुख्यब्राह्मण्यवान् । 'ब्राह्मणोऽसौ षट्कर्मा यागादिभिर्युत.' इत्यमर । विद्वान्सदा स्वदीयाभ्युदयसाधनावमर्शनपर । 'विदः शतुर्वा' इति क्नु । त्व यस्य सीरध्वजस्य । राष्ट्रं जनपद गोपायति रक्षतीति राष्ट्रगोप । 'गुपू रक्षणे' इत्यस्मात्कर्मण्यण् । 'राष्ट्रं विषय उत्पाते' इति रत्नमाला । तथाविध. पुरोहितो भवसि । न

जामदग्न्यः—गौतम त्वयेव बहुभिः क्षत्रियपुरोहितैर्ब्रह्मतेजसा स्फुरितमासीत्। किंतु प्राकृतानि तेजांस्यप्राकृते ज्योतिषि शाम्यन्ति।

शतानन्दः—(सक्रोधम्) अरे अनड्वन्, पुरुषाधम, निरपराधराजन्यकुलकदन, महापातकिन्, अशिष्ट, विकृतवेष, बीभत्सकर्मन्,

---

केवलं श्रौतस्मार्तकर्मणि भविष्यसि तद्दर्शी। किंतु राज्यविषयेऽपीति भाव। तस्य तथाविधस्य सीरध्वजस्य राष्ट्रं न व्यथते कुतश्चिदपि न बिभेति। यद्वा न व्यथते प्रकृतिविपर्यासं न भजते। 'व्यथ भयसचलनयो' इति धातुपाठ। सचलनं नाम प्रकृतिविपर्यास इत्युक्तम्। न रिष्यति न हिनस्ति। परस्परमिति शेष.। 'रुष रिष हिंसायाम्' इति च धातुपाठ। यद्वा प्रेरणाशस्त्रागाद्दु खाश्रयो न भवतीत्यर्थ। हिंसा हि दु खोत्पादनम्। न जीर्यत्यकाले शैथिल्यं न प्राप्नोति। 'जृष् झृष् वयोहानौ' इति धातुपाठ॥ १८॥ क्षत्रियपुरोहितै कर्तृभिर्ब्रह्मतेजसः ब्राह्मण्यप्रयुक्तपराभिभवनसामर्थ्यरूपप्रभावेण करणेन स्फुरितमासीत्स्फुरणमभूत्। किंचिद्व्यापारोऽभूदिति यावत्। कित्वेवं स्फुरणे प्राकृतानि पृथग्जनेषु भवानि। 'प्राकृतश्च पृथग्जन' इत्यमर। 'तत्र भव' इत्यण्। अत्राङ्के नियताप्तिप्रकरीयोगात्मको विमर्शसधिरुक्तः। तदुक्तम्—'गर्भसधौ प्रसिद्धस्य बीजार्थस्यावमर्शनम्। हेतुना येन केनापि विमर्श सधिरिष्यते॥ नियताप्तिप्रकर्युक्तेरङ्गान्यस्य त्रयोदश। तत्रापवादः सफेटो विद्रवद्रवशक्त्य॥ द्युति प्रसङ्गश्चलनं व्यवसायो निरोधनम्। प्ररोचनं विचलनमादानं च त्रयोदश॥' इति। तथा—'अपायाभावतः कार्यनिश्चयो नियताप्तिका। अव्यापिनी प्रकरिका' इति च परशुरामप्रयुक्तापायाभावेन निर्विघ्नरामत्रेयोरूपकार्यनिश्चयस्य तदुपयुक्तशतानन्दाद्यव्यापिकथाशस्य च योगाद्बीजार्थावमर्शनरूपविमर्शसधि। अस्याङ्गान्युत्तरत्र दर्शयिष्यन्ते॥ अनड्वन्गर्वोद्धत। गौणवृत्त्या निर्देश। वृषभो हि दर्पस्तिमितो भवति। पुरुषाधम पराभ्युदयासहिष्णो। परसमृद्धिसहिष्णुत्व ह्युत्तमपुरुषलक्षम्, तद्व्यतिरेक पुरुषाधमत्वम्, निरपराधेत्यादि। होमधेन्वपहरणादिना कस्यचिदपराधित्वेऽप्यन्यस्यानपराधित्वादिति भाव। कदन। वैक्लव्यकारिन्वैकल्यकारिन्निति वार्य। 'कदि क्रदि क्लदि वैक्लव्ये'। 'वैकल्ये' इति च पाठ। त्रयोऽप्यनिदित इति नन्दी। तेन नुमभाव। महापातकिन्। महापातकशब्दो ब्रह्महत्यादिषु योगरूढ। तस्मादिनि। यद्वा महापातकं ब्रह्महत्यादिरूपमतिशयेनास्तीत्यतिशयविवक्षाया कर्मधारयादिनि.। अतिशयो हि न बहुव्रीहिलभ्यः। नात. 'न कर्मधारयात्' इति निषेध। अतिशयितब्रह्महत्या च कार्तवीर्यवधरूपा। तदुक्तं भागवते जमदग्निना—'राज्ञो मूर्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरु॥' इति। अशिष्ट वेदप्रामाण्याभ्युपगमरहित। ब्राह्मणस्यायुधग्रहणप्रतिषेधातिक्रमादिति भाव। विकृतवेष। परशुवनुर्बाणादिब्राह्मण्यविरुद्धवस्तुधारणाच्छस्त्रक्षतकिणधारणाच्चेति भावः। बीभत्सानि जुगुप्सनीयानि कर्माणि यस्य स तथोक्तस्तस्य सबुद्धि। 'वधेश्चित्तविकारे' इति जुगुप्साया वधे. सन्। तत. कर्मणि 'अचो यत्' इति यत्।

अपूर्वपाषण्ड, काण्डीर, काण्डपृष्ठ, कथमस्यामपि दिशि प्रगल्भसे। ननु च रे, त्वमसि कि ब्राह्मण एव। अहो ब्राह्मणस्याचारः।

मातुरेव शिरश्छेदो गर्भाणां चापकर्तनम्।
राज्ञां च सवनस्थानां ब्रह्महत्यासमो वधः॥ १९॥

जामदग्न्यः—आः, स्वस्तिवाचनिक दुष्ट सामन्तपुरोहित, अपि च रे अहल्यायाः पुत्र, तवाहं काण्डपृष्ठः।

अपूर्वपाषण्ड नूतनपाषण्ड। 'भवव्रतधरा ये च ये च तान्समनुव्रता·। पाषण्डिनस्ते' इत्युक्तेरिति भाव·। 'तस्मात्तु पाप्मनो लिङ्गं पाषण्डमिति कथ्यते' इत्युक्तपापलिङ्गधरेत्यर्थः। 'पाषण्डा सर्वलिङ्गिन' इत्यमरश्च। काण्डा बाणा अस्य सन्तीति काण्डीरस्तस्य संबुद्धि। 'सायक प्रदरः काण्डकङ्कपत्रत्रिलीमुखा.' इत्यमरशेष। 'काण्डाण्ड्वादीरन्नीरचौ' इति मत्वर्थीय ईरन्प्रत्यय। 'स्यात्काण्डवास्तु काण्डीर' इत्यमर। काण्डपृष्ठ आयुधजीविन्। 'शस्त्राजीवे काण्डपृष्ठायुधीया युधिकाः समा.' इत्यमर। आयुधजीवित्वं ब्राह्मणस्य निषिद्धम्। प्रगल्भसे धार्ष्ट्यं करोषि। रे इति नीचसबोधनम्। ननु चेति विरोधोक्ति·। त्वं कि ब्राह्मण एवासि कस्मिन्देशे कीदृशब्राह्मण्यवानसि। क्षेपोक्तिरियम्। अहो इति। ब्राह्मणस्याचारः। विस्मयनीय इत्यर्थः। **मातुरिति**। एवकार· प्राधान्यपर। स्त्रीसामान्यवधे महान्दोष·, कि पुन प्रधानभूताया मातुर्वध इति भाव। यद्वावधारणार्थको गुरुवचनानुरोधान्मातुर्वधो न दोषायेति शङ्कावारणार्थक। गुरुवचनानुरोधोऽपि महापातकव्यतिरिक्तविषय एव युक्त, न तु पतनीयप्रसङ्ग इति भाव। तथा चापस्तम्ब—'आचार्याधीनः स्यादन्यत्र पतनीयेभ्य·' इति, 'अमुं ममारातिं ब्राह्मणमित्थं व्यापादयेत्याचार्येणोक्ते एवमादि न कुर्यात्' इति तद्विषया ह्युज्ज्वला। तथा च—'पितुर्दशगुण माता गौरवेणातिरिच्यते' इति पितुरतिजयेन गौरव्याया मातुर्वध पितृवचनमूलकोऽपि न युक्त एव। गर्भाणामपकर्तनं च गर्भिणीभि सह च्छेदश्च। सवनस्थाना यागादिदीक्षिताना राज्ञा क्षत्रियाणा ब्रह्महत्यासमो वधश्चेति ब्राह्मणस्याचारो विस्मयनीय इति पूर्वेण सबन्ध। ब्रह्महत्यासम इत्यनेन ब्रह्महत्यातिदेशो विवक्षित। तथा च मनु—'हत्वा गर्भमविज्ञातमेतदेव व्रत चरेत्। राजन्यवैश्यावीजानावात्रेयीमेव च स्त्रियम्॥' इति। ईजानौ यागदीक्षामध्यवर्तिनौ। आत्रेय्यत्रिगोत्रजा गर्भिण्यृतुमती चेति तद्व्याख्यातार·। विष्णुरपि—'यागस्थक्षत्रियस्य वैश्यस्य रजस्वलायाश्चान्तर्वत्न्याश्चात्रिगोत्रजाया अविज्ञातगर्भस्य शरणागतस्य घातानि ब्रह्महत्यासमानि' इति। कामन्दकस्तु—'करणे ब्रह्महत्यासमत्व कैमुतिकसिद्धम्'। अत्र गुणज्येष्ठस्य मूर्धावसिक्तस्य वधो भूयसा ब्रह्मवधादुरु·। राजमात्रस्य यागमध्यस्थस्य वधो ब्रह्महत्यासम, यागदीक्षारहितस्य राजमात्रस्य वधो ब्रह्महत्यायासुरीयाशसमः। तथा चामर—'तुरीयो ब्रह्महत्याया. क्षत्रियस्य वधे स्मृत' इति॥ १९॥ आ. इति क्रोधे। स्वस्तिवाचनेन जीवति स्वस्तिवाचनिक। 'वेतनादिभ्यो जीवति' इत्यनेन

शतानन्दः—दुष्ट दुर्मुख भृगुप्रसवपांसन,

राजानो गुरवश्चैते महिम्नैव महाक्षमाः ।

क्षमन्तां नाम न त्वेवं शतानन्दः क्षमिष्यते ॥ २० ॥

(इति कमण्डलूदकेनोपस्पृशति ।)

(नेपथ्ये ।)

कः कोऽत्र भोः, प्रसाद्यतामयं धवित्रनिर्धूत इवाभिप्रणीतः पृषदाज्याभिघारघोरस्तनूनपात्समिध्यमानदारुणब्रह्मवर्चसज्योतिराङ्गिरसः ।

ठक्प्रत्यय. । दुष्ट दोषयुक्तेति सबुद्ध्यन्तम् । सामन्तविशेषण वा । सामन्तस्य पार्श्वराजस्य । सार्वभौमताशून्यस्येति यावत् । पुरोहित । रे इति नीचाह्वाने । अहल्याया पुत्र । इन्द्रातिचाराभिप्रायेणाहल्यापुत्रत्वोक्ति । 'षष्ठ्या आक्रोशे' इत्यलुक् । अहं तव काण्डपृष्ठ । त्वदभिप्रायेणायुधजीवीत्यर्थ । **दुर्मुखेति** । दुर्मुख परुषवदन । भृगुप्रसवाना भृगुवंश्याना पासनावद्यावह । अवद्यपरात्पासुशब्दान्मत्वन्ताण्णिच् । मतुब्लोपे सति नन्द्यादित्वात्कर्तरि ल्यु । **राजान इति** । राजानो दशरथजनकादय । गुरवो वसिष्ठादय । महिम्नैव महात्त्वेनैव महक्षमा आग सहनरूपक्षमाभूयिष्ठा । क्षमन्ता नाम परशुरामपारुष्यं सहन्ता नाम । महता क्षमात्वभावत्वात्तेषा क्षमा युक्तेत्यर्थ । शतानन्दस्तु तद्वत्क्षमाप्रयोजकमहद्भावविरहितोऽहमित्यर्थ. । एवं वसिष्ठादिवन्नैव क्षमिष्यते । उत्तरक्षण एवापराधानुगुण दण्ड प्रयोजयामीत्यर्थ । अत्र शतानन्दजामदग्न्याभ्यामन्योन्यदोषप्रख्यापनादपवादो नाम विमर्शसंध्यङ्गमुक्तम् । यथोक्तम्—'दोषप्रख्यापनमपवाद' इति । अत्रैवान्योन्यं रोषसभाषणात्सफेटो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'रोषसभाषण सफेट.' इति ॥ २० ॥ कमण्डलूदकेनोपस्पृशत्याचमन करोति । 'उपस्पर्शस्त्वाचमनम्' इत्यमर । कर्मण करणत्वविवक्षया तृतीया । 'आचान्तेन कर्तव्यम्' इति नियमादिति ॥ **प्रसाद्यतामिति** । धवित्रेण मृगचर्मरचितव्यजनेन । 'धवित्र व्यजनं तद्यद्रचित मृगचर्मणा' इत्यमर । निर्धूत । समधिकज्वलनार्थमुत्कम्पितोऽभिप्रणीत कृतसस्कार । 'प्रणीत सस्कृतोऽनल' इत्यमरः । विशिष्टवाचकाना पदाना विशेष्यवाचकपदसमभिव्याहारे विशेषणमात्रपरत्वम् । पृषदाज्यस्य दधिमिश्राज्यस्य । 'पृषदाज्यं सदध्याज्ये' इत्यमर । अभिघारेणाभित सेचनेन । 'गृ घृ सेचने' इत्यस्माद्भौवादिकाद्भावे घञ् । घोर. चटचटात्कारविसष्ठुलज्वालतया भयकरस्तनूनपादग्निरिव । 'जातवेदास्तनूनपात्' इत्यमर. । समिध्यमानं सम्यग्दीप्यमानम् । अन्तर्भावितण्यर्थात् 'इन्धी दीप्तौ' इत्यस्मात्कर्मणि लट. शानच् । यद्दारुणं भयंकर ब्रह्मणो वर्चस्तेजो ब्रह्मवर्चसम् । 'ब्रह्महस्तिभ्या वर्चसः' इत्यच् । तदेव ज्योतिर्यस्य स तथोक्त. । ब्रह्मवर्चसज्योति शब्दयो सा मान्यविशेष । भावान्न पुनरुक्ति । यद्वा ब्रह्मवर्चसस्य सद्वृत्ताध्ययनसमृद्धेर्ज्योतिस्तेजो यस्येति विग्रह.-'स्याद्ब्रह्मवर्चस वृत्ताध्ययनर्धि' इत्यमरः । प्रसाद्यता निवृत्तकोप क्रियताम् । प्रसाद-

शतानन्दः—(ससरम्भं शापोदकं गृहीत्वा ।) भो भोः सभासदः, पश्यन्तु भवन्तः ।

सक्रोधप्रसभमह पराभिघाता-
दुद्भूतद्रुतगतिराततायिनं वः ।
उत्पातक्षुभितमरुद्विघट्यमानो
वज्राग्निर्द्रुममिव भस्मसात्करोमि ॥ २१ ॥

(नेपथ्ये ।)

भगवन्, प्रसीद । गृहानुपगते प्रशाम्यतु दुरासदं तेजः ।

श्लाघ्यो गुणैर्द्विजवरश्च निजश्च बन्धु-
स्तस्मिन्गृहानुपगते सदृशं किमेतत् ।
विद्वानपि प्रचलितस्तु यदेष मार्गा-
त्क्षन्तं हि तत्र विनयाय शमं भज त्वम् ॥ २२ ॥

वच्छब्दाण्णिजन्तात् 'प्रातिपदिकाद्धात्वर्थे' इत्यादिना मतुब्लोपे कर्मणि लोट् ॥ **ससंरम्भमिति** । सरम्भ सक्रोधयत्न । शापस्य परानिष्टौपयिककोशस्योदकमभिव्यञ्जनक जलम् । सभाया सीदन्तीति सभासद । 'सत्सूद्विष–' इत्यादिना सीदते. कर्तरि क्विप् । **सक्रोधेति** । परस्यारेः परशुरामस्य । 'परोऽरि. परमात्मा च' इति रत्नमाला । अभिघातात्परिभवरूपहिंसनाद्धेतो सक्रोधप्रसभं सकोपवेगम् । 'प्रसभो वेगहर्षयो.' इति कोश । उद्भूतोत्पन्ना द्रुतगति शीघ्रव्यापारो यस्य तथाविधोऽहं वो युष्माकमाततायिनं वधोद्यतम् । 'आततायी वधोद्यत.' इत्यमर । अनेन 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति वचन सूच्यते । उत्पातेन प्राणिनामशुभयोगेन हेतुना क्षुभितेन सचलितेन मरुता प्रवातेन विघट्यमानो भज्यमानो वज्राग्निरशनिवर्द्रुममिव भस्मसात्करोमि कृत्स्नमेवामु भस्म सपद्यमान करोमि । 'विभाषा सातिकात्स्न्यें' इति सातिप्रत्यय । अत्र वधोद्योगाद्विद्रवो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'वधबन्धादिविद्रव ' इति ॥ २१ ॥ प्रसीद प्रसादं प्रामुहि । गृहानुपगते । परशुराम इति शेष । 'न कचन वसतौ प्रत्याचक्षीत' इति श्रुतेरिति भावः । दुरासदं दुर्धर्ष तपःप्रयुक्त पराभिभवनसामर्थ्य तेज. प्रशाम्यतु प्रशान्त भवतु । गृहानुपगत इति पूर्वापरान्वयि । **श्लाघ्य इति** । परशुराम इत्यादि । परशुरामो गुणै श्रोत्रियत्वादिभिः श्लाघ्य· प्रशंसनीय । किंचाय द्विजवरो ब्राह्मणश्रेष्ठ । किंचाय तव निजो बन्धु । स्वीय. सपिण्ड इत्यर्थ. । 'निजौ स्वीयाविनाश्निौ' इति रत्नमाला । 'सगोत्रबान्धवज्ञातिबन्धुस्वजना समा ' इत्यमर । गृहानुपगते तस्मिन्युष्मद्गृहागते तथाविधपरशुरामविषय एतद्भस्मसात्करण सदृशमनुरूप किम् । नानुरूपमित्यर्थ. । एष परशुरामो विद्वानपि ज्ञाता सन्नपि । अत्र 'विदुषोऽतिक्रमे दण्डभूयस्त्वम्' इत्येतद्विवक्षितम् । मार्गाद्ब्रह्मण्यानुगुणाचाररूपात्प्रचलित इति यत्, तत्र विनयाय शिक्षणाय

वसिष्ठः—(शापोदकमपहरन् ।) वत्स शतानन्द, यथाह संबन्धी ते महाराजदशरथः । अन्यच्च ।

यत्कल्याण किमपि मनसा तद्वयं वर्तयाम-
स्त्वं जाबालिप्रभृतिसहितः शान्तिमध्यग्निकुर्याः ।
जेतु जैत्रानथ खलु जपन्सूक्तसामानुवाका-
नस्मच्छिष्यैः सह स भगवान्वामदेवो गृणातु ॥ २३ ॥

(शतानन्द परिक्रम्य निष्क्रान्त ।)

जामदग्न्यः—पश्यत बटोः क्षत्रियावष्टब्धस्य गर्जितानि । तत्किमनेन । भो भोः कोसलविदेहेश्वरप्रसादोपजीविनो ब्राह्मणाः, सप्तद्वीपकुलपर्वतगोचराश्च सर्वक्षत्रियाः, वदामः ।

तपो वा शस्त्रं वा व्यवहरति यः कश्चिदिह वः
स दर्पादुद्दामस्त्विषमसहमानः स्खलयतु ।

क्षत्र हि क्षत्रवर्णो हि । योग्यमिति शेष । तुशब्द शङ्काद्योतकः । सा च शङ्का परशुरामोऽयमाचारव्यतिक्रमाद्दण्डनीय इत्याकारिका । तत्र क्षत्रिय एव योग्यो न ब्राह्मण इति परिहार । यस्मादेव तस्माद्धे शतानन्द, त्व ब्राह्मणोत्तमस्त्वं शम क्रोधनिवृत्तिं भज प्रामुहि । अत्र विरोधशमनाच्छक्तिर्नाम सध्यङ्गमुक्तम् । यथोक्तम्—'विरोधशमन शक्तिः' इति ॥ २२ ॥ यथाह तथैवास्त्विति शेषः । **यदिति** । यत्कल्याणमगर्हितेष्टार्थसिद्धिरूप रामस्य श्रेयस्तन्मनसा वयमहं विश्वामित्रादयश्च वर्तयाम आशासनेन निष्पादयाम । त्वं जाबाल्यादियुक्तः सन्नग्नावध्यग्नि । विभक्त्यर्थेऽव्ययीभावः । शान्तिमनिष्टशान्तिहोमं कुर्या कुरु । पूर्वत्रात्र च फलस्य कर्तृगामित्वविरहान्नात्मनेपदम् । स भगवान् । 'तच्चेतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे' इति श्रुतिप्रसिद्धज्ञानादिषाड्गुण्यपूर्णो वामदेवोऽस्मच्छिष्यैः सह सहितः सन्परानभिभवितुं जैत्राज्ञयहेतुभूतान् । करणस्य कर्तृत्वविवक्षया तृच् । जेतैव जैत्र । प्रज्ञादेराकृतिगणत्वात्स्वार्थेऽण्प्रत्यय । सूक्तानि श्रीसूक्तपुरुषसूक्तादीनि, सामानि रथतरादीनि, अनुवाकान् 'शुक्रप्रविध्य' इत्यादिकान् 'आशु शिशान.' इत्यादिकाश्च जपन्नुपाशूच्चारयन्गृणातु पठतु । जपतिरत्रोपाशुप्रयत्नमात्रवचनो गृणातिनोच्चारणस्याभिधानात् । अत्र कार्यसग्रहणरूपमादानं नाम सध्यङ्गमुक्तम् । यथोक्तम्—'कार्यसग्रहणमादानम्' इति ॥ २३ ॥ **पश्येतेति** । बटोरित्यनेन शतानन्दस्य परशुरामतो वयसा न्यूनत्व सूचितम् । पूर्वोक्त गुरुत्वं तु स्थानेनेति मन्तव्यम् । क्षत्रियावष्टब्धस्य जनकादिक्षत्रियावलम्बिन । 'अवाचालम्बनाविर्दूर्ययोः' इत्यवपूर्वकस्य स्तम्भे षत्वम् । कोसलविदेहेश्वरयोर्दशरथजनकयो प्रसादमनुग्रहमुपजीवन्तीत्याश्रित्य जीवन्तीत्यर्थे 'सुप्यजातौ–' इति णिनि । सप्तद्वीपाः कुलपर्वताश्च गोचरा निवासदेशा येषा ते तथोक्ताः । इदं पूर्वोत्तरान्वयि । **तपो वेत्यादि** । वो युष्माकं मध्ये यो ब्राह्मणो वा

अरामां नि.सीरध्वजदशरथीकृत्य जगती-
मतृप्तस्तत्कुल्यानपि परशुरामः शमयति ॥ २४ ॥

(नेपथ्ये ।)

भार्गव भार्गव, अति हि नामावलिप्यसे ।

जामदग्न्यः—असूयति नामास्मदवलेपाय जनकः ससंरम्भश्च ।

(प्रविश्य ।)

जनकः—

शत्रुध्वंसात्परिणतिवशाद्ब्रह्मतन्त्रव्रतानां
नैरन्तर्यादपि च परमब्रह्मतत्त्वोपलम्भात् ।

क्षत्रियो वा कश्चिदिह दशरथजनकविषये तपो वा शापप्रयोजकं तपो वा, शस्त्र वा युद्धोपकरणमायुधं वा । ब्राह्मणस्तप क्षत्रिय शस्त्रमुभावप्युभयं वेति यथायथं विकल्पसमुच्चयौ द्रष्टव्यौ । व्यवहरत्यस्मदभियोगोपकरणत्वेन वदति । दर्पादुद्दाम स दर्पाधिकः स ब्राह्मण क्षत्रियो वा विषमस्मदीयं तेजोऽसहमान· सन्नमृष्यमाण सस्त्रिषमस्मदीयं तेज स्खलयतु भ्रशयतु । 'प्रैषातिसर्गप्राप्तकालेषु–' इति कामचारे प्राप्तकाले लोट् । 'स्खल सचलने' इत्यस्मात् 'हेतुमति च' इति णिच्, 'दलिवलिस्खलिरणिध्वनिन्नपिक्षपयश्च' इति भोजराजमतेन मित्त्वात्स्खलयत्विति हस्व । कामचारार्थकलोटा न न किञ्चिदनिष्टमिति सूच्यते । परशुरामोऽरामामविद्यमानरामाम् । 'नञोऽस्त्यर्थाना वाच्यो वा चोत्तरपदलोप ' इति विद्यमानशब्दस्य लोप. । जगतीं भूमिम् । 'जगती रत्नगर्भा च' इत्यमर । नि सीरध्वजदशरथीकृत्य दशरथजनकशून्या कृत्वा । 'कृभ्वस्तियोगे–' इत्यादिना च्वि । 'ऊर्यादिच्विडाचश्च' इति गतिसज्ञायाम् 'कुगति–' इत्यस्मात्समासे 'समासेऽनञ्पूर्वे' इत्यादिना ल्यप् । अतृप्त सस्तावताप्यलंबुद्धिरहितसस्तत्कुल्यानपि जनकदशरथयोर्वंशे गृहे च स्थितान्मनुष्यानपि शमयति नमयिष्यति । 'वर्तमानसामीप्ये–' इति भविष्यदासन्ने लट् । अत्रोद्वेजनाद्द्युतिर्नाम सध्यङ्गमुक्तम् । यथोक्तम्—'तर्जनोद्वेजने द्युति.' इति । तर्जनं कायिकमुद्वेजनं वाचिकमिति भेद ॥ २४ ॥ अवलिप्यसे गर्ववान्भवसि ॥ अस्मदवलेपायासूयति । अस्मद्गर्ववविषयकक्रोधप्रयुक्तदोषाविष्करण करोतीत्यर्थ । 'कुधद्रुहेर्ष्यासूयार्थाना यं प्रति कोप.' इति चतुर्थी । नामेति कुत्सायाम् । दुर्बलस्यासूया कुत्सनीयेत्यर्थ । 'नाम प्राकाश्यसभाव्यक्रोधोपगमकुत्सने' इत्यमर । ससरम्भश्च ॥ प्रविश्येति । आहेति शेष. । **शत्रुध्वंसादिति** । विजयसहज विजयेन सहोत्पन्नं यत्क्षात्रं क्षत्रियवर्णासाधारणं तेज. पराभिभवनसामर्थ्य कर्तृ शत्रुध्वंसात्पुरा देवताप्रसादसहकृतभुजबलेन शत्रूणा नि शेषविध्वसनात् । किच परिणतिवशाज्जरानुरोधात् । 'वश कान्तौ' । कान्तिरिच्छा । किच गृह्यस्यापस्तम्बादिप्रणीतकर्मावबोधकग्रन्थस्य । 'कर्मावबोधके गृह्यम्' इति रत्नमाला । तन्त्राणां तद्वोधितप्रयोगरूपाणाम् । तन्त्रं स्वराष्ट्रचिन्तायां तन्तुवाये परिच्छदे । यागप्रयोगसिद्धान्तशास्त्रमुख्यौषधेषु च ॥' इति रत्नमाला ।

क्षात्रं तेजो विजयसहजं यद्व्यरंसीदिदं त-
त्प्रत्युद्भूय त्वरयति पुनः कर्मणे कार्मुकं नः ॥ २५ ॥

जामदग्न्यः—भो जनक,

त्वं ब्रह्मण्यः किल परिणतश्चासि धर्मेण युक्त-
स्त्वां वेदान्तेष्वचरमऋषिः सूर्यपुत्रः शशास ।
इत्याचारादसि यदि मया प्रश्रयेणोपजुष्ट-
स्तत्किं मोहादविदितभयः कर्कशानि ब्रवीषि ॥ २६ ॥

व्रतानामुपवासादिनियमानाम् । 'नियमो व्रतमस्त्री' इत्यमर. । नैरन्तर्याद्विच्छेदविरहात् । किंच परमस्य मुख्यस्य ब्रह्मणो ब्रह्मशब्दवाच्यस्य भगवतस्तत्त्वस्यानारोपितरूपस्योपलम्भाद्योगदृष्ट्या साक्षात्कारान्मुक्तात्मनाम् । प्रधानस्य वेदादेव गौण्या वृत्त्या ब्रह्मशब्दविषयत्वात्तद्व्यावृत्त्यर्थं परमेति । श्रूयते च—'देव ब्रह्म परमं कवीनाम्' इति । स्मर्यते च–'परमब्रह्मभूतस्य वासुदेवस्य' इति । 'वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि । तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने ॥' इति च । 'बृहति बृहयति तस्माद्दुच्यते परम ब्रह्म' । बृहन्तोऽस्मिन्गुणा 'बृहत्त्वाद्बृंहणत्वाच्च ब्रह्मेति परिपठ्यते,' 'ब्रह्म परिबृढं सर्वत्र' इत्यादिना च ब्रह्मशब्दो निरुक्त. । तत्त्वोपलम्भादित्यनेन 'मनो ब्रह्मेत्युपासीत' इत्यादिनोक्तानामर्वाचीनफलकाना ब्रह्मोपलम्भाना व्युदास. । अनेन मोक्षहेतुब्रह्मसाक्षात्कारादिति फलितम् । एवं च हेतुचतुष्टयेन व्यरंसीद्युद्धादिकर्मणो विरतमभूत्तदिदं क्षात्र तेज कर्तृ । पुन प्रत्युद्भूयोद्भूतता प्राप्य । प्रकाशावस्था प्राप्येति यावत् । कार्मुक कोदण्ड कर्मणे युद्धरूपकर्मणे त्वरयति सभ्रमयति । 'ञिक्षरा सभ्रमे' घटादित्वान्मित्त्व मिलाभ्रस्व । कर्मणे त्वरयतीत्यनेन 'कर्मण उकञ्' इति सूत्रोक्ता 'कर्मणे प्रभवति कार्मुकम्' इति व्युत्पत्ति स्मारिता ॥ २५ ॥ **त्वमिति** । भो जनक, त्वं ब्रह्मण्य किल । वेदवैदिकादिविषये साधुरिति प्रसिद्धि । 'ब्रह्म तत्त्व तपो वेदा ब्रह्मा विप्र. प्रजापति ' इति कोश । ब्रह्मशब्दात् 'तत्र साधु ' इति यत् । किंच परिणतोऽसि । किंच धर्मेण युक्तोऽसि । 'धर्मेण पापमपनुदति' इत्युक्तमोक्षसाधनधर्मेण नित्ययुक्तोऽसि । किंच त्वा सूर्यपुत्रो ऋषिर्याज्ञवल्क्य । 'पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्,' 'गरीयान्ब्रह्मद पिता स हि विद्यातस्तं जनयति' इत्यादिना शिष्यस्य पुत्रत्वप्रतीते सूर्यपुत्र इत्युक्तम् । वेदान्तेषूपनिषत्स्वचरम श्रेष्ठ बृहदारण्यकं शशास बोधितवान् । 'दुह्याच्–' इत्यादिना शासेर्द्विकर्मकत्वम् । बृहदारण्यकसमाख्ययैव तस्य वेदान्तेषु श्रैष्ठ्यमवगतमित्यभिप्रायेणाचरमपदेन तस्य निर्देश । इतिशब्दो हेतौ । ब्रह्मण्यत्वादिहेतुचतुष्टयेन । 'आचारात्तेषा त्वयासनेन प्रश्वसितम्' इत्यादिश्रुत्युक्ताचारनिमित्त मया त्वं प्रश्रयेण विनयेनोपजुष्टोऽसि यदि सेवितोऽसि यदि तत्ततो हेतोर्मोहात्स्वपरबलाबलाज्ञानादवि-

जनकः—अण्डभेदनं क्रियते प्रश्रयश्चेति । शृणुत भोः सभासदः,

भृगोर्वंशे जातस्तपसि च किलायं स्थित इति
द्विषत्यप्यस्माभिश्चिरमिह तितिक्षैव हि कृता ।
यदा भूयोभूयस्तृणवदवधूनोत्यनिभृत-
स्तदा विप्रेऽप्यस्मिन्नमतु धनुरन्यास्ति न गतिः ॥ २७ ॥

जामदग्न्यः—(सरोषहासाक्षेपम् ।) किमात्थ । भो भो धनुर्धनुरिति । अहो आश्चर्यम् ।

क्षत्त्रालोकक्षुभितहुतभुक्प्रस्फुलिङ्गाट्टहासं
हास्य पश्यन्नपि रिपुशिरःशाणशातं कुठारम् ।
दत्तोत्सेकः प्रलपति मया याज्ञवल्क्यानुरोधा-
न्मिथ्याध्मातः किमपि जरसा जर्जर· क्षत्त्रबन्धुः ॥ २८ ॥

दितभय सन्नज्ञातभाव्यनर्थ सन्कर्कशानि कठोराणि ब्रवीषि वदसि । 'स्यात्कर्कशः साहसिक कठोरमसृणावपि' इत्यमर ॥ २६ ॥ अण्डभेदन क्रियत इति । औद्धत्येनेति शेष । प्रश्रयश्चेति । कीर्त्यत इति शेष । अण्डभेदनप्रश्रयकथनयोर्मिथो व्याहृतिरिति भाव· । शृणुतेति । यूयमिति शेष । **भृगोरिति** । अय परशुरामो भृगोर्वंशे जात । किच तपसि स्थित इति हेतोरस्माभिर्मया द्विषत्यपि द्वेषवत्यपीह परशुरामे तितिक्षैवापराधानुगुणदण्डाभावसकल्प एव चिरमियन्तं काल कृता । हिशब्दः प्रसिद्धौ । **यदेति** । अयमित्यनुषज्यते । अयं परशुरामोऽनिभृत सन्नविनीत सन् । 'निभृतविनीतप्रश्रिता समा' इत्यमर· । निभृतो न भवतीत्यनिभृत इति विग्रह । यदा येन हेतुना भूयोभूय· पुन पुनस्तृणवत्तृणेन तुल्यमवधूनोति कम्पयति । अस्मानिति शेष । तदा तस्माद्धेतोर्विप्रेऽप्यस्मिन्परशुरामे धनुः कर्तृ नमतु नतं भवतु । कर्मण· कर्तृत्वविवक्षा । तदभावे हेतु पूर्वमेवोक्त· । अन्या गतिरुपायान्तर नास्ति । दण्डैकसाध्यत्वादस्येति भाव ॥ २७ ॥ रोष क्रोध, हास स्मितम्, आक्षेपोऽवमाननम् । किमात्थ कि ब्रवीषि । धनुर्धनुरिति द्वित्वं कार्मुकशब्दार्थाभिप्रायेण । अहो आश्चर्यमिति शब्दद्वयं विस्मयातिशयद्योतकम् । अहो इत्येतत्सबोधने वा । अहोशब्दस्य 'ओत्' इति प्रगृह्यसज्ञायाम् 'प्लुतप्रगृह्या –' इति प्रकृतिभाव । **क्षत्त्रेति** । याज्ञवल्क्यस्यानुरोधात्प्रेम्णा हेतुना मया मिथ्याध्मातोऽस्मद्गुणोद्गारेणापूरितोऽतएव दत्तोत्सेक सजातस्मय जरसा जरया जर्जर शिथिलः क्षत्त्रबन्धु क्षत्रियापसद । 'ब्रह्मबन्धुरधिक्षेपे' इत्यमरसिंहवचनं क्षत्त्रबन्धुशब्दस्याप्युपलक्षणम् । ब्रह्मक्षत्त्रशब्दसमभिव्याहृतबन्धुशब्दो ब्राह्मणावमं क्षत्रियाधमं चाभिवत्ते । जनक इति शेष । क्षत्त्रस्य क्षत्रियवर्णस्यालोकेन दर्शनेन क्षुभितस्य प्रकृतिं गतस्य हुतभुजो वह्ने प्रस्फुलिङ्गा एव प्रकृष्टकिरणा एवाट्टहासो महाहासो यस्य तथोक्तम् । 'अट्टहासो महान्हासो मुखरागादिकृत्' इत्यभिधानविद । रिपुशिरोरूपेषु शाणेषु निकषोपलेषु । 'शाणस्तु निकष कषः' इत्यमर । शातं निशितम् । 'अय निशितक्षुतशा-

जनकः—(सावेगम् ।) किमत्र बहुना ।

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥ २९ ॥

(इति धनुरारोपयति ।)

(नेपथ्ये ।)

विरम नरपते कथं द्विजेऽस्मि-
न्नविरतयज्ञवितीर्णगोसहस्रः ।
तव पलितनिरन्तरः पृषत्कं
स्पृशति पुराणधनुर्धरस्य पाणिः ॥ ३० ॥

जनकः—सखे महाराज दशरथ,

तानि तेजिते' इत्यमरः । कुठार पश्यन्नपि हास्यः सन्किमपि प्रलपति । अनर्थकं वचो वदतीत्यर्थ । अत्र क्षत्रबन्धुरित्यादिनावमाननाच्चलनं नाम सध्यङ्गमुक्तं भवति । यथोक्तम्—'अवमाननं चलनम्' इति ॥ २८ ॥ सावेगं ससम्भ्रमम् । बहुना किम् । वाक्येनेति शेष । क्रियाकेवलमुत्तरमिति भाव । **ज्याजिह्वयेति** । ज्या मौर्वी सैव जिह्वा तया वलयिते सजातवलये उत्कटे उद्ग्रे कोटी एवाग्रे एव दंष्ट्रे यस्य तत्तथोक्तम् । यद्वा जिह्वेव ज्या ज्याजिह्वेत्युपमितसमास । दंष्ट्रे इव कोटी कोटिदंष्ट्रे उपमितसमास· । वलयिते उत्कटे क्रोटिदंष्ट्रे यस्येत्युपमितसमासबहुव्रीह्याश्रयणाद्दंष्ट्रा-शब्दस्य न पूर्वनिपात । पूर्वयोजनाया रूपकमत्र तूपमा । उद्गारोऽस्यास्तीत्युद्गारी । अविच्छिन्नोद्गत इत्यर्थ । 'उद्गूरि' इति च पाठ । भूयानित्यर्थ । घोरो भयकरो घनस्तारो घर्घरघोषो यस्य तत्तथोक्तमेतच्चापं ग्रासे जगद्भक्षणे प्रसक्तस्य व्यापृतस्य हसतोऽन्तकस्य यमस्य यन्त्रसदृशवक्त्रस्य जृम्भा विडम्बयत्यनुकरोतीति जृम्भाविडम्बि विकटं दन्तुरमुदरं मध्य यस्य तत्तथोक्त तथाविधमस्तु भवतु ॥ २९ ॥ धनुरारो-पयति । ज्यामिति शेष । अत्र तर्जनरूपा द्युतिर्नाम सध्यङ्गमुक्तम् । यथोक्तम्—'तर्जनो द्युतिः' इति ॥ **विरमेति** । नरपते जनक, विरम निवृत्तो भव । बाणप्रयोगादिति शेष । अविरतं सतत यज्ञेषु ज्योतिष्टोमादियागेषु वितीर्णानि गवा धेनूना सहस्राणि येन स तथोक्त । 'दक्षिणाचारेण कर्तव्यम्' इति दक्षिणपाणिनिय-मादिति भाव । पलितेन जरातिशयप्रयुक्तकेशादिशौक्ल्येन निरन्तरो निविडः पुरा-णश्चिरंतनो धनुर्धर इति विग्रहे 'पूर्वकाल—' इत्यादिना समानाधिकरणसमासः । तव पाणिर्द्विजेऽस्मिन्परशुरामे । पृषत्कं बाणम् । 'पृषत्कबाणविशिखा.' इत्यमर । कथं स्पृशति । प्रयोक्तुमिति शेष । अत्रापि विरोधशमनाच्छक्तिर्नाम सध्यङ्गमुक्तम् ॥ ३० ॥ **सखे इति** । 'पूर्वसबन्धिन ज्ञाला तत. पूर्वं ब्रवीमि ते' इति रामायणे

अस्मानधिक्षिपतु नाम न किंचिदेत-
त्कस्य द्विजे परुषवादिनि चित्तभेदः ।
वत्सस्य मङ्गलविरुद्धमयं तु पापः
कर्णे रटन्कटु कथं न बटुर्विषह्यः ॥ ३१ ॥

जामदग्न्यः—आः दुरात्मन् क्षत्रियापसद, मामेवं बटुरित्यधिक्षिपसि ।

उत्तिष्ठोत्तिष्ठ यावद्द्विशकलितयकृत्क्लोमवृक्कास्रगात्र.
स्नायुग्रन्थ्यस्थिशल्कव्यतिकरितजरत्कधरादत्तखण्डः ।

वसिष्ठोक्त्या जनकस्य दशरथः पूर्वमेव मित्रमिति सखे इत्युक्तम् । 'सर्वा पूर्वमिय येषामासीत्कृत्स्ना वसुधरा' इति तत्रोक्त्या जनकस्य नरपतित्वमात्रम्, दशरथस्य तु महाराजत्वमिति महाराजेत्युक्तम् । **अस्मानिति** । अयमित्यादिकमयं परशुरामोऽस्मानधिक्षिपत्यस्मद्विषये दुरुक्तानि वदतु । कामचारे लोट् । नामेत्यभ्युपगमे । 'नाम प्राकाश्यसभाव्यक्रोधोपगमकुत्सने' इत्यमर. । एतत्परशुरामकृताधिक्षेपणं न किंचित्किंचिदपि न भवति । लेशोऽपि दुःखकर न भवति । स्तुतिनिन्दयोरविशेषादिति भाव. । द्विजे परुषवादिनि सति कस्य । ब्रह्मनिष्ठस्यापीति भाव । चित्तभेद क्रोधरूपमनोवृत्तिविशेष । ब्रह्मनिष्ठस्य तु मम ब्राह्मणकृताधिक्षेपे कोपो नास्त्येवेति भाव. । किंतु पापोदुष्कर्मकारी बटुर्बालोऽय परशुरामो वत्सस्य रामस्य मङ्गलस्य कल्याणस्य विरुद्धं विपरीतं कटु परुषवाक्यं कर्णे रटञ्श्रोत्रसमीपे ध्वनन्सन्कथं नु विषह्य. कथं मर्षणीय. । 'परिनिविभ्यः–' इति सहते. षत्वम् । 'रट परिभाषणे' इत्यस्माल्लटः शतरि रटन्निति रूपम् । परिभाषणं सनिन्दोपालम्भः । इह तु कटुपदेन कर्मणा उक्तत्वाद्रटते शब्दमात्रपरत्वम् । अनेन तितिक्षाया आत्माधिक्षेपविषयत्वम्, अमर्षणस्य तु भगवदधिक्षेपविषयत्वमिति विभागो दर्शित ॥ ३१ ॥ आ इति क्रोधे । दुरात्मन्दुर्बुद्धे क्षत्रियापसद क्षत्रियाधम, 'निहीनोऽपसदो जाल्म' इत्यमर । अत्र प्रकरणे जनकादीना बहूना क्रोधसरब्धानामन्योन्याक्षेपकथनान्निरोधन नाम सध्यङ्गमुक्तम् । यथोक्तम्—'क्रोधसरब्धानामन्योन्याक्षेपो निरोधनम्' इति । **उत्तिष्ठेति** । उत्तिष्ठोत्तिष्ठ । युद्धार्थमिति शेष । क्रोधसम्भ्रमेण क्रियाया द्विरुक्ति । तदुक्त वैयाकरणैः—'संभ्रमेण प्रवृत्तौ यथेष्टमनेकवा प्रयोग प्रायेण न्यायसिद्ध' इति । परशु कुठारः । विशकलितानि विशेषेण खण्डितानि । यकृत्कालखण्डम् । 'कालखण्डयकृती तु समे इमे' इत्यमर । क्लोमं तिलकम् । 'तिलक क्लोम मस्तिष्कम्' इत्यमरः । वृक्काग्रमासम् । 'वृक्काग्रमासम्' इत्यमर. । असृक्तम् । 'अश्रुशोणितयोरस्रम्' इति रत्नमाला । यकृत्क्लोमवृक्कास्राणि यस्य तत्तथोक्तं विशकलितयकृत्क्लोमवृक्कास्रं गात्रं येन स तथोक्त इति परशुरामविशेषणम् । पृथक्पदं बहुव्रीहिगर्भं बहुव्रीहिरूपम् । किंच स्नायूना स्नसानाम् । 'अथवा स्नसा । स्नायु. स्त्रियाम्' इत्यमर. । ग्रन्थिभि. । 'ग्रन्थि. पर्वगदान्तरे' इति रत्नमाला । अस्थीना शल्कैश्च शकलैश्च । 'शल्के शकल-

मूर्धच्छेदादुदञ्चद्गलधमनिशिरासक्तडिण्डीरपिण्ड-
प्रायासृग्भारघोरं पशुमिव परशुः पर्वशस्त्वां शृणातु ॥ ३२ ॥
(प्रविश्यान्तरे ।)

दशरथः—भो भार्गव,

एष नो नरपतिर्यथा स्थितः
स्वं शरीरमपि ते स्थितं तथा ।
तत्र वाक्परिभवैः कृतैर्वयं
सर्वथैव ननु दुःखमास्महे ॥ ३३ ॥

जामदग्न्यः—ततः किम् ।

वल्कले' इत्यमर । व्यतिकरिता युक्ता जरती जीर्णा । 'जीर्यतेरतृन्' इति 'जॄष् वयोहानौ' इत्यस्मादतृन्प्रत्यये तस्योगित्त्वात् 'उगितश्च' इति ङीप् । या कंधरा ग्रीवा तस्या ग्रीवायाम् । 'शिरोधि. कंधरेत्यपि' इत्यमर । दत्त. खण्ड· खण्डनं येन स तथोक्तस्तथाविधश्च सन् । मूर्धच्छेदाच्छिरश्छेदादुदञ्चतोद्गच्छता । इदं भारविशेषणम् । गलस्य कण्ठस्य । 'कण्ठो गल' इत्यमर । धमनीषु महानाडीषु शिरासु क्षुद्रनाडीषु । यद्यपि 'नाडी तु धमनि शिरा' इति पर्यायवाचकौ धमनिशिराशब्दौ तथापि सहप्रयोगादवान्तरभेदौ द्रष्टव्यौ । सक्तेन सबद्धेन डिण्डीरपिण्डप्रायेण फेनसघातबहुलेन । 'डिण्डीरोऽब्धिकफः फेन' इत्यमरः । रक्तस्यैवावस्थाविशेषोपलक्षणमिदम् । असृग्भारेण रक्तसमूहेन घोर भयकर त्वा पशुमिव व्याघ्रादिकमिव पर्वश पर्वणि पर्वणि । 'पर्व ग्रन्थौ पञ्चदश्यामुत्सवे विषुवादिके' इति रत्नमाला । ग्रन्थौ ग्रन्थावित्यर्थ । 'सख्यैकवचनाच्च वीप्सायाम्' इति शस्प्रत्यय । यद्यपि परिमाणशब्दादेवैकवचनान्ताच्छस् माषशो ददातीत्युक्तम्, तथापि जातिशब्दादप्यर्थप्रकरणानेकार्थवृत्तेर्वीप्साया शस्भवति । खण्डशो ददाति, वनश प्रविशतीति वामनमते जातिशब्दादपि शस स्वीकारात्पर्वश इति शस्भवत्येव । 'कारकात्' इतीत्यनुवृत्तेऽविकरणकारकाच्छस् । पर्वशब्दोऽयमङ्गुलिरेखावाची सन्परिमाणशब्दो भवतीति पक्षान्तरेऽपि शस्भवत्येव । त्वा पर्वपरिमित शृणात्विल्यर्थ । अत्र । कर्मकारकाच्छस् । यावच्छृणातु । हिनस्त्वेवेत्यर्थ । 'शॄ हिसायाम्' क्र्यादि । 'प्वादीनाम्–' इति ह्रस्व । 'शृणाति' इति पाठे हिसिष्यतीत्यर्थ । 'यावत्पुरानिपातयो –' इति भविष्यति लट् । पूर्वपाठे तु यावच्छब्दोऽवधारणार्थक । 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमर ॥ ३२ ॥ अन्तरे जनकपरशुरामयोर्मध्ये । **एष इति** । एषोऽस्माकं मित्रं नरपतिर्जनको यथा स्थितस्तथा ते स्व शरीरमपि स्थितम् । उभयोरप्यन्योन्यवाक्परिभवेन शरीरावयवेषु न कश्चिदपि छेद इति भाव । तत्र जनकविषये कृतैर्वाक्परिभवैर्हेतुभिर्वय सर्वथैव सर्वप्रकारेणापि दु खमास्महे दु खं यथा तथा वर्तामहे । ननु इत्यवधारणे । यद्यपि जनको ब्रह्मनिष्ठत्वात्परैरधिक्षेपेऽपि न खिद्यते तथापि तद्विषये परैरधिक्षेपोऽस्माकं दु खहेतु-

दशरथः—ततश्च न क्षम्यते ।

जामदग्न्यः—त्वमप्यपरः प्रभविष्णुरिव मामवस्कन्दयसि । चेतयस्व नित्यनिरवग्रहः प्रकृत्यैव रामोऽस्मि जामदग्न्यः । क्षत्रियश्च भवान् ।

दशरथः—अतः खलु नोपेक्ष्यसे ।

दुर्दान्तानां दमनविधयः क्षत्रियेष्वायतन्ते
दुर्दान्तस्त्वं वयमपि च ते क्षत्रियाः शासितारः ।
सद्यः शान्तो भव किमपरं दम्यसे चाधुनैव
क्व ब्रह्माणः प्रशमनपराः क्षत्रधार्यं क्व शस्त्रम् ॥ ३४ ॥

जामदग्न्यः—(विहस्य ।) चिरस्य खलु कालस्य जामदग्न्यः सनाथो वर्तते यस्य यूयं क्षत्रिया विनेतारः ।

दशरथः—अरे, किमत्र काचिद्भ्रान्तिः ।

भवतीति भावः ॥ ३३ ॥ तत किं दु खासहने किम् ॥ ततश्च न क्षम्यते । अधिक्षेपो दु खकरत्वान्न मृष्यतेऽस्माभिरित्यर्थं ॥ **त्वमपीति** । त्वमपीत्यपिशब्देन जनक समुच्चीयते । अपर प्रभविष्णुरिवान्य प्रभुरिव । जनको हि प्रभुरिव मामवस्कन्दयति । त्वमपि ततोऽन्य प्रभुरिवावस्कन्दयसि । सतापयसीत्यर्थ । 'स्कन्दिर् गतिशोषणयो' । क्षेपोक्तिरियम् । नियाम्यस्त्वम् । नियामकोऽसीत्यर्थ । चेतयस्व जानीहि । किमित्यत्राह—**नित्येति** । प्रकृत्यैव स्वभावत एव नित्यनिरवग्रहो नित्यनिष्प्रतिबन्धो जामदग्न्यो रामोऽस्मि । क्षत्रियान्तकोऽस्मीत्यर्थ । क्षत्रियश्च भवान् । अतो वध्यघातकभावोऽनुक्तसिद्ध इत्यर्थ ॥ अतस्तव ब्राह्मणत्वान्मम क्षत्रियत्वाच्च विमार्गगस्त्वं मया नोपेक्ष्यसे, किंतु दम्यस इत्यर्थ । **दुर्दान्तानामिति** । दुर्दान्ताना दु खेन दमयितव्यानाम् । अत्युद्धतानामित्यर्थ । दमनविधय शिक्षाविधानानि क्षत्रियेष्वायतन्ते क्षत्रियायत्ता भवन्ति । आङ्पूर्वो यततिरायत्तताया वर्तते । 'अधीनो निम्न आयत्त' इत्यमर । त्वं दुर्दान्तः । क्षत्रिया वयमपि ते तव शासितारो दमयितार । भवाम इति शेष । सद्योऽस्मिन्नेव क्षणे । 'सद्य सपदि तत्क्षणे' इत्यमर । शान्तो निवृत्तकोपो भव । अपरं किमन्यत्किम् । त्वं शान्तिं न गच्छसि चेद्वक्ष्यमाणादन्यन्न किमपि, किंतु वक्ष्यमाणमेव तव भवतीत्यर्थ । किं तदित्यत्राह—दम्यस इति । दम्यसे शिक्ष्यसे । शिक्षाहेतुरतिचार इत्यत्राह—क्व ब्रह्माण इति । प्रशमनं प्रकृष्टा शान्तिः परमुत्कृष्टं येषां ते तथोक्ता ब्रह्माणो ब्राह्मणा । 'ब्रह्मा विप्र प्रजापति' इत्यमर । क्व । कस्मिन्प्रकारे स्थिता इत्यर्थ । क्षत्रधार्यं शस्त्रं क्व कस्मिन्प्रकारे स्थितम् । ब्राह्मणत्वशस्त्रग्राहित्वयोर्व्याघात इत्यर्थ । अत. शस्त्रग्रहणाद्दुर्दान्तस्त्वं क्षत्रियैरस्माभिर्दम्यस इत्यर्थ ॥३४॥ सनाथो नाथवान् । विनेतार शिक्षका । क्षत्रिया राजान पालका । क्षेपोक्तिरियम् । नाहं नाथवान्नापि यूयं विनेतार इत्यर्थ ॥ अत्र तवास्माकं च शिक्ष्यशिक्षकभावविषये भ्रान्तिरन्यथाज्ञानं

अज्ञो वा यदि वा विपर्ययगतज्ञानोऽथ संदेहधृ-
दृष्टादृष्टविरोधि कर्म कुरुते यस्तस्य गोप्ता गुरुः ।
निःसंदेहविपर्यये सति पुनर्ज्ञाने विरुद्धक्रियं
राजा चेत्पुरुषं न शास्ति तदयं प्राप्तः प्रजाविप्लवः ॥ ३५ ॥

विश्वामित्रः—युक्तमाह महाराजः ।

अनुत्पन्नं ज्ञानं यदि यदि च संदेहविधुरं
विपर्यस्तं वा स्यात्परिचर वसिष्ठस्य चरणौ ।

व्यत्यासेन शिक्ष्यशिक्षकत्वज्ञानम् । **अज्ञ इत्यादि** । अज्ञो वा दृष्टादृष्टफलतदुपायविषय-प्रमितिरूपज्ञानानुदयवान्वा । विपर्ययमसद्धर्मविषयकत्वं सद्धर्मविषयकत्वं च गतं प्राप्तं ज्ञान यस्य स तथोक्तस्तथाविधो यदि वा । यदि चेति निपातसमुदायो वाशब्दसमानार्थक । भ्रमस्य हि पीत शङ्ख स्थूलोऽहमिति धर्मभ्रमत्वधर्मिभ्रमत्वाभ्या द्वैविध्य प्रसिद्धम् । तदुभयविधभ्रान्तिज्ञानवान्वा । भ्रान्तिज्ञान च दृष्टादृष्टफलतदुपायविषयकं विवक्षितम् । अथेति कल्पान्तरप्रस्तावे । 'मङ्गलानन्तरारम्भ' इत्याद्यमर । सदेहमेकस्मिन्धर्मिणि विरुद्धनानाधर्मप्रकारकं ज्ञानं धरतीति सदेहधृत् । 'अन्येभ्योऽपि दृश्यते' इति क्विप् । 'हलस्य–' इति तुगागम । सदेहज्ञानमपि दृष्टादृष्टफलादिविषयकं विवक्षितम् । य. पुरुष । 'शास्त्रं तु मनुष्याधिकारत्वात्' इत्युक्तरीत्या तिर्यग्व्यावृत्तो देहीत्यर्थ । दृष्टमैहिकपशुपुत्रपुष्यन्नायुरिन्द्रियादिफलम्, अदृष्टमामुष्मिकस्वर्गमोक्षरूप फलम्, तयोर्विरोधि नाशक विपरीतफलप्रदं च कर्म कुरुते स्वानुभाव्यफलहेतुतयानुतिष्ठति । 'स्वरितञित –' इत्यादिना कर्तृगे फले तङ् । तस्य पूर्वोक्तानुदयसशयविपर्यस्तपुरुषस्य गुरुरज्ञाननिवर्तक आचार्य । 'गुशब्दस्त्वन्धकारे स्याद्रुशब्दस्तन्निरोधक । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥' इत्युक्ते । गोप्तोपदेशादिनानुदयादिनिरसनेनैहिकामुष्मिकपुरुषार्थतत्साधनप्रयोजकत्वद्विपरीतनिवर्तकश्च भवतीत्यर्थ । 'गुपू रक्षणे' कर्तरि तृच् । ऊदित्त्वाद्वेट् । रक्षणमिष्टप्रापणमनिष्टनिवर्तनं च । ज्ञाने निःसंदेहविपर्यये सति सदेहत्वविपर्ययत्वाभ्या निर्गते सति । भावप्रधानो निर्देश । दृष्टादृष्टादिषु प्रमित्यात्मके सत्यपीत्यर्थ· । विरुद्धा दृष्टादृष्टविरुद्धा क्रिया व्यापारो यस्य स तथोक्तस्तं पुरुष पुन पुरुषं तु । 'पुनरप्रथमे भेदे' इत्यमर । राजा न शास्ति चेत्तत्तस्माद्राजशासनविरहादयं प्रजाविप्लव प्रजोपद्रव. प्राप्त, अतस्त्व शिक्ष्य एवेति नात्र शिक्ष्यशिक्षकभावव्यत्ययभ्रान्ति कार्येति पूर्वेण संबन्ध । 'इन्द्रियदौर्बल्याद्विप्रतिपन्नाना शास्ता निर्वेदमुपदिशेत् । तस्य चेच्छास्त्रमतिप्रवर्तैरन्राजान गमयेत् । बलविशेषेण वधदास्यवर्ज नियमैरुपशोषयेत्' इत्यापस्तम्बवचनमनुसधेयम् । अत्र गुरुकीर्तनात्प्रसङ्गो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'गुरुकीर्तन प्रसक्त.' इति ॥ ३५ ॥ महाराजो दशरथ । **अनुत्पन्नमिति** । अत्र भार्गवेत्यादि । हे भार्गव, तव ज्ञानं पूर्वोक्तदृष्टादृष्टविषयादिविषयकप्रमित्यात्मकं ज्ञानमनुत्पन्नं यद्यनुदितं चेद्वसिष्ठस्य चरणौ परिचर शुश्रूषस्व । 'शुश्रूषया वा परया', 'तद्विद्धि प्रणिपातेन परिप्रश्नेन

ध्रुवं ज्ञाने दोषः कथमपरथा दुर्व्यवहृति-
र्विशुद्धौ चेत्पापं चरसि न सहन्ते नृपतयः ॥ ३६ ॥

जामदग्न्यः—कौशिक,

धर्मे ब्रह्मणि कार्मुके च भगवानीशो हि मे शासिता
सर्वक्षत्रनिबर्हणस्य विनयं कुर्युः कथं क्षत्रियाः ।
सबन्धस्तु वसिष्ठमिश्रविषये मान्यो जरायां न तु
स्पर्धायामधिकः समश्च तपसा ज्ञानेन चान्योऽस्ति कः ॥ ३७ ॥

सेवया' इत्युक्तदिशा गुरुशुश्रूषया तव सम्यग्ज्ञानमुदेष्यतीति भाव· । तव ज्ञान सदेहेन समानविषयकसशयेन विधुरमनुष्ठानशून्यं यदि वसिष्ठस्य चरणौ परिचर । तत्प्रसादादर्थसदेहो निवर्तिष्यत इत्यर्थ । सदेहदत्वेनानुष्ठापनशक्तिशून्यं यदिति, भावप्रधानो निर्देश इति वा व्याख्येयम् । तव ज्ञानं विपर्यस्तं वा स्यात्पूर्वोक्तद्विविधभ्रान्त्यात्मकं यदि स्यात्ततोऽपि वसिष्ठचरणौ परिचर । तव तत्प्रसादाद्भ्रान्तिज्ञानं निवर्तिष्यत इत्यर्थ. । ननु कथ सप्रतिपन्नज्ञाने परशुरामे ज्ञानानुदयाद्युपन्यास इत्यत्राह—ध्रुवमिति । ज्ञाने दोषो ध्रुवम् । अनुदयसशयविपर्ययलक्षणो दोषोऽस्य ज्ञानेऽनुमीयत इत्यर्थ । अत्र दुराचारो हेतुरभिप्रेत । तथा चाय ज्ञानदोषवान्दुराचारात्सप्रतिपन्नवदित्यनुमानशरीरम् । अत्राप्रयोजकलशङ्का निरस्यति—कथमिति । अपरथा ज्ञानदोषरूपसाध्याभावे दुर्व्यवहृतिर्दुराचारः कथं स्यादिति शेष । व्यवपूर्वको हरति· कायिकव्यापारे वाचिकव्यापारे च वर्तते । अत्र च समानविषयत्वादिसबन्धेन ज्ञानव्यापारयोः सामान्यतः कार्यकारणभावः । तेनैव सबन्धेन सम्यग्ज्ञानसम्यग्व्यापारयोर्दुष्टज्ञानव्यापारयोश्च विशेषत. कार्यकारणभावश्च दृष्ट इति दुष्टज्ञानदुर्व्यापारयो कार्यकारणभावभङ्गप्रसङ्ग एवाप्रयोजकत्वशङ्कानिवारक इति भाव । विशुद्धाविति । ज्ञान इत्यनुषज्यते । ज्ञाने विशुद्धौ पूर्वोक्तसशयत्वादिदोषाभावेऽपि पापं चरसि चेच्छास्त्रप्रतिषिद्धं कर्मानुतिष्ठसि चेन्नृपतयो न सहन्ते । न मृष्यन्तीत्यर्थ । विदुषोऽतिक्रमे दण्डभूयस्त्वाद्राजानस्त्वादृश दण्डयेयुरन्यथा तत्पापं तेषा भवेत् । यथोक्तं मनुना—'राजा त्वशासनात्सत्य तदेवाप्नोति किल्बिषम्' इति । ततो राजानो न मृष्यन्तीति भाव. ॥ ३६ ॥

धर्मे इति । भगवानीशो रुद्रो धर्मे वेदैकसमधिगम्यश्रेय साधने ब्रह्मणि धर्माराध्ये परमात्मनि कार्मुके धर्मविरोधनिरासक्षमे धनुषि च विषये । अधिकरणत्वरूपस्य विशेषस्य विवक्षणान्न द्वितीया किंतु सप्तमी । मे मम शासिता बोधयिता । हिशब्द प्रसिद्धौ । अतो मम ज्ञानदोष इति भाव. । सर्वक्षत्रनिबर्हणस्य समस्तक्षत्रियजात्यानां सहर्तुर्मम निबर्हणम् । प्रमापणमित्यर्थ. । प्रकृते तु नन्द्यादित्वात्कर्तरि ल्यु । विनयं शिक्षणं क्षत्रिया. कथं कुर्युः कथ कर्तुं शक्नुयु । शकि लिङ् । अतो न सहन्ते नृपतय इत्युक्तम् । वसिष्ठमिश्रविषये सबन्ध पूज्यतमवसिष्ठप्रातियोगिकसबन्धो जरायां मान्यः । जरेत्युपलक्षणम् । स्थान इत्यपि । स्थानवयोभ्यामाधिक्ये सति तच्चरणपरिचरणहेतुतया पुरस्कार्य । तुशब्द. प्रपितामहत्ववृद्धत्वप्रयुक्तशङ्काद्योतक. । स्पर्धायां

वसिष्ठः—भृगुप्रसवात्पराजय इति प्रियं नः । किंतु
अस्माभिरेव पाल्यस्य प्रशस्तत्वात्प्रियस्य नः ।
असद्ग्रहे पुराणस्य पश्याचारस्य विप्लवम् ॥ ३८ ॥

जनकदशरथविश्वामित्राः—अनार्यं निर्मर्यादं,
जगत्सनातनगुरौ वसिष्ठेऽपि निरङ्कुशः ।
व्यालद्विप इवास्माभिरुपकृष्यैव दम्यसे ॥ ३९ ॥

जामदग्न्यः—एवमवधूतोऽस्मि ।

तु ज्ञानतप प्रयुक्तसघर्षे सति तु न मान्यो न पुरस्कार्यं । कुत इत्यत्राह—अधिक इति । अन्य को वसिष्ठो वा त्वमन्यो वा को ज्ञानेन तपसा चाधिक समो वा ममास्तीत्यर्थ । अतो ज्ञानार्थं न तच्चरणपरिचरण कार्यमिति विश्वामित्रोक्तं वाक्यत्रयमपि प्रत्युक्तम् । अत्र गुरुतिरस्कृतिरूपो द्रवो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'गुरुतिरस्कृतिर्द्रव ' इति ॥ ३७ ॥ भृगुप्रसवाद्भृगुवंश्यात्पराजयस्तिरस्कारो न्यूनभावो भवतीति यत्तदस्माकमिष्टमित्यर्थं । भृगोर्ज्येष्ठत्वात्तद्वृश्येन पौत्रस्थानीयेन चानेन परिभव प्रिय एव । 'पुत्रादिच्छेत्पराजयम्' इति स्मरणादिति भाव· । **अस्माभिरिति** । अस्माभि पाल्यस्यानुच्छेदेन रक्षणीयस्य प्रशस्तत्वादभ्यर्हितत्वान्नोऽस्माक प्रियस्य पुराणस्य चिरतनस्याचारस्य ब्राह्मणासाधारणनिलत्वा(१)दिमूलसदाचारस्यास्मद्ग्रह एव विप्लवं हानिं पश्य । भृगुवसिष्ठयो सनाभित्वादस्मद्ग्रह इत्युक्तम् । भार्गवोऽयं मामधिक्षिपतीति न दूये किंतु धर्मप्रवर्तकानामस्माकं वशे धर्महानिर्जातेति दूय इति भावः ॥ ३८ ॥ **जनकेत्यादि** । आहुरिति शेष । अनार्याशिष्ट । निर्मर्यादं वैदिकव्यवस्थाभञ्जक । **जगदिति** । जगर्ता सनातनगुरौ नित्यगुरौ । 'नित्यसदातनसनातना.' इत्यमर । वसिष्ठेऽपि ब्रह्मण प्राणाज्ज्ञातत्वात्प्राणवत्तदभिमते वसिष्ठेऽपि निरङ्कुशो निर्भयस्त्वं निरङ्कुशोऽङ्कुशान्निष्क्रान्तो व्यालद्विप इव दुष्टगज इव । 'व्याल सर्पे दुष्टगजे श्वापदे नाशके त्रिषु' इति रत्नमाला । विशिष्टवाचकानां पदाना विशेष्यवाचकसमभिव्याहारे विशेषणमात्रपरत्वाद्दुष्टमात्रपरोऽत्र व्यालशब्द । अस्माभिर्बहुभिर्ब्राह्मणक्षत्रियैरुपकृष्यानुनीय दम्यसे शिक्ष्यसे । 'दमु उपशमे' इत्यस्माण्ण्यन्तात्कर्मणि लट् । अत्र वसिष्ठोऽयं सप्तव्याहृतिषु ऋषित्वाज्जगतो नित्यगुरु । यद्यपि धर्मे ब्रह्मणीति त्वदुक्तरीत्या रुद्रस्तव धर्मादौ गुरुरस्तु, तथापि ब्राह्मण्यनिदानसर्वा-यर्हितसप्तव्याहृतिऋषित्वात्तवायं मुख्यगुरुरिति तद्विषयस्पर्धा तव ब्रह्महत्यासमा । तथा च याज्ञवल्क्यः—'गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वध । ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥' इति । 'धर्मे ब्रह्मणि कार्मुके च भगवानीशो हि मे शासिता', 'मान्यो जराया न तु स्पर्धायाम्' इति त्वदुक्तं दुरुक्तम् । बहूना पाल्याद्ब्राह्मणस्यापि विश्वामित्रस्य तत्रानुप्रवेशाद्धुर्वधिक्षेपेण परशुरामस्य तेजोवैकल्यसभावनया चास्माभिस्त्वं दम्यस इत्युक्तम् । तेन 'सर्वक्षत्रनिबर्हणस्य' इत्यादिकमपि प्रत्युक्तम् ॥ ३९ ॥ अवधूतोऽ-

अन्तर्धैर्यभरेण वृद्धवचनात्संपीड्य पिण्डीकृतो
हृन्मर्माश्रितशल्यवत्परिदहन्मन्युश्चिरं यः स्थितः ।
स्फूर्जत्येव स एष संप्रति मम न्यक्कारभिन्नस्थितिः
कल्पापायमरुत्प्रकीर्णपयसः सिन्धोरिवौर्वानलः ॥ ४० ॥

दिष्ट्या ।
निकारं प्राप्तोऽयं ज्वलति परशुर्मृत्युरिव मे
पृथिव्यां राजानो दशरथकुले सन्त्युपगताः ।
पुनर्द्वाविंशोऽपि प्रकुपितकृतान्तोत्सवकर-
श्चिरात्क्षत्रस्यास्तु प्रलय इव घोरः परिमरः ॥ ४१ ॥

स्म्यधिक्षिप्तोऽस्मि। **अन्तरिति** । यो मम मन्यु क्रोधो वृद्धाना च्यवनादीना वचनाद्धेतोर्धैर्यस्य क्रोधनियमनसामर्थ्यप्रयोजकधृतिविशेषस्य भरेणातिशयेन हेतुना सपीड्य वीररणप्रतिबन्धकपिण्डीभावानुकूलव्यापार कृत्वा पिण्डीकृत सहतता प्राप्तोऽत एव हृन्मर्माश्रितशल्यवद्धृदयदेशात्मकविमर्दासहदेहप्रदेशगतबाणखण्डेन तुल्य परिदहन्सन्नेकत्र स्थितोऽपि परितस्तापं कुर्वन्नन्त शरीरान्तश्चिर स्थित स एष मन्युर्मम न्यक्कारेण जनकादिकृतधिक्करणेन भिन्नस्थितिश्छिन्नमर्याद सन् । 'मर्यादा धारणा स्थिति.' इत्यमर· । कल्पस्य ब्रह्मदिनस्यापायेऽवसाने मरुता वायुना । 'सप्तमी' इति योगविभागात्समास । प्रकीर्णमुद्वृत पयो यस्य स तथोक्तस्य सिन्धोरौर्वानल इव वडवानल इव । 'और्वस्तु वाडवो वडवानल.' इत्यमर । अत्र वाडवस्य स्वरूपविशेषणमात्रपरत्वमौर्वशब्दस्यानलपदसममिव्याहारादिति द्रष्टव्यम् । सप्रति स्फूर्जति वज्रशकलवद्व्याप्रियते । वेगवत्त्वदुर्निवारत्वादिना सादृश्यम् । 'टुओस्फूर्जा वज्रनिर्घोषे' इति पठितस्य लक्षणयोक्तार्थपरत्व विवक्षितम् । एवकारो दार्ढ्यद्योतक ॥ ४० ॥ दिष्ट्येत्यानन्दे । **निकारमिति** । निकार जनकादिकृतं परिभवम् । 'निकारो विप्रकार स्यात्' इत्यमर । प्राप्तोऽय मे परशुर्मृत्युरिव ज्वलति शत्रुदहनानुकूलज्वलनवान्भवति । दिव्यपरशोरभिमानिदेवताविष्ठानान्निकारप्राप्त्युक्तिरिति मन्तव्यम् । पृथिव्या दशरथकुले च राजान पृथिवीस्था दशरथगृहस्थाश्च राजान सीरध्वजकुशध्वजादयो दशरथरामलक्ष्मणादयश्चोपगता सन्ति । यस्मादेव तस्मात्प्रकुपितस्य कोपातिशयवत कृतान्तस्य यमस्योत्सवकर आनन्दजननशील । 'कृजो हेतुताच्छील्यानुलोम्येषु' इति ट । द्व्यधिका विंशतिर्द्वाविंशति । 'द्व्यष्टन सख्यायाम्' इत्यादिना द्विशब्दस्यात्वम् । द्वाविंशते. पूरणो द्वाविंश । 'तस्य पूरणे डट्', 'तिविंशतेर्डिति' इति तिशब्दलोपः । पूर्वमेकविंशति क्षत्रियवधा आसन्, अयमन्यो द्वाविंश इत्यर्थ । अपिशब्द पूर्वसमुच्चये । प्रलय इव प्रपञ्चप्रलय इव घोरो ममापि भयंकर क्षत्रस्य क्षत्रवर्णसामान्यस्य परिमर, परिम्रियन्तेऽस्मिन्वीरा इति परिमर सङ्ग्राम. । परिपूर्वान्म्रियते 'पुसि संज्ञाया घ प्रायेण' इत्यधिकरणे घप्रत्यय । पुनरप्यस्तु । प्राप्तकाले लोट् ॥ ४१ ॥

वसिष्ठः—कष्टं भोः,

कामं हि नः स्वजन एष तथापि दर्पा-
द्घोरं व्यवस्यति कथं नु भवेदवश्यः ।
संदूषितेन च मया सकृदीक्षितश्चे-
द्वत्सस्य भार्गवशिशोर्दुरितं हि तत्स्यात् ॥ ४२ ॥

विश्वामित्रः—अरे जामदग्न्य, अब्रह्मवर्चसमिव भ्रंशितशस्त्रसामर्थ्यमिव जीवलोकं मन्यसे ।

ब्रह्मक्षत्रसमाजमाक्षिपसि यद्वत्से च घोराशय-
स्तेनातिक्रमणेन दुःखयसि नः पाल्योऽपि संबन्धतः ।

काममिति । एष परशुरामो नोऽस्माकं स्वजनो बन्धुर्भवति । 'बन्धु स्वस्वजना समा' इत्यमर । काममित्यनुज्ञायाम् । तथापि स्वजनत्वेऽप्येष दर्पाद्घोर भयकर कर्म व्यवस्यति कर्तव्यत्वेन निश्चिनोति । रामभद्रादिष्विति शेष. । एषोऽवश्योऽस्माकमपरतन्त्र कथं नु भवेत्कथं भवेत् । सर्वथास्माक स्वाधीन एव कार्य. । अन्यथा व्यवसायानुगुण व्याप्रियेतेत्यर्थ । तत्र स्वाधीनकरणोपायस्तु न तावत्साम भवेद्दृप्तत्वात् । नापि दानं विरक्तत्वात् । न च भेदोऽसहायत्वात् । किंतु दण्ड परिशिष्यते । सोऽपि सबन्धवशेन कारुणिकस्य मामनुमत इत्यभिप्रायेणाह—संदूषितेनेति । एष परशुराम सदूषितेन क्रोधरूपविकृतिं प्राप्तेन । 'दुष वैकृत्ये' इति पठिताण्णिच् । प्रेरणाशस्त्रागादकर्मकत्वेन । 'गत्यर्थाकर्मक–' इति कर्तरि क्त । वैकृत्य विकृति । यद्वा संदूषितेन 'मान्यो जराया न तु स्पर्धायाम्' इति दोषोद्भावनेनाविक्षिप्तेन मया सकृदेकवारमीक्षितश्चेत्तदीक्षणं वत्सस्य प्रपौत्रत्वरूपसबन्धेन लालनीयस्य भार्गवशिशोरस्मज्ज्येष्ठभ्रातृवंशजस्य ज्ञानतपोवयोभिरल्पत्वाद्दयनीयस्य दुरितमनिष्टकर स्यात् । हि यस्मादेवं तस्मात्कष्टमिति संबन्ध. । अत्र भगवता वसिष्ठेनापकारिण्यपि तितिक्षुत्वकारुणिकत्वादिस्वगुणाविष्करणाद्विचलनं नाम सध्यङ्गमुक्तम् । यथोक्तम्—'स्वगुणाविष्करण विचलनम्' इति ॥ ४२ ॥ अब्रह्मवर्चसमिव शापानुग्रहसामर्थ्यहेतुसद्वृत्तस्वाध्यायाध्ययनसमृद्धिशून्यमिव । 'स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धि' इत्यमर. । भ्रंशितमध पतितं शस्त्रसामर्थ्यमायुधपरिग्रहशक्तिर्यस्य स तथोक्तमिव । 'शस्त्रमायुधचापयो' इति रत्नमाला । जीवलोकं प्राणिना निवासभूतं भुवनम् । 'जीवो बृहस्पतिप्राणजीवनात्मद्रुमेषु ना । मौर्व्यां वसाया जीवन्त्या जीवाजीववति त्रिषु ॥' इति रत्नमाला । 'लोकस्तु भुवने जने' इत्यमरः । **ब्रह्मक्षत्रेति** । जामदग्न्य, त्व संबन्धतोऽस्मद्भागिनेयजमदग्निपुत्रत्वरूपेण सबन्धेन हेतुना पाल्योऽप्यस्माकं रक्षणीयोऽपि ब्रह्मक्षत्रसमाजं ब्राह्मणाना क्षत्रियाणा च तपोध्ययनादिना सधर्मिणां समूहम् । 'पशूनां समजोऽन्येषा समाजोऽथ सधर्मिणाम्' इत्यमर । आक्षिपस्यधिक्षिपसि । किंच वत्से रामे घोराशयः क्रूराभिप्रायोऽसि । 'अभिप्रायश्छन्द आशय.'

आतस्त्वां प्रति कोपनस्य तरलः शापोदकं दक्षिणः
प्राक्संस्कारवशेन चापमितरः पाणिर्ममान्विष्यति ॥ ४३ ॥

जामदग्न्यः—ननु भो कौशिक,

त्वं ब्रह्मवर्चसधनो यदि वर्तमानो
यद्वा स्वजातिसमयेन धनुर्धरः स्याः ।
उग्रेण भोस्तव तपस्तपसा दहामि
पक्षान्तरे च सदृशं परशुः करोतु ॥ ४४ ॥

(नेपथ्ये।)

अयमहं भोः, कौशिकान्तेवासी रामः प्रणम्य विज्ञापयामि ।
पौलस्त्यविजयोद्दामकार्तवीर्यार्जुनद्विषम् ।
जेतारं क्षत्रवीर्यस्य विजयेय नमोस्तु वः ॥ ४५ ॥

इत्यमर । इति यत्, तेन ब्रह्मक्षत्रसमाजाविक्षेपरामजिघासासमुच्चयात्मकेनातिक्रमणेन वेदवैदिकमर्यादातिलङ्घनेनास्मान्दु खयसि दु खवत करोषि । दु खवच्छब्दात् 'तत्करोति–' इति णिचि णाविष्ठवत्त्वान्मतुब्लोप । यद्वा नोऽस्माकं दु खयसि दु खं करोषि । 'सुखदु ख तत्क्रियायाम्' इति णिच् । इति यत् । आत अतः । अत.शब्दवदात.शब्दोऽपि दीर्घादिर्हेखर्थकोऽस्ति । विषु एकपदे वृत् आत इत्यव्ययेषु पाठात् । स्वा प्रति कोपनस्य स्वद्विषयकक्रोधयुक्तस्य मम दक्षिण पाणिस्तरल संस्त्वां प्रति शापोदकमन्विष्यति । इतर. पाणिर्वाम कर प्राक्सस्कारवशेन तपोवसिष्ठवाक्याभ्या ब्रह्मर्षित्वाधिगमात्पूर्वं क्षत्रियत्वप्रयुक्तधनुर्विद्यापाटववासनानुरोधेन । 'ग्रहो ग्राहे वशः कान्तौ' इत्यमर । कान्तिरिच्छा । चापमन्विष्यति । शापचापाभ्यां वर्तमानभूतब्राह्मणत्वक्षत्रियत्वानुगुणाभ्या निगृह्णामीत्यर्थ । 'ऋषि गतौ' इति दैवादिकस्योपसर्गवशेनेच्छार्थकत्वम् ॥ ४३ ॥ **त्वमिति** । त्वं वर्तमानो ब्रह्मवर्चसधनो यदि स्या. । वर्तमानत्वं ब्रह्मवर्चसधनत्वद्वारान्वेति । एतत्कालवर्तिब्राह्मणत्वानुगुणवृत्ताध्ययनसमृद्ध्युपकरणको भवसि चेदुग्रेण तपसा ब्राह्मणत्वानुगुणेन तव तपो ब्राह्मणत्वानुगुणं दहामि भस्मीकरोमि । 'दह भस्मीकरणे' । यद्वेति कल्पान्तरे । स्वजातिसमयेन क्षत्रियात्क्षत्रियाण्या स्वजन्मतोऽनुरूपेण समयेनाचारेण । 'समयाः शपथाचारकालसिद्धान्तसविद.' इत्यमर । धनुर्धर स्याश्चेत् । पक्षान्तरे धनुरुपकरणत्वरूपपरिग्राह्यकल्पविशेषे । 'पक्ष परिग्रहे' इति पठितात्पक्षतेः पक्षशब्दो निष्पन्न । सदृशमनुरूपं युद्धात्मकं कर्म परशु करोतु । कामचारे लोट् । तपसो यद्यपि कर्तृत्वेन मदपेक्षा स्यात्परशोस्तु न मदपेक्षेति निर्देशभेदाभिप्रायः । अत्र स्वशक्तिप्रशसनाध्यवसायो नाम संध्यङ्गमुक्तम् । यथोक्तम्—'स्वशक्तिप्रशसनं व्यवसाय' इति ॥ ४४ ॥ कौशिकान्तेवासी विश्वामित्रशिष्यः । 'छात्रान्तेवासिनौ शिष्ये' इत्यमरः । युद्धप्रस्तावाद्वसिष्ठव्यपदेशिनोऽपि स्वस्य रामेण कौशिकान्तेवासीति व्यपदेशः कृतः । **पौल-**

दशरथः—कथं प्राप्तो रामः । कथं हि नामैतत् ।

जनकः—हन्त भोः, प्रशस्तमभ्यनुजानीत । विजयतां रामभद्रः ।

अयं विनेता दृप्तानामेकवीरो जगत्पतिः ।
वयं वसिष्ठधौरेयाः सर्वे प्रतिभुवोऽत्र वः ॥ ४६ ॥

दशरथः—

नन्वद्यैव प्रथितयशसामूढरक्षाव्रतानां
याज्यानां वो गुणवति गृहे रामभद्रः सुजातः ।

स्त्येति । पौलस्त्यविजयेन रावणविजयेनोद्दामस्योद्धतस्य कार्तवीर्यार्जुनस्य द्विषं शत्रुं क्षत्रवीर्यस्यान्येषा क्षत्रियाणा वीर्यस्य जेतारमभिभवितार परशुरामं विजयेय विजेतु शक्नोमि । 'शकि लिङ्', 'विपराभ्या जे ' इति तङ् । गुरुसनिधौ शक्त्याविष्करण-दोषस्य प्रायश्चित्तं चरति—नमोऽस्तु व इति । यद्वा न मा यूय प्रेम्णातिशयेनास्थान-शङ्कया निवारयध्वमित्यनुनयति—नमोऽस्तु व इति । अत्र वालिरावणयोरपि मया प्रेप्सितो विजय सुकरश्चेति रामाभिप्राय सूचित । एतेन शिष्टचतुष्टयाङ्कार्थ सूचित ॥ ४५ ॥ कथं प्राप्त । कथमिति सभ्रमे । एतद्वालेन रामेण क्षत्रियान्तकनिरसनम् । प्रशस्त सम्यक् । हन्त हर्षे । अभ्यनुजानीतानुज्ञा कुरुत । विजयता रामभद्र । परशु-राममिति शेष । **अयमिति** । एकवीर सजातीयद्वितीयशून्यो वीर । बाहुलकात्स-मास. । जगत्पतिरयं रामो दृप्ताना विनेता दमयिता । तृजन्तमिदम् । दृप्तानामिति बहुवचनेन वालिरावणयोरपि विनेतेति सूचितम् । वसिष्ठो धौरेयो निर्वाहको येषां ते तथोक्ता । 'धुरो यड्ढकौ' इति ढक् । सर्वे वयमत्र रामस्य विनेतृत्वे प्रतिभुवो लग्नका । 'स्युर्लग्नका प्रतिभुव ' इत्यमर । अत्र 'अय विनेता दृप्तानाम्' इति सिद्धवद्भाविश्रेय कथनात्प्ररोचनं नाम सध्यङ्गमुक्तम् । यथोक्तम्—'सिद्धवद्भाविश्रेय कथनं प्ररोचनम्' इति ॥ ४६ ॥ **नन्वित्यादि** । नन्वित्यामन्त्रणे । 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमर । रामभद्र प्रथितयशसा प्रख्यातकीर्तीना यद्यपि यश एव ख्याति-स्तथापि ख्याते ख्यातिर्विवक्षिता । 'कीर्ते कीर्ति ' इति ह्युक्तम् । गुणवत्ताप्रथारूप-कीर्ते. । गुणवत्ताप्रथा हि वस्तुसनिबन्धनलक्षणगुणप्रसिद्धिरूपा । 'पुण्यैर्यशो लभ्यते' इति दृष्टनिबन्धनशून्यमपि हि यश क्वचिदुक्तम् । अतस्तद्व्यावृत्तये प्रथितयशसामि-त्युक्तम् । ऊढ धृतं रक्षाव्रतं जगद्रक्षणनियमो यैस्ते तथोक्तास्तेषाम् । किंच वो युष्मा-भिर्याज्याना याजयितुमर्हाणाम् । 'कृत्याना कर्तरि वा' इति व इति षष्ठी । तथावि-धानाम् । इक्ष्वाकूणामिति शेष. । गुणवति गृहे गुणभूयिष्ठे गृहेऽद्यैव सुजात. । पूर्व पुत्रकामेष्ट्या जातोऽपि जातो न भवति, इदानीमेव भाविपरशुरामादिविजयरूपश्रेय-स्कतया भवद्भिरनुगृहीतत्वाच्छोभनजन्मवानित्यर्थ. । यद्वा नन्विति जनकं प्रत्यामन्त्र-णम् । रामभद्र. प्रथितयशसामूढरक्षाव्रताना याज्याना वो गृहेऽद्यैव सुजात । नास्म-द्गृहे पूर्व प्रजात इत्यर्थः । यद्यस्माज्ज्ञानज्योतिषा ज्ञानप्रकाशेन परिगता. सम्यग्ज्ञाता भवता वर्तमानाना भूतानामतीताना भव्याना भाविना च प्रभावा प्रकृष्टस्वभावा येषां

ज्ञानज्योतिःपरिगतभवद्भूतभव्यप्रभावा
यद्ब्रह्माणः किमपि शिशुकेऽप्यत्र संवेदयन्ते ॥ ४७ ॥

जामदग्न्यः—एहिमन्ये राजपुत्र, जामदग्न्यं विजेष्यसे । (सस्मितम् ।)
नहि विजेष्यसे । दुर्दान्तो हि रेणुकातनयस्त्वदन्तकः । तथाहि ।

कृत्तक्षत्रियकण्ठकंदरसरत्कीलालनिर्वापित-
प्रत्युद्भूतशिखाकलापहुतभुग्झङ्कारिभिर्मार्गणैः ।
एतद्धस्मरकालरुद्रकवलव्यापारमभ्यस्यतु
ब्रह्मस्तम्बनिकुञ्जपुञ्जितघनज्याघोषघोरं धनुः ॥ ४८ ॥

(इति निष्क्रान्ता. सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते तृतीयोऽङ्कः ।

ते तथोक्ता । 'भव्यगेय–'इत्यादिना भवते. कर्तरि यत् । 'भव्यं सत्ये शुभे क्लीबे त्रिषु स्याद्योग्यभाविनो' इति रत्नमाला । ब्रह्माणो वसिष्ठविश्वामित्रादयो ब्राह्मणोत्तमा । शिशुकेऽप्यत्रात्यन्तबालेऽपि रामे किमपि मह्यपेक्षया मनसाप्युल्लिलितुमनर्हं परशुरामादिविनेतृत्व संवेदयन्ते सभूय जानन्ति । 'विद वेदनाख्याननिवासेषु' इति चुरादौ पठ्यते । अत्रावैव जात इत्यादिनापायाभावत कार्यनिश्चयरूपनियतासिरुक्ता । शतानन्दाद्यव्यापिकथारूपप्रकरी चोक्ता । अतोऽस्मिन्नङ्के समग्राङ्गो विमर्शसधिरुक्तः ॥ ४७ ॥ एहिमन्ये राजपुत्र, जामदग्न्य विजेष्यसे । हे राजपुत्र, जामदग्न्यमहं विजेष्य इति मन्यसे, इत एहीति योजना । 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च' इति मन्योपपदाद्धातोरुत्तमे प्रयोक्तव्ये मध्यम प्रयोक्तव्य । मन्यतेर्मध्यमे प्रयोक्तव्ये उत्तमः प्रयोक्तव्य. प्रहासे गम्यमान इत्युक्तेरत्र मन्ये विजेष्यस इत्युत्तममध्यमयो प्रयोगः । एहीति च प्रहासद्योतकम् । अतएव 'एहिमन्ये ओदनं भोक्ष्यसे' इत्युदाहृतम् । तत्र ह्योदनस्यान्योपयुक्तत्वमजानन्तं बुभुक्षमाणं प्रतिहास । प्रकृतेऽपि क्षत्रियान्तकस्य क्षत्रियबालकविजय· प्रहासहेतुरित्यभिप्रेत्यात्र पुत्रेत्युक्तम् । तमिमं प्रहास कण्ठत एवाह—सस्मितम् । नहि विजेष्यसे । दुर्दान्तो हि रेणुकातनयस्त्वदन्तक इति 'विपराभ्या–' इति जयतेरात्मनेपदम् । **कृत्तेति** । ब्रह्मस्तम्बाना ब्रह्माण्डानाम् । 'स्तम्बो गुल्मेऽप्यशाखेऽद्रौ' इति रत्नमाला । स्तम्बशब्देनोर्ध्वत्वादिसादृश्याद्वृक्षा भुवनाण्डान्युच्यन्ते । तेषा निकुञ्जेषु कुञ्जेषु । 'निकुञ्जकुञ्जौ' इत्यमर । ब्रह्माण्डानि कुञ्जोपपादकलतास्थानीयानि भवन्ति । तेन ब्रह्माण्डगणेष्विति फलितम् । पुञ्जितो राशीकृतोऽत एव घनो ज्याघोषस्तेन घोर भीष्ममेतद्धनुः कर्तृ कृत्ताशिरस्काः क्षत्रियाणा कण्ठा एव कंदरास्ताभ्य सरद्भिर्निष्कामद्भि कीलालै रक्तैः । 'शोणितेऽस्रमसि कीलालम्' इत्यमरः । निर्वापिता शमिता· प्रत्युद्भूता शिखाना कलापाः सघाता यस्य स तथोक्त । 'कलापो भूषणे बर्हे काञ्च्या सहतितूणयो' इति रत्नमाला । तथाविधस्य हुतभुजोऽग्नेर्झङ्कारा एषु सन्तीति विग्रहे 'अत इनिठनौ' इनिप्रत्ययः ।

तथाविधैर्मार्गणैः । 'कलम्बमार्गणशरा' इत्यमर । घस्मरस्य जगद्भक्षकस्य । 'भक्षको घस्मरोऽग्र.' इत्यमर । कालरुद्रस्य प्रलयकालरुद्रस्य कवलव्यापार ग्रासक्रियामभ्यस्यतु पुन पुन करोतु । 'योग्यागुणनिकाभ्यास' इत्यमर ।'उपसर्गादस्यत्यूह्योर्वावचनम्' इत्यात्मनेपदस्य वैकल्पिकत्वात्परस्मैपदम् । अत्र पदार्थवृत्तिरूपनिदर्शनाविशेषोऽलंकार 'पदार्थवृत्तिमप्येके वदन्त्यन्या निदर्शनाम्' इति तल्लक्षणात् । अत्र च कुठार विहाय धनुष कीर्तनेन तस्मादपि धनुष प्रियत्वावगमादुत्तराङ्के रामजितेन भार्गवेण श्रीत्या रामाय धनुषः प्रदानं करिष्यमाणं सूच्यते ॥ ४८ ॥

यो महीसारवास्तव्यो वाधूलो वीरराघव· ।
स महावीरचरिते तृतीयाङ्कं व्यवीवरत् ॥

अस्मद्गुरुर्जयतु संप्रति यो निवासो लक्ष्म्या हि संततमशेषगुरूपसेव्य ।
श्रीरङ्गराजशिशुनेह सुपुत्रवान्स दूरीकृतेशगुरुशेषतुरङ्गकण्ठ ॥

इत्याण्णाप्पङ्गार्यनामधेयेन वाधूलवीरराघवेण विरचितायां महावीरचरितव्याख्यायां भावप्रद्योतिनीसमाख्यायां तृतीयोऽङ्कः ॥

चतुर्थोऽङ्कः ।

(नेपथ्ये ।)

भो भो वैमानिकाः, प्रवर्तन्तां मङ्गलानि ।

कृशाश्वान्तेवासी जयति भगवान्कौशिकमुनिः
सहस्राशोर्वंशे जयति जगति क्षत्रमधुना ।
विनेता क्षत्रारेर्जगदभयदानव्रतधनः
शरण्यो लोकानां दिनकरकुलेन्दुर्विजयते ॥ १ ॥

इदानीं कवि पुनरपि मुखान्तरेण गर्भसधिं विमर्शसधिं च तुरीयपञ्चमषष्ठैरङ्कैर्वक्ष्यन्प्रथमं तुरीयाङ्कस्य विष्कम्भमुपक्षिपति—**भो भो इत्यादि** । विमानेन व्योमयानेन चरन्तीति वैमानिका । 'तेन चरति' इति ठक् । मङ्गलानि पुष्पवर्षादीनि शुभकर्माणि प्रवर्तन्ताम् । कर्तरि लोट् । कोऽत्र हेतुरित्याह—**कृशाश्वेति** । कृशाश्वस्य जम्भकादिदिव्यास्त्राणा प्रथमं द्रष्टु कृशाश्वनाम्नो ब्रह्मर्षेरन्तेवासी शिष्यो भगवान्कौशिको मुनिर्जयति सर्वोत्कर्षेण वर्तते । 'शिष्यप्रकर्षो यशसे गुरूणाम्' इति भाव । अधुना सहस्राशोर्वंशे सूर्यवंशे क्षत्रं क्षत्रवर्णो जयति । कुत इत्यत्राह—विनेतेति । क्षत्रारे परशुरामस्य विनेता दमयिता जगतामभयदानव्रतमेव धनं यस्य स तथोक्त । लब्धपरिपालनादलब्धस्य लभ्यलाच्च धनसादृश्यम् । जगत्कण्टकवालिरावणादिवधोऽपीह सूचित । लोकाना शरण्यः शरणे रक्षणे साधु । 'शरणं रक्षणे गृहे' इति विश्व । 'तत्र साधु' इति यत्प्रत्यय । जगदभयेत्यादिना त्रैवर्गिकफलप्रदान तत्प्रत्यनीकविध्वंसनं च विवक्षितम् । शरण्य इत्यादिना च भयनिवर्तन मोक्षप्रदानं च विवक्षितम् । अनेन सुग्रीवविभीषणाभ्या किष्किन्धालङ्कैश्वर्यप्रदानं तत्परिपन्थिनोर्वालिरावणयोर्वधश्च वक्ष्यमाण सूचित । एव जटायुवालिनोर्मोक्षप्रदान च सूचितम् । एवभूतौ दिनकरकुलेन्दु सूर्यवशानन्दकरो रामो विजयते सर्वोत्कर्षेण वर्तते । दिनकरेत्यनेन सतापकरस्याप्युष्णकिरणस्य चन्द्रवत्तापहरत्वं रामस्य व्यज्यते । अत्र परशुरामविजयेन दृष्टस्योत्तरत्र वनप्रवासेनादृष्टस्य रामश्रेयोहेतुविश्वामित्रयत्नरूपबीजस्यान्वेषणाद्गर्भसधि । तदुक्तम्—'गर्भो दृष्टस्य नष्टस्य बीजस्यान्वेषण मुहु ' इति । अस्मिंश्च सर्वौ पताकारूपार्थप्रकृति प्राप्त्याशारूपाचार्थप्रकृतिर्वक्तव्ये । तत्स्वरूपं तु—'उपायापायशङ्काभ्या प्राप्त्याशाकार्यसभव । प्रतिपाद्यकथाङ्गं स्यात्पताकाव्यापिनी कथा ॥' इत्युक्तम् । वसिष्ठविश्वामित्रानुग्रहाद्युपायशङ्कया माल्यवन्मन्त्राद्यपायशङ्कया च कार्यसभावनाया उक्तत्वात्प्राप्त्याशोक्ता । प्रतिपाद्यरामकथाङ्गस्य व्यापिन्या लक्ष्मणकथायाश्चोक्त्या पताका वर्णिता । अस्य च गर्भसधेरङ्गानि द्वादश । तदुक्तम्—'अभूताहरणं मार्गो रूपोदाहरणक्रमा । संग्रहश्चानुमानं च तोटकादिबले तथा । उद्वेगसभ्रमाक्षेपा द्वादशाङ्गान्यनुक्रमात् ॥' इति । एतेषां स्वरूपाणि स्वावसरेष्वेव दर्शयिष्यन्ते ॥ १ ॥ विष्कम्भक-

(ततः प्रविशत संभ्रान्तौ विमानेन शूर्पणखामाल्यवन्तौ ।)

माल्यवान्—दृष्टस्त्वया दिवौकसामेकायनीभावः, यदिन्द्रादयः स्वतो बन्दित्वमुपागताः ।

शूर्पणखा—णंहि तुह्मेहि णिरूविदं विसंवदइ । सपदं उक्कम्पिदह्मि । ता किं एत्थ करणिज्जम् ।

माल्यवान्—या सा राज्ञा दशरथेन प्राक्प्रतिश्रुतवरद्वया राज्ञी भरतमाता कैकेयी, तया मन्थरा नाम परिचारिका दशरथस्य वार्ताहारिणी मिथिलामयोध्यातः प्रेषिता मिथिलोपकण्ठे वर्तत इति सप्रत्येव मम निवेदितं चारैः । तस्यास्त्वया शरीरमाविश्यैवमेवं च कर्तव्यम् । (इति कर्णे कथयति ।)

---

१. नहि युष्माभिर्निरूपित विसवदति । सांप्रतमुत्कम्पितास्मि । तत्किमत्र कार्यम् ।

माह—**ततः प्रविशत इत्यादिना** । सभ्रान्तौ । अत्र सभ्रमवचनात्तोटक नाम सध्यङ्गमुक्तम् । यथोक्तम्—'रोषसभ्रमवचन तोटकम्' इति । स्वोत्तेजितस्य परशुरामस्य पराजयात्सभ्रान्तवचनम् । वैमानिकप्रवृत्त्यवगमाय विमानप्रवेशः ॥ एकमयनमधिकरणं येषा ते तथोक्ता अनेकायना सपद्यन्त इत्यस्मिन्नर्थे भवतियोगे च्विप्रत्यय । भवतेश्च भावे घञ्प्रत्यय । एकायनीभावः । रामात्मकैकाधिकरणकत्वमित्यर्थ । 'अयन निलये मार्गे दक्षिणोदग्गतौ रवे' इति रत्नमाला । दृष्ट किमिति काक्षा योजनीयम् । इन्द्रादय । आदिपदाद्वह्न्यादिपरिग्रह । बन्दित्वं स्तुतिपाठकत्वम् । 'बन्दिन स्तुतिपाठका' इत्यमर । कृशाश्वान्तेवासीत्यादिश्लोकापेक्षयेदं बन्दित्वमुक्तम् । स्वत स्वेच्छयोपगता इति यत्, अयमेकायनीभाव इत्यन्वय ॥ निरूपितं विचार्य निर्णीतं वस्तु न विसवदति नान्यथा भवति । 'विप्रलम्भो विसवाद' इत्यमर । सर्वे त विजयिन निर्जरा जानीयुरित्यादिना द्वितीयाङ्कविष्कम्भे माल्यवता निरूपणाद्युष्माभिर्निरूपित शूर्पणखयोक्तम् । एष सचितार्थप्राप्तिरूप क्रमो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'सचितार्थप्राप्ति क्रम' इति । साप्रतमुत्कम्पितास्मि । साप्रतं परशुरामपरिभवानन्तरम् । तत्किमत्र कार्यम् । अत्र रामविषये । तत्रापि शक्तितः प्रतिविधास्य इति माल्यवता सामान्यत प्रतिविधानं परशुरामपरिभवपक्षे प्रतिज्ञातम्, तद्विशेषतोऽद्य शूर्पणखया पृच्छ्यते किमत्र करणीयमिति ॥ **या सेति** । प्रतिश्रुत प्रतिज्ञातं वरद्वयम् । त्रियेते प्रार्थ्येते इति वरौ । 'वृङ् संभक्तौ', संभक्ति· प्रार्थनम्, तयोर्द्वयं यस्यै सा तथोक्ता । 'अङ्गीकाराभ्युपगमप्रतिश्रवसमाधय' इत्यमर । केकयस्यापत्य स्त्री कैकेयी । 'केकयमित्रयुप्रलयानाम्' इत्यादिना यादेरियादेश । वार्ताहारिणी प्रवृत्तिप्रापिका । अयोध्यातोऽयोध्याया. । 'अपादाने च' इत्यादिना पञ्चम्यास्तसि. । मिथिलामिति । प्रेषयते. 'गतिबुद्धि–' इत्यादिना द्विकर्मकत्वान्मिथिलामिति

शूर्पणखा—किं[1] अण्णहा करिस्सदि एव्वं रामो त्ति ।

माल्यवान्—भिद्यते न सद्वृत्तमिक्ष्वाकुगृहेषु, विशेषतस्तादृशस्य विजिगीषोः ।

शूर्पणखा—तदो[2] किम् ।

माल्यवान्—ततोऽनेन योगाचारन्यायेन दूरमाकृष्य रक्षसामङ्कमु-

---

१ किमन्यथा करिष्यत्येव राम इति ।

२. ततः किम् ।

द्वितीया । प्रेषिता । 'प्रयोज्यकर्मण्यन्येषा ण्यन्तानां लादयो मता' इत्युक्ते कर्मणि क्त । चारैर्गूढपुरुषै । 'चारस्तु गूढपुरुष' इत्यमर । तस्या मन्थरायाः । कर्णे कथयतीति । 'अर्थैस्त्वेकेन विज्ञेय पश्चाज्ज्ञाप्यश्च यो भवेत् । कर्णे एवमिवेत्युक्त्या काव्यबन्धे तमीरयेत् ॥' इत्युक्तलाद्रहस्यार्थस्य कर्णे कथनमुक्तम् । अत्र च वरद्वयेऽप्येकेन रामस्य वनप्रवासनमपरेण भरतस्याभिषेक इत्युत्तरत्र स्फुटीभविष्यति । अत्र प्रस्तुतोपयोगिच्छद्माचरणादभूताहरणं नाम सध्यङ्गमुक्तम्—'अभूताहरण प्रस्तुतोपयोगिच्छद्माचरणम्' इति ॥ राम किमेवं करिष्यति वन प्रवेक्ष्यति किम् । अन्यथा करिष्यति किम् । वनप्रवेशं विहाय स्वयं राज्य करिष्यतीत्यर्थः । अत्र वितर्कप्रतिपादनाद्रूप नाम सध्यङ्गमुक्तम् । यथोक्तम्—'वितर्कप्रतिपादनं वाक्यं रूपम्' इति ॥ इक्ष्वाकुगृहेषु सद्वृत्तं मातृपितृवाक्यकरणरूपसमीचीनवृत्तं न भिद्यते न भिन्न भवति । न त्यक्त भवतीत्यर्थः । भिनत्ति कर्मकर्तरि यक् । **विशेषत इति** । तादृशस्य लोकोत्तरस्य विजिगीषोर्विजयेच्छो रामस्य सद्वृत्तं विशेषतो न भिद्यते । तस्य सद्वृत्तभेदाभावोऽतिशयित इत्यर्थः । तत्र हेतुर्विजिगीषोरिति । विजिगीषुलक्षणं कामन्दकेनोक्तम्—'सपन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रम । जेतुमेषणशीलश्च विजिगीषुरिति स्मृत ॥' इति । प्रकृतयोऽपि तत्रैवोक्ता.—'अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चम । एता प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृता ॥' इति । सद्वृत्तहानिरमात्यराष्ट्राणामप्रीतिहेतुरिव सा त्याज्येति भावः । तादृशोऽस्मीत्यनेन दशवर्गयुक्तत्वं विवक्षितम् । दशवर्गश्च—'दुष्टानां निग्रहश्चैव शिष्टाना प्रग्रहस्तथा । द्रुतचारनिसर्गश्च रञ्जनं बलराष्ट्रयो ॥ धर्मार्थयोस्तथा कार्य तथा सैन्यस्य वेतनम् । नित्यकर्म क्रिया चेति दश कर्म प्रचक्षते ॥' इत्युक्त । तत्र सदाचारहानौ बलराष्ट्ररञ्जनधर्मयोर्हानि प्रसज्येदिति भावः । पितृवचनपालनम् 'जीवतोर्वाक्यकरणात्' इत्यादिभ्यो धर्मोऽवगत । अत्र प्रस्तुतोत्कर्षाभिधानादुदाहृतिर्नाम सध्यङ्गमुक्तम् । यथोक्तम्—'प्रस्तुतोत्कर्षाभिधानमुदाहृति' इति ॥ ततः किम् । रामेण सद्वृत्तपालनेन पितृवचनकरणाद्धेतो किं फलं भविष्यतीत्यर्थः ॥ **ततोऽनेनेत्यादि** । तत । पितृवचनपरिपालने रामेण कृते सतीत्यर्थः । अनेन मया तव कर्णे कथितेन योगाना सामदानभेददण्डात्मकानामुपायानामाचारस्यानुष्ठानस्य न्यायेन देशकालाद्यानुगुण्याद्युपायेषु त्याज्योपादेयविवेकपूर्वकानुष्ठानहेत्वौचित्यनिरूपणेन । 'योग. सनहनोपायध्यानसगतियुक्तिषु' इत्यमर । 'अत्रेषन्या-

पनीतस्य विन्ध्यकान्तारेष्वदेशज्ञस्य विचरतः सुकराण्येवावस्कन्दनानि स्युः। विराधदनुकबन्धप्रभृतयस्तीक्ष्णा दण्डकारण्यसत्रेषु चरिष्यन्ति। ते हि शक्ताः लुप्तप्रभुशक्तेरुत्साहशक्तिं छद्मनातिसधातुम्। अनिवर्तनीयश्च रावणस्य सीतास्वीकारग्रहः। स चैवमीषत्करः सप्रयोजनश्चेति।

शूर्पणखा—[1]अह लक्खणसहाअत्तणे किं पओअणम्।

माल्यवान्—

वीरोऽस्त्रपारगश्चिन्त्यो यथा रामस्तथैव सः।
छद्मदण्डप्रयोगस्तु यथैकस्मिंस्तथा द्वयोः॥ २॥

---

१. अथ लक्ष्मणसहायत्वे किं प्रयोजनम्।

यकल्पाश्च' इति चामरः। यद्वा योगाचारो नाम बुद्धशिष्येष्वन्यतमस्तदुक्तेन न्यायेन सवरणाख्येन। मायाप्रयोगात्मना दण्डविशेषेणेत्यर्थः। रक्षसामङ्गं समीप स्थानमुपनीतस्य प्रापितस्य। 'अङ्गो नाटकविच्छेदे सज्ञाया युधि भूषणे। समीपे रूपके स्थाने मतावुत्सङ्गचिह्नयो॥' इति रत्नमाला। विन्ध्यकान्तारेषु विन्ध्यपर्वतवनेष्वदेशज्ञस्य विचरतोऽदेशज्ञस्य सतो विचरतः। देशदोषमजानता संचरत इत्यर्थः। अवस्कन्दनानि पीडनानि सुकराण्येव स्युः सुखेन कर्तुं शक्यान्येव भवेयुः। 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति कर्मणि करोतेः खलप्रत्ययः। **विराधेति**। तीक्ष्णा क्रूरा दण्डकारण्यसत्रेषु दण्डकस्य राज्ञो देशः शुक्रशापेनारण्यमासीदिति दण्डकारण्यसज्ञकवनेषु। 'सत्रं यज्ञे यज्ञमेदे सदादाने वनेऽशुके' इति रत्नमाला। सज्ञाशब्दत्वादपुनरुक्तिः। लुप्ता नाशिता प्रभुशक्तिः कोशदण्डजतेजोरूपसामर्थ्यं यस्य स तथोक्तस्तस्य। पूर्वमेव राज्यभ्रंशवनवासाभ्यां कोशदण्डजशक्तिरूपप्रभुशक्तिविकलस्येत्यर्थः। रामस्येति शेषः। उत्साहशक्तिं कर्तव्येषु स्थेयान्प्रयत्न उत्साहस्तत्र शक्तिः सामर्थ्यं तां छद्मना मायाप्रयोगरूपगूढानिष्टकरणेनातिसधातुं वञ्चनेन नाशयितुं शक्ता। समर्था इत्यर्थः। अतिसपूर्वको दधातिरिह वञ्चनया नाशने प्रयुक्तः। **अनिवर्तनीय इति**। रावणस्य सीतास्वीकारग्रह सीतास्वीकारनिर्बन्ध। 'निर्बन्धोपरागार्कादयो ग्रहाः' इत्यमरः। अनिवर्तनीय प्रकारान्तरेण निवर्तयितुमशक्यः। भवतीति शेषः। **स चेति**। एवं मायाप्रयोगे सत्येव स सीतास्वीकारनिर्बन्ध ईषत्करोऽनायासेन कर्तुं शक्यः, सप्रयोजनश्च सीतालाभरूपविषयसिद्धिमाश्च। भवेदिति शेषः॥ माल्यवता शूर्पणखायाः कर्णे कथिते वाक्यसदर्भे 'सीतालक्ष्मणमात्रकात्परिजनादन्यो न चानुव्रजेत्' इति स्थितम्। तत्र लक्ष्मणस्यापि वञ्चनया प्रत्याकर्षणे किं फलमिति शूर्पणखा पृच्छति—अथ लक्ष्मणसहायत्वे किं प्रयोजनमिति। अथेति प्रश्ने॥ **वीर इति**। वीरो नैसर्गिकशक्तियुक्तोऽस्त्राणां पारमध्ययनसमाप्तिपराकाष्ठां गच्छतीति गच्छते कर्तरि डः। पार तीर कर्मसमाप्तौ' इत्यसाद्भावे घञ्। एवं रामो यथा चिन्त्यो भयस्थानत्वेन शङ्क-

शूर्पणखा—मम[1] तु दुअं एव्व एदं ण जुत्तं पडिभाइ । जं दूरट्ठिदस्स दासरहिणो संणिहाणकरणं, जं अ अनाबद्धवेरस्स अप्पडिसमाहेअं इत्थियावेरं ति ।

माल्यवान्—स तावद्वत्से, भूम्यानन्तर्यतः प्रत्यासन्न एव । सानुचरसुन्दोपसुन्दपुत्रोपप्लवाच्च ताटकारिर्भूम्यनन्तरः कथमनाबद्ध-

---

१. मम तु द्वयमेवैतन्न युक्तं प्रतिभाति । यद्दूरस्थितस्य दाशरथेः संनिधानकरणम्, यच्चानाबद्धवैरस्याप्रतिसमाधेयं स्त्रीवैरमिति ।

नीयो भवति, तथैव वीरोऽस्त्रपारगो लक्ष्मणोभयस्थानत्वेन चिन्तनीय इत्यर्थः । लक्ष्मणेन सहास्त्रिति हि पूर्वं रामेण प्रार्थितम् । छद्मदण्डप्रयोगो गूढदमानुष्ठानम् । 'दण्डोऽस्त्री दमहिंसासेनालगुडेषु शासने राज्ञाम्' इति रत्नमाला । एकस्मिन्नेकत्र यथा । कार्य इति शेषः । तथा द्वयो कार्यं । रामे लक्ष्मणे च कार्यं इत्यर्थः ॥ २ ॥ **मम त्विति** । अप्रतिसमाधेय स्त्रीवैर प्रकारान्तरेणानिवर्त्यं स्त्रीप्रयुक्तवैरम् । प्राकृते स्त्रीशब्दस्य 'इत्थिया' आदेश । अनाबद्धवैरस्य निमित्तान्तरप्रयुक्तवैररहितस्य यत्सनिधानकरणं यच्च स्त्रीवैरमेतद्वयमिति पूर्वेण सबन्धः । वैरं हि पञ्चविधम् । तदुक्तम्—'सापत्नं वस्तुजं स्त्रीजं वाग्जातमपराधजम् । वैरप्रभेदनिपुणैर्वैरं पञ्चविध मतम् ॥' इति । **स तावदिति** । तावच्छब्द क्रमार्थकः । सनिधानं युक्तमेवेति प्रथमं निरूप्यत इत्यर्थः । स रामो भूमेरानन्तर्यतो भूम्यनन्तरत्वाद्धेतो प्रत्यासन्न एव सनिहित एव । रावणापेक्षया भूम्यनन्तरत्वं विवक्षितम् । तच्च स्वमण्डलसनिकृष्टमण्डलवर्तित्वम् । तदुक्तममरसिंहेन—'विषयानन्तरो राजा शत्रुर्मित्रमत परम्' इति । विषयानन्तरो भूम्यनन्तरः । 'नीवृज्जनपदौ देशविषयौ' इति विषयशब्दस्य देशवाचित्वाद्द्वादशविधेषु राजसु भूम्यनन्तरो नाम कश्चित् । तथाहि—मध्यतो विजिगीषु, तस्यारि, मित्रम्, अरेर्मित्रम्, मित्रशत्रु, शत्रुमित्रमित्रं चेति पुरोवर्तिन पञ्च । पार्ष्णिग्राहः, आक्रान्तः, पार्ष्णिग्राहासार, आक्रान्तासारश्चेति विजिगीषोः पृष्ठभागस्थाश्चत्वार । एवं च भवति विजिगीषुर्दशम, पार्श्वस्थो मध्यम, एतेषा बहिरवस्थित उदासीनश्चेति राजानो द्वादशविधा भवन्ति । तदिदमुक्तं कामन्दकेन—'सपन्नस्तु प्रकृतिभिर्मदोत्साह कृतश्रम । जेतुमेषणशीलश्च विजिगीषुरिति स्मृत ॥ अरिर्मित्रमरेर्मित्रं मित्रमित्रमत परम् । अथारिमित्रमित्रं च विजिगीषो पुर सरा' ॥ 'पार्ष्णिग्राहस्तत पश्चादाक्रान्तस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तर । अनुग्रहे सहतयोर्व्यस्तयोर्निग्रहे प्रभु ॥ मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः । अनुग्रहे सहताना व्यस्ताना च वधे प्रभु ॥' इति । अत्र रावणो माल्यवत्पक्षेण विजिगीषुः, तथारिरिन्द्रादिदेववर्ग, मित्रमसुरवर्ग इत्यादि यथायोग्यं विजिगीष्वादिकल्पनाया रामो भूम्यनन्तर सपद्यते । एवं सनिधानं निरूपितम् । अथ वैरसद्भावं निरूपयति—**सानुचरेत्यादिना** । सानुचरयोः सुन्दोपसुन्दपुत्रयोः सुबाहुमारीचयोरुपप्लवादेकस्य वधरूपादन्यस्य समुद्रप्रक्षेपणरूपाच्चोपद्रवाद्धेतोर्भूम्यन-

वरः । अप्रतिविधेयं च रामरावणयोरितरथापि वैरम् । पश्य ।

पाल्यं तस्य जगद्वयं तु जगतो नित्यं हठादेशिनः
सामैवं सति कीदृगप्रियकृता शश्वद्विरुद्धात्मना ।
कानर्थान्रघुनन्दनो मृगयते देवैः पतिर्यो वृत-
स्तस्माद्दानमपीह नास्ति न भिदा तस्यैव नः साधनम् ॥ ३ ॥

दण्डोऽप्यभ्यधिके शत्रौ न प्रकाशः प्रशस्यते ।
तूष्णींदण्डस्तु कर्तव्यस्तस्य चायमुपक्रमः ॥ ४ ॥

न्तरस्ताटकारी राम. कथमनाबद्धवैर. । ताटकारित्वात्सुबाहुमारीचोपप्लवाच्च रामो भूम्यनन्तर । बद्धवैर एवेत्यर्थ. । तथा चोक्तम्—'राज्यस्त्रीस्थानदेशाना ज्ञातीनां च धनस्य च । अपहारो मदो मान ' इत्यारभ्य 'इति विग्रहयोनय ' इति । इतरथा प्रतिविधेयम् । छद्मदण्डप्रयोगेण विना दुर्निवर्त्यमित्यर्थ· । तदेव वैरस्य दुर्निवर्त्यत्वमाह—**पश्येत्यादिना** । मुनिरूपत्वाभिप्रायेण पश्येति विधि ॥ **पाल्यमिति** । जगत्तस्य रामस्य पाल्यं रक्षणीयम् । भवतीति शेष । वयं च रावणादयो वयं तु जगतो लोकस्य नित्यं हठेन बलात्कारेणादेशिन. शासितारः । भवाम इत्यर्थ । 'प्रसभस्तु बलात्कारो हठ' इत्यमर· । जगत्पालनतत्प्रसभयोर्व्याघातादिति भाव । ततः किमत्राह—**सामेति** । एवं सति रामस्यास्माकं च जगत्सुखदु.खतत्परत्वे सति शश्वत्सदा विरुद्धात्मना विपरीतबुद्धिनाऽप्रियकृता विप्रियकारिणा रावणेन कर्त्रा रामविषये सामाख्यं मधुरवाक्यं कीदृक् । कथभूतमित्यर्थ. । विप्रियकृतो वाक्यमपि विप्रियमेवेति साम्नस्वरूपमेव दुर्घटमिति भाव । 'साम सान्त्वमुमे समे', 'अत्यर्थं मधुरं सान्त्वम्' इत्यमर । अनेन सामोपायो न वैरप्रतिविधानहेतुरित्युक्त भवति । यो रघुनन्दनो रामो देवैरिन्द्रादिभि पति पालक. स्वामी च वृत स राम कानर्थान्देयवस्तूनि मृगयतेऽपेक्षते । 'मृग अन्वेषणे' । अनेन दानोपायोऽपि न वैरप्रतिविधानहेतुरित्युक्त भवति । तदेवाह—तस्माद्दानमपीह नास्तीति । इह वैरप्रतिविधौ नास्ति । हेतुतयेति शेषः । इह रामे वा । तस्यैव देवै पतित्वेन वृतस्यैव रामस्य भिदा भेदोपायो न साधनमस्माक प्रतिविधिहेतुर्न भवति । वेतनेन सैन्यसग्रहेऽप्यधिकवेतनप्रदानप्रलोभेन सैन्यादीना पृथक्करणं न घटते । तेषां स्वार्थतया स्वारसिकरामपक्षपातेन भेदो दुर्घट इति भाव· ॥ ३ ॥ दण्ड परमवशिष्यते, मायोपेक्षयोस्तत्रैवान्तर्भावादिन्द्रजालस्य भेदेऽन्तर्भावाच्च । सप्तोपायपक्षानभ्युपगमेनोपायचतुष्टयस्यैवाभ्युपगमात् । तदुक्तं कामन्दकेन—'साम दान च भेदश्च दण्डश्चेति चतुष्टयम्' इति । सोऽयं दण्डो द्विविध —प्रकाशदण्ड , तूष्णीदण्डश्चेति । तत्र प्रकाश. सेनाभिगमनादिना वधबन्धनादि । तूष्णीदण्डस्तु गूढवधादि । अयमेव छद्मदण्डादि शब्देन व्यवह्रियते । तत्र प्रबले प्रकाशदण्डो न युक्त । तस्मात्तूष्णीदण्ड एवोचित इत्याह—**दण्डोऽपीति** । अभ्यधिकेऽत्यन्ताधिके । अधिक. कार्तवीर्य., ततोऽप्य

तथा सति सीतापहारतः किमपरं कुर्यात् । ततश्च,

हृतजानिररातिभिः सलज्जो
यदि मृत्युः शरणं ततोऽन्यथा तु ।
भ्रदितो मृत एव निष्प्रतापः
परितप्तो यदि वा घटेत सधौ ॥ ५ ॥

धिक परशुराम, ततोऽप्यधिको राम इत्यभिप्रायेणाभ्यधिक इत्युक्तम् । शत्रौ रामे प्रकाशो दण्ड· सेनाया अभिगमनादिना वधादिर्न प्रशस्यते न गुणवान्भवति । किंतु प्रयोक्तुर्दुर्बलत्वेन स्वरूपोच्छेदकरतया दोषवानेव भवतीत्यर्थ । 'शंसु स्तुतौ' कर्मणि यकि नलोपः । स्तुतिर्गुणनिष्ठगुणाभिधानमभ्यधिके शत्रौ तूष्णींदण्डस्तु कर्तव्य कर्तुमर्हं. । तुशब्द. प्रकाशदण्डवैलक्षण्यद्योतक । तच्च प्रयोक्तु. स्वरूपोच्छेदकरत्वाभावरूपम् । अयं तु मन्थराशरीरप्रवेशादिस्तस्य तूष्णीदण्डस्योपक्रमो बुद्धिपूर्वारम्भ. । भवतीति शेष । 'ज्ञात्वारम्भ उपक्रम' इत्यमर । अत्र प्रस्तुतोपयोगिसामदानवचनात्सग्रहो नाम सध्यङ्गमुक्तम् । तथोक्तम्—'प्रस्तुतोपयोगिसामदानवचनात्सग्रह.' ॥ ४ ॥ तथा सति वनविप्रवासादौ सति सीतापहारहेतो किमपरं कुर्यात्किमन्यत्कर्तुं शक्नुयादिति वक्ष्यमाणादन्यत् किमपि कर्तुं न शक्नुयादिति भाव । शकि लिङ् । **हृतजानिरिति** । अत्र राम इत्यादि । रामोऽरातिभि. शत्रुभिः । 'अभिघातिपरारातिप्रत्यर्थिपरिपन्थिन' इत्यमर । यदि हृतजानिर्हृतदारो भवेद्यदि, तदा राम. सलज्जो भवेत् । लोकमुखनिरीक्षणानर्हतया युद्धादिकार्याक्षमो भवेदित्यर्थ । अथवा तस्य रामस्य मृत्युर्मरणं शरणं रक्षकं भवेदिति शेष· । तस्येत्यपि शेषः । प्राणेभ्योऽपि गरीयस्यास्तस्याः क्षणविरहासहतया तत्क्षण एव म्रियेतेति भाव· । 'शरणं गृहरक्षित्रोः' इत्यमरः । अन्यथा तु तत्क्षणमरणाभावेऽपि भ्रदितो मृदूकृत सन् । मृदुशब्दात्तत्करोतीत्यर्थे णिचि ऋकारस्य रेफादेशे च सति कर्मणि क्त । मृतो भवेत् । क्षीणबल सन्कर्मेण म्रियेतेत्यर्थ । अन्यथा त्वित्यनुषज्यते । अन्यथा तु क्रमेण मरणाभावेऽपि निष्प्रताप पूर्वमेव राज्यभ्रशात्कोशदण्डजतेजोविरहित. । 'सप्रताप. प्रभावश्च यत्तेज. कोशदण्डजम्' इत्यमर. । परितप्त. सस्तप्त सन्सधौ घटेत चेष्टेत । 'घट चेष्टायाम्' । चेष्टा हिताहितपरिस्पन्द । यदिवेत्ययमव्ययसघातो यद्वेत्यर्थे वर्तमान सर्वेषु कल्पेष्वन्वेतव्य. । सधिर्नाम विजिगीषोर्व्यवस्थाकरणलक्षणमैक्यम् । स च षाड्गुण्ये प्रथम· । 'सधिर्नो विग्रहो यानमासनं द्वैधमाश्रय । षड्गुणा' इत्यमर. । तच्च षड्गुणं निरुक्तम् । यथा विजिगीषोर्व्यवस्थाकरणलक्षणमैक्यं सधि, विरोधो विग्रह, विजिगीषोरारिं प्रति यात्रा यानम्, तयोर्मिथ प्रतिबद्धशक्त्यो कालप्रतीक्षया तूष्णीमवस्थानमासनम्, दुर्बलप्रबलयोर्द्विषोर्वाचिकमात्मसमर्पण द्वैधीभाव, अरिणा विध्यमानस्य बलवदाश्रयण समाश्रय इति । एतादृशे सधौ व्याप्रियेतेत्यर्थ. । अत्र शत्रुविषये वृत्तचतुष्टयं नीतिसिद्धम् । तच्च—'उच्छेदन चापजय पीडनं कर्शनं तथा' इत्युक्तम् । तत्र सलज्ज इत्यपजय, मृत्युरित्युच्छेदनम्, मृत इति पीडनम्, परितप्त

उत्तिष्ठेत वधाय नः परिभवप्रेद्धेन चेन्मन्युना
नेष्टे तत्प्रसरं निरोद्धुमुदधिस्तिग्मांशुवीर्यो हि सः ।
किंतु प्राक्प्रतिपन्नरावणसुहृद्भावेन भीमौजसा
शत्रुर्वज्रधरात्मजेन हरिणा घोरेण घानिष्यते ॥ ६ ॥

अनेन प्रसङ्गेन बहूनुसंधातव्यम् ।

इति कर्शनं चोक्तम् ॥ ५ ॥ पक्षान्तरमाह—**उत्तिष्ठेतेत्यादि** । अत्रापि राम इत्यादि । राम परिभवप्रेद्धेन सीतापहाररूपतिरस्कारप्रदीप्तेन पूर्वमेवेन्द्रादिपीडनेन मन्यु, मुनिपीडनेन तस्य दीप्तत्वम्, सीतापहरणेन तु प्रदीप्तत्वमिति भाव । मन्युना क्रोधेन हेतुना शत्रुकृतापराधादिना मन प्रज्वलनं क्रोधो नोऽस्माकं वधाय । न इत्येतन्मध्यमणिन्यायेन वधपरिभवाभ्यामन्वेतव्यम् । उत्तिष्ठेत चेदुद्युङ्क्ते चेत् । 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम् । 'उत्थान पौरुषे तन्त्रे सनिविष्टोद्भमेऽपि च' इत्यमर । उदधि समुद्रस्तस्य रामस्य प्रसरमस्मात्प्रतिप्रस्थानम् । 'स्यादासार प्रसरणम्' इत्यमर. । प्रसरणशब्द प्रसरशब्दश्च पर्यायौ । निरोद्धु निवर्तयितु नेष्टे न शक्नोति । 'ईश नियमने' शपो लुक् । हि यस्मात्स रामस्तिग्मांशुवीर्यं सूर्यसदृशप्रतापः । भवतीति शेष । 'वीर्यं बले प्रभावे च' इत्यमर· । यद्यपि रामेणोत्थानेऽप्यस्माकं जलदुर्ग समुद्रोऽस्त्येव । यथोक्तम्—'औदकं पार्वतं वार्क्षमैरिणं धान्वन तथा । शस्त्र प्रशस्तमतिभिर्जलदुर्गोपचिन्तकैः ॥' इति । 'तेषा मध्ये सप्त महादुर्गाणीत्यपरे जगु । गिरिदुर्ग वनाह्वं च सलिलं पङ्कदुर्गकम् ॥ ऐरिणं देवदुर्गं च मिश्राख्यमिति सप्तधा ॥' इति च, तथापि रामस्य तदकिञ्चित्करम् । सूर्यवत्तस्य जलशोषणसमर्थत्वादिति भाव । एवं शूर्पणखाभिप्रेतं समुद्रदुर्गपक्षं दूषयित्वा स्वपक्षमाह—कित्विति । प्राक्प्रतिपन्नरावणसुहृद्भावेन पूर्वमेव स्वीकृतरावणसख्येन भीमौजसा रावणस्यापि भयहेतुबलयुक्तेन । 'ओजः शब्दगुणे ज्ञाने बले गर्वप्रकाशयो' इति रत्नमाला । घोरेण रामस्यापि भयस्थानभूतेन वज्रधरात्मजेनेन्द्रपुत्रेण हरिणा वानरेण । वालिनेति फलितम् । शत्रू रामो घानिष्यते हनिष्यते । 'हन हिंसायाम्' इत्यस्मात्कर्मणि लृट्, 'स्यसिच्-' इत्यादिना चिण्वद्भावाद्धिरिडागमश्च । 'अचिण्णलो –' इत्युक्तेश्चिणि तकारादेशाभाव. कुत्वं च । अत्र चेन्द्रात्मजस्य कथमिन्द्रपक्षरामविपक्षत्वमिति शङ्कावारणाय हरिणेत्युक्तम् । तस्य कापेयात्पितृपक्षविप्रतिपक्षत्व सभवतीति भाव । 'एतदप्यस्य कापेयं यदर्कमुपतिष्ठति' इति न्यायोऽत्राभिप्रेत । ननु दुर्बलस्य तस्य कथं रामप्रत्यनीकत्वमिति शङ्कावारणाय भीमौजसेति । तादृशबलाधिक्ये को हेतुरिति शङ्कावारणाय वज्रधरेति । ननु तथापि स्वस्मादधिकबलं राम स कथं हनिष्यतीति शङ्कावारणाय घोरेणेति । समुद्यताना सर्वेषामपि बलाकर्षणेनोपचीयमानबलत्वं घोरत्वम्, अतो रामबलमप्याकर्षेदिति हृदयम् । ननु तथापि रावणकार्यं कुत. स करिष्यतीति शङ्कावारणाय प्रतिपन्नरावणसुहृद्भावेनेति । 'शरीर वसु विज्ञानं मित्रार्थं संपरित्यजेत्' इत्युक्तेर्मित्रकार्यं करिष्यत्येवेति भाव । ननु तथापि रामेण वालिनो

शूर्पणखा—किं[1] विअ ।

माल्यवान्—रावणप्रियासि वत्से, कार्यज्ञा च । ततो निःशङ्कमावेद्यते हृदयखेदः ।

क्षितेरानन्तर्यादपकृदपकृत्यश्च सततं
द्विधा रामः शत्रुः प्रकृतिनियतः क्षत्रिय इति ।
तृतीयो मे नप्ता रजनिचरनाथस्य सहजो
रिपुः प्रत्यासत्तेरहिरिव भयं नो जनयति ॥ ७ ॥

---

१. किमिव ।

मित्रीकरणे स कथ रामं हनिष्यतीति शङ्कावारणाय प्रागिति । पूर्वमेव वालिनो रावणेन मित्रीकरणात्तस्याग्रमित्रारिणा रामेण मित्रीकरणमेव न घटत इति भाव । अतो निर्दोषोऽयं पक्ष इति हृदयम् । एव पाण्डुण्ये चरमोद्दिष्ट समाश्रय कर्तुं युक्त इत्युक्तम् । समाश्रयो ह्यरिणा पीड्यमानस्य बलवदाश्रयणरूप । अत्रेष्टार्थोपायानुसरणादाक्षेपो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'इष्टार्थोपायानुसरणमाक्षेप.' इति ॥ ६ ॥ एवं परपक्षभयेऽपहृतेऽपि रावणस्य स्वपक्षभयं यदीदमित्याशङ्क्य परिहरति—अनेन प्रसङ्गेनेत्यारभ्य नोपेक्षेत्यन्तेन । अनेन प्रसङ्गेन । परपक्षोभयोपन्यासप्रयुक्तोपस्थितिविषयत्वे सत्युपेक्षानर्हत्वरूपेणोपस्थितस्योपेक्षानर्हत्वं हि प्रसङ्ग । बहुविस्तरेण वक्ष्यमाणमर्थजातमनुसधातव्यं निरूपयितव्यम् ॥ **रावणप्रियेति** । कार्यं जानातीति कार्यज्ञा । 'आतोऽनुपसर्गे क.' इति क. । नि शङ्कं परेभ्य. कथनशङ्कारहितं यथा तथा हृदयखेद आवेद्यते कथ्यते । तुभ्यमिति शेष । अत्र मित्रं त्रिविधम्—कृत्रिमं सहजं प्राकृतं चेति । एवं शत्रुस्त्रिविध—कृत्रिम सहज. प्राकृतश्चेति । तत्रोपकारात्मककक्रियया निवृत्तं कृत्रिमं मित्रम् । एकशरीरजातं मित्रं सहजमित्रम्, तच्च मातृष्वसेयपैतृष्वसेयादिरूप प्रकृत्या स्वभावेन सिद्धम् । पूर्वोक्तकृत्रिममित्रत्वरहितं मित्रं प्राकृतमित्रम् । तच्च विषयानन्तरराजरूपम् । एवमपकारक्रियया निर्वृत्त शत्रु कृत्रिम, एकशरीरजात. पितृव्यतत्पुत्रादिरूप सहजशत्रु, विषयानन्तर प्राकृतशत्रु । तत्र रामो रावणस्य न सहजशत्रु क्षत्रियत्वात्, किंतु विषयानन्तरत्वात्प्राकृत शत्रु । अपकर्तृत्वादिना च कृत्रिमशत्रुर्भवति । विभीषणस्तु रावणस्य सहजशत्रुत्वाद्रामस्य तु गुणत प्रत्यासन्न रावणस्यापकुर्यादिति भयस्थानमित्याह—**क्षितेरानन्तर्यादित्यादिना** । क्षत्रियो राम क्षितेरानन्तर्यात्पूर्वोक्तभूम्यनन्तरत्वाद्धेतो. प्रकृतिनियत स्वभावसिद्ध । प्राकृत इति यावत् । किंचापकृदपकृत्यश्चेत्यपकर्तापकार्यश्चेति । कृत्रिमश्चेति यावत् । द्विधा शत्रु प्राकृतत्वकृत्रिमत्वरूपप्रकारद्वययुक्तः शत्रु । रावणस्य भवतीति शेष. । क्षत्रियपदं, सहजशत्रुत्वाभावविवक्षया क्षत्रियो राम. क्षितेरानन्तर्यात्प्रकृतिनियत इत्यपकृदपकृत्यश्चेति द्विधा शत्रुर्भवतीति योजना । रजनिचरनाथस्य सहजो रिपु । भ्रातृत्वादिति शेष । मे तृतीयो नप्ता मम

कुम्भकर्णस्तु सन्नप्यसत्समः कृत्रिमस्वापव्यसनादविनयाच्च । विभीषण-स्त्वाभिगामिकात्मगुणसंपन्न इत्येनमनुरताः प्रकृतयः । खरदूषणप्रभृतयस्तु संघवृत्तयो राजानमुपतिष्ठन्ते, यतस्तेन यत्सेनेव राजानमर्थान्दुहन्ति । उपजापिताश्च प्रत्युपजपन्ति प्रकृतयः । तदिदमन्तर्भेदजर्जरं

तृतीयो दौहित्र । विभीषण इत्यर्थ । प्रत्यासत्तेर्गुणतो रामप्रत्यासत्तेः, देशतो दायादतश्च रावणप्रत्यासत्ते सनिकर्षादहिरिवैकाश्रयाश्रित सर्प इव नोऽस्माकं भयं भाव्यनर्थशङ्का जनयत्युत्पादयति । अत स्वपक्षप्रभवभयं वर्तत इति भाव. । अहिरिवेत्यनेनाहिभयशब्दोऽहेरिव भयमिति व्युत्पत्त्या स्वपक्षप्रभवभये निरूढ इति ध्वनितम् । 'महीभुजामहिभयं स्वपक्षप्रभवं भयम्' इत्यमरश्च । अत्र शङ्कात्रासयोरुक्ते सभ्रमो नाम सध्यङ्गमुक्तम् । यथोक्तम्—'शङ्कात्रासौ च सभ्रम' इति ॥ ७ ॥ ननु कुम्भकर्ण· कथं न शङ्क्यते, कथं विभीषणाद्भयं तेन न निवर्त्यतेत्यत्राह—**कुम्भकर्णस्त्विति** । कृत्रिमस्वापव्यसनाद्ब्राह्मवरात्मककियया निवृत्तनित्यनिद्रादु खादविनयाच्च किंचिज्जागरे चात्याहारादिकरणेन मदोत्कटत्वाच्च सन्नप्यसत्सम इत्यन्वय । विभीषणस्य भयहेतुत्वं विवृणोति—**विभीषणस्त्वित्यादिना** । विभीषणस्तु । तुशब्द कुम्भकर्णाद्व्यावृत्तिद्योतकः । अभिगमाय प्रभवन्तीत्याभिगामिकाः । 'तस्मै प्रभवति सङ्घादिभ्य' इति ठक्प्रत्यय· । अमात्यादिकर्तृकाभिगमहेतुभूता इत्यर्थ. । तथाविधैरात्मगुणै सपन्न समृद्ध इति हेतोरेनं पूर्वोक्त विभीषणम् । अन्वादेशे इदम एनादेश । प्रकृतयोऽमात्या अनुरता· । अनुरक्ता इत्यर्थ. । एवमिति 'लक्षणेत्थंभूत–' इत्यादिनानो कर्मप्रवचनीयसज्ञायाम् । 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीया । आभिगामिकगुणवर्गश्च कामन्दकीये दर्शित·—'सुशीलत्वं वयस्यत्वं दाक्षिण्यं क्षिप्रकारिता । अविसवादिता सत्यं वृद्धसेवा कृतज्ञता ॥ दैवसपन्नतावुद्धिरक्षुद्रपरिवारता । शक्यसामन्तता चैव तथैव दृढभक्तिता ॥ दीर्घदर्शित्वमुत्साह शुचिता स्थूललक्षता । विनीतता धार्मिकता गुणाः साध्वाभिगामिका ॥ गुणैरेतैरुपैत सन्सुव्यक्तमभिगम्यते ॥' इति । 'अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चम । एता प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृता· ॥' इति प्रकृतयोऽपि तत्रैव दर्शिता । **खरदूषणप्रभृतयस्त्विति** । सघेन वृत्तिर्जीवनं येषा ते तथोक्ता । प्रत्येकं बुद्धिसामर्थ्यशून्या इत्यर्थ । राजानं स्वामिनमुपतिष्ठन्ते भजन्ति । तिष्ठते 'वा लिप्सायाम्' इत्यात्मनेपदम् । यतो यस्माद्धेतोस्तेन सघेन । वत्सेनेव धेनुमिति शेष । राजानमर्थान्दुहन्ति । दुहिर्द्विकर्मक । धेनोर्वत्समिव राज्ञ संघं दर्शयित्वा धेनोः सकाशात्पय इव राज्ञः सकाशात्प्रयोजनानि सपादयन्त इत्यर्थ । प्रयोजनार्थिना तेषा स्वामिनियमो न विवक्षित इति भाव. । यद्वा तेन विभीषणेन वत्सेनेवेत्यादिपूर्ववत् । सहजरिपुमिममेवावष्टभ्य कदाचित्पृथग्भवेयुरिति शङ्कमानाद्राज्ञ स्वप्रयोजनानि लभन्त इति भाव । तर्हि मुखान्तरेण प्रकृतयो विभीषणाद्भेद्यन्तामित्यत्राह—**उपजापिता इति**। प्रकृतयोऽमात्यादय उपजापिताः

राजकुलमभियुक्तमात्रं रामेण भिद्यते । यथोक्तम्—'लघ्वपि व्यसनपदमभियुक्तस्य कृच्छ्रसाध्यं भवति' इति । तत्र विभीषणावग्रहस्य प्रतिविधानं कर्तव्यम् । स तु प्रकाशदण्डस्तूष्णींदण्डः संरोधनमपसारणं वा स्यात् । तत्र प्रकाशमभिन्नसंबन्धाः कथं राक्षसास्तितिक्षेरन् । तूष्णींदण्डोऽपि प्राज्ञैरनुमीयमानः प्रकृतिकोपको रामेऽभियोक्तरि दुरन्तः स्यात् ।

सत्य प्रत्युपजपन्ति । भेदकानेव विभीषणानुगुण्येन भिन्द्युरित्यर्थः । 'भेदोपजापौ' इत्यमर. । विभीषणगुणग्राहिण्य प्रकृतयो रावणदोषानुसधानाद्भेदकानेव भिन्द्युरिति भाव । 'अलब्धवेतनो लुब्धो मानी चाप्यवमानितः । क्रुद्धश्च कोपितोऽकस्मादभीतश्चापि भीषित ॥ यथाभिलषितै कामैर्भिन्द्यादेनाश्चतुर्विधान् ॥' इत्युक्तप्रकारो हि भेदोपाय । तन्न विभीषणस्य स्थूललक्ष्यत्वलक्षणाभिगामिकगुणसंपन्नत्वादत्र नालब्धवेतनः कश्चित्सभवति । अक्षुद्रपरिवारत्वाच्च नास्य परिवारो लुब्ध· सभवति । विनीतत्वाच्चास्य नावमानितोऽनेन कश्चित्सभवति । दाक्षिण्यसपन्नत्वाच्चास्य न कोपितोऽनेन कश्चिदस्ति । धार्मिकत्वाच्चास्य नास्माद्भीत कश्चिदपि परिवारोऽस्तीति तत्रोपजापो दुर्घट इति । किंतु तत्पक्षीयै प्रत्युपजाप एव सभावित इति हृदयम् । **तदिदमिति** । तत्तस्माद्भेतोरन्तर्भेदेन स्वजनैर्मिथो वैमत्येन जर्जरमन्त. शिथिलं राजकुलं रावणगृहं रामेणाभियुक्तमात्रं युद्धायाभियातमेव सत् । न तूपजापितमित्यर्थ । भिद्यते स्वयमेव भिन्नं भविष्यति । कर्मकर्तरि प्रयोग । विसृष्टवैमत्यतत्पूर्वपृथग्भावादियुक्तं भवेदिति भाव । अस्मिन्नर्थे नीतिशास्त्रसवादमाह—**यथोक्तमित्यादिना** । लघ्वपि स्वल्पमपि व्यसनपदं भ्रंशस्थानं कामक्रोधप्रभवदोषस्थानं वा । 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे' इत्यमर । व्यसनस्थानमित्यन्तर्भेदोऽभिप्रेतः । अभियुक्तस्य परेणाभियातस्य । इदं पूर्वोत्तरान्वयि । अभियुक्तस्य व्यसनपदमभियुक्तस्य कृच्छ्रसाध्यं भवति दुःखेन प्रतिकार्यं भवति । 'साधनमनुगमगत्योः शेफसि सिद्धौ निवृत्तिदापनयो । मृतसस्कारे हेतौ धनहिंसायातनासु सेनाङ्गे ॥' इति रत्नमाला । साधयतिरत्र निर्वृतौ च वर्तते । तत्र भेदे सति विभीषणावग्रहस्य विभीषणपृथग्भावस्य पदच्छेदवाचिनोऽवग्रहशब्दस्यात्र पृथग्भावमात्रपरत्वम् । प्रतिविधान प्रतीकार । तत्र न तावज्ज्येष्ठेन कनिष्ठे सामप्रयोग उचितः । नापि दानं संसृष्टित्वात् । भेदस्तु न घटत इति पूर्वमेवोक्तमित्यभिप्रायेणाह—**स तु प्रकाशदण्ड इति** । विधेयप्राधान्यात्पुंलिङ्गता । स । प्रतिविधानमित्यर्थ. । प्रतिविधानशब्दाभिप्रायेण वा स इति पुंस्त्वम् । 'उद्देश्यप्रतिनिर्देश्ययोरेकत्वमापादयन्ति सर्वनामानि तत्तल्लिङ्गमुपपादयन्ति कामचारे' इति शाब्दिकोक्ते सरोधनान्वयित्वेऽपि पुंलिङ्गत्वम् । प्रकाशदण्डस्तूष्णींदण्डश्च पूर्वमेव व्याख्यातौ । सरोधनं कारागृहबन्धनम् । अपसारणं नगरान्निर्वासनम् । तत्र तेषु प्रकाशदण्डादिषु चतुर्षु प्रकाशं प्रकाशदण्डमभिन्नसबन्धाः समानस्वस्वामितादिसंबन्धा कथं तितिक्षेरन्कथं सहेरन् । 'तिजे. क्षमायाम्' इति सन् ।

संरोधने त्वभिभवाद्विहिते तदैक-
मत्यात्खरप्रभृतयश्च तथा विकुर्युः ।
निर्वास्यमानमपि तं परिवारयेयु-
स्तस्मात्खरप्रभृतयः पुर एव चिन्त्याः ॥ ८ ॥

शूर्पणखा—अहो[1] अनुजीवित्तणस्स गुरुअदा, जं रावणस्स खरप्पमुहाणं अ तुल्ले अण्णोण्णसंबन्धे एव्वं मादामहो चिन्तेदि ।

---

१. अहो अनुजीवित्वस्य गुरुकता, यद्रावणस्य खरप्रमुखानां च तुल्येऽन्योन्यसंबन्ध एवं मातामहश्चिन्तयति ।

तूष्णींदण्डोऽपि प्राज्ञैरूहापोहकुशलैरनुमीयमानो लिङ्गेन ज्ञायमान सन्प्रकृतीनाममात्यादीना कोपको मन प्रज्वलनहेतु । 'तत्प्रयोजक –' इति भाष्यसूत्रथो प्रयोगात् 'तृजकाभ्या कर्तरि' इति समासनिषेधस्यानित्यत्वात्प्रकृतिकोपक इति षष्ठीसमास साधु । शेषषष्ठ्या वा समास । रामेऽभियोक्तरि सति सेनयाभियाते सति दुरन्तः स्यादप्रतिविधेय स्यात् । 'अन्तोऽस्त्री निश्चये नाशे सुरूपेऽग्रेऽन्तिकेऽन्तरे' इति रत्नमाला । अत्र लिङ्गाद्यूहनोक्तेऽनुमान नाम सध्यङ्गमुक्तम् । यथोक्तम्—'लिङ्गाभ्यूहनमनुमानम्' इति । **संरोधन इति** । सरोधने विहिते सति त्वभिभवाद्धेतोरिदं विकुर्युरित्यत्रान्वेति । तत्र हेतु —पदैकमत्यादिति । तेन विभीषणेन सहाभिन्नमतत्वात्खरप्रभृतयोऽपि विकुर्यु क्रोधादिरूपा विकृतिं प्रामुयु । अतस्तन्न युक्तमिति भाव. । किच खरप्रभृतयो निर्वास्यमानं नगरान्निष्कास्यमानं त विभीषणं परिवारयेयुर्मध्ये कुर्यु । अतस्तन्निर्वासनमपि न् युक्तमिति भाव । अत. खरादीना प्रकाशदण्डादिचतुष्टयपरिपन्थित्वात्तत एव पुरतश्चिन्त्या इत्याह—तस्मादिति । पुर एव पूर्वमेव चिन्त्या । भयस्थानत्वेन शङ्कनीया इत्यर्थ ॥ ८ ॥ तत्र खरादिविषये रामस्योपयोग. । चिकीर्षितकार्यहेतुत्वं स्यादिति शेष । केनचिदपदेशेन खरादिषु रामेण व्यापादितेषु विभीषणस्यापसारणादिकं सुशङ्कमिति प्रथममस्माभिरुपायतो रामेण खरप्रभृतयो घातयितव्या इति रामस्यास्मच्चिकीर्षितोपयोग इति भाव । अत्र खरप्रभृतीष्टजनातिसधानादतिबलं नाम सध्यङ्गमुक्तम् । यथोक्तम्—'इष्टजनातिसधानमतिबलम्' इति ॥ अनुजीवित्वस्यामात्यभावेन रावणापेक्षजीविकाया· । गुर्वेव गुरुकम् । यद्वा कुत्सितं गुरुकम् । 'कुत्सिते' इति कन् । बन्धुषु वैषम्यप्रयोजकत्वात्कुत्सितत्वम् । गुरुकस्य भावो गुरुकता । अहो । विस्मयनीयेत्यर्थ । तुल्येऽन्योन्यसबन्धे । त्वयेति शेष । मातामहदौहित्रादिसबन्धे समाने सतीत्यर्थ । एवं छद्मना खरादिवधं मातामहश्चिन्तयति । त्वं चिन्तयसीत्यर्थः ॥ कुलपुत्रकाणा सदृशजातानामत्यन्तबालानामप्याचारोऽनुष्ठानमीदृश खलु । स्वामिकार्यैकतत्पर इति प्रसिद्धमित्यर्थ. ॥ खरप्रमुखैर्विना । तेषामभावे विभीषणस्य क कर्तव्याध्यवसाय इत्यर्थ. ॥ प्राज्ञ खलूहापोहकुशलः किलासौ विभीषण· स्वयमेवावेक्षितविकारोऽनुमितास्मद्विरुद्धाभिप्राय. सन्नपसर्पेत् ।

माल्यवान्—ईदृशः खलु कुलपुत्रकाचारः ।

शूर्पणखा—विणा खरप्पमुहेहिं विभीसणस्स का पडिवत्ती[1] ।

माल्यवान्—प्राज्ञः खल्वसाववेक्षितविकारः स्वयमेवापसर्पेत्, उपेक्षणीयस्त्वमस्माभिः । न चैवं मन्तव्यमौरसाद्भयमिति । यतः ।

बाल्यात्प्रभृत्येव निरूढसख्यं
सुग्रीवमेष ध्रुवमाश्रयेत ।
वालिप्रसादीकृतभूमिभागे
कुमारभुक्तौ स्थितमृष्यमूके ॥ ९ ॥

तत्रस्थो वालिना घानिष्यते । रामोपाश्रयेण वा रामोपश्लेषेण वा नोपेक्षेत वाली ।

---

१. विना खरप्रमुखैर्विभीषणस्य का प्रतिपत्तिः ।

नगरादिति शेष । उपेक्षणीयस्त्वस्माभि । तुशब्द पक्षान्तरद्योतक । अथवास्माभिरुपेक्षणीय । नानुग्राह्यो न निग्राह्यश्चेत्यर्थ. । न चैवं मन्तव्यमौरसाद्भयमिति । स्वयमवेक्षितास्मद्विकारतयापसर्पतोऽप्यस्मादौरसाद्बन्धुभूतादेकाकिनो विभीषणाद्भयमकिंचित्करमिति च मन्तव्यमेवेत्यर्थ । तत्र हेतुमाह—**यत इति । बाल्यादिति ।** एष विभीषणो बाल्यात्प्रभृति बाल्यादारभ्य निरूढसख्यं प्रवृद्धमैत्रीकं वालिना प्रसादीकृतेऽनुग्रहत्वेन दत्ते भूमिभागे भूमेरेकदेशे । कुमारैर्भुज्यत इति कुमारभुक्ति । भुजेः कर्मणि क्तिन् । कुमारभुक्तिर्नाम कुमाराणा राजभि कल्पिता वृत्ति· सुग्रीवस्य वालिन प्रत्यनुजत्वात् 'ज्येष्ठभ्राता पितृसम' इति न्यायेन सुग्रीवस्य तं प्रति कुमारत्वात्तद्दत्तभूभागस्य कुमारभुक्तित्वोक्ति । धावनं व्याजमात्रं प्रसादेनैव वाली सुग्रीवस्यर्श्यमूकमनुमन्यत इति हृदयम् । ऋष्यमूके स्थितं सुग्रीवमाश्रयेत । संभावनाया लिङ् । ध्रुवमित्यपि सभावनायाम् । ज्येष्ठभ्रात्रा विरोधस्योभयोरविशिष्टत्वाच्च सुग्रीवाश्रयण सभावितमित्यर्थ. ॥ ९ ॥ एवमपि नास्माकं क्षतिरित्याह—तत्रस्थो वालिना घानिष्यते । चिण्वद्भावाद्वृद्धि । दुर्बलमिमं सुग्रीवमिवोपेक्षेत वालीत्यत्राह—**रामेति** । रामो हृतभार्य. कदाचिदेकाकी मैथ्या तत्रागच्छेत्, तं च सुग्रीव. समाश्रयेत्, विभीषणो वा साक्षादाश्रयेत् । ततश्च प्रबल रामं प्रति संधाय प्रागेव वाली विभीषणं सुग्रीवेण सह हन्यात्स्वमित्ररावणारित्वात्, स्वशत्रुसुग्रीवमित्रत्वात्, स्वमित्ररावणशत्रुराममित्रत्वाच्चेति भाव । रामोपाश्रयेण साक्षादेव रामाश्रयणेन रामोपश्लेषेण सुग्रीवद्वारा तदाश्रयणेन हेतुना नोपेक्षेत । उपेक्षितुं नार्हति । तमिति शेषः ॥ एवं माल्यवता स्वपक्षप्रभवं भयमाशङ्क्य परिहृतम् । तत्र शूर्पणखा प्रकारान्तरेण शङ्कते—अथेति पक्षान्तरप्रस्तावे । व्यापादयति हन्ति । 'व्यापादो द्रोहचिन्तनम्' इत्यमर । 'द्रुह जिघासायाम्' इति धातुपाठः । परशुराममिवेत्यनेन शङ्काबीजमुप-

शूर्पणखा—[1]अह परसुरामं विअ राहवो जणिअविरोहं वालिणं वावादेदि, तदो रामविभीसणसंओओ अणत्थो त्ति सभावेमि ।

माल्यवान्—ननु वत्से,

यो वालिनं हन्ति हता वयं च
तेन ध्रुवं तत्र तु सर्वनाशे ।
एकः स जीव्यात्कुलतन्तुरस्तौ
रामः श्रियं धर्ममयो ददातु ॥ १० ॥

शूर्पणखा—(सास्रम् ।) एव्वं वि दाव होदु ।

माल्यवान्—गम्यतामिदानीं यत्र प्रेषितासि । सुकरं चैतत्प्रयोजनं यदि जनकदशरथान्तिके वसिष्ठविश्वामित्रौ न स्याताम् । अहमपि लङ्कामेव गच्छामि ।

---

१ अथ परशुराममिव राघवो जनितविरोध वालिनं व्यापादयति तदा रामविभीषणसयोगोऽनर्थ इति संभावयामि ।

२. एवमपि तावद्भवतु ।

न्यस्तम् । रामो वालिनं जेष्यति । वालिनोऽधिकपरशुरामजिष्णुत्वादिति च तद्बीजम् । एवं परशुरामो वालिनोऽधिको रावणजेतृतया वालितुल्यकार्तवीर्यजेतृत्वादिति च शङ्काङ्गशङ्कान्तरमित्यभिप्रेतम् । राघव इति स्वाभिप्रायशरणागतरक्षणव्रततया प्रसिद्धरघुवंशप्रभवो राम शरणागतौ विभीषणसुग्रीवावपेक्ष्य वालिनं हनिष्यतीत्यभिप्रायेण राघव इत्युक्तम् । अत्राप्यनुमान नाम सध्यङ्गमुक्तम् ॥ **य इति** । यो वालिनं हन्ति तेन वयं च हता· । भवाम इति शेष । ध्रुवमिति संभावनायाम् । अत्र यो हन्ति तेन हता इति सामान्योक्त्या रामो रावणादीनस्मान्हनिष्यति रावणजेतृवालिहन्तृत्वादित्यनुमानं विवक्षितम् । तेन रामेण सर्वनाशे सर्वेषा रावणादीना वधे सति सर्वेषां नाश इति शेषषष्ठया समास· । 'कर्मणि च' इत्युभयप्राप्तौ षष्ठ्या समासनिषेधात् । कुलतन्तुर्नष्टस्य वृद्धिहेतुः सूक्ष्माश एक स विभीषणो जीव्यात्सप्राणो भूयात् । आशिषि लिङ् । अस्तौ विभीषणाय धर्ममयो धर्मप्रचुरो राम श्रियं लङ्कैश्वर्यं ददातु । आशिषि लोट् । अत्र तत्त्वार्थानुकीर्तनान्मार्गो नाम संध्यङ्गमुक्तम् । यथोक्तम्—'तत्त्वार्थानुकीर्तनं मार्ग' इति ॥ १० ॥ एवमपि तावद्भवतु । अपिशब्दोऽनुकल्पत्वद्योतकः । रावणमृतिर्मुख्य· कल्प· तदलाभेऽपि विभीषणामृतिरनुकल्पोऽप्याशास्यत इत्यर्थः ॥ यत्र प्रेषितासि । मिथिलायामिति शेषः । सुकरं सुखेन कर्तु शक्यमेतत्प्रयोजनं मन्थराशरीरावेशादिकम् । यदि जनकेत्यादि । यदि न स्याता तदा सुकरमिति संबन्ध· । अनेन चोत्तराङ्के प्रवेशता जनकादीना चतुर्णा मध्ये वसिष्ठविश्वामित्रयोर्नि-

शूर्पणखा—हा अम्ब, तुएवि दुक्खं पेक्खिदव्वम् ।

माल्यवान्—

हा वत्साः खरदूषणत्रिशिरसो वध्याः स्थ पापस्य मे
हा हा वत्सविभीषण त्वमपि मे कार्येण हेयः स्थितेः ।
हा मद्वत्सल वत्स रावण महत्पश्यामि ते संकटं
वत्से केकसि हा हतासि नचिरात्त्रीन्पुत्रकान्द्रक्ष्यसि ॥ ११ ॥

(इति निष्क्रान्तौ)

मिश्रविष्कम्भः ।

(तत. प्रविशतो वसिष्ठविश्वामित्राभ्यां सह दशरथजनकौ ।)

(राजानावन्योन्यं परिष्वज्य ।)

जनकः—राजन्, दिष्ट्या वर्धसे यदीदृशस्ते वत्सो रामभद्रः ।

---

१ हा अम्ब, त्वयापि दुःख प्रेक्षितव्यम् ।

र्गम· सूचित । अत्राङ्कास्यमुक्तमिति द्रष्टव्यम् ॥ **हा अम्बेति** । दु खं प्रेक्षितव्यम् । विभीषणमात्रपरिशेषस्य भाविलादिति भाव· ॥ **हा वत्सा इति** । हे वत्सा खरदूषणप्रभृतय । यूयमित्यध्याहार । पापस्य बन्धुवधप्रयोजककुटिलनयनिष्णाततायाहेतुदुरितप्रचुरस्य मे मया । 'कृत्यानां कर्तरि वा' इति षष्ठी । वध्या हन्तव्या· स्थ भवथ । अस्तेर्मध्यमपुरुषबहुवचनम् । हा दु ख्यते । 'हा विषादशुगर्तिषु' इत्यमर । वत्स विभीषण, त्वमपि कार्येण रावणकार्येण मे पापेन मया स्थिते स्थानात् । 'स्थानमर्यादयो. स्थिति.' इति रत्नमाला । हेयस्त्याज्यः । भवसीति शेष. । हा हा इति द्विरुक्तिर्विषादातिशये । मयि वत्सल प्रीतिमन् । 'वत्सांसाभ्यां कामबले' इति वृत्तिविषये प्रीतिवाचकाद्वत्सशब्दान्मत्वर्थीयो लच्प्रत्यय । वत्स । दौहित्रत्वाद्वत्सशब्द. । ते महत्सकटं दु खसबाधम् । 'सकटं ना तु सबाध.' इत्यमरः । पश्यामि न्यायदृष्ट्या निश्चिनोमि । वत्से, ज्येष्ठभ्रातु पुत्रि । केकसीति रावणमातुर्नाम । हतासि । 'पुत्रोत्पत्तिविपत्तिभ्यां न पर सुखदु खयो ' इति प्रसिद्धिरिति भावः । हा दु.ख्यसे नचिराच्छीघ्रमेव त्रीन्पुत्रकान्खरकुम्भकर्णरावणान् । खर· केकस्याः खसृपुत्रः । अनुकम्पाया कन् । द्रक्ष्यसि । रामेण हतान्प्रेत्य त्वत्समीपगमनादिति भाव ॥ ११ ॥ **मिश्रविष्कम्भः** । सस्कृतप्राकृतात्मकविष्कम्भ· ॥ अथाङ्क. प्रस्तूयते—**ततः प्रविशत इत्यादिना** । राजानौ जनकदशरथौ । परिष्वज्यालिङ्ग्य । दिष्ट्येत्यानन्दे । वर्धसे श्रेयस्वी भवसि । पुत्रविषयाज्जामातृविषयाच्च श्रेयस्त्वम् । ईदृश. परशुरामस्यापि विनेता ते वत्स । जामातुरपि पुत्रप्रायत्वाज्जनकं प्रति वत्सत्वम् । जामाता हि श्वशुरस्य शिष्यत्वात्पुत्रस्थानीयः । तदाह भागवते दक्ष.—'एष मे शिष्यता प्राप्तो यन्मे दुहितुरग्रहीत् । पाणि विप्राग्निमु-

अप्राकृतानि च गुणैश्च निरन्तराणि
लोकोत्तराणि च फलैश्च महोदयानि ।
वीरस्य तस्य महतश्चरिताद्भुतानि
नासाकमेव जगतामपि मङ्गलानि ॥ १२ ॥

वसिष्ठः—(विश्वामित्रं परिष्वज्य ।) सखे कुशिकनन्दन,
अस्माभिरप्यनाशास्यो रामस्य महिमान्वयः ।
यत्कृतास्तेन कृतिनो वयं च भुवनानि च ॥ १३ ॥

विश्वामित्रः—प्रकृष्टपुण्यपरिपाकोपादान एष महिमा । के वयमेतावतः प्रकृष्टस्य ।

दशरथः—भगवन् कुशिकनन्दन, मा मैवम् ।
आदित्याः कुलदेवतामिव नृपाः पूर्वे दिलीपादय-
स्तेजोराशिमरुन्धतीपतिमृषिं भक्त्या यदाराधयन् ।

खत· सावित्र्या इव साधुवत् ॥' इति । **अप्राकृतानीति** । अप्राकृतानि दिव्यानि गुणैर्ज्ञानादिभि शौर्यादिभिर्विनयादिभिः सौन्दर्यादिभिश्च निरन्तराणि निबिडानि लोकोत्तराणि सर्वाभ्यर्हितानि फलैश्च महोदयानि महाफलजनकानि सप्रत्यासंनिकर्षोत्तरेत्युक्तम् । चरिताद्भुतानि चरितरूपाण्याश्चर्याण्यस्माकमेवावयोरेव मङ्गलानि भवन्तीति न । किंतु जगतामपि मङ्गलानि भवन्तीत्यर्थ । अगर्हितेष्टार्थसिद्धिर्मङ्गलम् ॥ १२ ॥ **अस्माभिरिति** । अस्माभि· । आवाभ्यामित्यर्थ । रामस्य महिमान्वयो महिम्नो विभूतिगुणाद्यतिशयस्यान्वय सबन्धोऽनाशास्य । कुत इत्यत्राह—यदिति । तेन रामेण वयं कृतिन· कृताः कृतार्था कृता, गुरुत्वलक्षणेन स्वसंबन्धेन परमपुरुषार्थभागिन· कृता, भुवनानि च कृतार्थानि कृतानि । कृतिन इत्यादेरनुषक्तस्य लिङ्गविपरिणाम । तदधीनाभ्युदयाभ्यामावाभ्यां न तदभ्युदय आशासनीयः, एवमन्येषामपि तदधीनाभ्युदयत्वेन तदभ्युदयकारकत्वं न सभवतीत्यर्थ· ॥ १३ ॥ एष महिमा रामस्य महिमा प्रकृष्टोऽतिशयित· पुण्यपरिपाक पुण्यस्य फलप्रदानोन्मुखीभाव उपादानं कारणं यस्य स तथोक्त । भवतीति शेष । 'पुण्यानामपि पुण्योऽसौ' इत्युक्ते स्वयमेव राम प्रकृष्टपुण्यात्मक । ततोऽनन्याधीनोऽयं रामस्य महिमेति भाव । एतावत परशुरामविजयपर्यन्तस्य प्रकृष्टस्यातिशयस्य के वयम् । आशासनेन निष्पादयितुमशक्ता इत्यर्थ· ॥ मा मैवम् । के वयमिति वक्तुं नोचितमित्यर्थ । **आदित्या इति** । मङ्गलानां निधिर्भवान्न प्रसन्न इति यदस्मासु कृतानुग्रह इति यत्, अयमेव पाक इति योजना । आदित्या सूर्यवंश्याः । 'दित्यदित्यादित्य–' इत्यादिनादित्यशब्दादपत्यार्थे ण्यप्रत्यये 'हलो यमा यमि–' इति यकारलोप· । पूर्वे मत्त· प्राचीना दिलीपादयो नृपा । कुलदेवतामिव श्रीरङ्गनाथमिव

पाकस्तस्य च याश्च भूरितपसां सत्याशिषामाशिष-
स्तासामप्ययमेव मङ्गलनिधिर्यन्नः प्रसन्नो भवान् ॥ १४ ॥

वसिष्ठः—सत्यमीदृशो विश्वामित्रः ।

यद्वाचां विषयमतीत्य चेतसां वा
पर्यायात्परमतिशायनस्य वा यत् ।
ब्रह्मर्षौ तदिह दुरासदे समिद्धं
तेजोभिर्ज्वलति महत्त्वमप्रमेयम् ॥ १५ ॥

विश्वामित्रः—भगवन् मैत्रावरुण,

तेजोराशिं प्रभावनिधिमृषिं सत्यवचसम् । 'मुख्यस्य निर्विशेषेण शब्दोऽन्येषा विशेषत' इति न्यायेन मुख्यमृषिभूतमरुन्धतीपतिम् 'निधिरपि पवित्रस्य महस' इत्युक्ताया अरुन्धत्या पतिं वसिष्ठ भक्त्याराध्यत्वज्ञानेनाराधयन्नपूजयन् । अत्र 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इति श्रुतिरनुसहिता । इति यत्तस्य च भूरितपसा प्रचुरतपसा सत्याशिषाममोघाशासनाना या आशिष सन्ति तासामपि पाकफलप्रदानोन्मुखीभाव । भवतीति शेष । विधेयप्राधान्यादयमित्युद्देश्यवाचकस्य पुंलिङ्गत्वम् ॥ १४ ॥ ईदृश । दशरथोक्तमाहात्म्ययुक्त इत्यर्थ । **यद्वाचामित्यादि।** यन्महत्त्व वाचा चेतसा वा गिरा मनसश्च । 'वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये' इत्यमर· । विषयं देशम् । 'देशविषयौ' इति चामर । अतीत्यातिक्रम्य । 'परावरयोगे च' इति क्त्वाप्रत्यय । 'समासे नञ्पूर्वे क्त्वो ल्यम्' इति ल्यबादेश । वाङ्मनसागोचर इत्यर्थ· । यन्महत्त्वमतिशायनस्य विश्वाधिकस्य प्रकर्षस्य । अतिपूर्वाच्छेतेर्भावे ल्युट् । 'अतिशायने तमबिष्ठनौ' इति सूत्रेऽतिङ्ग्रायन इति निपातनाद्दीर्घ । पर्यायादतिशयात् । 'पर्यायोऽवसरे क्रमे' इत्यमर· । क्रमवाचिना पर्यायशब्देनातिशायनार्थशब्दान्तरवाच्योऽतिशयो गृह्यते । तथा च विश्वावधिकप्रकर्षावधिकप्रकर्षादित्यर्थ । परम् । अतिशयितमित्यर्थ· । विश्वावधिकप्रकर्षो यस्तदवधिकोऽपि यः प्रकर्षस्तदवधिकप्रकर्षयुक्तं च यद्भवतीति भाव । 'यद्वाचाम्' इत्यादिना प्रमाणाधिकत्वमुक्तम् । तत्र वाङ्मनसयो· सकुचितत्वविषयत्वस्वाभाव्यात्प्राप्तस्य सकोचस्य व्युदासेऽपि प्रमेयस्य स्वत सकोच· सभाव्येत । अत प्रमेयस्वाभाव्यादपि सकोचो नास्तीति बोधनाय पर्यायात्परमित्यादि प्रकर्षस्यात्यन्तनिरवधिकत्वविवक्षया चोत्तरोत्तरावधिनिर्देश । तत्तेजोभि प्रभावै । 'तेज प्रभावे दीप्तौ च' इत्यमर । समिद्धं सम्यग्दीप्तम् । 'इन्धी दीप्तौ' इत्यस्मात् 'गत्यर्थ–' इत्यादिना कर्तरि क्तो नकारलोपश्च । अप्रमेयमपरिच्छेद्यम् । अत्र पर्यायात्परमित्यन्वयोक्ति । अप्रमेयमिति व्यतिरेकोक्ति· । अतो न पुनरुक्ति । अनेन च महत्त्वस्य प्रायिकत्वव्युदासो दुरासदो माहात्म्यातिशयात् । अस्माभिरपि समीपमासादयितुमशक्ते ब्रह्मर्षौ स्वतपसा प्राप्तमहर्षित्वयुक्ते विश्वामित्रे महत्त्वमुत्कर्षो ज्वलति दीप्यते । 'ज्वल दीप्तौ' ॥१५॥ मित्रावरुणयोरयं मैत्रावरुणः । 'तस्येदम्' इति सबन्धसामान्येऽण्प्रत्यय· । वसिष्ठस्य

सनत्कुमाराङ्गिरसोर्गुरुर्विद्यातपोमयः ।
स्तौषि चेत्स्तुत्य एवासि सत्यशुद्धा हि ते गिरः ॥ १६ ॥
रामभद्रे तु नाश्चर्यमेतत् । महाराजदशरथो हि तस्य जनयिता ।
साक्षात्पुण्यसमुच्छ्राया इव मनोर्वैवस्वतस्यान्वये
राजानस्त्वदपेक्षितेन विधिना गोपायितारः प्रजाः ।
ये भूताः प्रथमे पवित्रचरितास्तेषामय धूर्धरो
वीरः क्षत्रियपुंगवो गुणनिधिः श्लाघ्यो धरित्र्याः पतिः ॥ १७ ॥

सबुद्धि. । **सनत्कुमारेति** । सनत्कुमाराङ्गिरसो स्वज्येष्ठभ्रात्रोरपि सनत्कुमाराङ्गिरसोर्गुरुराचार्यो विद्ययाध्यात्मविद्यया तपसा कायशोषणनियमेन ब्रह्मभावनानिष्ठस्य सनत्कुमारस्य विद्योपदेष्टा । कर्मभावनानिष्ठस्याङ्गिरसस्तपसामुपदेष्टेति भाव । त्वमिति शेष । एवविधस्त्वं मा स्तौषि चेद्गुणवन्तं कथयसि चेत्स्तुत्य एवास्म्यभिधेयगुणवानेवासि । हि यस्मात्ते गिरः सत्या अमोघा स्वविषयसद्भावौपयिकाः शुद्धा. पूता ज्ञाताशेष्वयाथार्थ्यरहिताः । खञ्जकुब्जादिवत्समास । भवन्तीति शेष । गुणनिष्टगुणाभिधानं हि स्तुतिः । सा यद्यपि गुणशून्ये मयि न घटते, तथापि स्तावकस्य तव सूक्तेरमोघतया मम ब्रह्मर्षित्ववन्माहात्म्यरूपेणाप्यतएव निष्पद्यत इति स्तुत्यत्वमुपपद्यत इति भाव. । अत्र च देवद्भूते. प्रचेतसा च स्वस्वपुत्र कपिलादिक प्रतीव सनत्कुमाराङ्गिरसोरपि स्वानुजं वसिष्ठ प्रत्युपपन्नं शिष्यत्वम् । तदिदं पुराणेष्वनुसधेयम् । अतएव 'न च हि वयो जाति प्रकृष्टानाम्' इत्येतदन्यविषयं व्यवस्थाप्यम् ॥ १६ ॥ रामभद्रमाहात्म्यं न मत्प्रयुक्त भवद्वचनेनेदानीमेव माहात्म्यनिष्पत्ते , किंतु पितुर्दशरथस्य संबन्धप्रयुक्तमित्याह—**रामभद्रे त्विति** । एतन्माहात्म्यं नाश्चर्यं नापूर्वम् । 'आश्चर्यमनित्ये' इति सूत्रेणापूर्ववस्तुन्याश्चर्यशब्दो निपातित. । हि यस्माद्दशरथोऽस्य जनयिता पिता । भवतीति शेष. । अतः पितृप्रभावादिद रामभाहात्म्यं नापूर्वमित्यर्थ । **साक्षादिति** । साक्षात्पुण्यसमुच्छ्राया इव प्रत्यक्षतापन्नसुकृतराशय इति संभावनार्हाः । इवशब्द सभावनायाम् । तदुक्तम्—'यदायमुपक्रमाशो लोकतोऽसिद्धिमृच्छति । तदोत्प्रेक्षैव येनेवशब्दसंभावनापरः ॥' इति । उपमानपुण्यसमुच्छ्राणा स्वरूपेण लोकप्रसिद्धानामपि प्रत्यक्षतापन्नत्वेन लोकेष्वसिद्धत्वादुत्प्रेक्षालकार. । 'कर्तरि क्रियातादात्म्यसंभावनोत्प्रेक्षा' इति केचिदालकारिकाः प्राहुः । अत्र पुण्यकर्तृषु पुण्यतादात्म्योत्प्रेक्षेयम् । त्वदपेक्षितेन त्वदिष्टेन । 'अवेक्षितेन' इति पाठे त्वया दृष्टेनेत्यर्थः । विधिना शास्त्रोक्तविधानेन प्रजा जनान्गोपायितारो रक्षितार. । प्रजारक्षणशीला इत्यर्थ । 'गुपू रक्षणे' इत्यस्मात्तच्छीलिकस्तृन्प्रत्ययः । अत एव 'न लोक–' इत्यादिना षष्ठीनिषेधात्प्रजा इति कर्मणि द्वितीया । पवित्राणि स्मरणादिना लोकपावनानि चरितान्यनुष्ठानानि येषा ते तथोक्ता. । प्रथमे पूर्वे । 'प्रथमचरम–' इत्यादिना प्रथमशब्दस्य सर्वनामसज्ञाया जसः शीभावात्प्रथमाबहुवचनान्तमिदम् । ये राजानो वैवस्वतस्य विवस्वदपत्यस्य मनो-

अपि च ।

अरिष्टस्त्वाष्ट्रस्य प्रशमनविधौ जम्भदमनः
स विश्वेषामीशः पतिरपि निकायस्य मरुताम् ।
विनेतारं सेनां सततमपहन्तारमसुरा-
नमुं वीरं वव्रे बहुषु समनीकेषु मघवा ॥ १८ ॥

सोऽयमीदृशः कथमनीदृशं प्रसूते । कथमत्राश्चर्यं नाम ।

मरुत्वन्तं देवं य इह भगवन्तं विजयते
विजिग्ये तं राजा युधि दशमुखं हैहयपतिः ।

न्वये वंशे भूता जाता. अभवन्निति शेष । तेषा धूर्धरस्तद्वाह्यभारवोढा तेषा श्रेष्ठो वा वीरः क्षत्रियपुगव । क्षत्रियश्रेष्ठ इत्यर्थ । 'स्युरुत्तरपदे व्याघ्रपुगवर्षभकुञ्जरा. । सिंहशार्दूलनागाद्या पुंसि श्रेष्ठार्थगोचरा ।' इत्यमर । धरित्र्या अयं श्लाघ्यः पतिर्दशरथो गुणाना राममाहात्म्यहेतुगुणाना निधिरक्षयस्थानविशेष । भवतीति शेष ॥१७॥ **अरिष्ट इति** । स प्रसिद्धो मघवेन्द्र । 'श्वनुक्षन्–' इत्यादिना मघवच्छब्दो निपातित· । जम्भदमन सन्नपि जम्भासुरहन्ता सन्नपि, त्वाष्ट्रस्य देवशिल्पिन. पुत्रस्य प्रशमनविधौ हननक्रियायामरिष्ट सन्नप्यशुभरहित सन्नपि । 'रिष्टं क्षेमाऽशुभाभावे' इत्यमर । विश्वेषामीशोऽपि त्रैलोक्याधिपति सन्नपि, मरुतां देवाना सन्नमरुतां वा । 'मरुतौ पवनामरौ' इत्यमरः । निकायस्य समूहस्य । 'स्यान्निकायः पुञ्जराशौ' इत्यमरः । पति· सन्नपि । मध्यमणिन्यायेनायमप्युभयत्रान्वेति । सेना विनेतारं व्यूहादिक्रियासु सेनाशिक्षणशीलमसुरानपहन्तारमसुरवधशीलम् । सततमित्युभयान्वयि । तृन्नन्तयोगात्सेनासुरशब्दाभ्या द्वितीया । वीरमसुं दशरथं बहुषु समनीकेषु युद्धेषु वव्रे वृतवान् । 'वृञ् वरणे' इत्यस्मात्कर्तरि लिट् । 'स्वरितञित –' इत्यादिनात्मनेपदम् । सहायत्वेनेति शेष ॥ १८ ॥ **स इति** । ईदृश इन्द्रेण वरणीयो दशरथोऽनीदृशं रामं विसदृशं कथं प्रसूते जनयति । ईदृशशब्दोऽयं परशुरामविजयिनं राम परामृशति । 'पितुः शतगुण. पुत्र' इति न्यायेनायं दशरथो महेन्द्रसहायात्तस्माच्छतगुणं पुत्रमजनयदिवेति भाव । कथमत्राश्चर्यं नामेति । अत्र रामे कथ नामाश्चर्यम् । तादृशात्पितु शतगुणस्य न्याय्यत्वान्नेदमपूर्वमिति भाव· । यत एवं तत सर्वमनेन जितमिति निगमयति—**मरुत्वन्तमित्यादिना** । यो दशमुख इह भुवने भगवन्त माहात्म्यवन्तं वीर्यातिशयवन्त वा । 'भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु' इत्यमर । देव विजिगीषुं दीप्तिमन्तं वा मरुत्वन्तमिन्द्रम् । 'इन्द्रो मरुत्वान्मघवा' इत्यमर । विजयते । अभिभवतीत्यर्थ । 'जि अभिभवे' अभिभवो न्यूनीकरणम् । 'विपराभ्या–' इत्यात्मनेपदम् । अद्यापि रावणेनेन्द्राभिभवनस्य वर्तमानत्वाल्लट. प्रयोग. । त दशमुखं हैहयाना हैहयदेशराजाना पतिः स्वामी राजा कार्तवीर्योऽर्जुनो युधि युद्धे । 'समित्याजिसमि-

निहन्तारं तस्य प्रथितमहिमानं त्रिभुवने
महावीरं जित्वा किमिव तव वत्सेन न जितम् ॥ १९ ॥

दशरथः—तत्किमित्यद्य द्विधा विभज्यते लोकः ।

विश्वामित्रः—एष वत्सो रामभद्रः सजामदग्न्य इत एवाभिवर्तते । य एषः

वीरश्रिया च विनयेन च शोभमानो
मान्ये मुनाववनतश्च गुणोन्नतश्च ।
लज्जां वहन्भृगुपतौ हृतवीरदर्पे
शिष्यो गुराविव कृतप्रथमापचारः ॥ २० ॥

(ततः प्रविशतो रामजामदग्न्यौ ।)

रामः—

यद्ब्रह्मवादिभिरुपासितवन्द्यपादे
विद्यातपोव्रतनिधौ तपता वरिष्ठे ।

द्युधः' इत्यमरः । विजिग्येऽभिभूतवान् । 'सन्लिटोर्जे' इति कुत्वम् । कार्तवीर्यस्यातीतत्वाल्लिट प्रयोग । तस्य कार्तवीर्यस्य निहन्तार प्रथितमहिमानमेकविंशतिकृत्वः सर्वक्षत्रियविध्वंसनेन प्रख्यातमाहात्म्यम् । त्रयाणा भुवनाना समाहारस्त्रिभुवनम् । पात्रादित्वात्स्त्रीत्वाभावः । तस्मिन् । निर्धारणे सप्तमी । महावीर त्रिभुवनान्तर्गतत्वेऽपि त्रिभुवनोत्तीर्णवीर्यातिशययुक्तम् । यद्वाधिकरणे सप्तमी । त्रिभुवने प्रथितमहिमानमित्यन्वयः । परशुरामामित्यर्थ । जित्वा । स्थितेनेति शेषः । तव वत्सेन । रामेणेत्यर्थ । किमिव न जितम् । किमिति क्षेपे । सर्वमेव जेतव्यं जितमित्यर्थ । सामान्ये क्लीबम् । व्यतिरेकोक्ति प्रामादिकलनिवृत्त्यर्था । इवशब्दो वाक्यालंकारे । अत्राप्यनुमान नाम सध्यङ्गमुक्तम् ॥ १९ ॥ **तत्किमित्यादि** । अद्य लोको जन । समष्टावेकवचनम् । द्विधा विभज्यते द्वेधा भिद्यत इति यत्, तत्किम् । केन हेतुनेत्यर्थ. ॥ **एष इति** । अभिवर्तत आगच्छति । अतस्तयोर्मार्गप्रदानाय जनसघातो द्विधा भिद्यत इत्यर्थ । य एष । योऽयं राम इत्यर्थ । **वीरश्रियेति** । वीरश्रिया वीरपुरुषधर्मशौर्यादिसमृद्ध्या विनयेनानौद्धत्यावहत्योत्कर्षानुसधानेन शोभमानो मान्ये पूज्ये मुनौ परशुरामेऽवनत. प्रह्नो गुणैः सौहार्दादिभिरुन्नत उत्कृष्ट. । चकारचतुष्टय तत्तद्गुणसमुच्चयार्थम् । गुरौ कृतप्रथमापचार. कृतपूर्वानुचितव्यापार शिष्यो गुराविव हृतवीरदर्पे नाशितशौर्यादिप्रयुक्तगर्वे भृगुपतौ लज्जा वहन्नकृत्यानुष्ठानबुद्धिप्रयुक्तहृदयसकोचं वहन्सन्नभिवर्तत इत्यनुषङ्गः ॥ २० ॥ **यदित्यादि** । भगवन्माहात्म्यनिधे, ब्रह्मवादिभिर्वेदान्तवेद्यपरमात्मापदेशशीलै. । ब्रह्मवादिनो हि सर्वोत्कृष्टास्तथाविधैरुपासिता केचित्तैरपि वन्द्यौ पादौ

दैवात्कृतस्त्वयि मया विनयापचार-
स्तत्र प्रसीद भगवन्नयमञ्जलिस्ते ॥ २१ ॥

जामदग्न्यः—अपराद्धं किं त्वया जामदग्न्यस्य । ननूपकृतम् ।

पुण्या ब्राह्मणजातिरन्वयगुणः श्लाघ्यं चरित्रं च मे
येनैकेन हृतान्यमूनि हरता चैतन्यमात्रामपि ।
एकः सन्नपि भूरिदोषगहनः सोऽयं त्वया प्रेयसा
वत्स ब्राह्मणवत्सलेन शमितः क्षेमाय दर्पामयः ॥ २२ ॥

यस्य स तथोक्तस्तस्मिन्विद्याना ज्ञानाना तपसा नियमाना व्रताना च निधावक्षयाधारे । यद्यपि नियमव्रतयोरनतिरेकस्तथापि विद्यार्थत्वमोक्षार्थत्वाभ्यामिह भेदो विवक्षित । तपता दोषानभिषङ्गेण दीप्यमानाना वरिष्ठे श्रेष्ठे त्वयि विषये मया विनयापचारोऽविनयप्रयुक्तानुचितवृत्तिर्दैवाद्विधिवशात्कृत इति यत्तत्र निमित्ते ते तुभ्यमयमञ्जलि । बद्ध इति शेष । 'अञ्जलि परमा मुद्रा क्षिप्र देवप्रसादनी' इत्युक्तम् । तदाह—**प्रसीदेति** । प्रसीद । कालुष्य जहीत्यर्थ ॥ २१ ॥ किमपराद्धम् । कोऽपराध कृत इत्यर्थ । ननूपकृतम् । उपकार एव कृत इत्यर्थ । तदेवाह—**पुण्येति** । हे वत्स राम, चैतन्यस्य समीचीनज्ञानस्य मात्रामपि लेशमपि । 'अथ मात्र स्यादवधारणकात्स्न्र्ययो । मात्रा परिच्छदे वर्णमाने कर्णादिभूषणे ॥ सैवाल्पपरिमाणे च' इति रत्नमाला । हरता नाशयतैकेनासहायेन दर्पामयेन पुण्या धर्मिष्ठा । 'पुण्य धर्मवति त्रिषु' इति रत्नमाला । ब्राह्मणजातिर्ब्राह्मण· । 'जातिश्छन्दो जन्म गोत्रं स्वभ्याहृतिकरोत्तर· । सामान्यं मालती च' इति रत्नमाला । अन्वयस्य भृगुवशस्य गुणोऽमानित्वाद्यात्मगुणवर्ग । ब्राह्मणवशेषु हि भृगुवंश· प्रशस्त । अतएव प्रवराध्याये 'भृगूणामेवाग्रे व्याख्यास्याम·' इत्युपक्रान्तम् । श्लाघ्य मे चरित्रं मयानुष्ठेय वृत्तजात्यन्वयानुरूपं चेत्यमूनि जातिगुणचरित्राणि । असौ चासौ चादश्चेति सहोक्तौ 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषे 'त्यदादित शेषे पुंनपुंसकतो लिङ्गवचनानि' इति शास्त्रेण परत्वान्नपुंसकशेष । हृतानि नाशितानि । अभवन्निति शेष । हृता च हृतश्च हृतं चेति सहोक्तौ 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकैकशेष । एकवद्भावस्य वैकल्पिकत्वाद्बहुवचनम् । प्रसिद्धस्य हि राजयक्ष्मादेरामयस्य वातपित्तश्लेष्मात्मकधातुत्रयनाशकत्वमिति दर्पामयस्यापि जात्यादित्रयनाशकत्वमुक्तम् । सोऽय तथाविधोऽयमेकः सन्नप्यसहाय· सन्नपि भूरिदोषै क्रोधमात्सर्यादिभिर्हेयस्वभावविशेषै स्वप्रयुक्तैर्गहनो दुरासद । न केवल गुणहानिकर, किंतु दोषावहश्चेत्यर्थः । दर्प एव शौर्यातिशयप्रयुक्ताहंकार एवामयो व्याधि । 'रोगव्याधिगदामया' इत्यमर । ब्राह्मणेषु वत्सलेन प्रीतिमता प्रेयसा विशिष्यैव मयि प्रीतिमता त्वया क्षेमाय मङ्गलाय लब्धरक्षणाय । 'क्षेममस्त्री स्यान्मङ्गले लब्धरक्षणे' इति रत्नमाला । क्षेमशब्दोऽत्र मोक्षरूपक्षेमवाची । तथा चापस्तम्ब·—'प्रायश्चित्तबुद्धे क्षेमप्रापणम्' इति । शमितो

रामः—कथं नापराद्धं मया, यदायुधपरिग्रहं यावदारूढो दुर्योगः ।

जामदग्न्यः—एष एव न्याय्यः ।

असाध्यमन्यथादोषं परिच्छिद्य शरीरिणः ।
यथा वैद्यस्तथा राजा शस्त्रपाणिर्भविष्यति ॥ २३ ॥

रामः—कोऽहमुक्तिप्रत्युक्तिकायां भगवता । तस्मादित इतो भगवन् ।

जामदग्न्यः—क्व पुनर्मया वत्स, गन्तव्यम् ।

रामः—यत्र तातश्च तातजनकश्च । अथवा शान्तम् । यत्र भगवन्तौ मैत्रावरुणकौशिकौ ।

नाशित । इत पर जातिगुणचरित्रवृद्धिनिर्विघातेति भाव । भूरिदोषगहन इत्यनेन राजयक्ष्मणो बहुरोगसमूहात्मकत्ववद्दर्पस्य बहुदोषसमूहात्मकत्वमिति सूच्यते । चैतन्यमात्रा हरतेति चैतन्यनाशकत्वादप्यस्य व्याधेश्च तुल्यत्वम् । उक्तं च—'राजयक्ष्मेव रोगाणा समूह' इति । 'स्वस्थे चित्ते बुद्धयः सभवन्ति' इति च । ब्राह्मणवत्सलेनेत्यत्र 'गुरुविप्रतपस्विदुर्गतान्प्रतिकुर्वीत भिषक्स्वमेषजै' इत्येतदनुसधेयम् ॥ २२ ॥ कथं नापराद्धम् । अपराध कथ न कृत इत्यर्थ । आयुधपरिग्रह यावदायुधपरिग्रहपर्यन्तम् । महाभाष्यकारप्रयोगाद्यावच्छब्दयोगे द्वितीया । 'यावत्तावच्च सकाल्येऽवधौ मानेऽवधारणे' इत्यमर । दुर्योग । युज्यतेऽनेन शुभाशुभरूप फलमिति योगो दैवम् । दुर्योगो दुष्टदैवम् । दुर्भाग्यमिति यावत् । आरूढ प्रयोजितवान् ॥ एष आयुधपरिग्रहो न्याय्य । उचित इत्यर्थ । 'परिन्योर्नीणोर्द्यूताप्रेषयो' इति निपूर्वादिणो घञ्प्रत्यय । एवकारो दुर्योगप्रयुक्तानि व्यवच्छिनत्ति । तदाह—**असाध्यमिति** । वैद्यो भिषक् । 'भिषग्वैद्यश्चिकित्सके' इत्यमर । शरीरिणो देहिनो दोष व्रणरूपं कर्मान्यथा शस्त्रग्रहणादन्येनोपायेनासाध्यमनिवर्त्य निश्चित्य । 'साधनमनुगमगत्यो शेफसि सिद्धौ निवृत्तिदापनयो' इति रत्नमाला । यथा शस्त्रपाणि शस्त्र पाणौ यस्य स तथोक्त । 'प्रहरणार्थेभ्य परे निष्ठासप्तम्यौ' इति पाणिशब्दस्य परनिपात । व्रणरूपदोषनिवर्तनार्थमिति शेष । भविष्यति तथा राजा दुर्दमनाधिकृतो राजा शरीरिण शास्त्रवश्यत्वार्हस्य दोषमकृत्यकरणकृत्याकरणरूपम् । अन्यथा शस्त्रग्रहणातिरिक्तगुणोपदेशाद्युपायेनासाध्यमनिवर्त्य परिच्छिद्य निश्चित्य शस्त्रपाणिर्दुष्टदमनार्थं गृहीतायुधो भविष्यति । परिच्छेदक्रियापेक्षया भविष्यत्त्वम् । दोषस्य प्रकारान्तरेणानिवर्त्यत्वनिश्चयोत्तरक्षणप्रभृतिशस्त्रमादत्त इत्यर्थ । 'शस्त्रक्षुराग्निकर्माणि प्रकरोति यथा पिता' इत्यादिकमत्रानुसधेयम् ॥ २३ ॥ **क्व इति** । उक्तिश्च प्रत्युक्तिश्च यस्या क्रियाया सोक्तिप्रत्युक्तिका । मयूरव्यंसकादित्वात्समास. ॥ तातजनकश्च । भार्यां प्रति पितृत्वाज्जनकस्य तातत्वम् । क्षत्रिययोर्ब्रह्मर्षिणानुपसर्तव्यतामभिसधायाह—**अथवा शान्तमिति** । एव मदुक्तिनिमित्तकं दुरितमिति शेष. । शान्तम् । शाम्यत्वित्यर्थ । 'आशंसाया भूतवच्च' इति निष्ठा ।

जामदग्न्यः—इदमिदानीमशक्यम् । अनतिक्रमणीयो रामनिदेशः । (परिक्रम्य ।)

स एष रामः सौम्यत्वादचण्डश्चण्डशासनः ।
यस्य प्रतिष्ठित जैत्रं जामदग्न्येऽपि शासनम् ॥ २४ ॥

राजानौ—अतिगम्भीरः सौजन्योद्गारः ।

रामः—एष वो रामशिरसा प्रणामपर्यायः ।

सर्वे—एह्येहि वत्स । (इति परिष्वजन्ते ।)

जामदग्न्यः—भगवन् मैत्रावरुण, एष जमदग्निपुत्रः प्रणम्य कौशिकेन सार्धमत्रभवतो विज्ञापयति ।

वृद्धातिक्रमसंभृतस्य महतो निर्णिक्तये पाप्मनः
प्रायश्चेतनमादिशन्तु गुरवो रामेण दान्तस्य मे ।

मैत्रावरुणकौशिकौ वसिष्ठविश्वामित्रौ स्त । आवयोर्विद्यातपोभिराविक्यात्तेन तयोरुपगन्तव्यलं न्याय्यमिति भाव ॥ इद पूर्व मया क्षिप्तयोर्दशरथजनकयोर्वसिष्ठविश्वामित्रयोर्वा समीपगमनमिदानी मम परिभवकालेऽशक्यम् । लज्जावशाद्दुष्करमित्यर्थ । अनतिक्रमणीयो रामनिदेश । तथापि रामाज्ञा दुरतिक्रमेत्यर्थ. । 'निदेशः शासनं च स । शिष्टिश्चाज्ञा च' इत्यमर. । **स एष इति** । जैत्रं जयशील यस्य रामस्य शासनमाज्ञा जामदग्न्ये क्षत्रियान्तके परशुरामेऽपि प्रतिष्ठितं सजातगौरवं कार्यनिर्वाहसामर्थ्ययुक्तं वा । जातमिति शेष । 'प्रतिष्ठा तु समाप्तौ गौरवेऽपि च । कार्यनिर्वाहसामर्थ्ये चतुर्थे छन्दसि स्थितौ ॥' इति रत्नमाला । सौम्यत्वात्सोमवदाह्लादकरत्वादचण्डोऽतीक्ष्ण स एष रामश्चण्डशासनस्तीक्ष्णाज्ञ । आज्ञायास्तीक्ष्णत्वमतिवर्तिनामात्महानिपर्यन्तं दुर्गतिप्रयोजकत्वम् ॥ २४ ॥ **अतीति** । सौजन्यस्य सुजनभावस्योद्गार आविष्करणम् । अतिगम्भीर· । अक्षोभ्यसौहार्दमूलक इत्यर्थ । 'निम्नं गभीर गम्भीरम्' इत्यमर । निम्नपर्यायोऽयं गम्भीरशब्दो गौण्या वृत्त्या त्वक्षोभ्यपर शासनीयत्वमभ्युपगच्छतो मित्रत्वमविचाल्यमिति हि लभ्यते ॥ प्रणामस्य नमस्कारस्य पर्याय । क्रमप्राप्तस्यानतिपात इत्यर्थ । 'पर्यायोऽवसरे क्रमे' इत्यमर । 'परावनुपात्यय इण' इति घञ् । गुरुविषये प्रणामस्य विहितत्वादिदानीं तदनुष्ठानात्तस्यानतिपात इति भाव. ॥ परिष्वजन्त आलिङ्गन्ति ॥ कौशिकेन सार्धमत्रभवतो विश्वामित्रसहितान्युष्माञ्जमदग्निपुत्र इति विशेषणेन मयि दुष्टेऽपि मत्पिता भवद्भिरवेक्षणीय इति व्यज्यते । विज्ञापनप्रकारमेवाह—**वृद्धेति** । गुरवो भवन्तः कर्तार । रामेण दान्तस्य दमितस्य । शिक्षितस्येति यावत् । 'वा दान्तशान्त–' इत्यादिना णिचि निष्ठान्तो दान्तशब्दो निष्पादितः । मे मम वृद्धानां भवतामतिक्रमेणातिलङ्घनेन संभृतस्य सपादितस्य महतः पाप्मनो

प्राग्धर्मस्य भवन्त एव हि परं द्रष्टार आसन्गुरो
लब्ध्वा ज्ञानमनेकधा प्रवचनैर्मन्वादयः प्राणयन् ॥ २५ ॥

वसिष्ठः—वत्स, अद्य नः श्रोत्रियाणां कुले जातोऽसि ।
दुर्विनीते त्वयि वयं दुःखिताः सुखिनोऽन्यथा ।
निसर्गो ह्येष वृद्धानां यत्तु श्रेयस्तथैव तत् ॥ २६ ॥

तत्परिपूत एवासि ।

ब्रह्महत्यासाम्यान्महापातकस्य निर्णिक्तये निर्णेजनाय । 'णिजिर् शौचे' इत्यस्माद्भावे स्त्रिया क्तिन् । शुद्धये प्रायश्चेतन प्रायश्चित्त तपोनिर्णयं पापनाशकं कर्म वादिशन्तूपदिशन्त्वाज्ञापयन्तु वा । यद्यपि तपोवाचिन पापवाचिनो नाशवाचिनो वा प्रायशब्दस्याकारान्तस्य निर्णयशोधनसंधानान्यतमवाचिनि चित्तिशब्दे चित्तशब्दे वा परे 'प्रायस्य चित्तिचित्तयो' इति सुडागमो विहित, तथापि पारस्करादेराकृतिगणत्वाच्चित्तिचित्तशब्दसमानार्थकचेतनशब्देऽपि परत प्रायशब्दस्य सुडागम साधु । एवम् 'प्रायश्चेतयाचके' इति मुरारिप्रयोगोऽपि पारस्करादेराकृतिगणत्वादेव साधु । 'प्रायो नाम तप प्रोक्तं चित्तिर्निर्णय उच्यते । तपोनिश्चयसंयोगं प्रायश्चित्तं विदुर्बुधा ॥ प्राय पाप विजानीयाच्चित्तं तस्य विशोधनम् ॥' इति चोक्तम् । 'चिती सज्ञाने' चौरादिकः । अनुष्ठेयानिर्णयस्यानर्थपर्यवसाननियमादनुष्ठानमर्थसिद्धम् । चेतयतेर्विशोधनसधानार्थकत्वं तु धातूनामनेकार्थत्वात्प्रायशब्दस्य नाशवाचित्वे तु नष्टस्य ब्राह्मण्यादे सधायकं कर्म प्रायश्चित्तादिशब्देनोच्यत इत्याहु । प्राय शब्दस्याव्ययत्वादव्ययानामनेकार्थत्वात्तप पापार्थकत्वम् । ततश्च प्रायश्चेतन प्रायश्चेतयाचके इत्यनयो साधुत्वम् । एवं प्रायश्चित्तिशब्दश्च साधुरेव । 'प्रायस्य चित्तिचित्तयो' इत्येतत्तु प्रायश्चित्त्यादे सुडागमरहितस्य वारणार्थमित्यपि द्रष्टव्यम् । हे गुरो वसिष्ठ, भवन्त एव धर्मस्यालौकिकश्रेय साधनस्य वेदैकसमधिगम्यस्य वार्थस्य प्राग्द्रष्टार आसन्प्रथमदर्शिनोऽभवन्, मन्वादय पर मन्वादयस्तु प्रवचनैर्भवत्कृतोपदेशैर्ज्ञानं धर्मप्रमितिं लब्ध्वा धर्ममनेकधा प्राणयन्ग्रन्थै प्रतिपादितवन्त । यद्वा मन्वादयो भवद्भ्यो धर्मप्रमितिं लब्ध्वानेकधा प्रवचनैरुपदेशरूपैर्ग्रन्थैर्धर्मं प्राणयन्नबोधयन् । प्रपूर्वो नयति प्रतिपादने वर्तते । हि यस्मात्प्राणयस्तस्माद्भवन्त आदिशन्त्विति सबन्ध ॥ २५ ॥ **वत्सेति** । अद्यानुतापेन प्रायश्चित्तान्वेषणकाले । **दुर्विनीत इति** । हे वत्स जामदग्न्य, त्वयि दुर्विनीते सति सज्जनोचिताचारातिचरणेन समुद्धते सति वयं कुलवृद्धा दुःखिता सजातदुःखा । अभूमेति शेष । अन्यथा त्वयि विनीते सति सुखिन सजातसुखा । भवामेति शेष । एष खवश्येषु दुर्विनीतेषु दुःखितत्वं विनीतेषु सुखित्वं चेत्यम् । विधेयप्राधान्यात्पुस्त्वमेकत्वम् । वृद्धाना ज्ञानवय शीलै प्रकृष्टाना पुरुषाणा निसर्ग स्वभावः । हिशब्द प्रसिद्धौ । यच्छ्रेयस्तत्तथैव त्वदुक्तरीत्या सानुतापस्य तव प्रायश्चित्तं साध्यमेवास्ति ॥ २६ ॥

विश्वामित्रः—वत्स, अपहृतं ते विद्मः पाप्मानं रामभद्रेण । यतः प्रायश्चित्त इव राजदण्डेऽप्येनसो निष्कयमामनन्ति धर्माचार्याः, किं पुनरत्रभवान्वसिष्ठः प्रजापालनसंनिधौ प्रशास्ति ।

रामः—एतानि भगवता साक्षात्कृतब्रह्मणामृषीणां प्रसन्नगम्भीरपावनानि वचनानि ।

दशरथः—भगवञ्जामदग्न्य,

निसर्गतः पवित्रस्य किमन्यत्पावनं तव ।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ २७ ॥

वत्सेति । हे वत्स जामदग्न्य, ते पाप्मानं शस्त्रग्रहणादिप्रयुक्तं त्वत्पापं रामभद्रेणापहृतं विनाशितं विद्मो जानीम । यतो यस्माद्धर्माचार्या धर्मोपदेष्टारः । 'मन्त्रव्याख्याकृदाचार्यैः' इत्यमर । प्रायश्चित्त इव कृच्छ्रचान्द्रायणादिपापनाशककर्मणीव राजदण्डेऽपि राज्ञा शिक्षणेऽप्येनस. पापस्य निष्कय शुद्धिमामनन्ति बहुशो वदन्ति । 'म्ना अभ्यासे' इति पठितस्याड्पूर्वकस्य 'पाघ्रा–' इत्यादिना मनादेश । 'राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवा । निर्मला स्वर्गमायान्ति सन्त सुकृतिनो यथा ॥' इति मनुवचनम्, 'दण्डधे य पातयेद्दण्डं दण्ड्यो यश्चापि दण्ड्यते । कार्यकारणसिद्धार्थौ तावुभौ नावसीदत. ॥' इति श्रीरामायणवचनं च द्रष्टव्यम् । **किं पुनरिति** । अत्रभवान्पूज्य । अत्रभवत्तत्रभवच्छब्दौ पूजार्थाविति वैयाकरणाः । वसिष्ठ. प्रजापालनसंनिधौ प्रशास्ति परिपूत एवासीति निर्दिशति । 'प्रशासनं तु निर्देश' इति कोश । इति यत्, ततो हेतोस्ते पाप्मानमपहृतं विद्म इति किं पुनर्वक्तव्यमित्यर्थ । प्रजापालनसनिधावित्यत्र 'ऋग्वेदविद्यजुर्वेदविच्च सामविदेव वा । त्रयवरा परिषज्ज्ञेया धर्मसशयनिर्णये ॥' इति वचनमनुसधेयम् । अत्रभवानित्यत्र 'प्रब्रूते य स धर्मं स्यादेको वाघ्यात्मवित्तम' इत्येतदनुसधेयम् ॥ **एतानीति** । एतानि परिपूत एवेत्यादीनि प्रशास्तीत्यन्तानि । भगवताम् । 'उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्या च स वाच्यो भगवानिति ॥' इत्युक्तभगवच्छब्दप्रवृत्तिनिमित्तवता साक्षात्कृतब्रह्मणा प्रत्यक्षीकृतपरमात्मना प्रत्यक्षितविप्रकीर्णवेदाना वा ऋषीणा सत्यवचसा वचनानि वाक्यानि प्रसन्नानि सशयच्छेदकानि गम्भीराण्यक्षोभ्याणि पावनानि श्रवणमात्रेणापि पापहराणि च । भवन्तीति शेष. । निम्नोन्नतादिवद्विशेषणसमास । भगवतामित्यादिविशेषणद्वयेन यथार्थदृष्टित्वमुक्तम् । ऋषीणामित्यनेन यथार्थवक्तृत्वमुक्तम् । अनेनाप्तत्वमुक्तं भवति प्रसन्नपदेन सदेहनिर्णयार्थं मीमासापेक्षश्रुतिवचनेभ्यो व्यावृत्तिरुच्यते । गम्भीरपदेन विप्रकीर्णवेदमूलत्वोक्त्या विप्रलम्भकस्मृतिभ्यो व्यावृत्तिरुच्यते । पावनपदेन च मन्दानामपि तत्त्वार्थप्रमितिप्रबन्धकपापनिवर्तकत्वमुच्यते ॥ **भगवन्निति । निसर्गत इति** । भगवञ्जामदग्न्य, निसर्गत· स्वभावत. पवित्रस्य स्वयं पूतस्य सतो·

जामदग्न्यः—भगवति वसुंधरे, प्रसीद रन्ध्रदानेन ।

जनकः—भगवन्, यदि प्रसन्नोऽसि तद्विस्रब्धोपवेशनात्परिपुनीहि नो गृहान् । एतत्पूतमासनं भगवतः ।

जामदग्न्यः—यदभिरुचितं सूर्यशिष्यान्तेवासिने राजन्यश्रोत्रियाय ।

(सर्वे उपविशन्ति ।)

दशरथः—

जनपदबहिर्निष्ठा यूयं गृहस्य परिग्रहा-
द्वयमपि निजैर्व्यग्राः कार्यैस्ततो न बभूव यः ।
स इह भवतामद्यास्माभिर्मनोरथवाञ्छितः
सुचरितपरीपाकात्प्राप्तश्चिरस्य समागमः ॥ २८ ॥

ऽन्येषामपि पावयितुस्त्वान्यत्पावनं पावनान्तरं किम् । किमर्थमित्यर्थं. । तीर्थोदकं च ऋषिजुष्टोदकं च । ऋषिजुष्टाम्भोवाचिनस्तीर्थशब्दस्योदकशब्दसमभिव्याहारादृषि-जुष्टत्वरूपविशेषणमात्रपरत्वम् । वह्निश्च पावकश्चान्यतः शुद्धिं स्वव्यतिरिक्तवस्तुहेतुकां शुद्धिं नार्हत. । न क्षमेते इत्यर्थ. । अत प्रायश्चेतनामादिशन्निति भवदुक्तिर्न युक्तेति भाव. । दृष्टान्तालंकार । 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृति.' इति लक्षणात् । 'तेजीयसा न दोषाय वह्ने सर्वभुजो यथा' इति वचनाभिप्रायेण वह्ने. काष्ठानिर्देश ॥ २७ ॥ **भगवतीति** । रन्ध्रदानेन प्रायश्चित्तादिना पराजितपापस्याप्यसव्यवहितकार्यस्य मम विविक्तदेशवासार्थं स्वस्मिन्विवरप्रदानेन विवरप्रदानार्थम् । 'अध्ययनेन वसति' इतिवत्प्रयोजने तृतीया । प्रसीद प्रसाद कुरु ॥ **भगवन्नित्यादि** । यदि प्रसन्नोऽसि त्वमस्मासु कृतप्रसादश्चेत्तदा विस्रब्ध यथा तथा इमेऽस्माकमनतिरिक्ता इति विश्वासयुक्तं यथा तथा । 'समौ विस्रम्भविश्वासौ' इत्यमर । उपवेशनादासनान्नो गृहानस्मद्गृहान्परिपुनीहि परितः पावय । एतदित्यङ्गुल्यासन निर्दिशति—**यदिति** । सूर्यशिष्यस्य याज्ञवल्क्यस्यान्तेवासिने शिष्याय राजन्यश्रोत्रियाय क्षत्रियाय छन्दोऽध्येत्रे । 'श्रोत्रियाध्यापकधूर्तैर्जाति.' इति समास । 'रुच्यर्थाना प्रीयमाण.' इति चतुर्थी । यदभिरुचितं यत्प्रीयमाणम् । तदस्त्विति शेष ॥ सर्वे उपविशन्ति । उपवेशं नाटयन्तीत्यर्थ ॥ **जनपदेति** । अत्र जामदग्न्येत्यादि । हे जामदग्न्य, यूयम् । पूजाया बहुवचनम् । जनपदेभ्य कोसलादिभ्यो बहिर्भूते वने नितरा तिष्ठन्तीति जनपदबहिर्निष्ठा. । भवथेति शेष । यूयमरण्यैकनिष्ठा भवथेत्यर्थ । वयमप्यहमपि । 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् । गृहस्य परिपालनाद्गृहोपलक्षितगृहस्थाश्रमस्वीकारान्निजै. कार्यै राज्यपरिपालनादिभिरवश्यकर्तव्यैर्व्यापारैर्व्यग्रा व्यासक्ता । भवाम इति शेष । 'व्यग्रो व्यासक्त आकुले' इत्यमर । इति यत्, ततो हेतोर्य समागमो न बभूव न जातः सोऽस्माभिर्मनोरथैरुत्कण्ठाविशेषैर्वाञ्छितो विषयीकृतः । पाकं पचन्तीतिवन्निर्देश. ।

अत्र च ।

का ते स्तुतिः स्तुतिपथादतिवृत्तधाम्नः
किं दीयतामविकलक्षितिदायिनस्ते ।
शान्तस्य किं परिजनेन मुनेस्तथापि
पुत्रैः समं दशरथोऽद्य वशंवदस्ते ॥ २९ ॥

जामदग्न्यः—यूयमीदृशा इति किमाश्चर्यम् ।

प्रेद्धं धाम यमामनन्ति मुनयः सोऽयं निधिर्ज्योतिषां
देवो वः सविता कुलस्य किमतो भूत्यै प्रशंसापदम् ।

यद्वा मनास्येव रथा मनोरथास्तैरस्खलितगमनसाधनत्वेन सादृश्याद्रूपणम् । वाञ्छित. प्रेप्सितो भवतामस्माभि सह समागम । अस्माभिरित्यप्रधाने तृतीया स्वनैच्यं द्योतयति । अस्माभिरित्युभयान्वयि । सुचरितपरीपाकात्सुकर्मणा फलप्रदानौन्मुख्याद्धेतोः चिरस्य प्राप्तोऽस्माभिश्चिरेण लब्ध. । अभूदिति शेष ॥ २८ ॥ **अत्र चेति ।** अस्मिन्समागमे इत्यर्थ । **का त इति ।** स्तुतिपथात्स्तुतिमार्गादतिवृत्तमतिक्रान्तं धाम प्रभावो यस्य स तथोक्तस्तस्य । अतिवृत्ति प्रत्यपादानत्वविवक्षया स्तुतिपथादिति पञ्चमी । 'ऋक्पूरब्धू' इत्यादिना पथिन्शब्दादकारप्रत्ययः । 'धाम जन्मप्रभास्थानप्रभावसुखसद्मसु' इति रत्नमाला । ते का स्तुति· । भवेदिति शेष. । वाचामगोचरगुणातिशये त्वयि गुणाभिधानात्मिका स्तुतिर्नोचितेत्यर्थ । 'प्रत्यक्षे गुरवः स्तुत्या.' इत्येतत्तु शक्यस्तुतिकगुरुविषयमिति भाव । अविकलक्षितिदायिनः सद्वीपामित्यादिपूर्वोक्तरीत्या सपूर्णभूमिप्रदस्य ते किं दीयताम् । किं वस्तु दानार्हमित्यर्थः । 'पुष्कलेन धनेन वा' इत्येतत्त्वनीदृशविषयमिति भाव· । शान्तस्य वैषयिकसुखेभ्यो नियमितमनस्कस्य मुने· परमात्मनि मननशीलस्य तव परिजनेन किम् । परिजनसाध्या शुश्रूषाप्यनपेक्षितेत्यर्थः । 'शुश्रूषया वा परया' इत्येतदप्यन्यविषयमिति भाव । वसिष्ठसनाभित्वाज्जामदग्न्यस्य गुरुत्वाभिसधिनेयमुक्ति. । तथापि स्तुतिदानपरिजनानपेक्षितत्वेऽपि दशरथ पुत्रै समं रामादिभि· सहितः सन्नद्य ते वशंवद । त्वदधीन इत्यर्थ । भवतीति शेष । 'प्रियवशे वद खच्' इति खच्प्रत्यय । जामदग्न्यस्य स्तुत्याद्यनपेक्षितत्वेऽपि सपुत्रो दशरथो जामदग्न्याधीन इति तटस्थैरनुसधानाज्जामदग्न्य कृतातिशयो भवति । तदुक्त नीतिविद्भि —[1]मनागुपकारिता च सर्वस्यास्ति तत्परिकरत्वेन ज्ञायमानत्वादिति भाव ॥ २९ ॥ यूयमीदृशा इति किमाश्चर्यम् । रामादयस्त्वं च ब्राह्मणाधीना इत्येतन्नापूर्वमित्यर्थ· । **प्रेद्धमिति ।** मुनयस्तत्त्वमननशीला यं सूर्यं प्रेद्धं प्रकर्षेण दीप्तं धाम तेज आमनन्त्यधीयते (?) । अग्नीषोमतेजोमूलकत्व रूपः प्रकर्षः प्रशब्देन विवक्षितः सोऽयं ज्योतिषा निधिः सर्वतेजसामक्षयस्थानभूतो देव । स्वामी सूर्यो व. कुलस्य युष्मद्वंशस्य सविता जनयिता । 'षु प्रसवैश्वर्ययोः'

---

१. अत्र ग्रन्थः पतित इति ज्ञायते ।

यज्वानः परमार्थराजऋषयस्ते यूयमिक्ष्वाकवो
येषां वेद इवाप्रमेयमहिमा धर्मे वसिष्ठो गुरुः ॥ ३० ॥

अपि च ।

सङ्ग्रामेष्वभयप्रदं दिविषदां भर्तुर्धनुः शासनं
सप्तद्वीपनिविष्टयूपयजनश्रेण्यङ्किता भूमयः ।
शश्वत्कीर्तिनिबन्धनं भगवती भागीरथी सागरः
प्रख्यातानि च तानि तानि भवतां भूमानमाचक्षते ॥ ३१ ॥

इत्यस्मात्कर्तरि तृच् । भवतीति शेष । इति यदतोऽस्मादन्यद्भूयं सपत्तये 'भूतिर्मानाङ्गशृङ्गारजन्मसपत्तिभस्मसु' इति रत्नमाला । प्रशंसापदं प्रकृष्टस्तुतिस्थानं किम् । न किमपीत्यर्थ । सूर्यो व कुलस्य जनयितेत्येतदेव युष्माकं सपदे परमप्रशंसास्थानमित्यर्थ । येषा युष्माकमप्रमेयमहिमानवधिकमाहात्म्यो वसिष्ठो वेद इव नित्यापौरुषेयनिर्दोषश्रुतिरिव धर्मे नित्यनैमित्तिकादिरूपेष्वलौकिकश्रेय साधनेषु गुरु- संशयादिनिवर्तक । भवतीति शेष । ते तथाविधा यजनशीला इक्ष्वाकव इक्ष्वाकुदेशाधिपतेर्वंश्या । तद्राजलादपत्यप्रत्ययस्य लुक् । यद्वा राजविशेषनामधेयमिक्ष्वाकुपदं तदपत्येषु लाक्षणिकमिति बहुवचनोपपत्ति । यूयं परमार्थराजऋषयो वस्तुभूतराजर्षिलयुक्ताः भवथेति । अन्यत्र तु राजर्षिपदमौपचारिकमित्यर्थ । सूर्यो युष्माकं जन्मना गुरु , वसिष्ठस्तु विद्यया गुरुरित्युभयविधशुद्धियुक्ताना युष्माकं ब्राह्मणवशंवदत्वं नापूर्वमिति भावः ॥ ३० ॥

सङ्ग्रामेष्विति । दिविषदा भर्तुरिन्द्रस्य सङ्ग्रामेषु देवासुरयुद्धेष्वभयप्रदमसुरभयनिवृत्तिप्राप्तिप्रद धनुः कार्मुक शासनमाज्ञा । 'निदेश. शासनं च स.' इत्यमर । सप्ताना द्वीपाना समाहारः सप्तद्वीपम् । पात्रादिलात्क्लीबलम् । तस्मिन्निविष्टानि स्थितानि यूपा पशुनियोजनार्थदारूणि यजनानि 'सप्तमे यजेत । प्राचीनप्रवणे वैश्वदेवेन यजेत' इत्याद्युक्तयागानुष्ठानस्थलानि तेषा श्रेणीभि पङ्क्तिभिरङ्किताश्चिह्निता भूमयस्तास्ता द्वीपभूमयः शश्वत्कीर्ते· सदातनकीर्ते । 'पुन सदार्थयो शश्वत्' इत्यर्थ । निबन्धनं हेतुभूतम् । निबन्धनशब्दो नित्यनपुसकलिङ्गः । कीर्तिर्गुणवत्ताप्रथा । यद्वा औदार्यगुणनिमित्ता प्रसिद्धि । अथवा 'कृतिर्या रमयत्येव विश्वं सा कीर्तिरुच्यते । कुलमप्यागता सा चेद्यश इत्यभिधीयते ॥ यतो विश्वस्य शमिति तस्माद्यश इतीरितम् ॥' इत्युक्तलक्षणलक्षिता वा कीर्तिर्विवक्षिता । भगवती परमपूज्या भागीरथी भगीरथसबन्धिनी गङ्गा सागरः सागरै· खात समुद्रश्च । प्रख्यातानि प्रसिद्धानि तानि तानि नानाविधान्याश्चर्यकर्माणि च भवतामिक्ष्वाकुवंश्याना युष्माकं भूमानं वैपुल्यम् । माहात्म्यमिति यावत् । आचक्षते प्रकाशयन्ति । अत्र माहात्म्यबोधने धनुरादीना खलेकपोतन्यायेन कारणत्वोक्ते· समुच्चयविशेषोऽलंकार· । तदुक्तम्—'खलेकपोतन्यायेन बहूना कार्यसाधने । कारणाना समुद्योगः स द्वितीयः समुच्चय ॥' इति । वैपुल्यवाचिनो बहुशब्दाद्भाव इमनिच्प्रत्यये भूमशब्दो निष्पन्न ॥ ३१ ॥

वसिष्ठविश्वामित्रौ—(अपवार्य ।) एतद्धि शिक्षितं वत्सेन ।

जामदग्न्यः—रामभद्र, अनुमोदस्व मामरण्यगमनाय ।

विश्वामित्रः—मामप्यधुना भवन्तोऽनुजानन्तु ।

रघुजनकगृहेषु गर्भरूप-
व्यतिकरमङ्गलवृद्धयोऽनुभूताः ।
भृगुपतिविजयोन्नतं च वत्सं
प्रियमभिनन्द्य सुखी गृहानुपेयाम् ॥ ३२ ॥

दशरथः—वत्स रामभद्र, प्रस्थितस्ते भगवान्कौशिकः ।

विश्वामित्रः—(साश्रं राममालिङ्ग्य ।) अहमेव सौम्य, न त्वां मोक्तुमुत्सहे ।

किं त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति ।
संकटा ह्याहिताग्नीना प्रत्यवायैर्गृहस्थता ॥ ३३ ॥

अपवार्येति । रामजामदग्न्यौ प्रत्येवेत्यर्थ । एतत्क्षत्रियान्तकस्य क्षत्रियगुणश्लाघन वत्सेन रामेण शिक्षितम् । जामदग्न्यस्य व्युत्पादितमित्यर्थ ॥ अरण्यगमनाय वनगमनार्थमनुमोदस्वानुज्ञापूर्वक प्रीयस्व ॥ भवन्तो वसिष्ठदशरथजनकादयोऽनुजानन्त्वनुज्ञा कुर्वन्तु । अनुज्ञेयमर्थमाह—**रघुजनकेति** । अत्र मयेत्यादिः । मया रघूणा जनकाना च गृहेषु भवनेषु । 'गृहं गृहाश्च भूम्नि स्याद्वाविमौ गेहभार्ययो' इति रत्नमाला । गर्भस्येव रूप· स्वभावो ययोस्तौ तथोक्तौ । तयो । सीतारामयोरित्यर्थ । 'गर्भोऽर्भके नाट्यसधौ कुक्षौ पनसकण्टके । भ्रूणेऽपवरके च' इति रत्नमाला । 'रूपं स्वभावे शुक्लादौ' इति च रत्नमाला । तत्र रामस्य गर्भरूपत्वमपहृतपाप्मनोऽपि स्वेच्छामूलकम् । सीतायास्तु तथाविधानौरसत्वेऽपि प्रेमातिशयेनाविभागाद्गर्भरूपत्वम् । व्यतिकरो विवाहरूपोऽन्यसबन्ध· स एव मङ्गलं कल्याणं तस्य वृद्धयो लक्ष्मणोर्मिलादीना विवाहा अनुभूता सुखजनकसाक्षात्कारविषयीकृता । किं च भृगुपते परशुरामस्य विजयेनोन्नत वालिरावणयोरपि जितप्रायत्वेनात्यन्तविजयशालिनं प्रिय परमप्रेमास्पदं वत्स राममभिनन्द्य सुखी सन्निरतिशयसुखयुक्त सन् । भूमनि मत्वर्थीय इनिप्रत्यय । गृहानुपेया प्राप्नुयाम् । अस्मिन्नर्थे भवन्तोऽनुजानन्त्विति पूर्वेण सबन्ध । उपेयामिति प्रार्थनाया लिङ् । पुष्पिताग्रा वृत्तम् । तदुक्तम्—'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति ॥३२॥

वत्सेति । ते कौशिकस्त्वदेकप्रियः कौशिक· प्रस्थित । गन्तुमुपचक्रम इत्यर्थ· ॥

अहमिति । सौम्य सोमवत्प्रियदर्शन, अहमेव केवलोऽहम् । वक्ष्यमाणानुष्ठाननित्यत्वविरहितोऽहमिति यावत् । त्वां मोक्तुं त्यक्तुं नोत्सहे न व्यवस्यामि । 'उत्साहोध्यवसाय· स्यात्' इत्यमर । **किं त्विति** । अनुष्ठाननित्यत्वं नित्यानुष्ठानकत्वमनुष्ठाननैयत्यं वा । तच्च प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वमनुष्ठानस्य विवक्षितम् ।

वसिष्ठः—स्वगृहात्स्वगृहं गन्तुमागन्तुं च कामचारः ।

विश्वामित्रः—भगवन्, यद्यनुरुध्यसे तदेहि सिद्धाश्रमपदमुभौ गच्छावः । त्वा पुरस्कृत्य गच्छन्मधुच्छन्दसो मातुः सत्कार्यो भविष्यामि ।

वसिष्ठः—किमेतावत्यपि भवानस्मासु न प्रभवति ।

राजानौ—रमणीयः पावनो ब्रह्मर्षिसंगमः ।
अन्योन्यमाहात्म्यविदोरन्यैरविदितात्मनोः ।
विभ्राजते विरोधोऽपि नाम स्नेहे तु का कथा ॥ ३४ ॥

(नेपथ्ये)

एषा रामवधूर्गुरून्वन्दते ।

स्वातन्त्र्यं स्वैरावस्थितिमपकर्षति नाशयति । कदाचिदङ्गीकृतामपि स्वैरावस्थितिं प्रायश्चित्तानुष्ठापनेन द्विगुणायासजननेन निष्फलतीत्यर्थः । तद्विवृणोति—संकटेत्यादिना । आहिताग्नीनाम् । 'अग्नीनादधीत' इत्युक्ताधानसंस्कृताग्नियुक्ताना पुरुषाणाम् । इदं च 'यावज्जीवमग्निहोत्रं जुहुयात्', 'वसन्ते ज्योतिषा यजेत' इत्याद्युक्तनित्यक्रतूनामुपलक्षणम् । गृहस्थता गृहस्थाश्रम प्रत्यवायैः स्वैरावस्थितिमूलकाननुष्ठानप्रयुक्तदोषैः सकटा निषिद्धा । भवतीति शेष । हि यस्मादेवं तस्मादनुष्ठाननित्यत्व स्वातन्त्र्यमपकर्षतीति सबन्ध ॥३३॥ **स्वगृहादिति** । स्वगृहतुल्यान्मिथिलानगरात्स्वगृह सिद्धाश्रम गन्तुमागन्तुं च कामचार । भवतीति शेष । गमनागमनार्थो कामचारक्रिया भवतीत्यर्थ । कामेनेच्छया चारो व्यापार कामचार ॥ **भगवन्निति** । भगवन्, यद्यनुरुध्यसे यदि कामयसे । 'अनो रुध कामे' इति धातुपाठ । सिद्धाश्रमपदं सिद्धाश्रमरूपं स्थानम् । **त्वामिति** । अहमिति शेष । अह त्वा ब्रह्मर्षिश्रेष्ठं पुरस्कृत्य गच्छन्सन्मधुच्छन्दसो मातुर्मधुच्छन्दा विश्वामित्रपुत्रस्तस्य माता विश्वामित्रपत्नी तस्या सत्कार्य आदरणीयो भविष्यामि । गुणवत्पुत्रप्रसूत्वप्रयुक्तगौरवातिशयख्यापनाय मधुच्छन्दसो मातुरित्युक्तम् । पूर्व बहुशो विप्रकृतस्यानन्तरं मित्रीभवत स्वस्यापि ब्रह्मर्षित्वप्रदस्य परमपूज्यस्य वसिष्ठस्यातिथेर्लाभात्तस्या. प्रीत्यतिशयो भवतीति भाव. ॥ **किमिति** । एतावत्यप्यल्पेऽपि सिद्धाश्रमागमननियोगे भवान्पूज्यस्त्वमस्मासु मा प्रति न प्रभवति किम् । प्रभुर्न भवसि किमित्यर्थ. ॥ राजानौ दशरथजनकौ । रमणीयो हृद्य । पावनो दर्शनश्रवणादिना जनाना पापहरो ब्रह्मर्ष्योर्वसिष्ठविश्वामित्रयो सगम· समागमः । **अन्योन्येति** । अन्योन्यमाहात्म्यविदोरितरेतरप्रभावाभिज्ञयोरन्यै. स्वान्यैरविदितात्मनोर्दुर्ज्ञेयस्वरूपयो । ब्रह्मर्ष्योरिति शेष । विरोधोऽपि विद्वेषोऽपि विभ्राजते नाम परोपकारहेतुतया विशेषेण दीप्यत इति प्रसिद्धमेव । परोपकारहेतुत्वं च त्रिशङ्कुहरिश्चन्द्रादिविषये व्यक्तम् । स्नेहे तु वसिष्ठविश्वामित्रयो. परस्परसौहार्दे तु विषये का कथा । विभ्राजत इति किमु वक्तव्यमित्यर्थ· । विश्वोपकारहेतुत्वादिति भाव ॥ ३४ ॥ **एषेति** । रामवधू सीता गुरून्वसिष्ठादीन्वन्दतेऽभिवादयते ॥

ऋषयः—वत्से जानकि,

वीरेण ते विजयमाङ्गलिकेन पत्या
वृत्रद्रुहः प्रशमितेषु महाहवेषु ।
क्षत्रप्रकाण्डगृहिणीबहुमानपूजा-
मूर्जस्वलामपि शची मनसा करोतु ॥ ३५ ॥

रामः—(स्वगतम्।) अचिरात्समूलकाषं कषितेषु राक्षसेष्वेवं स्यात् ।

ऋषयः—स्वस्त्येवमेवासता भगवन्तः । (इत्युत्तिष्ठन्ति ।)

इतरे—(उत्थाय ।) नमो नमो वः ।

जामदग्न्यः—भगवन्तौ, जामदग्न्योऽभिवादयते ।

वसिष्ठविश्वामित्रौ—

स्थिरस्ते प्रशमो भूयात्प्रत्यग्ज्योतिः प्रकाशताम् ।
अभिन्नशिवसकल्पमन्तःकरणमस्तु ते ॥ ३६ ॥

(इति निष्क्रान्तौ ।)

ऋषयो वसिष्ठादय । **वीरेणेति** । हे वत्से जानकि, वीरेण जगति मुख्येन वीरेण । 'मुख्यस्य निर्विशेषशब्दोऽन्येषा विशेषतः' इत्युक्त्या मुख्यस्यलाभ. । मङ्गलं प्रयोजनमस्य माङ्गलिक. । विजये सति माङ्गलिको विजयमाङ्गलिक । 'सप्तमी' इति योगविभागात्समास । आनुषङ्गिकेण परशुरामविजयेन सह स्वत्प्राप्तिरूपमङ्गलं लब्धवतेत्यर्थः । ते पत्या । 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इत्युक्तरीत्या स्वदधीनसर्वोत्कर्षवता रामेण कर्त्रा वृत्रद्रुह इन्द्रस्य महाहवेषु महायुद्धेषु प्रशमितेषु सत्सु निवर्तितेषु सत्सु शच्यपीन्द्राण्यप्यूर्जस्वला प्रबलाम् । 'ज्योत्स्नातमिस्रा–' इत्यादिनोर्जस्वलशब्दो निपातित । क्षत्रप्रकाण्डगृहिणीना क्षत्रियश्रेष्ठपत्नीना या बहुमानपूजा गौरवातिशयप्रयुक्तपूजा ता मनसा वञ्चनया विना मानसपूर्वकं करोतु । यद्वा क्षत्रप्रकाण्डगृहिणी इति पृथक्पदं शचीविशेषणम् । क्षत्रप्रकाण्ड क्षत्रियश्रेष्ठ इन्द्र. । 'ब्रह्म बृहस्पति· क्षत्रमिन्द्र मरुतो वै देवाना विश ' इति श्रुत्येन्द्रस्य क्षत्रत्वमुक्तम् । तस्य गृहिणी पत्नी शच्यप्यूर्जस्वला बहुमानपूजा करोत्विति पूर्ववदर्थ· ॥ ३५ ॥ **अचिरादिति** । राक्षसेषु रावणादिषु समूलकाप कषितेषु मूलेन सह नाशितेषु सत्स्वेवं स्यात् । शचीकर्तृका बहुमानपूजा स्यादित्यर्थ । 'निमूलसमूलयो कषः' इति समूलशब्द उपपदे कषते. 'कषादिषु यथाविध्यनुप्रयोग.' इति णमुल् । प्रकृते. कषतेरनुप्रयोगः । अत्र स्वगतत्वोक्ते प्रकाशानुक्तिः प्रौढ्येति वदन्ति ॥ **स्वस्तीति** । भगवन्तो वसिष्ठविश्वामित्रावेवमेव परस्परसौहार्देनैव स्वस्त्यासता मङ्गलं यथा तथा तिष्ठन्तु ॥ **स्थिर इति** । स्थिर प्रशमो बलवतापि कारणेनाप्रकम्प्या प्रकृष्टा शान्तिरन्तरिन्द्रियनिग्रहस्ते भूयात् । आशिषि लिङ् । प्रत्यग्ज्योति स्वस्मै स्वयंप्रकाशमानमात्मरूपं ज्योतिस्ते प्रकाशताम् । योगदृष्टयेति शेषः । अत्र 'आत्म-

जामदग्न्यः—(किंचित्परिक्रम्य स्थित्वा च ।) वत्स रामभद्र, इतस्तावत् ।

रामः—(उपसृत्य ।) आज्ञापय ।

जामदग्न्यः—

यन्मदा क्षत्रविच्छेदविश्रान्तेनापि धारितम् ।
तदेतदधुना धत्ते धनुः करणशून्यताम् ॥ ३७ ॥

इध्मादित्रश्चनप्रयोजनस्तु परशुः ।

पुण्यानामृषयस्तटेषु सरितां ये दण्डकाया वने
भूयांसो निवसन्ति तेषु सततं लङ्घासदो राक्षसाः ।
विध्वंसाय चरन्ति तत्प्रमथने त्वस्योपयोगो भवे-
त्सप्रत्येष सहामुनैव धनुषा वत्सेऽधिकारः स्थितः ॥ ३८ ॥

(इति धनुरर्पयति ।)

रामः—(प्रणम्य ।) गृहीतेयमाज्ञा ।

ज्योति सम्राट् प्राणेषु हृद्य तज्ज्योति.' इत्यादिक द्रष्टव्यम् । ज्योति शब्देन स्वय-प्रकाशकत्वं विवक्षितम् । तच्च धर्मभूतज्ञानेऽप्यस्तीति प्रत्यगित्युक्तम् । प्रत्यञ्चतीति प्रत्यक् । भाववाचिना प्रतिशब्देन प्रकाशशेषिलमुक्त तदेव स्वस्मै भासमानत्वं नैयायिकाभिमतजडात्मवादव्युदासाय ज्योतिरित्युक्तम् । अत्र प्रशमोक्तिर्दमादीनामुपलक्षणार्थम् । अनेन 'शान्तो दान्त उपरतस्तितिक्षु समाहितो भूत्वात्मन्येवात्मानं पश्यति' इति श्रुत्यर्थो दर्शित । अभिन्नोऽविनष्ट शिव मङ्गलकर. सकल्पो मानस कर्म यस्य तत्तथोक्तमन्तःकरणं मनस्तेऽस्तु । पूर्वत्रात्र चाशिषि लोट् ॥ ३६ ॥ **वत्सेति** । इतस्तावत् । आगन्तव्यमिति शेष. ॥ **आज्ञापयेति** । किमितिकर्तव्यमिति शेष. ॥ **यदिति** । क्षत्रविच्छेदात्क्षत्रध्वसनाद्विश्रान्तेनापि विरतेनापि मया यद्धनुर्धारितं धृतं तदेतद्धनुरधुना त्वया मद्दमनानन्तरकाले करणशून्यता युद्धात्मकव्यापारशून्यता धत्ते ॥ ३७ ॥ परशुस्त्विध्मादीनामिध्मसमित्काष्ठाना व्रश्चनं च्छेदनं प्रयोजनं यस्य स तथोक्त. सन्मध्येव तिष्ठत्विति शेषः । धनु.परश्वधयोर्मध्ये परश्वधस्य सप्रयोजनत्वात्स मयि तिष्ठतु । धनुषस्तु मयि निष्प्रयोजनत्वात्त्वयि च सप्रयोजनत्वात्तवेदमस्त्वित्याह—**पुण्यानामित्यादिना** । दण्डकाया वने पुण्याना सरितां पावनीना गोदावर्यादिनदीना तटेषु तीरेषु भूयासो बहुतरा ये ऋषयो निवसन्ति तेषु विषये । लङ्घाया सीदन्ति तिष्ठन्तीति लङ्घासद । 'सत्सूद्विष–' इत्यादिना क्विप् । विध्वंसाय विध्वंस कर्तुम् । ऋषीणा हानिं कर्तुमित्यर्थ । चरन्ति सचरन्ति तेषा राक्षसाना वधे त्वस्य धनुष उपयोग उपकारकता भवेत् । सप्रत्यमुना धनुषा सह एषोऽधिकारो राक्षसवधे कर्तृभावो वत्स एव स्थितस्त्वय्येव तिष्ठति ॥ ३८ ॥ इति धनुरर्पयति । इत्युक्त्वा धनुर्ददातीत्यर्थ· ॥ **प्रणम्येति** । इयमाज्ञा परशुरा-

जामदग्न्यः—(सास्रं परिक्रम्य ।) आयुष्मन्, प्रतिनिवर्तस्व ।
(इति निष्क्रान्त ।)

रामः—(सबाष्पम् ।) गतो भगवान्भार्गवः । (विचिन्त्य ।) अपि नामान्येन केनचिदुपायेन दण्डकारण्यं प्रतिष्ठेयम् । कथं च रामप्रियाद्गुरुजनादेवं स्यात् ।

न्यस्तशस्त्रे भृगुपतौ परतन्त्रे तथा मयि ।
कष्टमुत्सारिताः क्रूरैर्यातुधानैस्तपोधनाः ॥ ३९ ॥

(नेपथ्ये ।)

आर्य,

मध्यमायाः प्रियसखी मातुर्नो मन्थरेति या ।
सा प्राप्तेयमयोध्यायास्तव राम दिदृक्षया ॥ ४० ॥

रामः—साधु यदीदमस्यां प्रवृत्त्या शिशुप्रवासदौर्मनस्यं विच्छिद्येत । तद्वत्स लक्ष्मण, समुपसर्पय ।

मेण कृता राक्षसवधाज्ञा गृहीता । मयेति शेष । एष सचितार्थप्राप्तिरूप क्रम उक्त ॥ **आयुष्मन्निति** । आयु शब्दाद्भूम्नि मतुप्प्रत्यय । प्रतिनिवर्तस्व । अल मामनुगम्य, निवृत्तो भवेत्यर्थः । इत्युक्त्वा निष्क्रान्त इत्यर्थ· ॥ **अपि नामेति** । अन्येन भार्गवानुगमनादन्येनापि प्रतिष्ठेय किम् । प्रस्थित स्यामित्यर्थ· । अत्र वितर्कप्रतिपादकवाक्यात्मकं रूप नाम सध्यङ्गमुक्तम् । **कथं चेति** । प्रियो रामो यस्य स रामप्रिय । 'वा प्रियस्य' इति प्रियशब्दस्य परनिपात । गुरुजनाद्धेतोरेवं दण्डकारण्यगमनं कथं स्यात् । गुरुजनो मम दण्डकारण्यगमनहेतुर्न भवति रामप्रियत्वादित्यनुमानमत्र विवक्षितम् । अतोऽत्र लिङ्गादभ्यूहनात्मकमनुमानं नाम सध्यङ्गमुक्तम् । **न्यस्तेति** । भृगुपतौ परशुरामे न्यस्तानि त्यक्तानि शस्त्राण्यायुधानि येन स तथोक्तस्तथाविधे सति । 'शस्त्रमायुधलोहयो' इति रत्नमाला । तथा मयि परतन्त्रे सति गुरुजनाधीने सति । यातुधानावकाशहेतुत्वेन सादृश्ये तथाशब्द । क्रूरैर्हिंसकैर्यातुधानै राक्षसै· कर्तृभि । तप एव धनं प्राणेभ्योऽपि रक्षणीयं येषा ते तथोक्ता ऋषय· ततो भङ्गभिया शमुमसमर्था इत्यर्थ । उत्सारिता निष्कासिता । भवन्तीति शेष । कष्टं दु खं स्यात् । 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमर ॥ ३९ ॥ **मध्यमाया इति** । हे राम, नोऽस्माकं मध्यमाया मातु· । कैकेय्या इत्यर्थ । प्रियसखी मन्थरेति मन्थरानाम्नी । यास्तीति शेष· । सेयं मन्थरा तव दिदृक्षया त्वद्दर्शनेच्छयायोध्यायाः । अपादाने पञ्चम्यन्तमिदम् । प्राप्ता । आगतेत्यर्थ ॥ ४० ॥ **साध्विति** । अस्या प्रवृत्त्या मन्थराहताया वार्तायाम् । 'वार्ता प्रवृत्तिर्वृत्तान्त' इत्यमर । इदमस्मदपेक्षितं शिश्वोरावयो प्रवासेन देशान्तरस्थित्या दौर्मनस्यं दु खितमनस्कत्वं यदि विच्छिद्येत नास्तीत्युपलभ्येत यदि साधु समीचीनम् । तत्तस्मा-

(ततः प्रविशति लक्ष्मण शूर्पणखा च ।)

शूर्पणखा—(स्वगतम् ।) [1]आविट्ठह्मि मन्थरासरीरे सुप्पणहा । वसिट्ठविस्सामित्तगमणेण सुसमाहिदम् । अह्मो एसो परसुरामविअई खत्ति-अकुमारो रामो । (निर्वर्ण्य ।) अह्मो समग्गसोभग्गलच्छीपरिग्गहेण लोअणरसाअणं सोम्मं से सरीरणिम्माणम्, जं दाणिं चिरआलवेहव्वदु-क्खप्पमुसिदसंसारसोक्खस्स वि जणस्स चारित्तं हिअए समक्खिवेदि ।

रामः—(उपसृत्य ।) अयि मन्थरे, अपि कुशलमम्बायाः ।

शूर्पणखा—[2]कुसळं सुहं अ । वच्छ, सा सदा पण्णुदत्थणी मज्झमा

---

१. आविष्टास्मि मन्थराशरीरे शूर्पणखा । वसिष्ठविश्वामित्रगमनेन सुसमाहितम् । अहो एष परशुरामविजयी क्षत्रियकुमारो रामः । अहो समग्रसौभाग्यलक्ष्मीपरिग्रहेण लोचनरसायनं सौम्यमस्य शरीरनिर्माणम्, यद्दिदानीं चिरकालवैधव्यदुःखप्रमुषितससारसौख्यस्यापि जनस्य चारित्र हृदये समाक्षिपति ।

२. कुशल सुखं च । वत्स, सा सदा प्रस्नुतस्तनी मध्यमा ते माता परि-

---

त्समुपसर्पय समीपं प्रापय । मन्थरामिति शेष. ॥ **सुसमाहितमिति** । कार्यमिति शेष । निर्व्याक्षेपमस्मत्कार्यमित्यर्थ । निर्वर्ण्यालोक्य । 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमर । समग्रस्य सपूर्णस्य सौभाग्यस्य सौन्दर्यस्य लक्ष्म्याः समृद्धे परिग्रहेण स्वीकारेण हेतुना लोचनाना जगन्नयनाना रसायनं रसायनाख्यौषधविशेषम् । 'यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्' इति वाग्भट । 'द्रष्टृणा रामसौन्दर्यं जरादोषमपोहति' इत्यर्थ .। उक्तं च दशरथेनापि—'नन्दामि पश्यन्नपि दर्शनेन भवामि दृष्ट्वा च पुनर्युवेव' इति । अनेन शूर्पणखया स्वकीयजरादोषचोद्यं प्रत्युक्त भवति । सौम्य सोमसबन्धि । 'सोमाट्ट्यण्' इति ट्यण्प्रत्यय । 'सौम्य पुमान्बुधे विप्रे त्रिषु स्यात्सोमदैवते । रम्येऽनुग्रे च' इति रत्नमाला । शरीरनिर्माण शरीरसृष्टि । **यदित्यादि** । यद्रामस्य शरीरनिर्माणमिदानीमत्यन्तजरायामपि चिरकालवैधव्यदु खेन बहुकालानुवृत्तभर्तृमरणदु:खेन । आदिकाले रावण एवास्याः पतिं जघानेत्युत्तरश्रीरामायणे स्पष्टम् । प्रमुषितं प्रणाशितं ससारसौख्यमात्मना देहपरिग्रहप्रयोजनीभूतयोषित्पुरुषससर्गसुखं यस्य स तथोक्तस्तथाविधस्यापि जनस्य । ममेत्यर्थ· । चारित्रं पातित्रत्यात्मकं वृत्तम् । द्वितीयान्तमिदम् । 'भूवादिगृभ्यो णित्रन्' इति प्रक्रम्य 'चरेर्वृत्ते' इत्यनेन चरधातोर्णित्रन्प्रत्ययेन चारित्रशब्दो निष्पन्नः । 'चारित्रं शीलम्' इति वैयाकरणा । हृदये मनसि समाक्षिपति चालयति । 'क्षिपु निरसने' ॥ अपि कुशलम् । कुशलं पृच्छयत इत्यर्थः । 'गर्हा समुच्चयप्रश्नशङ्कासभावनास्वपि' इत्यमर· ॥ **कुशलं सुखं चेति** । कुशलं मन प्रियम्, सुखमात्मसुखम् । धनधान्यरत्नवस्त्रादिना कुशलम्, अन्नपानादिभिरारोग्येण च सुखमिति भेदः । 'कुशलं क्षेममस्त्रियाम्', 'शर्मसातसुखानि च' इत्यमर । सदा प्रस्नुतस्तनी । प्रस्नुतौ पुत्रस्ने-

रामः—अहो प्रसादोत्कर्षः ।

तत्रैव गमनादेशो यत्र पर्युत्सुकं मनः ।
न चेष्टविरहो जातः स च वत्सोऽनुजोऽनुगः ॥ ४२ ॥

लक्ष्मणः—दिष्ट्यानुमोदितोऽहमार्येण ।

रामः—आर्ये मन्थरे, प्रस्थितोऽसि ।

शूर्पणखा—[1]णमो दाणिं भअवदो ससारस्स जस्सिं ईदिसा वि कप्पद्दुमा परोहन्दि ।

(इति निष्क्रान्ता ।)

लक्ष्मणः—आर्य, मातुलो युधाजिदार्यभरतसहचरस्तातमुपसर्पति ।

रामः—दिष्ट्या । कष्टं च ।

अपरिष्वज्य भरतं नास्ति मे गच्छतो धृतिः ।
अस्मत्प्रवासदुःखार्तं न त्वेनं द्रष्टुमुत्सहे ॥ ४३ ॥

---

१. नम इदानी भगवते संसाराय, यस्मिन्नीदृशा अपि कल्पद्रुमाः प्ररोहन्ति ।

तस्मात्परिजनात् । 'अन्यारादितरर्ते–' इत्यादिना पञ्चमी । अन्य. परिजनो नानुव्रजेन्नानुगच्छेत् । अत्रापीतिशब्दोऽध्याहर्तव्य· । इति वाचयतीति पूर्वेण सबन्ध· ॥ ४ ॥ प्रसादोत्कर्षोऽनुग्रहातिशय । अहो । विस्मयनीय इत्यर्थः । **तत्रेति** । मनो यत्र दण्डकाया पर्युत्सुकं राक्षसकृतमुनिजनपीडानुसधानेन गन्तुं सोत्कण्ठम् । स्थितमिति शेषः । तत्रैव दण्डकायामेव गमनादेशो गमनाज्ञा । कृत इति शेष । 'आङ्पूर्वो दिशिर्नियोक्तृप्रयोजनवचन.' इति न्यासकार । कि चेष्टस्य प्रियस्य विरहो न जातः । कथमित्यत्राह—स चेति । अनुजो वत्स स लक्ष्मणोऽनुगश्चानुगन्ता च । आदिष्ट इति शेष ॥ ४२ ॥ **दिष्ट्येति** । आर्येण रामेणानुमोदितोऽहं मध्यमाम्बयादिष्टवनानुगमने प्रीतिविषयीकृतोऽहम् ॥ **आर्ये इति** । मातु. प्रियसखीत्वादार्यशब्दप्रयोग ॥ **नम इति** । प्राकृते चतुर्थ्यर्थभावात्ससारस्येति षष्ठी । ससारः प्राणिना प्रपञ्चस्तस्य स्वञ्चनासाफल्यहेतुत्वाद्भगवत इति पूजानिर्देश. । ईदृशा· पितृवाक्यपरिपालनादिरूपश्रद्धातिशययुक्तरामलक्ष्मणादिरूपा कल्पद्रुमा । वनगमनाभ्युपगमेन स्वाभीष्टसपादनात्कल्पवृक्षत्वोक्तिरूपणम् । प्ररोहन्ति । जायन्त इत्यर्थ । 'रुह बीजजन्मनि प्रादुर्भावे च' इति धातुपाठ ॥ **मातुल इति** । मातुल कैकेय्या भ्राता । लक्ष्मणं प्रति भरतस्य ज्येष्ठत्वादार्यत्वम् । तात दशरथम् ॥ दिष्ट्या । कष्टं च । आनन्दो दु खं च युगपद्भवत इत्यर्थ. । कुत इत्यत्राह—**अपरिष्वज्येति** । भरतमपरिष्वज्य भरतमनालिङ्ग्य गच्छतो मे दण्डकावनं गच्छतो मम धृतिर्नास्ति । सत्ता न भविष्यतीत्यर्थ । 'धृतिर्धारणधैर्ययो' इत्यमरः । अस्माकं लक्ष्मणस्य मम च प्रवासेन देशान्तरगमनेन दु.खार्त दु खपीडितमेनं भरतं द्रष्टुम् । न तूत्सहे नैव व्यवस्यामि । परिष्वङ्गे कर्मतयोपात्तस्य दर्शने कर्मतयोपादानेनान्वादेशादेनादेश ।

(प्रविश्य ।)

युधाजिद्भरतौ—(दशरथमुपसृत्य) देव, श्रूयताम् । यदेकायनीभूय सर्वाः प्रकृतयस्त्वां विज्ञापयन्ति—

'त्रय्यास्त्राता यस्तवायं तनूज-
स्तेनाद्यैव स्वामिनस्ते प्रसादात् ।
राजन्वन्तो रामभद्रेण राज्ञा
लोकाः सर्वे पूर्णकामाश्च सन्तु ॥ ४४ ॥'

दशरथः—सखे जनक,

प्रियं कल्याणकामाभिः प्रजाभिश्चोदिता वयम् ।
किंतु रामप्रियौ नेह मैत्रावरुणकौशिकौ ॥ ४५ ॥

जनकः—

परोक्षे सुकृतं कर्म तयो. प्रीतिं करिष्यति ।
मन्त्रज्ञो वामदेवस्तु भगवानास्त एव हि ॥ ४६ ॥

प्रयाणकाले भरतपरिष्वङ्गादानन्द , प्रयाणहेतुकभरतदु खदर्शनाद्दु:खं चेति सुखदुःखयोर्यौगपद्यमिति भावः ॥ ४३ ॥ एकायनीभूय रामाभिषेकात्मकामीष्टरूपैकाधिकरणस्थिता भूत्वा । 'अयन निलये मार्गे दक्षिणोदग्गतौ रवे ' इति रत्नमाला । सर्वा प्रकृतयः समस्ताः पौराणा श्रेणय' । 'राज्याङ्गानि प्रकृतय पौराणा श्रेणयोऽपि च' इत्यमरः । **त्रय्या इति** । त्रय्या वेदस्य त्राता रक्षको योऽयं तव तनूज । भवतीति शेष. । तेन तथाविधेन । त्रयीरक्षकत्वादेर्भरतादिसाधारण्यं मत्वाह—रामभद्रेणेति । भद्रश्चासौ रामश्च रामभद्र । 'शुभमङ्गलयोर्भद्र स्याद्रम्यश्रेष्ठयोस्त्रिषु' इति रत्नमाला । बहुलग्रहणाद्भद्रशब्दस्य परनिपात । यद्वा भद्र इव रामो रामभद्रः । 'उपमित व्याघ्रादिभि –' इत्यादिना समास । 'भद्रश्चापि गजान्तरे' इति रत्नमाला । राज्ञा मुख्यराजत्ववता सर्वे लोका राजन्वत शोभनराजयुक्ता. पूर्णकामाश्च विषयसिद्धिभि परिपूर्णाभिलाषाश्च । विधेयविशेषणमिद द्वयम् । स्वामिनस्ते प्रसादात्परमेश्वरस्य तवानुग्रहात्सन्तु भवन्तु । प्रार्थनाया लोट् । इति विज्ञापयन्तीति पूर्वेण सबन्ध. ॥ ४४ ॥ **प्रियमिति** । कल्याण शुभकर कामोऽभिलाषो यासा तास्तथोक्तास्ताभि प्रजाभि कर्त्रीभि. । स्वानुकूलत्वमानन्दत्वं स्वस्यान्येषा चाविशेषेणानुकूलत्वं कल्याणत्वमित्यभियुक्ता । वयमह प्रियं सर्वप्रियं रामाभिषेकं चोदिताः । अनुशिष्टा इत्यर्थः । चोदयतेर्द्विकर्मकत्वात्प्रियमित्यस्यापि कर्मसमर्पकत्वम् । किंतु तथात्वेऽपि रामप्रियौ प्रियरामौ, मैत्रावरुणकौशिकौ वसिष्ठविश्वामित्रावित्यस्मिन्देशे न स्त इत्यर्थः । तयो सनिधानमेव विलम्बहेतुरिति भाव ॥ ४५ ॥ **परोक्ष इति** । वसिष्ठविश्वामित्रयोरसनिधौ । अक्ष्णः परमिति विग्रहे 'प्रतिपर–' इत्यादिना समा-

दशरथः—यद्येवं तदयं जामदग्न्यविजयोत्सवः प्रसज्यतामभिषेकमहोत्सवेन । यो यदर्थी महोत्सवेऽस्मिंस्तत्तस्मै दीयताम् ।

रामः—(उपसृत्य प्रणम्य च ।) अहं तावदर्थी ।

दशरथः—वत्स, केन ।

राजा—

योऽसौ वरद्वयन्यासस्तं माता मेऽद्य मध्यमा ।
यथेष्टं नाथते तात तत्प्रसादार्थिनो वयम् ॥ ४७ ॥

दशरथः—

सत्यसंधा हि रघवः किं वत्स विचिकित्ससि ।
त्वयि दूतेऽपि कस्तस्याः प्राणानपि धनायति ॥ ४८ ॥

सान्तविधानसामर्थ्यादव्ययीभाव. ।'परोक्षे लिट्' इति निपातनात्परस्यादेरुकारादेश्च । सुकृतं सुष्ठु कृत कर्म रामाभिषेकात्मकं कर्म तयोर्वसिष्ठविश्वामित्रयो. प्रीतिमानन्दं करिष्यत्युत्पादयिष्यति । अतस्तयोरसनिधानेऽपि न दोष इति भावः । ननु पौरोहित्यादिकं क कुर्यादित्यत्राह—मन्त्रज्ञ इति । मन्त्रज्ञोऽभिषेकरूपानुष्ठेयार्थप्रकाशक वेदभागज्ञोऽभिषेकार्थगुप्तवादज्ञश्च । 'वेदभेदे गुप्तवादे मन्त्र.' इत्यमरः । भगवान्वामदेव आस्त एव हि । अत पौरोहित्यादिकं सुलभमित्यर्थ ॥ ४६ ॥ **यद्येवमिति** । एवं यदि पूर्वोक्तप्रकारो यदि तत्तस्मादयम् । 'प्रवर्त्यन्ता मङ्गलानि' इति पूर्वोपक्रान्त इत्यर्थ । जामदग्न्यविजयोत्सव परशुरामविजयप्रयुक्त उत्सवोऽभिषेकमहोत्सवेन चिन्तितमेव तन्मध्योपनिपतितेन रामाभिषेकात्मकमहोत्सवेन कर्त्रा प्रसज्यतामुपजीवनीयाज्ञो भवेत् । परशुरामविजयोत्सवाङ्गान्येव रामाभिषेकाङ्गानि भवन्तिवति भाव । तदुक्तं तार्किकै —'अन्यार्थानुष्ठिताङ्गजन्योपकारस्यान्येनोपजीवनं प्रसङ्ग ' इति । **य इति** । अस्मिन्महोत्सवे रामाभिषेकरूपमहोत्सवे यः प्राणी यदर्थी येन वस्तुना सापेक्षो भवति । 'तृतीया तत्कृत–' इत्यादिना समासः । तद्वस्तु तस्मै दीयताम् । विध्यर्थे लोट् । इदं च रामाभिषेकस्य वैशेषिकाङ्गम् । यद्यपि परशुरामविजयोत्सवेऽपि वस्त्राभरणादिकं दीयते, तथापि तत्र दातुरिच्छया दानम्, अत्र त्वर्थिनामनुरोधेन दानमिति भवतीदं वैशेषिकाङ्गम् । **अहमिति** । तावच्छब्द. क्रमार्थक· । तिष्ठन्त्वन्ये, अर्थिनामहमेव प्रथमोऽर्थी भवामीत्यर्थ ॥ **केनेति** । केन । वस्तुनेति शेष ॥ **योऽसाविति** । असावदूरविप्रकृष्टो यो वरद्वयरूपो न्यासो भूयोऽपि स्वीकार्यत्वेन निक्षिप्तोऽर्थ. । 'पुमानुपनिधिर्न्यास ' इत्यमर. । तं वरद्वयं न्यास मे मध्यमा माता कैकेयी यथेष्टमिष्टविशेषमनतिक्रम्य नाथते याचते । 'नाथृ नाधृ याञ्चोपतापैश्वर्याशी षु' । भवता सामान्येन दत्तं वरद्वयं स्वाभीष्टविशेषे व्यवस्थाप्य याचत इति भाव. । हे तात, वयमहं लक्ष्मणादयश्च तस्याः प्रसादेन भवतोऽनुग्रहेणार्थिन. सापेक्षा । भवाम इति शेष ॥ ४७ ॥ **सत्यसंधा**

रामः—वत्स, वाच्यताम् ।

(लक्ष्मण 'अस्त्वेकेन' (४।४१) इत्यादि वाचयति ।)

सर्वे—कथमन्यदेव किमपि । हा हताः स्मः ।

(राजा मूर्च्छति ।)

रामलक्ष्मणौ—तात, समाश्वसिहि समाश्वसिहि ।

जनकः—

इक्ष्वाकुवंशतिलकस्य नृपस्य पत्नी
तस्मिन्विशुद्धिमति राजकुले प्रसूता ।
अत्याहितं किमपि राक्षसकर्म कुर्या-
दार्या सती कथमहो महदद्भुतं नः ॥ ४९ ॥

रामः—तातपादाः,

सत्यसंधाः स्थ यदि वा रामो वा यदि वः प्रियः ।
तत्प्रसीदत मे माता पूर्णकामास्तु मध्यमा ॥ ५० ॥

इति । रघवो रघुवंशजा सत्यसधा यथार्थप्रतिज्ञा । 'सधावधौ प्रतिज्ञायाम्' इति रत्नमाला । भवन्तीति शेष । हि. प्रसिद्धौ । उक्त च पुराणरत्ने—'न ह्यर्थिन कार्यवशाभ्युपेता ककुत्स्थवशे विमुखा. प्रयान्ति । किंवर्थिनामर्थिं' तदानदीक्षाकृतव्रतं श्लाघ्यमिदं कुलं ते ॥' इति । किं विचिकित्सस्यस्मिन्नर्थे कि सशयवानसि । 'विचिकित्सा तु सशय' इत्यमर । हे वत्स, त्वयि तस्या दूतेऽपि मम प्राणभूते त्वयि तस्या कैकेय्या संदेशहरेऽपि क प्राणानपि सर्वापेक्षितान्प्राणानपि धनायत्यभिकाङ्क्षति । 'अशनायोदन्यधनायाबुभुक्षापिपासागर्वेषु' इति गर्धशब्दिताभिकाङ्क्षाया धनायेति निपातिताल्लट् । मत्प्राणेक्षितेष्वपि तत्राभिकाङ्क्षया प्राणा अपि मया दीयन्त इत्यर्थः । अप्रकरणेऽपीष्टजनातिसधानात्मकमधिबलमुक्तम् ॥ ४८ ॥ **कथमिति** । अन्यदेव किमपि प्रकृतरामाभिषेकादन्यदेव वनगमन मनसापि चिन्तयितुमनर्हम् । अत्रापतितमिति शेषः । हता स्म । दैवेनेति शेष. । हाशब्दो विषादे ॥ **इक्ष्वाकिति** । इक्ष्वाकुवंशतिलकस्येक्ष्वाकुवंशश्रेष्ठस्य । मुखालकृतिवाचिनस्तिलकशब्दस्य गौण्या श्रेष्ठपरत्वम् । नृपस्य दशरथस्य पत्नी तत्कर्तृककर्मफलभोक्त्री । 'पत्युर्नो यज्ञसयोगे' इति ङीप्, नकारश्च । विशुद्धिमति तस्मिन्राजकुले केकयकुले प्रसूता जनिता । कैकेयीति शेष. । आर्या सती साध्वी सती । 'गौर्यामार्या त्रिषु त्वेष कुलीनन्यायसाध्विषु' इति रत्न माला । किमपि मनसा चिन्तयितुमनर्हमत्याहितं लोकभयकरम् । 'अत्याहितं महाभीति. कर्म जीवानपेक्षि च' इत्यमर' । राक्षसकर्म रक्षसामसाधारण कर्म । रक्ष शब्दात् 'तस्येदम्' इत्यण् । कथं कुर्यात् । कर्तु नार्हेत्यर्थ । इदं नोऽस्माकं महदद्भुत महाश्चर्यम् । भवतीति शेष ॥ ४९ ॥ **सत्येति** । तातपादा इत्यादि । यूय

दशरथः—एवमस्तु । का गतिः ।

जनकः—हा वत्स रामभद्र, हा लक्ष्मण,

पुत्रसक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतम् ।

त्वया तत्क्षीरकण्ठेन प्राप्तमारण्यकव्रतम् ॥ ५१ ॥

वत्से धन्यासि यस्यास्ते गुरुनियोगत एव भर्तुरनुगमनं जातम् ।

दशरथः—हा वत्से जानकि, कङ्कणधरैव रक्षसामुपहारीकृतासि ।

(इत्युभौ मूर्च्छत ।)

रामः—वत्स लक्ष्मण, अत्यापन्नो गुरुजनः । कथं नामैतत् ।

सत्यप्रतिज्ञा भवथ चेत् । स्थेत्यस्तेर्लटि मध्यमपुरुषबहुवचनम् । 'सत्यसधा हि रघव ' इत्यनुपदमेवोक्तं न विस्मर्यते चेदित्यर्थ । ननु त्व प्राणेभ्योऽपि प्रियतम । त्वद्वियोगे मम च प्राणात्ययो भवेत् । अत प्राणात्ययेऽनृतवदनं न दोष इति शास्त्रमर्यादेत्यत्राह—राम इति । रामो युष्माकं प्रियो यदि । इष्टश्चेदित्यर्थ । 'त्वयि दूतेऽपि' इत्यादिकमप्यनुपदमेवोक्त न विस्मर्यते चेदित्यर्थ । युष्माभिर्मम वनगमनानभ्यनुज्ञाने राम एव युष्माक दुर्लभो भवेदिति हृदयम् । वाशब्दद्वयमपि विकल्पे । तत्तदा मे प्रसीदत मम प्रसाद कुरुत । किमर्थमित्यत्राह—मातेति । मे इत्यनुषङ्ग । मे मध्यमा माता पूर्णकामा विषयसिध्या परिपूर्णमनोरथास्तु । प्रार्थनाया लोट् । मेशब्दस्य प्रसीदतेति पूर्ववाक्यावयवत्वान्न वाक्यादित्वम् ॥ ५० ॥ **एवमस्त्विति** । अस्त्वेकेनेत्यादिनोक्तप्रकारोऽस्त्वित्यर्थ । का गति । एतेन विना नान्यो रामलाभोपायोऽस्तीत्यर्थ. । एवं हि सति कालान्तरे वास्माकं रामलाभ सभाव्यते । अन्यथा तु न तथेति हृदयम् ॥ **पुत्रेति** । पुत्रसक्रान्ता आश्रयशैथिल्यात्स्वयमेवागता । न तु तैर्मनःपूर्वकं निहितेत्यर्थ । तथाविधा लक्ष्मीर्यैषा ते तथोक्तास्तैरित्यर्थ । उर प्रभृतित्वात्कप् । 'लक्ष्मी सपद्मा शोभा' इति रत्नमाला । वृद्धेक्ष्वाकुभिर्यदारण्यकव्रतं धृतम् । अभूदिति शेष । तदारण्यकानामरण्यसदा व्रतम् । 'अरण्यान्मनुष्ये' इति वुञ् । क्षीर कण्ठे यस्य स तथोक्तस्तेन बालेनेत्यर्थ । त्वया प्राप्त लब्धम् । अभूदिति शेष. । पूर्वेषा हि पुत्रवत्त्वमुपभुक्तराज्यकत्वं च यावच्छरीरशैथिल्य वार्धक चेत्येतेषा समुदितत्व एवारण्यकव्रतधारण जातम् । तव तु तेषु कस्यचिदप्यभावेऽप्यारण्यकव्रतधारणं जातमिति तेभ्यस्तव महद्वैलक्षण्यं जातम् । व्रतमित्यसमञ्जसवृत्तान्तव्यावृत्ति ॥ ५१ ॥ **वत्स इति** । गुरुनियोगत एव श्वशुराज्ञयैव ॥ **हा वत्से इति** । 'अस्माकं तु जनकसुता दुहितैव' इत्युक्त्वा दुहितृत्वाभिसधिना वत्से इति सबुद्धि । कङ्कणधरैव वैवाहिककङ्कणयुक्तैव । 'निर्वृत्ते त्वथ कल्याणे' इत्यादि स्मृत्वा कल्याणनिर्वर्तनानन्तर हि कङ्कणमोचन विहितम् । कङ्कणसत्त्वे तु कल्याणनिर्वर्तनानवगमात्कल्याणमध्य एव रक्षसामुपहारीकृतासीति दु खातिशयो हाशब्देन द्योत्यते । यद्यपि द्वितीयाङ्कान्ते 'देव्य कङ्कणमोचनाय मिलिता ' इत्युक्तं तथापि

लक्ष्मणः—ईदृशोऽयमापातकरुणस्नेहसवेगः । किमत्र क्रियते । प्रतिषिद्धं च नः कालहरणमम्बया । तदलमतिस्नेहकातर्येण ।

रामः—साध्वाचारनिष्ठ, साधु । अमनुष्यसदृशस्ते चित्तसारः । तद्वत्स, वैदेहीमानय ।

(लक्ष्मणो निष्क्रान्तः ।)

भरतः—मातुल मातुल, युक्तं सदृशमेतद्वो गृहस्य ।

युधाजित्—उद्भ्रान्तः संप्रमुग्धोऽस्मि वत्स ।

कल्याणकालातिशये तात्पर्यम् । 'उपायनमुपप्राह्यमुपहारस्तथोपदा' इत्यमर. ॥ अत्यापन्नोऽतिशयेनापदं प्राप्त । एतदापन्नत्वं कथ नाम केन प्रकारेण परिणंस्यत इति सभाव्यते । 'नामप्राकाश्यसभाव्यक्रोधोपगमकुत्सने' इत्यमरः । क्षिप्रमेव गुरुजनस्य प्राणात्ययान्मम वनगमनविघ्न सभाव्यत इति भाव ॥ **ईदृश इति ।** आपाते तदात्वे । 'भवेत्तदात्वेऽप्यापातः' इति रत्नमाला । भवितव्यतानुसधानादर्वागित्यर्थ. । करुणस्नेष्टजनवियोगजन्यदु खस्य स्नेहस्य तद्धेतुभूतप्रेम्णश्च सवेग सभ्रमः । अतिशय इति यावत् । 'समौ सवेगसभ्रमौ' इत्यमर. । ईदृशो मूर्च्छादिहेतुरित्यर्थ. । किमत्र क्रियतेऽत्र मूर्च्छाया कि क्रियते । किशब्द क्षेपे । वनगमनविलम्बो न कार्य इति भाव. । कुत इत्याह—**प्रतिषिद्धमिति ।** अम्बया कैकेय्या कालहरणं वनगमने कालविलम्ब. प्रतिषिद्धम् । निषिद्धमित्यर्थ. । 'यावन्नेन विहाय कालहरणं रामो वनं दण्डकाम्' इति हि लेखे स्थितमिति भावः । पितृमूर्च्छामातृनियोगयोर्बलाबलविचारे मातृनियोगो बलीयान् । 'पितुर्दशगुणं माता गौरवेणातिरिच्यते' इति शास्त्रात् । अत एवास्मिन्प्रकरणे रामायणे रामवचनम्—'न नूनं मम कैकेयि किंचिदाशंससे गुणम् । यद्राजानमवोचस्त्वं ममेश्वरतरा सती ॥' इति । राजा हीश्वरमात्रम् । कैकेयी त्वीश्वरतरेति तदभिप्रायः । तदिदमभिसधायाह—**तदलमिति ।** तत्तस्मात् । अम्बानियोगस्य बलीयस्त्वादित्यर्थ. । स्नेहकातर्येणालम् । पितृस्नेहप्रयुक्ताधीरतया साध्यं नास्तीत्यर्थ. ॥ **साध्विति ।** संमतौ द्विरुक्ति । आचारे मातृनियोगानुष्ठाने निष्ठा तात्पर्यं यस्य स तथोक्तस्तस्य सबुद्धि. । 'निष्ठा तु नाशे निष्पत्तावन्ते तात्पर्ययाब्दयो.' इति रत्नमाला । साधु साधु । सम्यगुक्त त्वयेत्यर्थ । **अमनुष्येति ।** ते चित्तसारस्तव कार्याकार्यविषयबलाबलानुसधानमूलको दुस्त्यजगुरुजनत्यागहेतुर्मनोबलममनुष्यसदृशो मनुष्यविसदृश. । लोकोत्तर इति यावत् । 'सारो बले स्थिरांशे च' इत्यमरः ॥ मातुल मातुलेति कुत्सने द्विरुक्ति । एतत्कैकेय्यभिमतं व कुलस्य युक्तं सदृशमनुरूपमिति क्षेपोक्तिरियम् । नानुरूपमित्यर्थः । युक्तं सदृशमिति पदद्वयमेकस्यानुरूपशब्दस्यार्थे वर्तते । तदुक्तमभियुक्तै.—'योग्यत्वे सति प्रकृष्टत्वं सादृश्ययुक्तमनुरूपत्वम्' इति ॥ उद्भ्रान्त उच्चलितः । 'भ्रमु चलने' इत्यस्मात् 'गत्यर्थाकर्मक–' इत्यादिना कर्तरि क्त. । सप्रमुग्धोऽस्मि समूर्च्छितोऽस्मि । पूर्ववत्क-

पतिर्मृत्योर्वक्त्रं व्रजति वनमेतत्सुतयुगं
वधूटी रक्षोभ्यो बलिरिव वराकी प्रणिहिता ।
निरालम्बो लोकः कुलमयशसा नः परिवृतं
स्वसुर्मे दौरात्म्यं जगदविकलं विक्लवयति ॥ ५२ ॥

(तत प्रविशति लक्ष्मण सीता च ।)

सीता—दिट्ठिआ[1] अणुमोदिदं म्हि अज्जेण ।

लक्ष्मणः—इयमार्या ।

रामः—इत इतः । (सीतालक्ष्मणाभ्या सह गुरुं प्रदक्षिणीकृत्य ।) मातुल,

---

१. दिष्ट्यानुमोदितास्म्यार्येण ।

प्रत्यय. । वत्सेति भरतं प्रति सबुद्धि. । **पतिरिति** । स्वसुरित्यादि । स्वसुरनेन वरद्वयाभिसधिना पति स्वभर्तां दशरथो मृत्योर्वक्त्रं व्रजति मरणं प्राप्स्यति । वर्तमानसामीप्ये लट् । एतत्सुतयुग रामलक्ष्मणात्मकपुत्रद्वयं कर्तृ । वनं व्रजतीत्यनुषङ्ग. । गमिष्यतीत्यर्थ । 'रामे वा भरते वापि विशेष नोपलक्षये' इति कैकेय्याः पूर्वाभिप्रायापेक्षया सुतयुगमित्युक्तम् । किच वधूटी यौवनप्रारम्भवती । तदुक्तं शान्दिकैः 'वधूटीचिरण्टीशब्दौ यौवनवाचिनौ' इति । 'जीवभर्त्री कुलस्था या वधूटी सा स्वयंवरा' इति त्रिकाण्डशेष । वराकी दयनीया । 'जल्पभिक्ष–' इत्यादिना वृङ् षाकन्प्रत्यय । षित्त्वान्ङीषि रूपम् । सीतेत्यर्थ । रक्षोभ्यो राक्षसेभ्य । 'चतुर्थी तदर्थ–' इत्यादिना बलिशब्देन चतुर्थ्याः समासविधानाद्बलिशब्दयोगे चतुर्थी । बलिरिवोपहार इव । 'करोपहारयो पुंसि बलि प्राण्यङ्गजे स्त्रियाम्' इत्यमर. । प्रणिहिता सकल्पिता । प्रक्षिप्ता भवतीति शेष । 'सीतालक्ष्मणमात्रकात्' इति रामानुव्रजनप्रत्ययेधे सीतायास्तया पर्युदासादिति भाव । किच लोको जनो निरालम्बो निराश्रयः । कृत इति शेषः । 'राज्य चाहं च रामस्य' इत्युक्तभरतस्वभावसमीक्षया निरालम्ब इत्युक्तम् । किच न कुलमयशसा कुलक्रमागतकीर्तिविपरीतप्रथया । 'कुलक्रमागता सा चेद्यश इत्यभिधीयते' इत्युक्ते. । 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्था. षट् प्रकीर्तिता ॥' इत्युक्तत्वान्नञो विपरीतार्थकत्वम् । परिवृतम् । व्याप्तमभूदिति शेषः । 'अश्वपतिर्वै भगवन्तो यं केकय· सम्प्रति ममात्मानं वैश्वानरमध्ये' इति वेदान्तप्रसिद्धस्यास्मत्कुलस्यायशो जातमिति भाव. । यत एवं ततो मे स्वसु सहजाया दौरात्म्यं दुर्बुद्धिरविकल जगत्सकलमपि लोकं विक्लवयति विह्वलयति । 'विक्लवो विह्वलः स्यात्तु' इत्यमर. । स्वदोषख्यापनाय ते मातुरित्यनुक्त्वा मे स्वसुरित्युक्तम् ॥ ५२ ॥ **दिष्ट्येति** । आर्येण श्वशुरेण । 'आर्यया' इति च पाठ. । श्वश्वा कैकेय्येत्यर्थः ॥ इयमार्या । ज्येष्ठभ्रातु पत्नीत्वादार्याशब्दः ॥ सीता-

एष तातश्च तातश्च प्रियापत्याश्च मातरः ।
आश्वासनीयाः शोकेऽस्मिन्भवतैव गता वयम् ॥ ५३ ॥

(इति परिक्रामति ।)

युधाजित्—(सावेगम् ।) कथं वोऽरण्ये त्यजामि । (उत्थायानुगच्छति ।)

भरतः—(अनुगच्छन् ।) मातुल मातुल, ब्रूहि किमिदानीं करोमि ।

युधाजित्—रामभद्र, अवेक्षस्व पादपरिचारकमरण्यानुगतं भरतम् ।

रामः—नन्वस्यापि वर्णाश्रमरक्षणे गुरुनियोगः ।

भरतः—लक्ष्मणस्य वा शत्रुघ्नस्य वा तद्भवतु ।

रामः—किमत्र कस्यचित्स्वरुचिः ।

भरतः—एतावत्येव मे स्वरुचिः ।

रामः—शक्यं नाम मयि तिष्ठति त्वयान्येन वा पितृनियुक्तमुल्लङ्घयितुम् ।

लक्ष्मणाभ्या सह सहितः सन् । **एष इति** । अस्मिञ्शोकेऽस्मद्वियोगदु खे एष तातो दशरथश्च तातश्च जनकश्च प्रियाणीष्टान्यपत्यान्यहं लक्ष्मण सीता च यासां तास्तथोक्ता । सीताया अप्यपत्यत्वं पूर्वोक्तदिशा द्रष्टव्यम् । मातर कौसल्यादयः कैकेय्या अप्यनुशयदु खमवर्जनीयमिति मातर इति बहुवचनम् । अवशिष्टा. पर·शत-दशरथपत्न्यो वा विवक्षिता । भवतैवाश्वासनीया । लघूकृतशोका कर्तव्या इत्यर्थ । ननु किमर्थमाश्वासनं त्वया तु न प्रयातव्यमित्यत्राह—गता वयमिति । न निवर्तामह इत्यर्थ । यद्वा ननु भरतशत्रुघ्नावाश्वासयतामित्यत्राह—गता वयमिति । वयं पुत्राश्चत्वारोऽपि । अत्र भरतशत्रुघ्नयोरकार्यक्षमत्वादूतप्रायत्वम् ॥ ५३ ॥ वो युष्मान् ॥ **किमिदानीं करोमीति** । किमनुगच्छाम्युतान्यदेव किमपि करोमीत्यस्मिन्सदेहे निर्णय ब्रूहीत्यर्थ ॥ **रामभद्रेति** । पादपरिचारकमरण्यानुगतं त्वत्पादं परिचरितुमरण्ये त्वामनुगतमित्यर्थ । 'तुमुन्ण्वुलौ क्रियाया क्रियार्थायाम्' इति ण्वुल् । अवेक्षस्व । मनागपाङ्गवीक्षणेनानुमन्यस्वेत्यर्थ ॥ **नन्विति** । नन्वित्यामन्त्रणेऽवधारणे वा । 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमर. । अस्य भरतस्य वर्णाना ब्राह्मणादीनामाश्रमाणा ब्रह्मचर्यादीना च रक्षणे गुरुनियोग पितुरादेश । यथा मम वनगमने गुरुनियोगस्तथा भरतस्य वर्णाश्रमरक्षणे गुरुनियोग इति समुच्चयस्यार्थ. ॥ **लक्ष्मणस्येति** । तद्वर्णाश्रमरक्षणम् ॥ **किमत्रेति** । अत्र पितृनियुक्तेऽर्थे कस्यचित्स्वरुचिः किम् । स्वेच्छा का व्यवस्थापिकेत्यर्थः । किशब्द. क्षेपे ॥ **एतावत्येवेति** । एतावति त्वदनुगमनमात्रे । अन्यत्र तु मम स्वरुचिर्न प्रयोजिकेति भावः । **शक्यमिति** । मयि तिष्ठति सप्राणे सति त्वयान्येन लक्ष्मणादिना पितृनियुक्तं समाज्ञप्तं वस्तु पितृनियोगो वा । भावे क्त. । पितृनियुक्तमिति द्वितीयान्तं प्रथमान्तं वा ।

भरतः—हा हा, कथं परित्यक्तोऽस्मि मन्दभाग्यः । (इति मूर्च्छति ।)

युधाजित्—वत्स, समाश्वसिहि समाश्वसिहि ।

भरतः—(आश्वस्य ।) मातुल, उद्धर माम् ।

युधाजित्—वत्स, एवं तावत् । (इति भरतस्य कर्णे कथयित्वा ।) रामभद्र, एवमयं विज्ञापयति—'यदेतद्भगवता शरभङ्गेण प्रेषितं तपनीयोपानद्युगं तदार्यः प्रसादीकरोतु' इति ।

रामः—(तदुन्मुच्य ।) गृहाणैतद्वत्स ।

भरतः—(शिरस्यारोप्य ।) हा आर्य ।

रामः—(परिष्वज्य ।) वत्स, मत्पादस्पृष्टिकया प्रतिनिवर्तस्व । सपदि संभावय चिरप्रमूढौ तातौ ।

भरतः—अयमिदानीमहम् ।

आद्ये पितृनियुक्तकर्मकमुल्लङ्घनं शक्यमित्यर्थः । द्वितीये पितृनियुक्त वस्तु तन्नियोगो वा । उल्लङ्घनगोचरशक्तिविषय इत्यर्थ. । शक्यमित्यत्र काक्वा नञर्थोऽन्तर्गत· । तथा च तवापि मदनुगमनं दु शकम्, लक्ष्मणादेरपि त्वद्वच्या वर्णाश्रमरक्षणं दु·शकम् । पितृनियोगोल्लङ्घिषु त्रिषु मम दण्डधरत्वादित्युक्त भवति ॥ **हेति** । परित्यक्तोऽस्मि । अनुगमनप्रतिषेधादिति भावः । मन्दभाग्य स्वल्पपुण्यफल कैकेय्या राज्यगर्द्धिकालम्बनत्वादहं स्वल्पभाग्य इत्यर्थ. ॥ **वत्सेति** । एवं तावदिति । अयं च सामान्यतो वाच्यनिर्देश. । कर्णे कथयित्वा कर्णे कथनमभिनीय । पश्चादस्य प्रकाशो भविष्यति । **रामभद्रेति** । अयं भरत एवं वक्ष्यमाणप्रकारेण । भगवता 'उत्पत्तिं प्रलयं चैव' इत्याद्युक्तज्ञानातिशययुक्तेन शरभङ्गेण शरभङ्गनाम्ना महर्षिणा प्रेषितं तपनीयोपानद्धो-र्हेममयपादुकयोर्युगम् । 'तपनीयं शातकुम्भम्' इत्यमर । 'पादुका । पादूरुपानत्स्त्री' इति चामर· । तदुपानद्युगमार्यो मम ज्येष्ठभ्राता रामः प्रसादीकरोतु प्रसादेन दत्तं करोत्विति प्रार्थनाया लोट् । इति विज्ञापयतीति पूर्वेण सबन्धः ॥ **तदिति** । तदुन्मुच्य पादुकायुगं पादाभ्यां वियोज्य । गृहाण स्वीकुरु ॥ **हा आर्येति** । पादुका प्रदानमात्रेण कथं मा विसर्जयसीति दु खमामीत्यर्थ ॥ **वसेति** । मत्पादस्पृष्टिकया । स्पृष्टिं करोतीति धात्वर्थोदेशे ण्वुल् । स्पृष्टिका स्पर्श । मत्पादयो स्पृष्टिका मत्पादस्पृष्टिका तया निमित्तेन । यदि मामनुगमनाय निर्बध्नासि तर्हि मह्यं दुह्यसीति मत्कृतेन मत्पादस्पर्शेन निमित्तेन प्रतिनिवर्तस्वेत्यर्थ. । यद्वा स्पृष्टौ मत्पादौ यस्या शपथक्रियाया सा मत्पादस्पृष्टिका । आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य परनिपात. । संज्ञाया कन् । मत्पादस्पृष्टिका । 'प्रत्ययस्थात्–' इतीत्वम् । मत्पादस्पृष्टिकया शपथक्रियया निमित्तेनेत्यर्थः । सपद्यस्मिन्क्षणे । 'सद्य सपदि तत्क्षणे' इत्यमरः । सभा-

नन्दिग्रामे जटां बिभ्रदभिषिच्यार्यपादुके ।
पालयिष्यामि पृथिवीं यावदार्यो निवर्तते ॥ ५४ ॥

(इति सीतारामौ प्रदक्षिणीकरोति ।)

लक्ष्मणः—आर्य भरत, लक्ष्मणः प्रणमति ।

(भरत परिष्वज्य बाष्पस्तम्भ नाटयति ।)

रामः—वत्स, तातौ सभावय ।

भरतः—कष्टम् । अद्यापि नोच्छ्वसितः । (इति वीजयति ।)

जनकः— (समुच्छ्वस्य । सर्वतोऽवलोक्य च ।) हा हा, मुषितोऽस्मि ।

दशरथः—(उच्छ्वस्य ।) वत्स रामभद्र, न गन्तव्यं न गन्तव्यम् ।

प्राणाः प्रयान्ति परितस्तमसावृतोऽस्मि
मर्मच्छिदो मम रुजः प्रसरन्त्यपूर्वाः ।
अक्ष्णोर्मुखेन्दुमुपधेहि गिरं च देहि
हा पुत्र मय्यकरुणः सहसैव मा भूः ॥ ५५ ॥

(सोन्मादमिव ।) भोः, क्व विशामीदानीं मन्दभागधेयः । (इति विक्लवौ भरतजनकाभ्यां नीयमानो निष्क्रान्तः ।)

युधाजित्—वत्स रामभद्र, पश्य ।

वय संभवन्तौ कुरु । तयोरसभवं परिहरेत्यर्थः । चिरात्प्रमूढौ मूर्च्छितौ ॥ **नन्दिग्राम इति** । आर्यो रामो यावन्निवर्तते तावत्पर्यन्तं जटा बिभ्रत्सन्नहमार्यपादुके नन्दिग्रामेऽभिषिच्य पृथिवीं पालयिष्यामीत्यर्थः ॥ ५४ ॥ बाष्पस्तम्भमश्रुण स्तब्धस्वकारणता नाटयत्यनुकरोति ॥ नोच्छ्वसित उच्छ्वासं न कुरुतः । श्वसित इत्यत्र 'रुदादिभ्यः सार्वधातुके' इति लडादेशस्य तस इडागमः । वीजयति । तथाभिनयतीत्यर्थः ॥ **हा हेति** । मुषितोऽस्म्यपहृतप्रयोजनोऽस्मि ॥ **प्राणा इति** । मम प्राणाः प्रयान्ति गन्तुमारभन्ते । किंच तमसाऽज्ञानेनावृतोऽस्मि व्याप्तोऽस्मि । किंच मर्मच्छिदः प्राणस्थानभेदिन्योऽपूर्वा नवा रुजो व्याधय । 'स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः' इत्यमरः । प्रसरन्त्यविच्छेदेनोत्पद्यन्ते । यत एवं ततः पुत्रमुखेन्दुं तव मुखचन्द्रमक्ष्णोरुपधेहि मम नेत्रसमीप प्रापय । किं च गिरं देह्यहं वनगमनान्निवृत्तोऽस्मीति वाचं वद । किं च त्वं सहसैवातर्कितमेव मयि त्वद्वियोगदुःखिते मय्यकरुणः करुणाशून्यो माभूर्न भवे । 'माङि लुङ्' इति लिङर्थे लुङ् ॥ ५५ ॥ सोन्मादम् । उन्मादश्चित्तविभ्रमस्तमभिनीयेत्यर्थः । क्व विशामि कुत्र प्रविशामि । मन्दभागधेयोऽल्पभाग्यः । 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः । विक्लवौ

एकीभूय शनैरनेकरसमप्युत्सन्नमेकक्रियो-
न्मुक्ताक्रन्दमितस्ततः किमिदमित्युद्भ्रान्तनारीनरम् ।
एतत्त्वत्पुरमन्यथैव सहसा सजातमापद्यते
यस्मिन्कर्दमितेषु वर्त्मसु घनैर्बाष्पाम्बुभिर्दुर्दिनम् ॥ ५६ ॥

रामः—मातुल मातुल, प्रतिनिवर्तस्व । अयं च वो हस्ते भरतः ।

युधाजित्—वत्स, अनुरुध्यस्व मामनुगच्छन्तम् ।

रामः—शान्तं पापम्, शान्तं पापम् । गुरवो यूयमनुगन्तव्या नानुगन्तारः । आत्मनातृतीयेन गन्तव्यमित्यम्बादेशः ।

युधाजित्—किमहमेकोऽनुगच्छामि । अपि तु सबालवृद्धाः प्रकृतयः कि न पश्यसि ।

विह्वल. सन् ॥ **एकीभूयेति** । हे वत्स रामभद्र, अनेकरसमपि भिन्नरुच्यपि । 'रसो रागे द्रवे हर्षे' इति विश्व । एकीभूयैकरुचिर्भूत्वा त्वयैकाभिलाष भूत्वोत्सन्नम् । दु खितमिति यावत्। एककिययैकव्यापारेणोन्मुक्त उच्चारित आक्रन्दो रोदनध्वनिर्येन तत्तथोक्तम् । किमिदमित्युद्भ्रान्ता निश्चयशून्या नारीनरा स्त्रीपुरुषा यस्मिंस्तत्तथोक्तम् । नार्यश्च नराश्चेति विग्रहे इतरेतरयोगद्वन्द्व । 'नृनरयोर्वृद्धिश्च' इति शार्ङ्गरवादिगणसूत्रेण नृशब्दान्डीनि वृद्धौ च सत्या नारीशब्दो निष्पन्नः । अतो नारीनरशब्दयो प्रकृतिभेदात् 'पुमान्स्त्रिया' इत्येकशेषो न भवति । 'यत्रोर्ध्व प्रकृतेर्विशेष.' इति महाभाष्योक्ति । अत एव 'नरनारीमयो हरि ' इति प्रयोगोऽपि साधु· । एतत्त्वत्पुर तव पुर सर्वमेवात्मैश्वर्यं जानातुरिति जनकाभिप्रायेण मिथिलानगर त्वत्पुरमित्युक्तम् । यद्वा । त्वदिति भिन्नं पदं पञ्चम्यन्तम् । एतत्पुर मिथिलानगर त्वत्वन्निमित्तं सहसा शीघ्रमन्यथैव सजातं सत्प्रस्तुतोत्सवप्रयुक्तानन्दरूपप्रकारातिरिक्तशोकरूपप्रकारविशिष्टं जात सदापद्यत आपन्न भवति । 'पद्लृ गतौ' उपसर्गवशादुक्तार्थे वृत्ति. । यस्मिन्पुरे घनै सान्द्रैर्बाष्पाम्बुभिर्नेत्रजलै. । 'बाष्पो नेत्रजलोष्मणो.' इति रत्नमाला । विशिष्टवाचिनोऽपि बाष्पशब्दस्याम्बुशब्दसमभिव्याहाराद्विशेषणमात्रपरत्वम् । कर्दमितेषु सजातपङ्केषु । 'पङ्कोऽस्त्री शादकर्दमौ' इत्यमर । वर्त्मसु मार्गेषु यद्दुर्दिनम् । भवतीति शेष. । 'मेघच्छन्नेऽह्नि दुर्दिनम्' इत्यमर. ॥ ५६ ॥ **वत्सेति** । अनुरुध्यस्व । कामयस्वेत्यर्थ ॥ **शान्तं पापमिति** । पूज्यस्य तव मदनुगमनोक्त्या त्वदीय पापं शम्यतादित्यर्थ· । 'आशसाया भूतवच्च' इति शम्यतेर्निष्ठा । कुत इत्यत्राह—**गुरव इति** । अनुगन्तव्या मयानुगमनार्हा नानुगन्तार. । मामनुगन्तुं नार्हा इत्यर्थः । हेत्वन्तरमप्याह—**आत्मनातृतीयेनेति** । मयेति शेषः । द्वावन्यावहं च तृतीयः । तथाविधेन मया गन्तव्यमिति मातुर्निर्देश इत्यर्थ. । 'सीतालक्ष्मणमात्रकात्परिजनादन्यो न चानुव्रजेत्' इत्युक्तेरिति भाव. । 'आत्मनश्च' 'पूरण इति वक्तव्यम्' इति सूत्रवार्तिकाभ्या तृतीयाया अळुक् ॥ **किमहमिति** । किशब्द. क्षेपे । नाहं

स्कन्धारोपितयज्ञपात्रनिचयाः स्वैर्वाजपेयार्जितै-
श्छत्रैर्वारयितुं तवार्ककिरणास्ते ते महाब्राह्मणाः ।
साकेताः सहमैथिलैरनुपतत्पत्नीगृहीताग्नयः
प्राक्प्रस्थापितहोमधेनव इमे धावन्ति वृद्धा अपि ॥ ५७ ॥

रामः—मातुल मातुल, गुरुभिरेव शिशवो धर्मलोपात्पालयितव्याः । तत्प्रसीद नः । प्रतिनिवर्त्यतामयं महाजनः । (इति प्रणमति ।)

युधाजित्—वत्स, उत्तिष्ठोत्तिष्ठ । बोधयित्वा प्रजाः क्वापि मन्द-भाग्यो गच्छामि ।

केवलोऽनुगच्छामीत्यर्थः । 'एके मुख्यान्यकेवला' इत्यमर । सबालवृद्धा बालवृद्ध-सहिता । 'वोपसर्जनस्य' इति सहशब्दस्य सभाव । प्रकृतयः पौरजनाः । **स्कन्धेति** । हे वत्स, ते ते साकेता अयोध्यावासिन । इमे महाब्राह्मणाः परम-पूज्या षट्कर्मचरिताश्च विप्रा । 'विप्रश्च ब्राह्मणोऽसौ षट्कर्मा यागादिर्युत' इत्य-मर । वृद्धा सन्तोऽपि । 'ते द्विजास्त्रिविधं वृद्धा ज्ञानेन वयसौजसा'इत्युक्तत्रिविध-वृद्धत्वयुक्ता सन्तोऽपीत्यर्थ. । स्कन्धेषु भुजशिर स्वारोपिता यज्ञपात्राणा स्रुक्चमसा-दीना निचया समूहा येषा ते तथोक्ता. सन्त , अनुपतन्तीभिरनुधावन्तीभिः पत्नी-भिर्भार्याभिर्गृहीतो ध्रियमाणोऽग्निर्गार्हपत्यादिर्येषा ते तथोक्ताश्च सन्त , प्राक्पूर्वमेव प्रस्थापिता होमधेनवो होमार्थदधिपयोघृतामिक्षादिहेतुभूता गावो येषा ते तथोक्ताश्च सन्तः । धेनूनां धावनाशक्त्या पूर्वमेव प्रस्थापनं मैथिलै सह मिथिलाभिजनैर्ब्राह्मणैः सार्धम् । 'सोऽस्याभिजन' इति साकेतमिथिलशब्दाभ्यामण् । साकेताना सीता-कल्याणायागमनात् 'साकेता सह मैथिलै.' इत्युक्तम् । वाजपेयार्जितैर्वाजपेययाग-सपादितै । स्वैरात्मीयैश्छत्रै करणै. । वाजपेययाजिना छत्रधारणं शास्त्रसिद्धम् । अर्क-किरणास्त्वा वारयितुं त्वयि यथा न पतिष्यन्ति तथा कर्तु धावन्ति शीघ्रं गच्छन्ति । 'सृ गतौ' इत्यस्य 'पाघ्रा–' इत्यादिना शीघ्रगमने धावादेश. । 'यावज्जीवं न कंचन प्रत्यवरोहेत्' इत्येतदपि त्वदर्थे परित्यजन्तीति भाव. । तदिदमुक्त श्रीमति रामा-यणे—'द्विजस्कन्धाधिरूढास्त्वामग्नयोऽप्यनुयान्त्यमी । वाजपेयसमुत्थानि च्छत्रा-ण्येतानि पश्य नः ॥ पृष्ठतोऽनुप्रयातानि मेघानीव जलात्यये । अनावृतातपत्रस्य रवि-संतापितस्य ते ॥ एभिश्छाया करिष्याम. स्वैश्छत्रैर्वाजपेयिकै । या हि नः सततं बुद्धिर्वेदमन्त्रानुसारिणी ॥ त्वत्कृते सा कृता वत्स वनवासानुसारिणी ॥' इति ॥५७॥ **मातुलेति** । गुरुभि पितृमातुलादिभि । 'गुरुर्निषेकादिकरे पुरोधसि बृहस्पतौ । पित्रादौ ना बृहत्ख्यातदुर्भरालघुषु त्रिषु ॥' इति रत्नमाला । धर्मलोपाद्गुरुवचनकर्त-व्यत्वगुरुजनानुगन्तव्यत्वरूपशास्त्रार्थभङ्गात् । 'भीत्रार्थाना–' इति पञ्चमी । प्रसीद प्रसादं कुरु । तत्फलमाह—**प्रतिनिवर्त्यतामिति** । महाजनः साकेतमैथिलमहा-ब्राह्मणपरिषत् । प्रतिनिवर्त्यताम् । मत्तस्त्वयेति शेषः । इति प्रणमति शरणं

त्वा लक्ष्मण महाबाहो त्वां च वैदेहनन्दिनि ।
आमन्त्रये निवृत्तोऽस्मि पापः कल्याणमस्तु वाम् ॥ ५८ ॥

(रुदन्प्रतिनिवृत्य ।) अहो नु खलु भोः,

प्रतिमन्वन्तरं भूतैर्गीयमाना चरिष्यति ।
प्रायः पवित्रा लोकानामियं चारित्रपञ्चिका ॥ ५९ ॥

(इति निष्क्रान्तः ।)

लक्ष्मणः—कथितमार्यस्य शृङ्गिबेरपुरवास्तव्येन निषादपतिना गुहेन तत्प्रदेशपर्यन्तावस्कन्दिनो विराधराक्षसस्य दुर्विलसितम् ।

गच्छति । शरणागतरक्षण हि सर्वस्य दुर्वारमिति हृदयम् ॥ उत्तिष्ठोत्तिष्ठेत्यार्तौ द्विरुक्ति । **बोधयित्वेति** । प्रतिनिवृत्तिमिति शेष । क्वापि मनसापि चिन्तयितुं दुःशके स्थाने । **त्वामिति** । महाबाहो लक्ष्मण, त्वामामन्त्रये त्वामप्यनुगमनमाज्ञापयामि । वैदेहनन्दिनि सीरध्वजपुत्रि, त्वा चामन्त्रये । पापोऽहं निवृत्तोऽस्मि निवृत्तिहेतुभूतरामप्रणामकर्मैकतारूपदुरितपूर्णोऽहमनुगमनान्निवृत्तो भवामि । वा युवयो. कल्याणमस्तु । आशिषि लोट् ॥ ५८ ॥ रुदन्प्रतिनिवृत्य । अत्र आहेति शेष । अहो नु खलु भोरिति विस्मये निपातसमुदाय. । **प्रतिमन्वन्तरमिति** । लोकाना सत्यलोकादीना पवित्रा परिशुद्धिकरीय चारित्रस्य पितृवचनपरिपालनप्रभृतिसद्वृत्तस्य । 'चरेर्वृत्ते' इति णिन्नन्तस्य । पञ्चिका विस्तार, व्यक्तीकृतिर्वा । 'पञ्चि विस्तारवचने', 'पञ्चि व्यक्तीकरणे' इत्याभ्या धात्वर्थनिर्देशे ण्वुल् । 'स्त्रीभावादावनिक्ञिण्वुल्' इति स्त्रीत्वम् । मन्वन्तरे मन्वन्तरे प्रतिमन्वन्तरम् । वीप्सायामव्ययीभाव । 'तृतीयासप्तम्योर्बहुलम्' इति बहुलग्रहणाद्वैकल्पिकोऽम्भावः । 'मन्वन्तरं तु दिव्याना युगानामेकसप्तति' इत्यमर । भूतैर्देवादिप्राणिवर्गैः । 'भूतं न्याय्ये समे प्राप्ते यथार्थातीतयोरपि । क्लीबे सत्त्वे पिशाचादौ भूम्यादौ जन्तुसत्त्वयो· ॥' इति रत्नमाला । गीयमाना सती श्रीरामायणादिना कीर्त्यमाना सती चरिष्यति व्याप्ता भविष्यति । प्राय·शब्द सभावनायाम् । 'मन्ये शङ्के ध्रुवं प्राय·' इत्याद्युक्ते । सभावना नामोत्कटकोटिक· सशय· ॥ ५९ ॥ **कथितमिति** । शृङ्गिबेराख्यनगरवासकर्त्र्यर्थ· । 'वसेस्तव्यत्कर्तरि णिच्च' इति तव्यत्प्रत्ययस्य णित्त्वाद्वृद्धि· । निषादानां धीवराणा पत्या गुहेन गुहनाम्ना तत्प्रदेशपर्यन्ताना चित्रकूटपर्यन्तभूभागानामवस्कन्दिनः पीडयितुर्विराधराक्षसस्य । विराधश्चासौ राक्षसश्चेति कर्मधारयात्षष्ठी । सामान्यशब्दं प्रति विशेषशब्दस्य विशेषणत्वात् 'विशेषणं विशेष्येण–' इति समासः । षष्ठ्याः समानाधिकरणेन समासनिषेधस्तु परिनिष्ठितविभक्त्या समासविषयकः । **दुर्विलसितं** दुश्चेष्टितमार्यस्य कथितमिति लक्ष्मणेन स्मारितम् ॥ तत्र रामवचनम्—

रामः—तेन हि विराधहतकोन्मथनाय संनिकृष्टप्रयागमनुषक्त-मन्दाकिनीपवित्रमेखलं चित्रकूटाचलमुपेत्य

ऋषिभिरुपजुष्टतीर्थां हन्तुं रक्षांसि दण्डकां प्राप्य ।
संनिहितगृध्रराजं क्रमेण यायां जनस्थानम् ॥ ६० ॥

(इति निष्क्रान्ता सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते चतुर्थोऽङ्कः ।

तेन हीत्यादि । तेन गुहकथितेन हेतुना विराधहतकस्य विराधाख्यस्य हतप्रायस्य । 'अल्पे' इति कः । उन्मथनाय मरणाय । 'घातोन्माथवधा अपि' इत्यमर । संनिकृष्ट· सनिहित· प्रयागो नाम क्षेत्रविशेषो यस्य स तथोक्तस्तमनुषक्तया समीपे संबद्धया मन्दाकिन्या पवित्राः परिशुद्धा मेखलास्तटा यस्य स तथोक्तस्तम् । 'मेखला खञ्जबन्धे स्यात्काञ्चीशैलनितम्बयोः' इति विश्व. । चित्रकूटाचलमुपेत्येत्यस्योत्तरत्रान्वय· । **ऋषिभिरिति** । रक्षांसि हन्तुमृषिभिर्मुनिभिरुपजुष्टमुपसेवितं तीर्थं पुण्यसलिलं यस्या सा तथोक्ता ताम् । ऋषिभिरुपजुष्टाम्भोवाचिनोऽपि तीर्थशब्दस्य विशेष्यमात्रपरत्वम् । दण्डका प्राप्य सनिहितो गृध्रराजो यस्य तत्तथोक्तं जनस्थानं क्रमेण पूर्वोक्तस्थानेषु यौगपद्येन यायां प्राप्नुयाम् । आशंसाया लिङ् । अत्रापि पूर्वाङ्कान्तपात्रेणोत्तराङ्कादौ प्रवेक्ष्यतो गृध्रराजरूपपात्रस्य सूचनादङ्कास्यमुक्तम् ॥ ६० ॥

यो महीसारवास्तव्यो वाधूलो वीरराघव· ।
स महावीरचरिते तुरीयाङ्कं व्यवीवरत् ॥

इत्यण्णाप्पङ्गार्यनामधेयेन वाधूलवीरराघवेण विरचितायां महावीरचरितव्याख्यायां भावप्रद्योतिनीसमाख्यायां चतुर्थोऽङ्कः ॥



पञ्चमोऽङ्कः।

(तत प्रविशति संपाति. ।)

संपातिः—नूनमद्य वत्सो जटायुरभिवादनाय मलयकन्दरकुलाय-मुपासीदति । तथा हि—

पर्यायात्क्षणदृष्टनष्टककुभः संवर्तविस्तारयो-
नीहारीकृतमेघमोचितधुतव्यक्तस्फुरद्विद्युतः ।
आरात्कीर्णकणात्कणीकृतगुरुग्रावोच्चयश्रेणयः
श्यैनेयस्य बृहत्पतत्रधुतयः प्रख्यापयन्त्यागमम् ॥ १ ॥

इदानीं कवि सुग्रीवविभीषणकथारूपपताका खरदूषणादिवधप्रयुक्तापायशङ्कया जटायुवृत्तान्तरूपापायशङ्कया च प्राप्त्याशा वदन्पुनरपि गर्भसधिमाह पञ्चमाङ्केन—तत्र प्रथमं विष्कम्भमाह—**ततः प्रविशति संपातिरित्यादिना** । सपातिर्जटायोरग्रज· । नूनमिति संभावनायाम् । वत्सो जटायुरिति । अनुजत्वाद्वत्स इत्युक्ति । मलयकन्दर एव मलयगिरिगुहैव । 'दरी तु कन्दरो वा स्त्री' इत्यमर । कुलायो नीडं तन्मदीयम् । 'कुलायो नीडमस्त्रियाम्' इत्यमर । उपासीदति सनिकर्षेण प्राप्नोति । **पर्यायादिति** । पर्यायात्क्रमात् । 'पर्यायोऽवसरे क्रमे' इत्यमर । सवर्तविस्तारयो पतत्राणा सकोचविकासयो । समिलेकीकारेऽव्ययम् । सवर्तनं सवर्तं । सकोच इति फलितम् । क्षण दृष्टा नष्टा अदृष्टाश्च ककुभो दिशो याभिस्तास्तथोक्ता । 'णश अदर्शने', 'गत्यर्थाकर्मक–' इत्यादिना कर्तरि क्त । 'सकोचे क्षणदृष्टत्वं विकासे क्षणनष्टता । पतत्राणा गृध्रपतेर्दिशामिति विवेकधी ॥' किच नीहारीकृतेभ्यो हिमवत्तुच्छीकृतेभ्यो मेघेभ्यो मोचिता विभाजिता धुता कम्पिता अत एव व्यक्तं स्फुटं यथा भवति तथा स्फुरन्त्यश्चलन्त्य प्रकाशमाना वा विद्युतस्तडितो याभिस्तास्तथोक्ता· । पक्षवात्यया मेघेषु खिलीकृतेषु निराश्रयत्वाद्विद्युता व्यक्तस्फुरणम् । किंच । आरादूरत एव कीर्णाद्विक्षिप्तात् । 'कॄ विक्षेपे' कर्मणि क्त । 'रदाभ्यां–' इति निष्टातकारस्य नत्वम् । कणादपि लेशादपि । 'लवलेशकणाणव ' इत्यमर· । कणीकृता लेशीकृता गुरुणा ग्रावोच्चयाना पर्वताना श्रेणय पङ्क्तयो याभिस्तास्तथोक्ता । 'अचलशैलशिलोच्चया.' इत्यमर. । तुल्यार्थत्वाद्ग्रावोच्चयशब्दोऽपि पर्वतवाची । 'पाषाणप्रस्तरग्रावा–' इति ग्रावशब्दोऽत्र शिलावाची । श्यैनेयस्य श्येनीपुत्रस्य । जटायोरित्यर्थः । 'पत्री श्येन ' इत्यमर । 'जातेरस्त्री–' इति ङीष् । 'स्त्रीभ्यो ढक्' इति ढक् । 'श्येन· श्येनाश्च गृध्राश्च व्यजायत सुतेजसः । तस्माज्जातोऽहमरुणात्सपातिस्तु ममाग्रज. ॥ जटायुरिति मा विद्धि श्येनीपुत्रमरिंदम ॥' इति हि श्रीरामायणे जटायुनोक्तम् । बृहता पतत्राणा पक्षाणा धुतय. कम्पनानि । 'गरुत्पक्षच्छदा पत्रं पतत्र च तनूरुहम्' इत्यमर. । 'धूञ् कम्पने' इति स्वादौ पठिताद्धावे स्त्रिया क्तिन् । आगमं जटायोरागमनं प्रख्यापयन्त्यनुमापयन्ति । 'प्रज्ञापयन्ति' इति च पाठः ।

अपि च ।

दूरोद्वेल्लितवाडवस्य जलधेरुल्लोलभिन्नाम्भसो
रन्ध्रैरापतितेन वेगमरुता पातालमाध्मायते ।
यद्वैकुण्ठवराहकण्ठकुहरस्फारोच्चलद्भैरव-
ध्वानोच्चण्डमकाण्डकालरजनीपर्जन्यवद्गर्जति ॥ २ ॥

(प्रविश्य ।)

जटायुः—

कावेरीवलयितमेखलस्य साना-
वेतस्मिन्मलयगिरेर्दिवः पतामि ।
यत्रार्यो निवसति काश्यपः शकुन्तः
• शैलेन्द्रोऽपर इव विप्रयुक्तपक्षः ॥ ३ ॥
विस्रंसयन्ती परिगृह्य पक्षौ
जाता ममाप्युत्पतनश्रमार्तिः ।

लिङ्गाभ्यूहनमनुमानं नामात्र गर्भसन्ध्यङ्गमुक्तम् ॥ १ ॥ **दूरेति** । 'श्यैनेयस्य बृहत्पतत्रधुतिना' इत्यादिर्जटायोर्बृहत्पतत्रधुतिना वेगमरुता उल्लोलान्यत्यन्तचलितानि भिन्नानि स्थानादपक्रान्तान्यम्भासि यस्य स तथोक्तस्य, दूरमधिकमुद्वेल्लित उच्चलितो वाडवो वाडवाग्निर्यस्य स तथोक्तस्य । वायुसखत्वादिति भाव । जलधे समुद्रस्य रन्ध्रैर्जलापायवशात्प्रकटैः श्वभ्रैरापतितेन प्रविष्टेन जटायोर्वेगमरुता वेगजन्यवायुना पातालमाध्मायते पूर्यते । यत्पातालं कर्तृ । वैकुण्ठवराहस्यादिवराहस्य कण्ठकुहराद्भूलरन्ध्रात् । 'कुहर विवर बिलम्' इत्यमर । स्फारमधिकं यथा 'स्फार भूयश्च भूरि च' इत्यमर· । उच्चलन्नुद्गच्छन्भैरवो दारुण । 'भैरव दारुणं भीष्मं भीषणं च भयानकम्' इत्यमर । ध्वान इव शब्द इवोच्चण्डं क्रूर यथा भवति तथाकाण्डकालरजनीपर्जन्यवदनवसरापतितप्रलयरात्रिमहामेघवद्गर्जति शब्दति । उक्तयच्छब्दस्तच्छब्दं नापेक्षते । 'काण्डोऽस्त्रीदण्डबाणार्ववर्गावसरवारिषु' इत्यमर· । चण्डमातिरेकविवक्षयोपमाद्वयम् ॥ २ ॥ **कावेरीति** । कावेर्या वलयिता मेखला नितम्बो यस्य स तथोक्तस्य । 'मेखला खड्गबन्धेऽपि काञ्चीशैलनितम्बयो·' इति विश्व· । मलयगिरेरेतस्मिन्सानौ तटे । 'स्नु प्रस्थः सानुरस्त्रियाम्' इत्यमर· । दिवोऽन्तरिक्षात्पताम्यवरोहामि । यत्र मलयगिरिसानावार्यो ज्येष्ठभ्राता काश्यप कश्यपपुत्रो व्यवहितोऽप्यपत्यमिति पक्षेण । कश्यपशब्दादपत्ये ऋष्यण् । शकुन्तः पक्षी । सपातिरित्यर्थ· । विप्रयुक्तपक्षश्छिन्नपक्ष· । इदं विशेषणमुभयान्वयि । अपरः शैलेन्द्र इवावासभूतमलयादन्य· शैल इव निवसति । पर्वतोपरि पर्वत इव तिष्ठतीत्यर्थः । विप्रयुक्तपक्षत्वे कारणमुत्तरत्र वक्ष्यति ॥ ३ ॥ **विस्रंसयन्तीति** । पक्षौ परिगृह्य प्राप्य विस्रंसयन्ती

शक्तिर्हि कालस्य विभोर्जराख्या
शक्तयन्तराणा प्रतिबन्धहेतुः ॥ ४ ॥
तदयमार्यो मन्वन्तरपुराणो गृध्रराजः संपातिः । अहो भ्रातृस्नेहः ।
पुराकल्पे दूरोत्पतनखुरलीकेलिजनिता-
दतिप्रत्यासङ्गात्परितपति गात्राणि तपने ।
अवष्टभ्यासौ मामुपरि ततपक्षः शिशुरिति
स्वपक्षाभ्यां श्लोषादविकलमरक्षत्करुणया ॥ ५ ॥
(उपसृत्य ।) आर्य काश्यप, त्वा जटायुरभिवादयते ।
संपातिः—एह्येहि वत्स,
त्वया पुत्रवती श्येनी गृध्राणा चक्रवर्तिना ।
गरुत्मतेव वीरेण विनता नः पितामही ॥ ६ ॥

शिथिलयन्त्युत्पतनश्रमेणार्तिरुत्पतनार्थप्रयत्नगौरवप्रयुक्तपीडा ममापि जातोत्पन्ना । अपिशब्दस्तदनर्हत्वं द्योतयति । तथाहि । विभो पदार्थाना परिणामापक्षयादिहेतुशक्तियुक्तस्य । यद्वा 'दिक्कालावीश्वरादतिरिच्येते' इति मतेन विभोरित्युक्तम् । अथवा 'काल कलयतामहम्' इत्युक्त्या कालशरीरकस्य भगवत इत्यर्थ· । जराख्या वयोहानिप्रयुक्तशैथिल्यात्मिका । शक्तितत्कार्ययोरभेदारोप· । शक्ति· सामर्थ्य शक्तयन्तराणामन्यासा शक्तीनामुत्पतनादिसामर्थ्याना प्रतिबन्धहेतु कार्यजननवैधव्यकरी भवतीति शेष ॥ ४ ॥ **तदिति** । मन्वन्तरेषु पुराणश्चिरंतन । 'मन्वन्तरं तु दिव्याना युगानामेकसप्तति·' इत्यमर· । गृध्रराज· सपातिस्तत्तस्मादुत्पत्त्यागमनाद्धेतोरयं सनिहित· । भवतीति शेषः । 'इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥' इत्युक्तत्वादिदंशब्दः सनिहितवाची । अहो भ्रातृस्नेहो भ्रातरि मयि प्रीतिर्विस्मयनीया । कुत इत्यत्राह—**पुरेति** । असौ ममाग्रज· सपाति· पुराकल्पे पूर्वस्मिन्ब्रह्मदिने । 'कल्पस्तु प्रलये न्याये शास्त्रे ब्रह्मदिने विधौ' इति रत्नमाला । दूरोत्पतनस्य खुरली लक्ष्यबन्धनं सूर्यमण्डलसनिधिरूपलक्ष्यस्वीकार । 'खुरली लक्ष्यबन्धनम्' इति केशवः । सैव केलिर्लीला तया जनितादुत्पादितादतिप्रसङ्गादत्यन्तसनिकर्षात्तपने सूर्ये गात्राणि शरीरावयवान् । 'गात्रं प्रतीके दण्डाग्रजङ्घाभागे वपुष्यपि' इति रत्नमाला । परितपति सति शिशुरिति करुणया मामवष्टभ्य शिशुत्वहेतुमद्विषयदयया मामवलम्ब्योपरि ततपक्षः सन्ममोपरि विस्तारितस्वपक्ष सन्स्वपक्षाभ्या करणाभ्या मामविकलं समग्रं श्लोषाच्छोषणादरक्षद्रक्षितवान् । रक्षतेर्लङ् । अतोऽत्र भ्रातृस्नेहो विस्मयनीय इति सबन्ध । एतेन सपाते· पक्षशोषो जात इति फलितम् ॥ ५ ॥ एह्येहीत्यादरेण द्विरुक्ति· । **त्वयेति**। वीरेण गरुत्मता गरुडेन नः पितामही विनतेव गृध्राणा चक्रवर्तिना सार्वभौमेन त्वया श्येनी नो माता पुत्रवती प्रशस्तपुत्रयुक्ता । भवतीति शेष· । प्रशंसाया मतुप् । अत्र

(परिष्वज्य ।) वत्स जटायो, कालविप्रकर्षान्मन्दीभूतपितृशोको रामभद्रः ।

जटायुः—

तस्य विद्यातपोवृद्धसंयोगः स्वा च धीरता ।
न्याय्यो रक्षाधिकारश्च दौर्मनस्यं व्यपोहति ॥ ७ ॥

संपातिः—

तृप्तैर्विराधमांसानां गृध्रैरावेदितं हि मे ।
चित्रकूटाद्यदा रामः शरभङ्गाश्रमं गतः ॥ ८ ॥
तथा च शरभङ्गेण हव्यवाहे हुता तनुः ।
अथोपसेदिवान्रामः सुतीक्ष्णाद्यानृषीनिति ॥ ९ ॥

जटायुः—बाढम् । अधुनागस्त्यवचनाद्रामः पञ्चवट्यां प्रतिवसति ।

संपातिः—(चिरं स्मृत्वा ।) अस्ति जनस्थाने पञ्चवटी नाम गोदावरीतटोद्देशः । वत्स जटायो, विषयबाहुल्यं कालविप्रकर्षश्च स्मृतिं प्रमुष्णाति ।

कल्पस्यादौ मम परिचयस्तावदासीदुदस्था-
द्यावद्विष्णोरुपरि चरणश्चारुगङ्गापताकः ।

'द्वौ पुत्रौ विनतायास्तु गरुडोरुण एव च । तस्माज्जातोऽहमरुणात्सपातिस्तु ममाग्रज. ॥' इत्येतदनुसधेयम् ॥ ६ ॥ **वत्सेति ।** कालविप्रकर्षात्त्रयोदशवर्षात्मककालातिपाताद्धेतो । राम. कि मन्दीभूतपितृशोक इति काकुरनुसधेया ॥ **तस्येति ।** तस्य रामस्य विद्याया अध्यात्मविद्यायास्तपसो नियमस्य वृद्धाना त्रिविधवृद्धाना च सयोगः सबन्ध स्वा स्वीया धीरता धैर्यम् । अप्रकम्प्यत्वमिति यावत् । न्याय्यो न्यायादनपेत । 'धर्मपथ्यर्थन्यायादनपेते' इत्यनपेतार्थे यत् । रक्षाया लोकरक्षणेऽधिकार कर्तृभावश्च दौर्मनस्यं पितृदु ख व्यपोहति नाशयति । भिन्नानि वाक्यानि । अत क्रियापदस्यैकवचनोपपत्ति. ॥ ७ ॥ **तृप्तैरिति ।** विराधमासानां तृप्तैर्विराधमासहेतुकतृप्तियुक्तै । कारणस्य शेषत्वविवक्षया षष्ठी । आवेदितार्थानाह—चित्रकूटादित्यादिना । हव्यवाहेऽग्नावुपसेदिवानुपससाद । सदेर्लिट क्रसु । धातोरेत्वाभ्यासलोपौ । इत्यावेदितमिति श्लोकद्वयमिदमेकान्वयम् ॥ ८ ॥ ९ ॥ **बाढमिति ।** संपातिश्रुतार्थानुमतौ । 'बाढं त्रिषु दृढे क्लीबमनुमत्याम्' इति रत्नमाला । पञ्चाना वटाना समाहार. पञ्चवटी तस्या प्रतिवसति निवसति ॥ गोदावरीतटोद्देशो गोदावर्यास्तीरप्रदेश. । विषयबाहुल्यं स्मृतिविषयवस्तुभूयस्त्वं कालविप्रकर्षश्चानुभवकालस्य चिरात्ययश्च स्मृतिं प्रमुष्णाति । स्मरत्यनयेति स्मृतिर्भावना तां स्मृतिजनकसस्कार प्रमुष्णाति स्मृतिजननसामर्थ्यरहिता करोति ॥ तदुभयमाह—**कल्पस्येत्यादिना ।**

पर्यन्तेष्वप्यवधिवलयस्तेजसां यावदद्रि-
र्लोकालोकः परिसरगतः सप्तमस्याम्बुराशेः ॥ १० ॥

जटायुः—तत्रैकदा रघुवृषं वृषस्यन्ती शूर्पणखा प्राप्ता ।

संपातिः—अहो निर्मर्यादता ।

अनेकयुगजीविन्यास्त्रेता यस्यास्त्रयोदशी ।
सा क्षीरकण्ठकं वत्सं वृषस्यन्ती न लज्जिता ॥ ११ ॥

जटायुः—

तस्यां च कर्णनासोष्ठकर्तनेन न्यवीविशत् ।
दशाननतिरस्कारप्रशस्तिमिव लक्ष्मणः ॥ १२ ॥

संपातिः—तन्निमित्तस्तर्हि कश्चिदनुबद्धः परैरभियोगः ।

जटायुः—बाढम् । एकेनैव रामभद्रेण ।

कल्पस्यादावस्य ब्रह्मकल्पस्यारम्भे चारुगङ्गैव पताका ध्वजपटी यस्य स तथोक्तश्चरणो दण्डवत् । गङ्गाध्वजपटवदिति भाव । विष्णोश्चरणो यावदुदस्थादुद्गतस्तावदुपर्यूर्ध्वप्रदेशे मम परिचयो विश्विष्यावगम आसीत् । किच तेजसा सूर्यादीना ज्योतिषामवधिवलयः सीमावलयभूत सप्तमस्याम्बुराशे परिसरगत समीपगतो लोकालोकश्चक्रवालपर्वत । यावत्सनिविष्ट इति शेषः । पर्यन्तेषु पार्श्वेषु तावत्परिचय आसीदित्यनुषङ्ग । अत पूर्वोक्तमुभय स्मृतिं प्रमुष्णातीति सम्बन्ध ॥ १० ॥ **तत्रेति** । रघुवृष रघुवंशजश्रेष्ठं वृषस्यन्ती रत्यर्थमिच्छन्ती । 'वृषस्यन्ती तु कामुकी' इत्यमर ॥ **अनेकेति** । अनेकयुगजीविन्या यस्यास्त्रेता त्रेतायुगम् । 'त्रेता स्त्रमित्रये युगे' इति रत्नमाला । त्रयोदशी त्रयोदशाना पूरणी । भवतीति शेष । 'तस्य पूरणे डट्' इति डटष्टिलान्डीप् । सा शूर्पणखा क्षीरकण्ठकमत्यन्तबालकं वत्स रामं वृषस्यन्ती मैथुनार्थमिच्छन्ती सती न लज्जिता न त्रपते । अतोऽस्या मर्यादातिक्रमो विस्मयनीय इति संबन्ध । किञ्चिदधिकद्वादशयुगवयस्कायास्त्रिंशद्वर्षाधिकवयस्करामकामना धर्मशास्त्रकामशास्त्रयोरत्यन्तानुचितेत्यर्थ । वृषस्यन्तीत्यत्र वृषशब्दस्येच्छार्थकक्यजन्तस्य 'अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि', 'अश्ववृषयोर्मैथुनेच्छायाम्' इति सूत्रवार्तिकाभ्यामसुगागमे कामुक्या रूढि ॥ ११ ॥ **तस्यामिति** । लक्ष्मणस्तस्या शूर्पणखायाम् । अस्य न्यवीविशदित्यनेनान्वय । कर्णनासोष्ठस्य । समाहारद्वन्द्व । कर्तनेन छेदनेन दशाननस्य तिरस्कारेण प्रशस्तिं रामकीर्तिं न्यवीविशन्निवेशयामास । निवेशयतेर्लुङि चङि द्वित्वं सन्वद्भावोपाधिनाभ्यासदीर्घ ॥ १२ ॥ **तन्निमित्त इति** । तन्निमित्त शूर्पणखावैरूप्यकरणहेतुक कश्चिदभियोगो वैरहेतुरभिग्रह । 'अभियोगस्त्वभिग्रह' इत्यमर । अनुबद्ध उत्पादित । कश्चिदित्यनेन हेतुभेदाभियोगवैविध्यं व्यज्यते ॥ **एके-**

चतुर्दशसहस्राणि चतुर्दश च राक्षसाः।
त्रयश्च दूषणखरत्रिमूर्धानो रणे हताः॥ १३॥

संपातिः—आश्चर्यमाश्चर्यम्। अथवा नाश्चर्यमेतद्दाशरथौ। महत्पुनरपावृतं वैरद्वारमिति मन्यमानः संप्रमुग्धोऽस्मि। तद्वत्स जटायो, नासिन्नवसरे सीतारामलक्ष्मणास्त्वया क्षणमपि मोक्तव्याः।

स्वसुः सोदर्यायाः कथमिव निकारं दशमुख-
स्तथा भूयोभूयः स्वजनविनिपातं च सहते।
मदान्धो मायावी प्रभुरमितवीर्योऽन्तिकचरः
सपत्नः कष्टं नो निपुणमनुपाल्या हि शिशवः॥ १४॥

नेति। लक्ष्मणस्तु सीतारक्षणे नियुक्त इति भाव। **चतुर्दशेति**। समासान्तविधेरनित्यत्वात्। 'द्वित्रिभ्या षमूर्ध्न' इति षप्रत्ययाभावेन त्रिमूर्धान इति॥ १३॥ **आश्चर्यमिति**। दाशरथौ महाशूरदशरथात्मजे। 'पितु शतगुणं पुत्र' इति न्यायादिति भाव। दशरथशब्दादपत्यविवक्षायाम् 'अत इञ्'। **महदिति**। पुनःशब्दः कितित्यर्थः। 'पुनरप्रथमे भेदे' इत्यमरः। महद्विपुलं वैरद्वार वैरहेतुरेव द्वारम्। श्लिष्टरूपकम्। 'द्वार तु द्वार्युपाये च' इति रत्नमाला। अपावृतमिति विवृतमिति मन्यमानः सभावयन्सप्रमुग्धोऽस्मि कृत्याकृत्यविवेकशून्यो भवामि। 'मुह वैचित्ये'। वैचित्यमविवेकः। अस्मिन्नवसरे समये न मोक्तव्या न त्याज्या। कुत इत्यत्राह—**स्वसुरिति**। मदेन मदिरादिकृतहर्षमोहव्यतिकरेणान्धः कृत्यादिप्रमितिशून्यः। तदुक्तम्—'मदिरादिकृतो हर्षमोहव्यतिकरो मदः' इति। अथवा मदेन शौर्यादिप्रयुक्तगर्वेणान्ध। 'गजदानं गर्वहर्षरेतोमृगमदा मदा' इति रत्नमाला। मायावी मायाप्रचुरो वञ्चनया शाम्बरीप्रभृतिविस्मयनीयास्त्रशस्त्रादिसृष्ट्या च भूयिष्ठ इत्यर्थः। 'अस्मायामेधा—' इत्यादिना भूम्नि मत्वर्थीयो विनिः। प्रभु कोशदण्डादिमान्। 'प्रभुः शक्ताविपौ' इति रत्नमाला। अमितवीर्योऽसख्येयपराक्रमः। 'वीर्यं पराक्रमे शुक्रे' इति रत्नमाला। अन्तिकचरः सपत्नो भूम्यनन्तर शत्रुर्दशमुखो रावण सोदर्याया एकोदरजाताया। 'सोदराद्यत्' इति यत्प्रत्ययः। 'समानोदर्यसोदर्यसगर्भ्यसहजाः समा' इत्यमरः। स्वसुर्भगिन्या शूर्पणखाया। 'भगिनी स्वसा' इत्यमरः। निकारं वैरूप्यम्। 'निकारो विप्रकारः स्यात्' इत्यमरः। कथमिव सहते कथमृष्यति। इवशब्देनाभासोऽपि सहनहेतुर्नास्तीति व्यज्यते। तथा तद्वद्भूयोभूयः पुनः पुनः स्वजनाना बन्धूनाम्। 'बन्धुस्वस्वजनाः समाः' इत्यमरः। विनिपात च वधं च कथमिव सहते। सुबाहुविराधवधाभिप्रायेण खरदूषणादिवधाभिप्रायेण च भूयोभूय इत्युक्तम्। कष्टं दुःखं निपुणं च यथा तथा शिशव सीतारामलक्ष्मणा नोऽस्माकमनुपाल्या रक्षणीयाः। भवन्तीति शेषः। बन्धुवधादयो वैरद्वारविवरणहेतव इति भाव। भूम्यनन्तरलक्षणं पूर्वमेवोक्तम्। अस्मिञ्श्लोक उपायापायशङ्काभ्यां प्राप्त्याशा

अहमपि समुद्रे कृताह्निकः शिवतातिमनुसंधास्यामि । (इति निष्क्रान्त ।)

जटायुः—(गगनगमनमभिनीय ।)

एषोऽस्मि प्रलयमरुत्प्रचण्डरंहः-
सक्षिप्तप्रथिम पिबन्निवान्तरिक्षम् ।
क्षेपीयो मलयगिरेर्निवासभूभृ-
त्संसक्तक्षितिरुहजालमभ्युपेतः ॥ १५ ॥

अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखकन्दरः सततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगोगिरिः प्रस्रवणो नाम । इयं च पञ्चवटी । (विभाव्य ।) अये,

दूरं हृतश्चित्रमृगेण राम-
स्तया दिशा गच्छति लक्ष्मणोऽपि ।
ततः परिव्राड्टजं प्रविष्टो
विज्ञ्यक्तरूपो दशकंधरोऽयम् ॥ १६ ॥

स्फुटा । अत्र च तत्त्वानुकीर्तनरूपो मार्ग , वितर्कप्रतिपादकवाक्यात्मक रूपम्, अपकारिजनाद्भयरूप उद्वेग , शङ्कात्रासरूपसभ्रमश्च सध्यङ्गान्युक्तानि ॥ १४ ॥ **अहमपीति** । कृताह्निक. कृतस्नान शिवताति शिवंकर वस्त्वनुसधास्यामि ध्यायामि । 'शिवताति शिवकर' इत्यमर । अत्रेष्टार्थोपायानुसरणमाक्षेपो नाम सध्यङ्गमुक्तम् ॥ गगनगमनमभिनीय । स्वावास प्रातुमिति भाव । **एषोऽस्मीति** । एषोऽह प्रलयमरुत प्रलयवातात्प्रचण्डेन तीव्रेण । 'चण्डो दैत्यविशेषे यमदासे त्रिषु तु तीव्रकोपनयो' इति रत्नमाला । रहसा वेगेन । 'रहस्तरसी तु रय स्यद' इत्यमर । सक्षिप्त सकोचित. प्रथिमा वैपुल्यं यस्य तत्तथोक्तम् । 'पृथ्वादिभ्य इमनिज्वा' इति भावे इमनिच् । अन्तरिक्षं नभ पिबन्निव सन् । अन्तरिक्षस्य स्वच्छत्वाज्जलसादृश्यमभिसधाय पिबन्निवेत्युक्तम् । मलयगिरेर्मलयपर्वतात्क्षेपीयो द्रुतं यथा तथा निवासभूभृन्निवासपर्वतस्तेन सह ससक्त सयुक्त क्षितिरुहजालं वृक्षषण्डमभ्युपेतोऽस्मि प्राप्तो भवामि ॥ १५ ॥ **अयमिति** । अयमनोकहाना वृक्षाणा निवहैः समूहैर्निरन्तरो निबिडः स्निग्धश्चाकचक्ययुक्तो नील परिसर समीपदेशो येषा तानि तथोक्तानि तथाविधैररण्यैर्वनै परिणद्धा सश्लिष्टा गोदावरी मुखेषु द्वारेषु येषा ते तथोक्ताः कन्दरा गुहा यस्य स तथोक्तः । अभिष्यन्दमानैर्व्याप्तुवद्भि । 'स्यन्दू प्रस्रवणे' इत्यस्याभिपूर्वस्य 'अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु' इति षत्वम् । मेघैर्मेदुरितो द्विगुणितो नीलिमा नैल्यं यस्य स तथोक्त. । **दूरमिति** । रामश्चित्रमृगेण दूरं हृत प्रापित । अभूदिति शेष । लक्ष्मणस्तया दिशा रामगतया दिशा गच्छति । ततस्तदनन्तर परिव्राट् सन्यासी । 'भिक्षु परिव्राट् कर्मन्दी' इत्यमर । उटजं पर्णशालाम् । 'पर्णशालोटजो-

अहो प्रमादः प्रमादः ।

परःसहस्रैरायुक्तं पिशाचवदनैः खरैः ।
रथं वधूटीमारोप्य पापः क्वाप्येष गच्छति ॥ १७ ॥

पौलस्त्य पौलस्त्य,

धर्तारः प्रलयेषु ये भगवतो वेदस्य विद्येश्वरा-
स्तेषामन्वयकेतनस्य भवतः स्नातस्य वेदव्रतैः ।
जेतुर्वैतलसद्मनोऽपि तपसा दीप्तस्य राज्ञः सतो
निन्द्या दुश्चरितावतारजननी जाता कथं दुर्मतिः ॥ १८ ॥

कथमवज्ञया न शृणोतीव । आः दुरात्मन्राक्षसापसद, तिष्ठ तिष्ठ ।

तुण्डप्रोतशिरःकरोटिविवराकृष्टस्फुरत्त्वग्वसा-
क्लोमग्रीहयकृद्वतोष्णरुधिरस्राव्यान्त्रमालस्य ते ।

ऽस्त्रियाम्' इत्यमर । प्रविष्ट प्राप्त । व्यक्तरूपोऽय भिक्षुर्दशकंधर । जात इति शेष. । धिगिति निन्दायाम् । अत्र प्रस्तुतोपयोगिच्छद्माचरणादभूताहरणं नाम सध्यङ्गमुक्तम् ॥ १६ ॥ प्रमादो मम रामलक्ष्मणयोश्चानवधानम् । अहो । विस्मयनीय इत्यर्थ. । कृत्सने द्विरुक्ति । **परःसहस्रैरिति** । सहस्रेभ्य. परे पर सहस्राणि तै । पिशाचानामिव वदनानि येषा ते तथोक्तैः खरैरायुक्तं समन्ततो युक्तं रथं वधूटीमपांसिनीं सीतामारोप्य एष पापो रावणः क्वापि गच्छति । 'जीवद्भर्त्री कुलस्था या वधूटी सा स्वपांसिनी' इति त्रिकाण्डशेषः ॥ १७ ॥ पौलस्त्य पुलस्त्यवंश्य । साभिप्रायमिदं विशेषणम् । तमभिप्रायमाह—**धर्तार इति** । विद्याना सर्वासामपि विद्यानामीश्वरा निर्वाहिका प्रलयेष्वप्यतृशून्यकालेषु भगवत पूज्यस्य वेदस्य सर्वपुरुषार्थतत्साधनज्ञापकस्यान्नायस्य धर्तारो धारयितार । सृष्टिकालेषु प्रवर्तनार्थमिति भाव । ये पुलस्त्यादय । भवन्तीति शेष । तेषामन्वयकेतनस्य वंशध्वजस्य । तत्प्रख्यापकस्येति यावत् । वेदव्रतैश्चतुर्वेदाङ्गप्राजापत्यादिशिरोव्रतादिभि· स्नातस्य व्रताङ्गस्नानकर्तुर्वितले भवानि वैतलान्यधोतलविशेषस्थानि सद्मानि येषा ते तथोक्ता. कालकेयादयस्तान्जेतुर्जितवत. । तृन्नन्तत्वाद्वैतलसद्मन इति द्वितीयान्तम् । तपसा दीप्तस्य प्रकाशमानस्य राज्ञ सतो रक्षकस्य प्रभो सतो भवतस्ते दुश्चरिताना दुष्कर्मणामवतारस्य सक्रमणस्य जननी हेतुभूता दुर्मतिः सीतापहारकर्तव्यताविषयकदुर्बुद्धि कथं जाता केन प्रकारेण जाता । वंशविद्यातप.पराक्रमप्रभावादीनि चेह चौर्येण परकलत्रापहारप्रतिभटानीति भावः । अत्र प्रस्तुतोपयोगिसामवचनात्सग्रहो नाम सध्यङ्गमुक्तम् ॥१८॥ **कथमिति** । अवज्ञया पक्षित्वप्रयुक्तानादरेण न शृणोति । मदीयं वचनमिति शेष· । इवशब्द. सभावनायाम् । आ इति कोपे । दुरात्मन्दुर्बुद्धे, राक्षसापसद राक्षसाधम । 'निहीनोऽपसद.' इत्यमर. । तिष्ठ तिष्ठेति कोपे द्विरुक्तिः । **तुण्डेति** । तुण्डेन मद्वक्त्रेण प्रोताना छिद्रीकृतानां

अत्युग्रककचप्रचण्डनखरोत्कर्तक्वणत्कीकसै-
रङ्गैः खण्डितकंधराधमनिभिः श्येनीसुतस्तृप्यतु ॥ १९ ॥

(इति निष्क्रान्तः ।)

शुद्धविष्कम्भः ।

(प्रविश्य)

लक्ष्मणः—हा आर्ये, क्वासि । कष्टं दशापरिणाममनुभवत्यार्यो मारीचशत्रुः ।

एष मूर्त इव क्रोधः शोकाग्निरिव जङ्गमः ।
कृच्छ्राद्बिभर्ति हृल्लेखलज्जासंवेगिनी तनुम् ॥ २० ॥

शिरसा करोटेरस्त्र । 'शिरोऽस्त्रि तु करोटि स्त्री' इत्यमर. । विवरेभ्यो रन्ध्रेभ्य आकृष्टा बहिरुद्धृता स्फुरन्त्यश्चलन्त्यः । इदं विशेषणद्वय बहुव्रीहिघटकमालाशब्दान्तद्वन्द्वे वेदितव्यम् । त्वचोऽसृग्धरा । 'स्त्रिया त्वगसृग्धरा' इत्यमर. । वसा मेदासि । 'मेदस्तु वपा वसा' इत्यमरः । 'स्फुरत्प्रस्फुट—' इति च क्वचित्पठ्यते । क्लोम तिलकम् । 'तिलकं क्लोम' इत्यमर. । प्लीहा गुल्म· । 'गुल्मस्तु प्लीहा पुंसि' इत्यमर । यकृत्कालखण्डम् । 'कालखण्डयकृती तु समे इमे' इत्यमर । द्रुतानि द्रवीभूतान्युष्णानि युद्धक्रोधवशादुष्णस्पर्शानि रुधिराणि रक्तानि स्नायवो वल्लसा । 'अथ वल्लसा । स्नायु स्त्रियाम्' इत्यमर. । आन्त्रमाला मालासदृशमान्त्रं पुरीतत् । 'आन्त्रं पुरीतत्' इत्यमर. । यस्य स तथोक्तस्तस्य ते तव, अस्य चाङ्गैरित्यनेनान्वय. । अत्युग्रोऽतितीक्ष्ण· ककच इव करपत्राख्यशस्त्रविशेष इव प्रचण्डैस्तीक्ष्णैर्नखरै । 'ककचोऽस्त्री करपत्रम्', 'नखोऽस्त्री नखरोऽस्त्रियाम्' इति चामर । उत्कर्तेन सम्यग्भेदनेन । 'कृती च्छेदने' इत्यस्माद्भावे घञ् । क्वणन्ति शब्दवन्ति कीकसान्यस्थीनि येषां तानि तथोक्तानि तै । 'कीकस कुल्यमस्थि च' इत्यमर । खण्डिताश्छिन्ना ग्रीवाणा कंधराणाम् । 'ग्रीवाया शिरोधि· कंधरेत्यपि' इत्यमर. । धमनय· शिरा येषां तै· । 'नाडी तु धमनि. शिरा' इत्यमरः । अङ्गैस्तवावयवै· करणै श्येनीसुतो गृध्र. । अहमिति यावत् । तृप्यतु तृप्तिं भजतु । प्राप्तकाले लोट् । अत्र रोषसंभ्रमवचनरूपं तोटकं नाम संध्यङ्गमुक्तम् ॥ १९ ॥ **निष्क्रान्त इति** । जटायुरिति शेषः ॥ शुद्धविष्कम्भ इति केवलसंस्कृतात्मकत्वात् । वृत्तानां विराधशूर्पणखाखरदूषणवधादिकथाशानां वर्तिष्यमाणानां जटायुकथाशानां च सक्षेपेण कथनाच्चेति भाव ॥ अथ पञ्चमोऽङ्कः प्रस्तूयते—**प्रविश्य लक्ष्मण** इत्यादिना । आर्ये । सीते इत्यर्थ । ज्येष्ठभ्रातृभार्यालादार्याशब्द । कष्टं दु खरूप दशाना क्रोधाद्यवस्थानाम् । 'दशावस्थानेकविधा' इत्यमरः । परिणामं विकारम् । 'परिणामो विकार' इत्यमरः । अनुभवति भुङ्क्ते मारीचशत्रु । मायामृगहननादिति भाव । तमाह—**एष इति** । मूर्तो मूर्तिमान्क्रोध इव स्थित. शत्रुकृतापराधप्रयुक्तमन प्रज्वलातिशय इति सभावनीयो जङ्गमः

तथा हि ।

आभुग्नभ्रुकुटीविटङ्कघटनासंसूचितान्तःस्फुर-
द्धैर्यस्तम्भितदुर्व्यवस्थवितताप्रोच्चण्डकोपानलः ।
उद्भूमावलिरम्भसामिव निधिर्मध्यज्वलद्वाडवो
विद्युद्व्यञ्जितवज्रगर्भजलदच्छायां समालम्बते ॥ २१ ॥

(तत प्रविशति राम ।)

रामः—

न्यक्कारो हृदि वज्रकील इव मे तीव्रः परिस्पन्दते
घोरान्धे तमसीव मज्जति मनः समीलितं लज्जया ।

सचरिष्णु साक्षादग्निरिव स्थित । दाहहेतुत्वेनाग्नितुल्येष्टजनवियोगादिजन्यदु खातिशय इति सभावनीय· । उभयत्रोत्प्रेक्षालंकार । एष आर्यो हृल्लेखो जुगुप्साविशेष । 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदयशब्दस्य हृदादेश । हृदयं लिखतीति हृल्लेख लेख इत्यण्णन्तम् । भार्यापहारे दोपदर्शनप्रयुक्तमनोवस्थाजुगुप्सात्र हृल्लेख· । लज्जा तु मन सकोचस्ताभ्या हेतुभ्या सवेगिनी सभ्रमवतीम् । 'समौ सवेगसभ्रमौ'इत्यमरः । तनुं शरीर कृच्छ्राद्दु खाद्विभर्ति धारयति ॥ २० ॥ पूर्वोक्तमेव दृष्टान्तोक्त्या विशदयति—**तथा हीति** । तथैवेत्यर्थ । **आभुग्नेति** । एष इत्यनुषज्यते । आभुग्नयो· कुटिलयो । 'आभुग्न कुटिलम्' इत्यमरः । भ्रुकुटीविटङ्कयोर्विटङ्कसदृशभ्रुवो· । 'कपोतपालिकाया तु विटङ्कं पुंनपुंसकम्' इत्यमर· । उन्नतत्वादिना सादृश्य विवक्षितम् । घटनयान्योन्यमेलनेन ससूचितो व्यञ्जितोऽन्त स्फुरता धैर्येणाप्रकम्प्यत्वलक्षणस्वभावविशेषेण स्तम्भित प्रतिहतोऽथापि दुर्व्यवस्थो·दु खेन व्यवस्था नियमन यस्य स दुर्व्यवस्थ, अत एव विततो विशीर्ण प्रोच्चण्डोऽतितीव्र· कोपात्मकोऽनलोऽग्निरिवसदृश· कोपो यस्य स तथोक्त., अत एवोद्भूमावलिरुद्वतधूमपङ्क्तिर्मध्ये ज्वलन्दीप्यमानो वाडवो वडवाग्निर्यस्य स तथोक्त, अम्भसा निधिरिव समुद्र इव स एष आर्यो विद्युता व्यञ्जितो वज्रो दम्भोलिर्गर्भेऽन्तर्यस्य स तथोक्तस्तस्य जलदस्य छाया कान्तिं समालम्बते । धारयतीत्यर्थ । अत्र भ्रुकुटीधूमावल्यो कोपानलवाडवयोश्च बिम्बप्रतिबिम्बभावेनाभिन्नयोः साधारणधर्मत्वादुपमालंकार । एवं भ्रुकुटीविद्युतो कोपानलवज्रयोश्च बिम्बप्रतिबिम्बभावेनाभिन्नत्वादुपमालंकार । तदनुप्राणिता च पदार्थवृत्तिरूपा निदर्शनेति सकर । 'पदार्थवृत्तिमप्येके वदन्त्यन्या निदर्शनाम्' इत्युक्ते· । अत्र कोपोत्कर्षाभिधानात्प्रस्तुतोत्कर्षाभिधानमुदाहृतिर्नाम संध्यङ्गमुक्तम् ॥ २१ ॥ **न्यक्कार इति** । न्यक्कारो भार्यापहरणभव परिभवो मे हृदि वज्रकील इव दुर्भेद्यवज्रशङ्कुरिव । 'ज्वाले स्थाणौ द्वयो· कील शङ्कुशङ्कुलयो· पुमान्' इति रत्नमाला । तीव्र सन्दु सह सन्परिस्पन्दते चलति । प्रतिक्रियानर्हत्वात्सादृश्यम् । किच मनो लज्जयानुचितदशावर्तिलप्रयुक्तसकोचेन समीलितं खल्पीभूतं सद्घोरान्धे भयकरेऽज्ञानावहे

शोकस्तातविपत्तिजो दहति मां नास्त्येव यस्मिन्क्रिया
मर्माणीव पुनश्छिनत्ति करुणा सीतां वराकीं प्रति ॥ २२ ॥

लक्ष्मणः—आर्य आर्य, न खलु लोकोत्तरकर्माणस्त्वादृशाः कृच्छ्रेषु प्रमुह्यन्ति ।

रामः—वत्स, लोकोत्तराणि रामस्य कर्माणि ।

यैर्गुप्तान्यकुतोभयानि भुवनान्यासन्महाभीशव-
स्ते सूर्यान्वयकेतवो नृपतयः पूर्वे तिरस्कारिताः ।
कल्पान्तेष्वपि यः स्थिरः स गमितः साधुर्जटायुर्दिवं
पत्नीं हारयता वने यदकृतं लोकैः कृतं तन्मया ॥ २३ ॥

च । 'अन्ध दृष्ट्युपघाते' इत्यस्मात्पचाद्यच् । खञ्जकुब्जादिवत्समास । तमसि मज्जनीव । कर्तव्येषु प्रतिपत्तिशून्यं भवतीत्यर्थ । किंच तातस्य पितृसखस्य जटायोर्विपत्तेर्मरणाज्जायत इति तातविपत्तिज । 'पञ्चम्यामजातौ' इति जनेर्डः । शोको दुःखं कर्तृ । मा दहति भस्मीकरोति । 'दह भस्मीकरणे' । यस्मिंस्तातविपत्तिजशोके क्रिया प्रतिक्रिया नास्त्येव । न्यक्कारादौ तु प्रतिक्रियास्तीति हृदयम् । वराकीं कृपणा सीतां प्रति करुणा पुन सीतादु खनिबन्धनदु खातिभूमिस्तु । 'पुनरप्रथमे भेदे' इत्यमरः । मर्माणि प्राणस्थानानि । 'तिरीटं मर्म योजनम्' इति नपुंसकत्वम् । छिनत्तीव । उक्तं च हनूमता—'इयं सा यत्कृते रामश्चतुर्भि परितप्यते । कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ स्त्री प्रणष्टेति कारुण्यम्' इति प्राधान्यात्तस्येहोपादानम् ॥ २२ ॥ लोकोत्तरकर्माणो लोकेषु श्रेष्ठचरिताः कृच्छ्रेषु कष्टेषु न प्रमुह्यन्ति प्रमुग्धा न भवन्ति प्रमोहस्त्वविवेकः । अत्राप्युदाहृतिर्नाम सध्यङ्गमुक्तम् ॥ **वत्सेति** । काकुरत्राभिप्रेता । किं लोकोत्तराणीत्यर्थं । तदाह—**यैरिति** । यैर्नृपतिभिर्भुवनानि गुप्तानि रक्षितानि सन्ति अकुतोभयानि कुतश्चिदपि भयरहितान्यासन्नभवन् । नास्ति कुतो भयं यस्येति विग्रहे मयूरव्यंसकादित्वात्समास । महान्तोऽभीशव. किरणा येषां ते तथोक्ता । 'अभीशु. प्रग्रहे रश्मौ' इति शाश्वतः । सूर्यान्वयस्य सूर्यवंशस्य केतवो ध्वजवत्प्रकाशकाः पूर्वे प्राचीनास्ते नृपतयो राजानो मया तिरस्कारिता अन्यैः परिभवं मया प्रापिता । किंच यो जटायु. कल्पान्तेष्वपि ब्रह्मादिनावसानेष्वपि स्थिरोऽनश्वर. साधुः परोपकारशील स जटायुर्मया दिवं गमितो लोकान्तरं प्रापित. । किंच वने पत्नीं हारयता रावणकर्तृकसीतापहारे प्रयोजककर्त्रा । मया लोकैर्यत्कर्माकृत तत्कृतम् । अतो लोकोत्तराणि रामस्य कर्माणीत्यर्थ । यद्वा लोकश्रेष्ठानीत्यभिप्रायेण लोकोत्तराणीति लक्ष्मणेनोक्तम् । रामस्त्वर्थान्तरपरिकल्पनार्थं तदेवानुवदति—**वत्स, लोकोत्तराणीति** । लोकानुत्तारयन्त्युल्लङ्घयन्त इति लोकोत्तराणीत्यभिप्रायेण पूर्वे तिरस्कारिता इत्युक्तम् । राजा राष्ट्रमिति न्यायेन लोकशब्दस्तद्राजपर. । किंच लोकमामुष्मिकलोक उत् अतिशयेन तारयन्ति प्रापयन्तीति लोकोत्तराणि । 'वेदान्तं तरति'

हा तात काश्यप शकुन्तराज, क्व पुनस्त्वादृशस्य महतस्तीर्थभूतस्य साधोः संभव· ।

लक्ष्मणः—पश्यामीव तां पश्चिमावस्थां तातस्य जटायुषः ।

यामोषधिमिवायुष्मन्विचिनोषि महावने ।
सा सीता मम च प्राणा रावणेनोभयं हृतम् ॥ २४ ॥

इत्येतदभिधाय वीरलोकानधिष्ठितवांस्तात· ।

रामः—वत्स, हृदयमर्माविध खल्वमी कथोद्घाताः ।

लक्ष्मणः—अथ किम् ।

रामः—किं हि नाम तत्करिष्यते यदेतावतः परिभवातिप्रसङ्गस्य तुल्यं स्यात् ।

प्रागेव राक्षसवधाय मति· कृता मे
वध्या हि ते बहुभिरेव यतो निमित्तै· ।

इत्यादाविव प्राप्त्यर्थकात्तरतेरन्तर्भावितण्यर्थात्पचाद्यच् । इत्यभिप्रायेण जटायुर्दिवं गमित इत्युक्तम् । किंच लोकेभ्य उत्तीर्णानि लोकोत्तराणीत्यभिप्रायेण 'यदकृतं लोकै· कृतं तन्मया' इत्युक्तम्, अतो लोकोत्तराणि रामस्य कर्माणीति सुष्ठूक्तं त्वयेति भाव· ॥ २३ ॥ तीर्थभूतस्य गुरुवद्धितोपदेष्टु· । 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमर । 'भूतं न्याय्ये समे' इति रत्नमाला । क्व सभव इत्यन्वय ॥ पश्चिमावस्थामन्तिमावस्थां पश्यामीव । स्मृतिवैशद्याद्दर्शने साम्यम् । **यामिति** । अयं श्रीरामायणश्लोक । आयुष्मन् । भूम्नि मतुप् । आशास्यमानदीर्घायुष्ट्वेत्यर्थ । या सीतामोषधिमिव मृतसजीविनीमोषधिमिव महावने दुर्लभौषधीनामपि सभवस्थानत्वान्महति वने । ओषधिर्हि वने विचेया भवति । विचिनोष्यन्विष्यसि । सा सीता लोकसजीविनी सीता मम प्राणाश्चेत्युभयम् । सामान्ये क्लीबत्वम् । रावणेन हृतं प्रापितं नाशितं चेत्यर्थ । द्वयमपि तत्रेण विवक्षितम् ॥ २४ ॥ **इतीति** । वीरलोकान्युद्धे हताना वीराणा प्राप्यालोकान् । 'अधिशीङ्स्थासा कर्म' इति कर्मत्वम् । लोकाभिनयेन वीरलोकानित्युक्तम् । 'गच्छ लोकाननुत्तमान्' इत्यनुत्तमलोकप्रदानात् ॥ **वत्सेति** । हृदयमर्माणि विध्यन्तीति विग्रहे 'नहिवृति–' इत्यादिना मर्मशब्दस्य दीर्घ । कथाया उद्घात· प्रस्ताव । 'स्यादभ्यादानमुद्घात ' इत्यमर· ॥ अथ किमित्यङ्गीकारे ॥ **किमिति** । परिभवातिप्रसङ्गस्य परिभवातिशयस्य यत्तुल्यमनुरूपं प्रतिविधानं स्यात्तत्किं नाम करिष्यत इत्यन्वय· । **प्रागेवेति** । प्रागेव सीतापहारादे पूर्वमेव मे मतिरिच्छा राक्षसवधाय कृता । यतो यस्मात्ते राक्षसा बहुभिर्निमित्तैर्मुनिजनकदनादिभिरव्यभिचरितहेतुभिर्वध्या एव । ततो हेतोः प्रागेव मतिः कृतेति सबन्ध· । परत इत पर सीतापहारादिनिमित्तोत्पत्त्यनन्तरं कृत्यं कर्तुं शक्यं प्रतिविधानं कुलस्य

तन्मात्रके त्विह कृतेऽपि कुतः शमो मे
कृत्यं कुलस्य शमनात्परतश्च नान्यत् ॥ २५ ॥

तथा हि वत्स,

प्रचण्डपरिपिण्डितः स्तिमितवृत्तिरन्तर्मुखः
पिबन्निव मुहुर्मुहुर्झटिति मन्युरुच्चैर्ज्वलन् ।
शिखाभिरिव निश्चरन्ननुपलभ्य दाह्यान्तरं
पयोधिमिव वाडवो दहति मामतस्त्रायताम् ॥ २६ ॥

लक्ष्मणः—एतान्यतिसंभ्रान्तविविधमृगयूथान्युन्मत्तश्वापदकुलाक्रान्तविकटगिरिगह्वराण्यरण्यानि दक्षिणा दिशमभि प्रवर्तन्ते । तदेभिरेव पथिभिर्विभावयामः ।

रामः—वत्स, अदृष्टपूर्वाः खल्वमी जनस्थानविभागाः ।

शमनादन्यन्नास्ति राक्षसकुलविध्वंसनादन्यन्न सभवति । इह तु सीतापहरणनिमित्तेषु तु तन्मात्रके तदेव तन्मात्रमल्पं तन्मात्रं तन्मात्रकम् । अल्पमेव राक्षसकुलविध्वंसनम् । तस्मिन्कृतेऽपि मे मम शमो मत्कृतोपरमः कुत । कस्माद्भवेदिति शेष । अत किं नाम करिष्यत इति सबन्ध ॥ २५ ॥ **तथा हीति** । अनुरूपप्रतिविधानदौर्लभ्यादित्यर्थ । **प्रचण्डेति** । प्रचण्डोऽत्यन्ततीव्र परिपिण्डित सघातभावं प्राप्तः स्तिमितवृत्ति स्तब्धवृत्ति । खञ्जकुब्जादिवत्समासः । अन्तर्मुखो गूढप्रसरणो मां मुहुर्मुहु· पिबन्निव झटित्युच्चैर्ज्वलज्ज्वालाभिर्निश्चरन्निव बहिर्निसरन्निव च स्थितो मन्यु· क्रोधो दाह्यान्तरमनुपलभ्य स्वल्पस्य राक्षसकुलविध्वंसनस्यासत्प्रायत्वेन मद्व्यतिरिक्त दग्धव्यं वस्त्वप्राप्य वाडव पयोधिमिव मा दहति भस्मीकरोति । अतोऽस्मान्मन्योर्मां त्रायतां रक्षतु । भवानिति शेष । अनुरूपदाह्यलम्भनादिना मा त्वं रक्षेत्यर्थ । 'भीत्रार्थाना–'इति पञ्चमी । इयमेव वीररसस्य परा काष्ठा । अत्र चाग्निर्हि प्रथमं गोमयपिण्डादिषु पिण्डीभूतशक्त्यावस्थतया स्तब्धवृत्तिरन्तरेव सूक्ष्मम्, अनन्तरमूर्ध्वं ज्वलन्,तदनन्तरं समन्ततो ज्वालाभिर्व्यामुवन्,आश्रयान्तराभावेन स्वाश्रयमेव दहतीत्यस्य प्रसिद्धाग्निवृत्तान्तस्याप्रस्तुतस्य विशेषणसाम्येन स्फूर्तेः समासोक्तिरलकार । 'समासोक्ति परिस्फूर्तिं प्रस्तुतेऽप्रस्तुतस्य यत्' इत्युक्तेः ॥२६॥ अनुरूपदास्या लाभ मन्वानो लक्ष्मणो व्यासङ्गान्तरोत्पादनमेव त्राणं मत्वाह—**एतानीति** । मृगाणां हरिणजातीयाना यूथानि कुलानि । 'सजातीयै. कुलं यूथं तिरश्चां पुंनपुंसकम्' इत्यमरः । श्वापदाना दुष्टसत्त्वानां कुलै समूहै. । 'शुनो दक्ष्रा' इत्यादिना सज्ञाया पूर्वपदस्य दीर्घः । दक्षिणा दिशमभि दक्षिणया दिशोपलक्षणीया सन्तः प्रवर्तन्ते पारम्पर्येण तिष्ठन्ति । 'अभिरभागे' इति कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । विभावयामो विचारयाम· ॥ **वत्सेति** । अदृष्टपूर्वा । पूर्वं कदाप्यदृष्टा इत्यर्थ. ॥ नन्वित्यवधारणे ।

लक्ष्मणः—ननु तदेव तातमारुणिं गृध्रराजमग्निसात्कृत्य निर्गतयोः पञ्चवट्याश्रमादावयोः कोऽपि कालो वर्तते । यतो दूरविच्छिन्नाः संप्रति जनस्थानसीमानः । यथा चेमान्यग्रतः प्रतिभयं जनयन्त्यरण्यानि तथा नूनमयमसौ जनस्थानपश्चिमः कुञ्जरवान्नाम दनुकबन्धाधिष्ठितो दण्डकारण्यभागः ।

रामः—द्रष्टव्य एव स दुरात्मा कान्तारमण्डूकः ।

(नेपथ्ये ।)

कः कोऽत्र भोः । परित्रायतामनेन दुरात्मना राक्षसकबन्धेनाकृष्यमाणामरण्ये स्त्रियम् ।

अहं हि श्रमणा नाम सिद्धा शबरतापसी ।
मतङ्गाश्रमवास्तव्या रामान्वेषिण्युपागता ॥ २७ ॥

रामः—वत्स लक्ष्मण, गच्छ गच्छ ।

लक्ष्मणः—एष गतोऽस्मि । (इति निष्क्रान्त ।)

रामः—

प्रिये हा हा क्वासि प्रकिर मधुरां वाचमथ वा
पराभूतैरित्थं विलपनविनोदोऽप्यसुलभः ।

आरुणिमरुणस्य पुत्रम् । 'अत इञ्' इतीञ् । 'ततोऽहमरुणाज्जात-' इत्युक्तेरग्निसात्कृत्य कृत्स्नमग्निमयं कृत्वा दाहेन संस्कृत्य । 'विभाषा साति कात्स्न्र्ये' इति सातिप्रत्ययः । पञ्चवट्याश्रमान्निर्गतयोरित्यन्वयः । कोऽपि कालो वर्तते । दीर्घकालो गत । वर्तमानसामीप्ये लट् । तत्र हेतुमाह—**यत इति** । दूरं विच्छिन्ना समाप्तिं गता-सीमानोऽवधिभूमयः । **यथा चेति** । प्रतिभयं भयं प्रतीति प्रतिभयम् । तथा तेन हेतुना नून तर्कयामि । 'नूनमवश्यं निश्चये' इत्यमर । जनस्थानस्य पश्चिमः प्रतीच्या दिशि स्थित कुञ्जरवानिति तस्य सञ्ज्ञा । दनुकबन्धेन दनुपुत्रत्वादपमूर्धकलेवरत्वाच्च दनुकबन्धसञ्ज्ञावता । उक्तं च श्रीरामायणे—'श्रिया विराजितं पुत्र दनोस्त्वं विद्धि लक्ष्मण । इन्द्रकोपादिदं रूप प्राप्तमेतद्रणाजिरे ॥' इति ॥ **द्रष्टव्य इति** । कान्तारमण्डूक. । वनान्निर्गमनाशक्त इत्यर्थ । मण्डूको हि जले एव तिष्ठति । तद्वदयं कान्तार एव तिष्ठतीति भाव. । द्रष्टव्य· । विकृतवेषत्वाद्द्रष्टुमाशंसित इत्यर्थः ॥ कः कोऽत्र भो. । विद्यत इति शेष । परित्रायताम् । भवानिति शेषः । **अहं हीति** । शबरी चासौ तापसी चेति विग्रहे कर्मधारयः । 'पुंवत्कर्मधारय–' इति पुंवद्भाव । मतङ्गाश्रमे वास्तव्या वासकर्त्री । सिद्धा सिद्धिमती ॥ २७ ॥ लक्ष्मणनिष्क्रमणेनाद्य व्यासङ्गान्तराभावादु खोद्रेकं रामस्याह—**प्रिये इति** । मधुरा प्रियाम् । 'स्वादुप्रियौ तु मधुरौ' इत्यमर. । वाचं प्रकिर । तत्तदर्थविवक्षया पुन पुन-

अनिन्द्यः पौलस्त्यो व्रजति परिवादो मयि पुन-
र्यतो वैरे रूढे बहुगुणमनेन प्रतिकृतम् ॥ २८ ॥

(तत. प्रविशति लक्ष्मणः श्रमणा च ।)

लक्ष्मणः—

तत्क्रूरदन्तकरपत्रनिकृत्तसत्त्व-
संघातनिःसरदसृक्प्लुतकूर्चगुच्छम् ।
वक्त्रं वपुश्च विकृताकृति दीर्घबाहो-
रार्येण राक्षसकुतूहलिना न दृष्टम् ॥ २९ ॥

आर्ये श्रमणे, अयमार्यः ।

श्रमणा—जयतु जयतु देवः ।

रामः—अथासत्पर्यन्वेषणे किं प्रयोजनम् ।

श्रमणा—शृणोषि रावणानुजं विभीषणम् ।

वेद । अथ वेति पूर्वोक्तस्य प्रतिषेध. । पराभूतै परिभूतैः (कर्तृभि) विलपनविनोदोऽपि 'प्रिये हा हा क्वासि' इत्यादिपरिदेवनेन तु खलधूकरणमप्यसुलभो दुर्लभ पौलस्त्यो रावणोऽनिन्द्यो व्रजत्यहृतभार्यत्वेन निन्दानर्हो यथेच्छं चरति । मयि पुनः परिवादो हृतभार्यत्वेन निन्दा। स्थितेति शेष । यतो यस्मादनेन रावणेन (कर्त्रा) वैरे विद्वेषे रूढे सति जाते सति। ताटकावधादिनेत्यर्थ । बहुगुणमभ्यधिकं यथा तथा प्रतिकृतम् । प्रतिक्रिया कृतेत्यर्थं । अत्र च विराधादिमुखेन पीडनाद्रावणवैरानुगुणं प्रतिकृतम् । सीताहरणेन द्विगुणं प्रतिकृतम् । जटायुवधेन तु तद्बहुगुण प्रतिकृतमिति भाव । जटायुवधो हि सीताहरणादपि गरीयान् । तथा च रामवचनम्—सीताहरणजं दु ख न मे सौम्य तथागतम् । यथा विनाशे गृध्रस्य मत्कृते च परतप ॥' इति । गुणशब्द आवृत्तिवचन । अत्राधिक्यं बोधयति—'मौर्वीसूदवृकोदरतत्त्वावृत्तीन्द्रियेषु रूपादौ । सत्त्वादौ सख्यादौ त्यागादावप्रधानके च गुण. ॥' इति रत्नमाला ॥ २८ ॥ **तदिति** । क्रूरा कर्कशा । 'त्रिषु क्रूरा. कर्कशोष्णनृशंसक्रुद्धभीषणा ' इति रत्नमाला । दन्ता दशना एव करपत्राणि क्रकचानि । 'क्रकचोऽस्त्री करपत्रम्' इत्यमर. । तैर्निकृत्ताना छिन्नाना सत्त्वाना जन्तूना सघातेभ्यो नि सरद्भि प्रवहद्भिरसृग्भी रक्तै प्लुत आर्द्र· कूर्चमेव भ्रूमध्यमेव । 'कूर्चमस्त्री भ्रुवोर्मध्यम्' इत्यमर. । गुच्छ स्तबको यस्य तत्तथोक्तम् । यद्वा कूर्चस्य भ्रूमध्यस्य गुच्छ स्तबको यस्य तत्तथोक्तम् । 'गुच्छस्तु स्तबके स्तम्बे हारभेदकलापयोः' इति रत्नमाला । दीर्घबाहोर्योजनबाहो. कबन्धस्य तद्वक्त्रं विकृताकृति वपुश्च राक्षसकुतूहलिना विकृतवेषराक्षसदर्शनेच्छावतार्येण न दृष्टम् । 'द्रष्टव्य एव स दुरात्मा' इत्युक्तवता त्वया न दृष्टमित्यनुशयो लक्ष्मणस्य सूच्यते ॥ २९ ॥ अथेति प्रश्ने । असत्पर्यन्वेषणे

रामः—कस्तं न शृणोति ।

श्रमणा—स च यदैव दैवात्खरदूषणत्रिशिरसो विनिहतास्तदैव बन्धुभ्यः कस्यापि हेतोरवगृह्य सुग्रीवसख्याद्दष्यमूके वर्तते । तस्यायमात्मसमर्पको लेखः । (इति लेखमर्पयति ।)

लक्ष्मणः—(गृहीत्वा वाचयति ।) स्वस्ति । रामदेवं प्रणम्य विभीषणो विज्ञापयति—

विशिष्टभागधेयानां द्वयी नः परमा गतिः ।
धर्मः प्रकृष्यमाणो वा गोप्ता धर्मस्य वा भवान् ॥ ३० ॥

मदन्वेषणे । रामान्वेषिण्युपागतेति हि तदुक्ति ॥ शृणोषि । शृणोषि किलेत्यर्थः ॥ कस्तं न शृणोति । सुवोऽपि लोकस्य प्रसिद्धं शृणोत्येवेत्यर्थ । किशब्द क्षेपे ॥ स च विभीषणश्च । दैवाद्विधिवशात् । तदैव खरादिवधानन्तरमेव । कस्यापि हेतो केनापि हेतुना । 'निमित्तकारणहेतुषु सर्वासा प्रायदर्शनम्' । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । बन्धूना स्वस्मिन्मनोविकारोत्प्रेक्षणेनेत्यर्थ । उक्त हि माल्यवता—'प्राज्ञ खल्वसावुत्प्रेक्षितविकारः स्वयमेवापसर्पेत्' इति । बन्धुभ्योऽवगृह्य विश्लिष्य । अवग्रहो विश्लेष । अपादाने पञ्चमी । सुग्रीवसख्याद्धेतो । इदमपि माल्यवतोक्तम् 'बाल्यात्प्रभृति' इत्यादिना । तस्य विभीषणस्यात्मसमर्पक स्वभरस्य स्वन्निर्प्राह्यत्वाभिसधिप्रकाशको लेखोऽयमित्युक्त्वा लेखमर्पयतीत्यर्थ । आत्मनः समर्पणमात्मसमर्पक. । भावे घञ् । तस्मादाचष्ट इत्यर्थे णिच् । कर्तरि ण्वुल् । अयमेव सख्यादिषु चरमः समाश्रयो नाम । यथोक्तम्—'अरिणा विध्यमानस्य बलवदाश्रयण समाश्रय' इति ॥ वाचयति पठति । **स्वस्तीति** । अस्त्विति शेष । रामदेवम् । देवशब्दोऽयं परमपूज्यवाची । 'राजा भट्टारको देवः' इत्यमर । **विशिष्टेति** । विशिष्टमतिशयितं भागधेयं भाग्यं येषा ते तथोक्तास्तेषाम् । 'भागरूपनामभ्यो धेय.' इति भाग्यवाचिनो भागशब्दाद्धेयप्रत्यय । नोऽस्मादृशा द्वयी वक्ष्यमाणं द्वयम् । 'द्वित्रिभ्या तयस्यायज्वा' इत्यजादेशस्य स्थानिवत्त्वात् 'टिड्ढा–' इत्यादिना द्वयशब्दान्ङीप् । परमा सर्वातिशायिनी गति । अभीष्टार्थसाधनं भवतीति शेष । का सा द्वयीत्यत्राह—**धर्म इति** । प्रकृष्यमाणः सर्वातिशायी धर्मो वा । अनाघ्रातावद्यगन्धमलौकिकश्रेय साधन वा । 'धर्मेण पापमपनुदति' इत्युपक्रम्य 'तस्माद्धर्म परम वदन्ति' इति श्रुतेरिति भाव । धर्मस्य गोप्ता पालक स्वरूपकर्तृदेशकालपरिकरफलतासाधनभावादिभि सह धर्मस्य सत्तानिर्वाहको भवान्वा सर्वज्ञ सर्वशक्त. सर्वेश्वरः कारुणिक. परब्रह्मभूतस्त्वं वा । भवतीति शेषः । वाशब्दोक्तोऽयं विकल्पो व्यवस्थितविकल्पः । तथाहि धर्म. प्रकृष्यमाणो वेति मीमासकमर्यादा । गोप्ता धर्मस्य वा भवानिति त्रय्यन्तनिष्णातांना मर्यादा । इदं च 'धर्म जैमिनि' 'फलमत उपपत्तेः' इति ब्रह्ममीमासासूत्रयोर्व्यक्तम् । किच धर्मः प्रकृष्यमाणो वेति साधकाना मर्यादा । गोप्ता धर्मस्य वा

रामः—वत्स, ब्रूहि किं सदिश्यतामेवंवादिनः प्रियसुहृदो लङ्केश्वरस्य महाराजविभीषणस्य ।

लक्ष्मणः—यदा लङ्केश्वरः प्रियसुहृदित्युक्तमार्येण तत्किमवशिष्यते संदेशस्य ।

रामः—यथाह सौमित्रिः ।

श्रमणा—अनुगृहीतास्मि ।

लक्ष्मणः—आर्ये श्रमणे, अपि, विभीषणसंपर्कादस्ति काचिदार्यायाः प्रवृत्तिः ।

श्रमणा—वर्तमाने नास्ति । यत्तदा दुरात्मनापह्रियमाणायाः स्रस्तमनसूयानामाङ्कमुत्तरीयम्, तच्च तैर्गृहीतम् ।

रामः—हा प्रिये, महारण्यवासप्रियसखि, विदेहराजपुत्रि ।
(इति सवरण नाटयति ।)

भवानिति शरणागताना मर्यादा । तत्र गुणागुणपरीक्षाया तद्धेतोरेवास्तु तद्धेतुत्वमिति गोप्ता धर्मस्य वा भवानित्येतदेव विभीषणस्य सिद्धान्त । प्रकृष्यमाण इति प्रपूर्वात्कर्षते कर्मकर्तरि यगात्मनेपदे ॥ ३० ॥ कि सदिश्यताम् । किं प्रतिवचनं प्रेष्यतामित्यर्थ ॥ **यदेति** । येन कारणेन । तत्तस्मात्सदेशस्य किमवशिष्यते । सदेशेषु मध्ये कः सदेश कर्तव्यतया तिष्ठतीत्यर्थ । त्व लङ्केश्वरोऽसि, मम प्रियसुहृदसीत्येष एव सदेश फलित इत्यभिप्रायः ॥ **यथेति** । यथाह सौमित्रि । तथास्त्विति शेष· ॥ अनुगृहीतास्मि । विभीषणाय लङ्केश्वरोऽसीत्यादिसदेशेन कृतप्रसादास्मि ॥ **अपि विभीषणेत्यादि** । विभीषणसपर्कादिभीषणसमागमादार्याया· सीताया काचित्प्रवृत्ति काचिद्वार्ता । 'वार्ता प्रवृत्तिर्वृत्तान्त.' इत्यमर । अप्यस्ति । अपि· प्रश्ने । 'गर्हासमुच्चयप्रश्नशङ्कासभावनास्वपि' इत्यमर ॥ **वर्तमान इति** । काले इति शेष । सप्रतीत्यर्थ । **यदिति** । दुरात्मना दुर्बुद्धिना । रावणेनेति शेषः । अपह्रियमाणाया इत्यपादाने पञ्चमी । स्रस्तमध·पतितमनसूयादत्तलादनसूयानामचिह्नं यत्स्रस्तं तत्तैर्गृहीतमित्यन्वय । लक्ष्मणस्य जिज्ञासोदयार्थ श्रमणया तैरिति सामान्येनोक्तम् ॥ **हेति** । महारण्यवासे प्रियसखीत्यर्थ । 'ये त्वया कीर्तिता दोषा वने वास्तव्यता प्रति । गुणा इत्येव तान्मन्ये तव स्नेहपरिप्लुता ॥' इति हि तयोक्तम् । विदेहराजस्य पुत्रीति विग्रह । 'आत्मजस्तनय· सूनु सुत· पुत्र स्त्रियां त्वमी । आहुर्दुहितरम्' इत्यमरः । पुत्रशब्दात्स्त्रीत्वविवक्षाया शार्ङ्गरवादिगणपाठान्ङीन् । 'सूतोग्रराजभोजकुलमेरुभ्यो दुहितु पुत्रङ्वा वक्तव्य.' इति वार्तिकं व्यर्थमिति शाब्दिकाः । सवरणं मूर्च्छाम् ॥ तैरिति श्रमणया सामान्येनोक्ते लक्ष्मणो

लक्ष्मणः—आर्ये, केन वा कस्य वा हेतोस्तद्गृहीतम् ।

श्रमणा—ऋष्यमूके रामगुणपक्षपातात्सुग्रीवविभीषणहनूमत्प्रभृतिभिः ।

रामः—वत्स, द्रष्टव्या हि निष्कारणप्रियकारिणो भुवनमहनीयमहिमानस्ते महात्मानः । तद्वत्स, तस्याः संस्तुतमभिज्ञानं द्रष्टुमृष्यमूकमभिसधाय तावद्गच्छावः ।

श्रमणा—इत इतस्तर्हि देवः ।

(सर्वे परिक्रामन्ति ।)

लक्ष्मणः—हनूमान्हनूमानिति महानयं वीरवादः । अत्रभवतो जातमात्रस्य सततपरिभ्रान्तदेवासुराण्याश्चर्याणि श्रूयन्ते । अपि च किल ।

यद्वज्रलक्षणे वीर्यं यद्वायौ वा समुन्नतम् ।
यद्वालिनि महाबाहौ तच्च वीरे हनूमति ॥ ३१ ॥

विशेषं पृच्छति—**आर्ये केनेत्यादिना** । वयोधिकत्वात्तपोतिशयवत्त्वाच्चार्याशब्द । केन कर्त्रा । कस्य हेतो । केन हेतुना । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । तदुत्तरीयं कुत्र गृहीतमित्यभिप्रेतम् । **ऋष्यमूकेति** । प्रतिवचन ऋष्यमूक इत्युक्ति । रामगुणेषु पूर्वोक्तेष्वाभिगामिकेषु रामस्य गुणेषु पक्षपातात्सारसिकप्रीत्या । 'पक्ष सहायगरुदन्तिकसाध्यभक्तिमित्रेषु चुल्लिविवरे नृपकुञ्जरे च । वृन्दे कचादुपरिमासदलौ च पक्षद्वारे बले च गजपार्श्वविरोधयोश्च ॥' इति रत्नमाला । पातो हि निम्ने सलिलस्येव स्वयमेव प्रवणता । कस्येत्यस्योत्तर रामगुणपक्षपातादिति । 'गुणे हेतावस्त्रियाम्' इति हेतौ पञ्चमी । केनेत्यस्योत्तर सुग्रीवेत्यादिकम् । अभेदैकत्वविवक्षया प्रश्नवाक्ये केनेत्येकवचनम् । प्रतिवचने तु सख्यविशेषविवक्षया बहुवचनम् ॥ **वत्सेति** । निष्कारणप्रियकारिणो मत्त किंचित्फलाभिसधिमन्तरैव मत्प्रियकरा भुवनैर्लोकै· । 'मह्याः क्रोशन्ति' इतिवन्महनीय पूजनीयो महिमा येषा ते तथोक्तास्ते सुग्रीवादयस्तस्या· सीताया सस्तुतमस्माभिश्चिरपरिचितम् । 'सस्तव स्यात्परिचय·' इत्यमर । 'अभिज्ञायतेऽनेनेत्यभिज्ञानमुत्तरीयमृष्यमूकमभिसधायर्ष्यमूकमुद्दिश्य द्रष्टु गच्छाव इत्यन्वय ॥ **इत इति** । तर्हि ऋष्यमूकस्य गन्तव्यत्वे इत इत इति मार्गदर्शनम् । आगच्छत्विति शेष· ॥ वीराणा वादो वीरैरेव गौरवातिशयेन पुन पुन· कीर्तनमत्रभवतः पूज्यस्य जात एव जातमात्रस्यस्य यौवनात्पूर्वमेवेत्यर्थ । सततपरिभ्रान्ता भयातिशयेन संभ्रान्ता देवासुरा यैस्तथोक्तान्याश्चर्याण्यपूर्वकर्माणि । अपि च कि च किलेति प्रसिद्धौ । **यदिति** । वज्रलक्षणे देवेन्द्रे । अस्तीति शेष । महाबाहौ वालिनि समुन्नतं यद्वीर्यमस्ति तच्चेति चकारेण वायुवालिवीर्ययो· समुच्चय । विद्यत इति शेष· ।

श्रमणा—एवमीदृशो हेमगिरिवास्तव्यस्य तत्रभवतः प्लवङ्गपुंगवानीकवृद्धयूथपतेः केसरिणः क्षेत्रसंभवः सूनुराञ्जनेयो हनूमान्नाम । यस्य रेतोधा भगवान्मातरिश्वा तत्किं हनूमतैकेन ।

अम्भोधेर्नारिकेलीरसमिव चुलकैरुद्विलुम्पन्त्यपो ये
येषामुत्क्षेपहेलः शिखरिषु लिकुचोदुम्बरप्राय एव ।
ब्रह्मस्तम्बं निवासद्रुममिव रभसाद्विप्रकर्तुं क्षमा ये
तेषां कोट्योऽप्यसंख्याः सुतममरपतेर्वानराणां नमन्ति ॥ ३२ ॥

रामः—आर्ये, हन्त दक्षिणेनास्थिसचयः सुमहान् । तत्किमेतत् ।

श्रमणा—लक्ष्मणेन योजनबाहोश्चितेयमभिसृष्टा ।

इत्येतत्प्रसिद्धमिति किलशब्दार्थः ॥ ३१ ॥ **एवमिति** । एवमुक्तप्रकारविशिष्ट ईदृश एतत्सदृशैरन्यैरपि प्रकारैर्विशिष्टो हेमगिरौ मेरौ वास्तव्यस्य वास कर्तुस्तत्रभवत पूज्यस्य प्लवङ्गपुंगवाना वानरश्रेष्ठानामनीकस्य सेनाया । 'चक्रं चानीकमस्त्रियाम्' इत्यमर. । केसरिण. केसरिनाम्न. क्षेत्रसभव. पत्न्यामन्येनोत्पादितः । 'क्षेत्र पत्नीशरीरयो.' इत्यमर । अञ्जनाया अपत्यमाञ्जनेय । 'स्त्रीभ्यो ढक्' । अनेनाञ्जना केसरिण. पत्नीत्युक्तम् । हनूमान्नाम हनूमानिति नाम्ना विश्रुत । मातर्याकाशे श्वयति वर्धत इति मातरिश्वा वायुर्यस्य हनूमतो रेतोधा रेतो धत्ते धारयतीति तथोक्तः । 'अन्येभ्योऽपि दृश्यते' इति कर्तरि क्विप् । दधातिरन्तर्भावितण्यर्थ । बीजप्रदः । पितेत्यर्थ· । अनेन क्षेत्रसभव इत्यत्राभिप्रेतोऽन्यो मातरिश्वेत्युक्त भवति तद्विशिष्यकथनाद्धेतोर्व्यञ्जितम् । किं हनूमतैकेन । हनूमदेकसाध्यं न किञ्चिदपीत्यर्थ । अपि तु तादृशा असख्याताः सन्तीत्यर्थः । तदाह—**अम्भोधेरिति** । ये वानरा अम्भोधेरपो जलानि नारिकेलीरसमिव नारिकेलशलाटुस्थितसलिलमिव । पिप्पल्यादित्वान्नारिकेलशब्दाञ्जातिविवक्षाया ङीष् । ततः फलरूपविकारप्रत्ययस्य 'हरीतक्यादिभ्यश्च' इति लुप् । लुपि युक्तवद्भावात्स्त्रीत्वम् । 'आस्वादनध्वनिसुधाम्बुरसाख्यधातुष्विष्टो रस.' इति रत्नमाला । चुलकै प्रसृतिभि· । 'चुलक प्रसृतौ भाण्डे' इति रत्नमाला । उद्विलुम्पन्ति नाशयन्ति 'लुप्लृ च्छेदने' 'शे मुचादीनाम्' इति नुम् । येषा वानराणा शिखरिषु पर्वतेषूत्क्षेप ऊर्ध्वोदञ्चनक्रियाया हेलोऽनादर । 'हेडृ अनादरे' इत्यस्माद्भावे घञ् । डलयोरैक्याल्लकार· । उत्क्षेपविषयानादर इत्यर्थ । लिकुचोदुम्बरप्रायो लिकुचफलोदुम्बरफलसदृशः । प्राय शब्दोऽय तुल्यार्थक । 'प्रायो वयोमृत्युतुल्यबाहुल्यानशनेषु ना' इति रत्नमाला । एवकारस्तु लिकुचोदुम्बरप्रायताया अम्भोविब्रह्मस्तम्बविषयव्यापारेणार्थसिद्धत्वं बोधयति । ये ब्रह्मस्तम्ब ब्रह्माण्ड निवासद्रुममिव विप्रकर्तुं विकारयितुं धूननभञ्जनादिना विकृतं कर्तुं क्षमा. समर्था. । भवन्तीति शेष· । तेषा वानराणामसख्या कोट्योऽप्यमरपते सुतं वालिनं नमन्ति । वन्दन्त इत्यर्थ ॥ ३२ ॥ **आर्य इति** । दक्षिणेन दक्षिणत । एनबन्तमिदम् । अस्था सचय समूहः । हन्त·

रामः—साधु कृतम् ।

लक्ष्मणः—आर्य, पश्य पश्य ।

सौहित्यात्पृथवः क्वथन्ति रुधिरोत्सेकाश्चमत्कारिण-
ष्टङ्कारोत्कटमुच्चरन्ति नलकास्त्वच्मांसविस्रंसनात् ।
उत्सर्पन्त्यथ मेदसा विलयनादुद्बुद्बुदा वीचय-
श्चित्रं चित्रमुदेति कोऽप्ययमितो दिव्यः श्मशानानलात् ॥३३॥

(प्रविश्य ।)

दिव्यपुरुषः—जयतु देवः ।

दनुर्नाम श्रियः पुत्रः शापाद्राक्षसतां गतः ।
इन्द्रास्त्रकृतकाबन्ध्यः पूतोऽस्मि भवदाश्रयात् ॥ ३४ ॥

रामः—प्रियं नः प्रियं नः ।

दनुः—माल्यवत्प्रयुक्तेन च मया युष्मदास्कन्दनाय दूषितमरण्यमा-

शब्दोऽनुकम्पायाम् । किमेतत् । कस्येदमित्यर्थः ॥ योजनबाहो कबन्धस्य । अभिसृष्टा निर्मिता ॥ **सौहित्यादिति** । सुहितस्तृप्तः । 'सुहि तृप्त्यर्थे' इत्यस्मात्कर्तरि क्तः । तस्य भाव सौहित्यम् । गुणवचनत्वाद्भावे ष्यञ् । 'पर्याप्तमुपसंपन्नं तृप्तिः सौहित्यमुच्यते' इति हलायुधः । तस्मात्सत्त्वसंघातमांसभक्षणेन नित्यतृप्तत्वात्कबन्धस्येति भावः । पृथवो विपुला रुधिरोत्सेका रक्तप्रवाहाश्चमत्कारिणः सन्तो द्रष्टॄणां दर्शनकुतूहलहेतवः सन्तः । चमदिति रसार्थकमव्ययम् । क्वथन्ति निष्पच्यन्ते । 'क्वथे निष्पाके' । किंच नलका शङ्कास्थीनि । 'शङ्कास्थि नलकम्' इति हलायुधः । अर्धर्चादेराकृतिगणत्वात्पुलिङ्गोऽपि । नलकशब्दस्त्वचा मांसाना च विस्रंसनादग्निस्पर्शेन बन्धविगलनाद्धेतोश्चमत्कारिण सन्तष्टङ्कारेणोत्कटं यथा तथोच्चरन्ति । उपरिष्टाद्गच्छन्तीत्यर्थः । अथ विलयनादग्निसयोगेन कात्स्न्येन द्रवीभावाद्धेतोरुद्बुद्बुदा अधिकबुद्बुदयुक्ता मेदसा वसाना वीचयः पङ्क्तयस्तरङ्गा वा । वीचिः कुन्तलवक्रत्वे खल्पे पङ्क्तितरङ्गयोः' इति रत्नमाला । उत्सर्पन्त्यूर्ध्वं गच्छन्ति । इत श्मशानानलादेवभूताच्चिताग्नेः । अपादाने पञ्चमी । कोऽप्यनिर्वाच्योऽयं दिव्यो देवसदृश उदेत्युत्तिष्ठति । चित्र चित्रम् । समधिकमाश्चर्यमित्यर्थः । वीरशृङ्गारान्यतरप्रधानके नाटके रसान्तराणावप्यङ्गतयानुप्रवेशस्य वक्तव्यत्वाच्चिताग्न्यादिवर्णनं कविना कृतम् ॥ ३३ ॥ **दनुरिति** । श्रियः श्रीनाम्न्या अप्सरस पुत्रो दनुरिति पितृप्रयुक्तं नाम । इन्द्रास्त्रेण वज्रेण । 'अस्त्रमायुधचापयोः' इति रत्नमाला । कृतं काबन्ध्यं कबन्धत्वं यस्य स तथोक्तो भवदाश्रयाद्भवत्सबन्धात्पूतोऽस्मि शुद्धोऽस्मि ॥ ३४ ॥ प्रियं न इत्यादरार्द्विरुक्ति ॥ **माल्यवत्प्रयुक्तेनेति** । माल्यवता रावणमातामहेन प्रयुक्तेन प्रेरितेन मयारण्यं युष्मदास्कन्दनाय युवयोराक्रमणाय दूषितमासीज्जीवहिंसादिदोषयोजितम-

सीत् । अलं वा कश्मलस्मरणेन । संप्रति युष्मत्प्रभावात्प्रादुर्भूतसहज-ज्योतिषोऽपरोक्षमिव मे वस्तु किंचित्प्रतिभाति । तच्च वः प्रतिविधानाय कृतमहोपकारेभ्यः कथ्यते ।

प्रार्थ्य माल्यवता वाली युष्मद्घाते नियुज्यते ।
तेनापि रावणे मैत्रीमनुरुध्याभ्युपेयते ॥ ३४ ॥

रामः—एष एव पन्थाश्चारित्रस्य ।

न तादृशः सुहृत्कार्ये माध्यस्थ्यमवलम्बते ।
ममाप्यस्मिन्महावीरे सोत्कण्ठमिव मानसम् ॥ ३५ ॥

इतरे—क्वान्यत्र रामदेवादमून्यक्षराणि ।

रामः—भद्र, कृतं सौजन्यम् । अधुना नन्दतु महाभागः स्वेषु लोकेषु ।

(दनुर्निष्क्रान्त ।)

लक्ष्मणः—आर्ये, वालिरावणयोः किंनिबन्धना मैत्री ।

भूत् । **अलमिति** । वाशब्द पूर्वोक्तार्थप्रतिषेधे । कश्मलस्य स्मरणेन प्रसक्तिमात्रेण मूर्च्छाहेतो पूर्वोक्तस्य स्मरणेनालम् । फलं नास्तीत्यर्थ । 'गम्यमानापि क्रिया कारक-विभक्तीना प्रयोजिका' इति स्मरणेन तृतीया । **संप्रतीति** । युष्मत्प्रभावाद्धवन्माहात्म्याद्धेतो प्रादुर्भूतं प्रकाशित सहज स्वाभाविकं ज्योतिर्ज्ञानात्मकतेजो यस्य स तथोक्तस्तस्य मेऽपरोक्षमिव प्रत्यक्षमिव किंचिद्वस्तु प्रतिभाति कश्चिदर्थ प्रकाशते । तद्वस्तु कृतमहोपकारेभ्यो वो युष्मभ्यं प्रतिविधानाय प्रत्युपकाराय कथ्यते । मयेति शेष । तदाह—**प्रार्थ्येत्यादिना** । माल्यवता रावणमन्त्रिणा वाली प्रार्थ्य,युष्मद्घाते युवयोर्वधे नियुज्यते प्रेर्यते । तेनापि वालिनापि रावणे मैत्रीमनुरुध्य रावणसख्यमुद्दिश्याभ्युपेयतेऽङ्गीक्रियते । माल्यवन्नियोग इति शेष । इतिशब्दोऽध्याहर्तव्य । इति कथ्यत इत्यन्वयः ॥ ३५ ॥ **एष इति** । एष एव रावणमैत्र्यनुरोधेन माल्यवन्नियोगाभ्युपगम एव चारित्रस्य वीराणा सद्वृत्तस्य पन्था. । मार्ग इत्यर्थः । **न तादृश इति** । तादृशो महावीरो वाली सुहृत्कार्ये मित्रकार्ये माध्यस्थ्यमौदासीन्यं नावलम्बते नाश्रयति । महावीरेऽस्मिन्वालिनि ममापि मन सोत्कण्ठमिव युद्धेच्छायुक्तमिव । भवतीति शेषः ॥ ३६ ॥ **इतरे** । लक्ष्मणश्रमणादिव्यपुरुषा. । रामदेवादन्यत्र क्व रामादन्यस्मिन्कस्मिन्पुरुषेऽमून्यक्षराणि 'न तादृश.' इत्यादि पूर्वश्लोकाक्षराणि स्युरिति शेष ॥ सौजन्य सुजनस्य कृतज्ञस्य कर्म प्रत्युपकारकरणम् । 'गुणवचन—' इत्यादिना कर्मणि ष्यञ् । कृतमनुष्ठितम् । अधुनाद्य महाभागो भाग्यातिशययुक्त स्वेषु लोकेषु नन्दतु समृद्धि प्राप्नोतु । 'टुनदि समृद्धौ' कामचारे लोट् । त्व स्वीयलोकान्भुङ्क्ष्वे-

श्रमणा—

कैलासे तुलिते जिते त्रिभुवने दृप्यन्तमभ्युद्यतं
दोर्युद्धाय दशास्यमिन्द्रतनयः प्रक्षिप्य कक्षान्तरे।
साध्यं कर्म समाप्य सप्तसु नदीनाथेष्वथो मुक्तवा-
नुन्मुक्ताय नताय नाथितवते सख्यं च तस्मै ददौ ॥ ३७ ॥

लक्ष्मणः—दुरात्मन् पौलस्त्यकुलपांसन, एष ते क्षत्रियपरितापिनोँ वीर्यस्योत्कर्षः।

रामः—एवमुत्तरोत्तरवीरभावश्चित्रीयते वीरलोकः।

लक्ष्मणः—आर्ये, पुरत एष शुभ्रो गिरिः किंनामधेयः।

श्रमणा—

नायं गिरिर्यशोराशिरिव वीरस्य वालिनः।
एष दुन्दुभिदैत्येन्द्रमहिषस्यास्थिसचयः ॥ ३८ ॥

ल्यर्थ ॥ आर्ये श्रमणे, किंनिबन्धना किंकारणिका मैत्री सख्यम् ॥ **कैलास इति।** कैलासे रुद्रावासे कैलासपर्वते तुलिते सत्युत्क्षिप्ते सति। 'तुल उन्माने' सज्ञापूर्वकविधेरनित्यत्वाद्गुणाभाव। यद्वा 'अतुलोपमाभ्याम्' इति तुलाशब्दनिपातनाद्गुणाभाव। तुला च तोलनमुपमा च। तत्र तोलवद्वाचिनस्तुलावच्छब्दात् 'तत्करोति' इत्यर्थे णिचि कर्मणि क्ते च तुलिते तुलावति कृते तोलनवति कृते उत्क्षिप्ते सतीति पर्यवस्यति। अथवा 'अनित्यण्यन्ताश्चुरादय' इति णिजभावे कर्मणि क्तः। त्रयाणा भुवनाना समाहारस्त्रिभुवनम्। पात्रादित्वात्त्रीत्वाभाव। पातालभूस्वर्गेष्वित्यर्थ। जिते सति दृप्यन्तं दर्पयुक्त दोर्युद्धाय बाहुयुद्धायाभ्युद्यंतं प्रयतमानं दशास्यं रावणमिन्द्रतनयो वाली कक्षान्तरे बाहुमूलविवरे। 'कक्षो गुल्मे तृणे बाहुमूले स्त्री तूत्तरकक्षमे' इति रत्नमाला। प्रक्षिप्य निवेश्य सप्तसु नदीनाथेषु समुद्रेषु सांध्यं सध्याभवम्। सधिवेलादित्वादण्। कर्मार्घ्यदानादिक समाप्य निर्वर्त्यार्थो अनन्तरम्। 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्यैंष्वथो अथ' इत्यमर। मुक्तवान्विसृष्टवान्। इन्द्रतनय इत्यनुषङ्ग। इन्द्रतनयो वाली उन्मुक्ताय स्वेन विसृष्टाय नताय नम्राय नाथितवते याचितवते। 'नाथृ याचने' इत्यादिर्धातुपाठ। तस्मै दशास्याय सख्यं सखित्वम्। 'सख्युर्यं' इति भावे य। ददौ दत्तवान्। अतो रावणयाञ्चानिबन्धना वालिरावणयोर्मैत्रीत्युत्तर फलितम् ॥ ३७ ॥ **दुरात्मन्निति।** पौलस्त्यकुलपासन पौलस्त्यकुलदूषण क्षत्रियपरितापिनस्तेऽनरण्यमरुत्तादिक्षत्रियसतापकारिणस्तव वीर्यस्योत्कर्षोऽतिशय एष वालिन्यसत्कल्प। जात इति शेषः ॥ एवमुक्तप्रकारेणोत्तरादतिशयिताद्युत्तरोऽतिशयितो वीरभावो वीरत्वं यस्य स तथोक्तो वीरलोको वीरसमूहश्चित्रीयते। विस्मयं जनयतीत्यर्थ। 'नमोवरिवश्चित्रङः क्यच्' इति करणार्थे क्यच् ॥ **आर्ये इति।** शुभ्रो धवल ॥ **नायमिति।** अयं शुभ्र पदार्थो न गिरि किंतु वीरस्य वालिनो यशो-

लक्ष्मणः—उपरुद्धान्यनेन वर्त्मानि । तत्परिहृत्य गच्छामः ।

रामः—नन्वेहि । (पादाङ्गुष्ठेन क्षिपति ।)

श्रमणा—आश्चर्यमाश्चर्यम् ।

यत्संक्रन्दननन्दनः कपिवृषा निर्मथ्य दोःस्तम्भयो-
व्यापारेण निरास्थदस्थिगिरिवद्देवद्विषो दुन्दुभेः ।
तत्कङ्कालमकालपाण्डुरघनप्रस्पर्धि रुन्धन्नभः
पादाङ्गुष्ठविवर्तनादयमितो निर्विन्ध्यमाविध्यति ॥ ३९ ॥

लक्ष्मणः— प्रशान्तगम्भीरनीलविपुलश्रीररण्यगिरिभूमिः प्रसज्यते ।

श्रमणा—ऋष्यमूकपम्पापर्यन्तभूमयः खल्वेताः । तथा चाग्रतो

राशिरिव यशोराशिरिति संभावनीय एष शुभ्र पदार्थो दुन्दुभिदैत्येन्द्रमहिषस्य दुन्दुमिनाम्नोऽसुरस्य महिषाकृतित्वान्महिषस्य वालिना हतस्यास्थिसचयः । अस्थिसमूह इत्यर्थः । अत्रापह्नुतिरुत्प्रेक्षा चालंकारः ॥ ३८ ॥ अनेनास्थिसंचयेनोपरुद्धानि निरुद्धानि वर्त्मानि मार्गाः । तत्तस्मान्मार्गोपरोधात्परिहृत्य वर्जयित्वा । इममिति शेष ॥ नन्वित्यामन्त्रणे । क्षिपति निरस्यति ॥ **यदिति** । सक्रन्दननन्दन इन्द्रात्मजः कपिवृषा कपीन्द्र । 'वासवो वृत्रहा वृषा' इत्यमर । देवद्विषोऽसुरस्य दुन्दुभेर्यदस्थि कर्म । दो स्तम्भयो स्तम्भसदृशयोर्बाह्वोर्व्यापारेण प्रयत्नपूर्विकया क्रियया गिरिवन्निर्मथ्य' गिरिणा तुल्यं प्रतिहृत्य । 'मन्थ विलोडने' । निरास्थन्निरस्तवान् । 'असु क्षेपणे' पुषादित्वादङ् । 'अस्यतेस्थुक्' इति थुगागम । अय राजपुत्रो रामो नभो रुन्धदावृत्य तिष्ठदकाले वर्षाकाले शरदादौ पाण्डुरेण धवलेन घनेन मेघेन प्रस्पर्धि सघर्षयुक्त तदधिकम् । धवलोन्नतविशालमित्यर्थ । तत्कङ्कालं शरीरास्थि । कर्म । 'स्याच्छरीरास्थि कङ्कालम्' इत्यमर· । पादस्य । न तु बाहुस्तम्भयोरित्यर्थ· । अङ्गुष्ठस्य । न तु पादस्येत्यर्थ । विवर्तनाद्यादृच्छिकस्पन्दनात् । न तु प्रयत्नपुर·सरव्यापारादित्यर्थ । इतोऽस्माद्देशान्निर्विन्ध्य विन्ध्यान्निष्क्रान्त यथा तथा । 'निरादय· क्रान्ताद्यर्थे पञ्चम्या' इति समास· । यद्वा विन्ध्यस्याभावो निर्विन्ध्यम् । अर्थाभावेऽव्ययीभावः । 'तृतीयासप्तम्योर्बहुलम्' इति सप्तम्या अम्भाव· । विन्ध्याभावदेश इत्यर्थ· । न तु विन्ध्यान्तरेवेति भावः । आविध्यति निरस्यति । 'व्यध ताडने' इति दैवादिकोऽयमाङ्पूर्वकः । 'ग्रहिज्या–' इत्यादिना सप्रसारणम् । 'आविद्धौ कुटिलक्षिप्तौ' इति रत्नमाला । अतो वालिनः शतगुणबलो राम इत्याश्चर्यातिशय इत्यर्थ· ॥ ३९ ॥ **प्रशान्तेति** । प्रशान्ता गम्भीराक्षोभ्या नीला विपुला च श्री शोभा यस्या सा तथोक्ता अरण्यगिर्यो· सबन्धिनी भूमिः प्रसज्यते प्रसक्ता भवति संनिहिता भवति । प्रपूर्वकोऽयं सज्जति· समीपगमनार्थं । अत कर्मणि यगात्मनेपदे । अस्मामिरिति शेष ॥ ऋष्यमूकपम्पयो· पर्यन्तभूमयः समीपदेशाः । अग्रत· पुरतो मतङ्गाश्रमपदं मतङ्गाश्रम-

शिशिरकटुकषायः स्त्यायते सल्लकीना-
मिभदलितविशीर्णग्रन्थिनिष्यन्दगन्धः ॥ ४१ ॥

लक्ष्मणः—किमभित एव प्रवृत्तपौरस्त्यमारुतवितन्यमानकदम्बानि काननानि संगलितबाष्पपटलया दृशा परिक्षिप्य धनुरवष्टम्भधीरधारितशरीरेणार्येण सम्प्रति स्थीयते।

रामः—वत्स, किं न पश्यसि।

स्थितमुपनतजृम्भारम्भबिम्बैः कदम्बैः
कृतमतिकलकण्ठैस्ताण्डवं नीलकण्ठैः।

नाम्। 'कुहरं गह्वरे छिद्रे' इति रत्नमाला। भल्लूकयूना तरुणानामृक्षाणाम्। 'ऋक्षाच्छभल्लभल्लूका' इत्यमर। अम्बूकृतानि सनिष्ठीवनशब्दा स्त्यानं सघातभावं दधति धारयन्ति। बहिर्निःसरणविलम्बादिति भाव। शिशिरकटुकषाय। खञ्जकुब्जादिवत्समासः। सल्लकीना गजभक्ष्यवृक्षविशेषाणाम्। '—गजभक्ष्या तु सुवहा सुरभी रसा। महेरुणा कुन्दरुकी सल्लकी ह्लादनीति च॥' इत्यमर। इभैर्दलिताना भग्नाना विशीर्णाना वायुना विशकलिताना ग्रन्थीना पर्वणाम्। 'ग्रन्थि पर्वगदान्तरे' इति रत्नमाला। निष्यन्दस्य स्वरसद्रव्यस्य गन्ध. स्त्यायते सघातभावं भजति। मूर्तद्रव्ययोग्याया सघातभावभजनक्रियाया अमूर्तेन गुणेन गन्धेन करणवर्णनात् 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम्। अन्ययोग्यक्रियाया अन्येन करणं हि कर्मव्यतीहार। अतिशयोक्तिरलंकार ॥ ४१ ॥ **किमित्यादि**। पौरस्त्यमारुतेन पुरोवातेन। 'दक्षिणापश्चात्पुरसस्त्यक्'इति पुर शब्दात्त्यक्प्रत्यय। वितन्यमानानि विकासितानि कदम्बानि कदम्बपुष्पाणि येषु तानि तथोक्तानि। कदम्बशब्दात् 'पुष्पमूलेषु बहुलम्' इति विकारप्रत्ययस्य लुक्। सगलितं सम्यग्गलितं बाष्पपटलमश्रुसमूहो यस्या. सा तथोक्ता तथा परिक्षिप्य समन्ततो दृष्ट्वा धनुरवष्टम्भेन धनुरवलम्बनेन धीर धैर्ययुक्त यथा तथा धारितं शरीर येनेति विग्रह। किं स्थीयते किमर्थं निर्व्यापारेण भूयते॥ **स्थितमिति**। उपनतं प्राप्त जृम्भारम्भस्य विकासप्रादुर्भावस्य। 'जृम्भस्तु जृम्भणे। त्रिषु ना तु विकासे स्यात्' इति रत्नमाला। बिम्बं चिह्नं येषा तानि तथोक्तानि तै। 'प्रतिबिम्बे तत्प्रकृतौ प्रतिकृत्या च मण्डले। लाञ्छनेऽपि च बिम्बोऽस्त्री' इति रत्नमाला। कदम्बै कदम्बवृक्षै कर्तृभि स्थितं तस्थे। भावे क्त। अतिशयित कलोऽव्यक्तमधुरध्वनिर्येषु तथोक्ता कण्ठा येषा तथोक्तैर्नीलकण्ठैर्मयूरैस्ताण्डवं नाट्यं कृतम्। यद्वातिकलकण्ठै प्रकृष्टकोकिलयुक्तैर्नीलकण्ठैर्मयूरै। कोकिलगानानुसारिभिर्मयूरैर्नृत्यत इत्यर्थ। 'प्रकर्षे लह्वनेऽप्यति' इत्यमर। विघटमानानि विकसन्ति प्रौढानि बृहन्ति तापिञ्छानि तमालकुसुमानीव नील। 'उपमानानि सामान्यवचनै' इति समास। 'कालस्कन्धस्तमाल स्यात्तापिञ्छोऽपि' इत्यमर। अद्रेः शिखरं श्रयति भजति। अतो वर्षागमो विह्वलयतीति भाव। अत्र कदम्बकान-

अपि च विघटमानप्रौढतापिञ्छनीलः
श्रयति शिखरमर्द्रेर्नूतनस्तोयवाहः ॥ ४२ ॥

लक्ष्मणः—(स्वगतम् ।) अपि नामार्यः केनचिद्रसान्तरेण विक्षिप्यते ।

(नेपथ्ये ।)

मातामह मातामह, प्रतिनिवर्तस्व ।
त्वन्नियोगादयुक्तोऽपि वधः साधोः करिष्यते ।
पूज्योऽसि ननु मित्रस्य यो गुरुर्गुरुरेव सः ॥ ४३ ॥

लक्ष्मणः—आर्ये, कोऽयम् ।

श्रमणा—देव, पश्य पश्य ।

बिभ्राणश्चारुचामीकरकमलमयं दाम दत्तं मघोना
पिङ्गेनाङ्गेन सध्याच्छुरित इव महानम्बुवाहस्तडित्वान् ।
उत्पातावि‌द्धमूर्तेर्दधदुपरि गिरेर्गैरिकाङ्कस्य लक्ष्मी-
मन्तः सीमन्तरेखामिव वियति जवादिन्द्रसूनुस्तनोति ॥ ४४ ॥

नादीन्युद्दीपकानि विरहात्मको विप्रलम्भशृङ्गारः । तदुक्तम्—'सभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः । सयुक्तयोस्तु सयोगो विप्रलम्भो वियुक्तयोः ॥' इति । मलयानिलचन्द्राद्यास्तटस्था. परिकीर्तिता.' इति ॥ ४२ ॥ तदेतदवलोक्य लक्ष्मणस्यानुसधानमुच्यते—**अपि नामेत्यादि** । रसान्तरेण प्रकृताद्विप्रलम्भशृङ्गाररसादन्येन वीररसादिनापि विक्षिप्यते व्यासक्त क्रियते । विक्षेपो हि मनसोऽन्यथाप्रवृत्ति· ॥ **त्वन्नियोगादिति** । त्वन्नियोगात्त्वदाज्ञया सावोर्न्यायादनपेतस्य रामस्य । कुत इत्यत्राह—ननु पूज्योऽसीति । तदपि कुत इत्यत्राह—मित्रस्य गुरुरिति । यो मित्रस्य गुरुर्मातामह स गुरुरेव । ममापीति शेषः ॥ इद वालिनो वाक्यम् ॥ ४३ ॥ **बिभ्राण इति** । मघोनेन्द्रेण दत्त चारुचामीकरकमलमयं हेमपद्ममयम् । 'चामीकरं जातरूपम्' इत्यमरः । 'नित्य वृद्धशरादिभ्य ' इति विकारार्थे मयट् । दाम मालाम् । 'न पुंसि दाम सदानम्' इत्यमर । बिभ्राणो दधान । पिङ्गेन पिङ्गलेन । 'पिङ्गलः पिङ्गपिशङ्गौ' इत्यमर । अङ्गेनोपलक्षितोऽन एव तडित्वान्विद्युत्वान्सध्यया सध्यारागेण छुरितो रूषितो महानम्बुवाह इव स्थित कनकदामपिशङ्गाङ्गयोस्तडित्सध्यारागयोश्च बिम्बप्रतिबिम्बभावेनैकीभावः । कि चोत्पातेनाभ्युत्पातेनाविद्धमूर्तेरावृतशरीरस्य । 'आविद्धौ कुटिलक्षिप्तौ' इति रत्नमाला । गैरिकाङ्कस्य धातुविशेषभूषितस्य । 'स्वर्णे धातौ च गैरिकम्', 'अङ्को नाटकविच्छेदे सख्याया युधि भूषणे' इति च रत्नमाला । गिरेर्लक्ष्मी श्रियमुपरि दधद्वहन् । अत्राप्युत्पाताविद्धमूर्तित्वपिङ्गाङ्गत्वयोः कनकदामगौरिकयोश्च बिम्बप्रतिबिम्बभाव । गगनचरत्वात्प्रथमदृष्टान्त , स्थिरत्वादिना

लक्ष्मणः—आर्य, आर्य, दिष्ट्या प्राप्तः स वीरगोष्ठीविनोद-प्रदानप्रियसुहृन्माघवतः ।

रामः—(स्वगतम् ।) महावीरः सः ।

(तत. प्रविशति वाली ।)

वाली—

लोकालोकालवालस्खलनपरिपतत्सप्तमाम्भोधिपूरं
विश्लिष्यत्पर्वकल्पत्रिभुवनमखिलोत्खातपातालमूलम् ।
पर्यस्तादित्यचन्द्रस्तबकमवपतद्भूरितारापसूनं
ब्रह्मस्तम्बं धुनीयामिह तु मम विधावस्ति तीव्रो विषादः ॥४५॥

द्वितीयदृष्टान्त. । एवंभूत इन्द्रसूनुर्वाली जवाद्वेगाद्वियति नभस्यन्तर्मध्ये सीमन्तरेख केशपाशरेखाम् । 'रेखा तु श्रेणिरेखयो.' इति रत्नमाला । तनोतीव करोतीव । अत्रोपमानिदर्शनोत्प्रेक्षाणां सकरः ॥ ४४ ॥ दिष्ट्येत्यानन्दे । स प्रसिद्धो वीराणा गोष्ठ्या सभाया. । 'सभासंलापयोर्गोष्ठी' इति रत्नमाला । विनोदे रसोत्पादक. सङ्ग्रामस्तस्य प्रदानेन प्रियसुहृदिष्ट सखा माघवतो मघवत इन्द्रस्य पुत्रः । 'तस्यापत्यम्' इत्यण् । वाली प्राप्तः । आगत इत्यर्थ ॥ **लोकालोकेत्यादि** । अहं ब्रह्मस्तम्बं गुल्मसदृशं ब्रह्माण्डं कर्म । 'स्तम्बो गुल्मेऽप्यशाखेऽद्रौ' इति रत्नमाला । लोकालोक एव चक्रवालपर्वत एव । 'लोकालोकश्चक्रवाल ' इत्यमर । आलवाल जलाधारविशेष । 'स्यादालवालमावालमावापः' इत्यमर । तस्य स्खलनेन सचलनेन परिपततः सप्तमाम्भोधे पूरा. प्रवाहा यस्मिन्कर्मणि तद्यथा भवति तथा । किच विश्लिष्यन्ति शिथिलीभवन्ति पर्वाणि ग्रन्थयो यस्मिन्कर्मणि तत्तथोक्तम् । 'पर्व ग्रन्थौ पञ्चदश्यामुत्सवे विषुवादिके' इति रत्नमाला । ईषदूनं विश्लिष्यत्पर्व विश्लिष्यत्पर्वकल्पम् । 'ईषदसमाप्तौ कल्पप्' इत्यादिना कल्पप्प्रत्ययः । शिथिलग्रन्थिप्रायमित्यर्थः । तथाविधं त्रिभुवनं यस्मिन्कर्मणि तत्तथोक्तम् । किचाखिलान्युत्खातान्युत्पाटितानि पातालस्य मूलान्येव मूलानि यस्मिन्कर्मणि तथोक्तम् । किच पर्यस्तौ परितो निरस्तावादित्यचन्द्रावेव स्तबकौ गुच्छौ यस्मिन्कर्मणि तत्तथोक्तम् । किचावपतन्त्यधः पतन्ति भूरीणि बहूनि । 'भूरि खर्णे बहौ त्रिषु' इति रत्नमाला । तारा एव नक्षत्राण्येव प्रसूतानि पुष्पाणि यस्मिन्कर्मणि तत्तथोक्तम् । 'तारा स्यात्सुग्रीवगुरुयोषितो· । कनीनिकर्क्षयो.' इति रत्नमाला । धुनीया कम्पयितुं शक्नोमि । 'शकि लिङ्' 'धूञ् कम्पने' क्रयादिः 'कुडिकम्प्योर्नलोपश्च' इति सूत्रेणावगतं कम्पिपदप्रवृत्तिनिमित्त कम्पयितृत्वम् । मम तु ब्रह्माण्डमविषयं भवेदिति भाव· । कित्विह विधौ माल्यवन्नियुक्ते कार्ये रामद्रोहरूपे तीव्रः क्रूरो विषादः खेदो ममास्ति । रामस्य न्यायवृत्तत्वादिति भावः । अत्र ब्रह्माण्डे गुल्मलाध्यवसायाद्रूपकातिशयोक्ति. । तदङ्गानि तु लोकालोकालवालादीनि रूपकाणीति सकर.

एव नामायुक्तमनुरुध्यमाना. पुमांसो महत्ययुक्तगह्वरे निपात्यन्ते । यदनेन माल्यवता पौलस्त्यमैत्रीप्रतिश्रवमनुस्मार्य तत्रभवतो रघूद्वहस्य निधने नियुक्तोऽस्मि । अहो ग्रहः । प्रातरारभ्य मामनुबध्नन्किष्किन्धायाः प्रस्थाप्य प्रतिनिवृत्तः । कष्टं भोः, कष्टम् ।

दौरात्म्यादरिभिर्निजार्जवशुचौ मायाविभिर्वञ्चिते
धर्मात्मन्यतिथौ निरागसि जगत्पूज्ये गृहानागते ।
एतस्मिन्नुचितं न नाम विहितं वाचापि नावेदितं
पापं प्रत्युत दारुणं व्यवसितं सख्यं किमेतादृशम् ॥ ४६ ॥

॥ ४५ ॥ **एवमिति** । अयुक्तमनुरुध्यमाना अन्याय्य कार्य कामयमाना· । अयुक्तगह्वरेऽन्याय्यकार्य एव गह्वरे देवखातबिले निपात्यन्ते । कर्मकर्तरि यगात्मनेपदे । स्वयमेव पतन्तीत्यर्थ । यद्यस्मात्पौलस्त्यमैत्रीप्रतिश्रवं रावणाय सख्यप्रतिज्ञानम् । 'अङ्गीकाराभ्युपगमप्रतिश्रवसमाधय ' इत्यमर· । अनुस्मार्य स्मारयित्वा रघूद्वहस्य रामस्य निधने वधे । अहो ग्रहो विस्मयनीयो माल्यवत स्वकार्यनिर्बन्ध· । 'निर्बन्धोपरागार्कादयो ग्रहा.' इत्यमर । प्रातरारभ्य प्रात·कालादारभ्य मामनुबध्नन्नुनयन् । किष्किन्धाया इत्यपादाने पञ्चमी । **दौरात्म्यादिति** । निजेन स्वीयेनाविनाशिना वा । 'निजौ स्वीयाविनाशिनौ' इति रत्नमाला । **आर्जवेनाकुटिलत्वेन शुचौ शुद्धेऽनुपहते वा** । 'शुचिर्ना शुक्रशुङ्गारचन्द्राषाढहरामिषु । उपधाशुद्धसचिवे ग्रीष्मे श्वेतगुणे त्रयौ ॥ अयं तु श्वेतगुणिनि शुद्धेऽनुपहते त्रिषु ॥' इति रत्नमाला । मायाविभिर्वञ्चनाप्रचुरैररिभि· कर्तृभि· । दौरात्म्यात्सहजशाठ्यलक्षणदु स्वभावाद्वञ्चिते धर्मात्मनि धर्मस्वरूपे । 'रामो विग्रहवान्धर्म·' इत्युक्तम् । अतिथौ । अतिथिलक्षणमापस्तम्बेनोक्तम्—'अग्निरिव ज्वलन्नतिथिरभ्यागच्छति धर्मेण वेदानाम्' इत्यारभ्य 'धर्मपुरस्कारो नान्यप्रयोजनो य सोऽतिथिर्भवति तस्य पूजाया शान्ति· स्वर्गश्च' इति । निरागसि निर्दोषे निरपराधे वा । 'आगो मन्तौ च किल्बिषे' इति रत्नमाला । जगता पूज्येऽवश्यपूजनीये पूर्वोक्तातिथिपूजनस्योद्देश्यभूते । तथा च स्मृतिः—'गोदोहकालं काङ्क्षेत गृहद्वारि समागत । अतिथिर्विष्णुमुद्दिश्य पूजनीयो विशेषत ॥' इति । गृहानागतेऽस्माभिर्गन्तव्येऽपि स्वयमेव गृहं प्राप्ते । यद्यपि 'अतिथिर्नो गृहागते' इत्यमरोक्त्या गृहागतत्वमप्यतिथिशब्दार्थान्तर्गत तथापि श्रोत्रियत्वाद्यतिथिलक्षणानाक्रान्तोऽपि गृहं गत एव पूजनीय इति बोधयितुं पृथगुक्ति । एतस्मिन्नाम उचितं पूर्वोक्ताजैवादिगुणानुरूपमर्हणं न विहितं नाम न कृतं नाम । नामेति कुत्साया्म् । अस्मिन्नुचितविधानाभाव· कुत्सित इत्यर्थ· । उचितमित्यनेन 'तस्याभिमुखोऽभ्यागम्य तस्यासनमाहारयेत्तस्य पादौ प्रक्षालयेत्तस्योदकमाहारयेत्साल-

१. एतावत्येव भवभूते. सूक्तिः । इत पर तु सुब्रह्मण्यनाम्नः कस्यचित्कवेर्वच इति

अवश्यं च श्रेयस्विना मया भवितव्यम् ।

यशःसतानो मे विशदशरदिन्दुद्युतिनिभ-
प्रकाशो विश्वान्तर्विलसति दिगन्ते विसृमरः ।
त्रयाणा लोकानामधिपतिरजय्यो जनयिता
तत. श्रेयोमूलं सुजनचरितं मेऽभिरुचितम् ॥ ४७ ॥

अनतिक्रमणीय च सुहृद्वाक्यम् । तदेवमुभयतःपाशया रज्ज्वा बद्धः समुग्धोऽस्मि । (सविचार परिक्रम्य राममवलोक्य ।) अहो, अचिन्त्याद्भुतमहिमानुभावमप्रतिहतानन्तशक्तिकमप्राकृतमिदं किमपि ज्योतिः । अपि च । मन्ये पौराणिकेषु प्रसङ्गप्रकरणेषु प्रख्यातम् । सत्यमेतस्यैव तेजोलेशविलासरूपाणि नान्यस्य ।

यित्वा तर्पयेत्' इत्यापस्तम्बोक्त विवक्षितम् । वाचापि नावेदितम् । उचितकरणाभावेऽपि वाङ्मात्रेण नावेदितमुचितमित्यनुषङ्गः । मुख्यातिथिकल्पानुष्ठानेऽप्यनुकल्पातिथिकल्पोऽपि न कल्पित इति भाव । तदाह गौतमः—'विपरीते तृणोदकभूमिस्वागतम्' इति । प्रत्युतोचितकरणादिविपरीतं दारुणं पापकृतामपि भयंकर पापमनिष्टाचरणम् । वध इति यावत् । व्यवसित कर्तव्यतया निश्चितम् । ममेति शेष । एतादृशं पूर्वोक्तरीत्या सर्वदोषास्पद सख्यं रावणसख्य किम् । गर्हितमित्यर्थ । किशब्द क्षेपे ॥ ४६ ॥ **अवश्यं चेति** । मया श्रेयस्विनावश्य भवितव्यमित्यन्वय. । **यशःसंतान इति** । विशदशरदिन्दुद्युतिनिभप्रकाशो निर्मलचन्द्रिकासदृशकान्ति. । यशस श्वेत्यशैत्यादिवर्णन समयसिद्धम् । विश्वस्मिन्नन्तर्विश्वान्त । शौण्डादित्वादन्त.शब्देन सप्तम्याः समास. । विसृमरो विकसितः । 'विकासी तु विकस्वर । विसृत्वरो विसृमर' इत्यमर. । अजय्यो जेतुमशक्य. । 'क्षय्यजय्यौ शक्यार्थे' इति निपातितः । इन्द्र । मे पितेत्यर्थ । ततः कीर्तिजन्मवशाद्धेतोरभिरुचितम् । इष्ट भवतीत्यर्थ. । 'रुच्यर्थानाम्' इति चतुर्थी ॥ ४७ ॥ **अनतिक्रमणीयमिति** । उभयतःपाशयोभयतोऽपि बन्धनयन्त्रयुक्तया उभयतोऽपि शस्त्रयुक्तयापि । 'पाशो बन्धनशस्त्रयो.' इत्यमर । **अहो इति** । महिमा गुणोत्कर्षः, अनुभावः प्रभाव., शक्तयः सामर्थ्यानि, अप्राकृतं प्राकृतविजातीयं पौराणिकेषु पुराणे भवेषु । 'तत्र भव' इत्यण् । प्रसङ्गप्रकरणेष्वन्यपरोक्तिप्रस्तावेषु । एतेनापक्षपातिप्रमाणप्रतिपन्नत्वं विवक्षितम् । प्रख्यात चेत्यर्थः । अपि चेति समुच्चयेनाचिन्त्याद्भुतत्वादेः सग्रह । **सत्यमेतस्यैवेति** । तेजोलेशस्य विला-

---

मूल एव स्फुटीभविष्यति । अवश्य चेत्यादीनि सुब्रह्मण्यकवेर्वचास्यपि प्रायशो व्याख्यास्यन्ते—वीरराघवः.

अत्युग्रोदग्रवल्गद्धगधगितजगद्दाहरौद्राधिकार-
क्रीडत्कल्पान्तकालज्वलनविलसदुद्दामचण्डायितानि ।
सवर्तारम्भसर्वंसहवनयनमहाव्यग्रहव्यग्रहौध-
प्राग्भारोद्दामघोरज्वलदुरुमिहिरज्योतिरुज्जृम्भितानि ॥ ४८ ॥

(परदेवताप्रतिपत्तिपूर्वकं भक्तिमभिनीय ।)

यथायं निध्यातः स्फुरति हृदि संभावितपरः-
सहस्रब्रह्माण्डप्रलयपुनरुद्बोधविभव ।
तथा मन्ये नूनं जगवदनहेतोरवतरं
गतो देव. साक्षाज्जयति भुवि नारायण इति ॥ ४९ ॥

धिक् त विनिपातहेतुभूतं सुहृत्कार्याभिनिवेशम् । यत एतादृशे महात्मनि महंत्पापं कर्तुमध्यवसितम् । परित्यज्यतामिदं सौहार्दम् । नास्ति मे प्रत्यवायः । तथाहि ।

अधर्मो धर्मतामेति ह्यादते परमेश्वरे ।
धर्मोऽप्यधर्म एव स्यात्तमनादृत्य भावित· ॥ ५० ॥

सरूपाणि । अस्य चोत्तरत्रान्वय. । **अत्युग्रेति** । अत्युग्राण्युदग्राण्यधिकानि वल्गच्चलत् । 'वल्ग चलने' । धगधगितमिति ज्वालातिशयानुकरणं येषां तानि तथोक्तानि जगद्दाहे रौद्राधिकारेण भयंकरेण व्यापारेण क्रीडन्ति कल्पान्तकालज्वलनस्य विलसन्त्युद्दामान्युच्छृङ्खलानि चण्डायितानि क्रूराचरणानि । अत्युग्रेत्यादीना कर्मधारयः । सवर्तारम्भः प्रलयारम्भः प्राग्भारः समूहश्चण्डायितान्युज्जृम्भितानि च विलासरूपाणीति सबन्ध ॥ ४८ ॥ परदेवताप्रतिपत्ति परदेवतात्वप्रमितिः । **एथेति** । अयं रामो निध्यातः सन्सभावितो निश्चित पर सहस्राणा सहस्रेभ्यः परेषा ब्रह्माण्डाना प्रलयः सक्षयः पुनरुद्बोधः पुनः सर्गश्च तावेव विभवोऽतिशयो यस्य स तथोक्तस्तथाविधो यथा यस्मात्स्फुरति प्रकाशते तथा तस्माद्धेतोर्नारायण. । 'आपो नारायण.' इत्युक्तरीत्यानन्यपरनारायणशब्दाभिधेयो भगवान्श्रिय पतिर्जगदवनहेतोर्लोकरक्षणात्मकप्रयोजनाय साक्षादवतरं मुख्यावतारम् । 'अवतारश्चावतर.' इति द्विरूपकोश । गत सन्प्राप्त. सन्भुवि जयतीति मन्ये । नूनमिति निश्चये । व्ययपूर्वकत्वात्सृष्टेः प्रलय. पूर्वं निर्दिष्ट. । 'प्रसुप्तमिव सर्वत.' इत्येतदपेक्षया सर्गस्योद्बोधत्वोक्तिः ॥ ४९ ॥ **धिगिति** । विनिपात आत्महानि । अभिनिवेश उत्कटाभिलाष । यतो येनाभिनिवेशेनाध्यवसितं निश्चितम् । मयेति शेष. । परित्यज्यतामवश्यं त्याज्य. । मयेति शेषः । सौहार्द रावणसख्यम् । 'हृद्भग–' इत्यादिनोभयपदवृद्धिः । 'सौहार्दं सौहृदम्' इति द्विरूपकोश· । प्रत्यवायो दोषः । **अधर्म इति** । परमेश्वरे रामे आदृते सत्यधर्मो मित्रद्रोहादिर्धर्मता नि श्रेयससा-

(पुन सविषादम्।) महावीराणां वानरेन्द्राणां राक्षसेन्द्राणा च समक्षं माल्यवन्तं प्रति प्रतिश्रुतसङ्गामस्य युद्धवैमुख्ये सति कथं ते महात्मानो मन्येरन्। चिरार्जितं च विश्वव्यापकं मद्यशो लुप्येत। अपयशश्च लोके सर्वत्र प्रचुरं स्यात्। किमत्र समाधानम्। (विचिन्त्य।) एवं क्रियताम्। समानबलेनैव वाली युध्यत इति काचिदस्ति मे प्रसिद्धिः। तथैव मे प्रतिज्ञा च। सत्यप्रतिज्ञश्चाहम्। तथैव बलसाम्यपरीक्षाव्याजेनासाध्यं किंचित्प्रत्यायनं कर्म प्रार्थ्यतां रामभद्रत.। (पुन· सविषादम्।) अहो, महाप्रभावस्य रामस्यासाध्यं नाम किंचिदस्ति। येन दुन्दुभिदेह· पादाङ्गुष्ठेन विन्ध्यात्परमाविद्धः। (पुनर्विचिन्त्य सावज्ञम्।) किंचित्प्रत्यायनं प्रार्थ्यताम्। तत स्वावमानहेतुभूते प्रत्यायने रामो न प्रवर्तेत। तथा च सिद्धं नः समीहित सङ्गामवैमुख्यम्। (पुनर्विमृश्य सविषादम्।) अहो, महात्मानं प्रति कथमेतादृशं वचनं वक्तुकामोऽस्मि। किमनेन प्रत्यवायसंवलितेन वक्रमार्गेण। ततः सङ्गामनिवृत्तौ ऋजुरेष मार्गो निष्कलङ्कश्च। त्यज्यतामिदमध्यवसितम्। किंतु जगत्पूज्यो भवानतिथिरस्माकमागत इति बहुमानवचनपुरःसर-

---

धनतामेति प्राप्नोति। तं परमेश्वरं राममनादृत्य भावितस्वद्भक्तिविरोधेनानुष्ठितो धर्मो मैत्री प्रतिश्रवादिरधर्म एव स्यादात्मान्तनरकहेतुर्भवेत् ॥ ५० ॥ **महावीराणामिति**। समक्षं संनिधौ। प्रतिश्रुतसङ्गामस्य प्रतिज्ञातयुद्धस्य। 'अङ्गीकृतमाश्रुतं प्रतिज्ञातम्' इत्यमर। महात्मानो महाबुद्धयः। विश्वव्यापकं त्रैलोक्यविस्मरम्। लुप्येत छिन्नं भवेत्। कर्मकर्तरि यगात्मनेपदे। सभावनाया लिङ्। अपयशो यशोविपरीतं दोषप्रख्यान प्रचुरं बहुलम्। 'प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु' इत्यमर·। अत्रास्मिन्विरोधे समाधानं कार्यद्वयविरोधशमनम्। युद्धयते युद्धं करोतीति। प्रसिद्धि· प्रख्यातिः। **तथैवेति**। असाध्यं रामेणाशक्यम्। प्रत्यायनं समानबलत्वप्रत्ययोत्पादकम्। असाध्यं किंचिदस्ति नाम। अशक्यं किंचिदस्तीति सभावना विस्मयनीयेत्यर्थ.। 'नाम प्राकाश्यसभाव्य–' इत्यमर। आविद्ध क्षिप्त·। सावज्ञमत्यल्पत्वादवमानयुक्तम्। किंचित्प्रत्यायन प्रत्ययकरं स्वावमानहेतुभूते। तन्मात्रार्हत्वसंभावनाद्वारा स्वपरिभवकरे समीहितमभिलषितमेत दृशवचनमवमानहेतुप्रत्यायनप्रार्थनावाक्यम्। प्रत्यवायसवलितेन दोषयुक्तेन। सङ्गामनिवृत्तौ युद्धनिवृत्तिं प्रति। ऋजुरकुटिल·। एष वक्ष्यमाण। जगत्पूज्य इत्यादि बहुमानसूचकवाक्यपूर्वकम्। सख्य मैत्री। यथा तथा वा गुण इति वा दोष इति वा। प्रोत्साहनं

मेव सख्यं क्रियताम् । वानरराक्षसाश्च यथा तथा वा जानन्तु । (पुनर्विमृश्य सविषादम् ।) लोकप्रसिद्धं वालिरावणयोः सख्यं रामो जानाति । अद्यतनं च मां प्रति माल्यवतः प्रोत्साहनं समीपगतस्य रामस्य कर्णपथं गतं स्यात् । तथा च रावणसौहृदपरित्यागिनं मित्रद्रोहिणं महापापिनं मत्वा न मामङ्गीकुर्यात्कदाचित् । समये प्राप्ते रावणमिव माममं परित्यजेदित्यविश्वसनीया बुद्धिश्च तस्य स्यात् । अतो दुर्घट तेन सख्यम् । तदीयहृदयदूरभूतस्यैहिकामुष्मिकप्रसङ्गो दूरत एव । अतस्तदपेक्षया सावज्ञप्रत्यायनप्रार्थनमेव गरीय । न चास्मिन्पक्षे रामस्यानाश्वासप्रसङ्ग सुहृत्कार्यविरुद्धं समामबलेन संप्रहार इति प्रतिज्ञापरिपालनमधर्म इति । यत· सर्वापेक्षया सत्यप्रतिज्ञता च बलवती । तथैव हरिश्चन्द्रादिभि सत्यप्रतिज्ञतानुरोधेन चण्डालदास्यादिकमप्याचरितम् । न चेदमवमानहेतुतया रामस्य प्रकोपहेतु· । महाप्रभावस्य तस्य मादृशै· कियानवमान· । किच महत्स्वेवापराधेषु महात्मनां प्रकोप । अतो मादृशानां वाङ्मात्रेण कोप न करिष्यति । तस्मात्तेनैव व्याजेन सङ्ग्रामः परिहरणीयः ।

नि·सारं निरयानुबन्धि च निराकुर्यामिदं सौहृदं
निःशेषाश्च निशाचरा निजपदाद्भ्रश्यन्तु नश्यन्तु वा ।

रामेण सह युद्धकर्तव्यतान्यवसायजननम् । 'उत्साहो व्यवसाय स्यात्' इत्यमर· । कर्णयो· पन्था कर्णपथ· । 'ऋक्पूरब्धू –' इत्यादिना समासान्तः । रावणसौहृदपरित्यागिनं रावणसख्यत्यागिनम् । अयं वाली । तस्य रामस्य । ऐहिकामुष्मिके एतद्दृष्टानुभाव्य देहान्तरानुभाव्यं च श्रेयस्तयो प्रसङ्ग प्रस्ताव· । गरीयो गुरुतमम् । त्रिष्वेकस्य निर्धारणादीयसुन् । **न चेत्यादि** । सावज्ञप्रत्यायनप्रार्थनया रामस्य वैमुख्यपक्षे रावणकार्याकरणान्मित्रद्रोहिशङ्कारूपोऽनाश्वासप्रसङ्गश्च नेत्यर्थ· । **यत इत्यादि** । सर्वापेक्षया रावणसख्यपरिपालनाद्यपेक्षया । सत्यप्रतिज्ञता प्रतिज्ञापरिपालनम् । **हरिश्चन्द्रादिभिरिति** । आदिपदेन दशरथादय परिगृह्यते । चण्डालदास्यादिकमित्यादिपदेन सर्वागृहीतराज्यमपि वासनावशादिक(?) गृह्यते । **न चेदमिति** । इदं सावज्ञप्रत्यायनप्रार्थनम् । प्रकोपहेतु प्रकृष्टकोपहेतु । तस्य रामस्य । **महात्मनां क्षमालक्षणस्वभावेन** महताम् । मादृशाना तिरश्चाम् । तेनैव व्याजेन सावज्ञप्रत्यायनप्रार्थनारूपच्छद्मना । **निःसारमिति** । नि·सार निष्फलं निरयानुबन्धि नरकावहं चेदं सौहृदं रावणसख्यं निराकुर्या त्यजेयम् । निजपदान्निजस्थानाद्भ्रश्यन्त्वध· पतन्तु नश्यन्तु वा हता भवन्तु वा । मन्द· स्वत एव प्रतिभाशून्यस्तदुपरि

मन्दो माल्यवता विमोहितमना मन्दोदरीवल्लभः
किं कुर्मो मतिविभ्रमादिह महावीरेण वैरायते ॥ ५१ ॥

अयं च रामः संभाषणयोन्य· स्वल्पान्तरालं संप्राप्तः । (राम प्रति ।) स्वागतं महावीरस्य ।

रामः—इदानीमहं महावीर· संवृत्तः । यतो महावीरलाभेन मद्बाहुबलं साफल्यमनुभवति ।

वाली—धिगस्तु मे महावीरताम् । येन वीरधर्म· परित्यक्तः । स एव खलु धर्मो वीरस्य यज्जगत्पूज्याना भवादृशां परितोषणम् ।

रामः—मद्बाहुबलसाफल्यं मम परितोषहेतुरेव ।

वाली—मया किंचिद्विज्ञाप्यमस्ति । तत्र भवान्मय्यनुग्रहबुद्ध्यावधारयतु ।

रामः—कि तत् ।

वाली—एतावन्तं कालं समानबलेनैव संप्रहार । अत समानबलत्वे किंचित्प्रत्यायनमनुगृह्यताम् ।

रामः—केन कर्मणा तत्रभवतः प्रत्यय· स्यात् ।

वाली—

वृक्षान्तर्लीनमूर्तिः प्रणिहितमनसा सम्यगालोक्य लक्ष्यं
वक्षस्याभोगयुक्ते मम निशितशरं मुञ्च गाढप्रहारम् ।
तच्चेद्विद्धेत दत्तप्रसरमपि भवेत्प्रव्यथेतापि यद्वा
तेनाशङ्कानिरासे ननु तदनु मतस्तुल्यसारो मम स्या· ॥ ५२ ॥

माल्यवता विमोहितमना भ्रामितहृदयो मन्दोदरीवल्लभो रावण· । मन्दोदरीत्यादिना तस्या सौमङ्गल्यबलमेतावदिति व्यज्यते । मतिविभ्रमान्महावीरेण रामेण सह वैरायते वैरं करोति । 'शब्दवैर–' इत्यादिना करणे क्यङ् । इह रावणस्यानुचितरामवैरकरणे किं कुर्म· । बुद्धिमन्तो वयं न रामवैरं कुर्म इत्यर्थः ॥ ५१ ॥ स्वल्पान्तरालं स्वल्पावकाशम् ॥ **महावीरलाभेनेति** । महावीरस्य तव लाभेनेति भाव ॥ एतावन्तं कालमित्यत्यन्तसंयोगे द्वितीया । सप्रहार· युद्धम् । प्रत्ययो बलसाम्यनिश्चय· । 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः ॥ **वृक्षान्तरिति** । प्रणिहितमनसा सावधानेन मनसाभोगयुक्ते परिपूर्णतायुक्ते । 'अभोग परिपूर्णता' इत्यमरः । गाढो दृढः प्रहारस्ताडनं येन स तथोक्तं निशितं शरं तीक्ष्णबाणं मुञ्च । तद्वक्षो भिद्येत चेद्दत्तप्रसरमपि कृतरक्तादिविसर्पणं वा यदि भवेत् । 'प्रसरस्तु विसर्पणम्' इत्यमरः ।

रामः—(सक्रोधम् ।) हा दुरात्मन्, वीरबन्धो, तृणप्रायं मत्वा माम् उपहससि । अथवा क्व तवापहासयोग्यता । तथा मन्ये सत्य सङ्ग्राम-भीरुणा त्वया प्राणसंरक्षणाय कश्चिद्व्याजः परिकल्पितः । किंच यदि परित्यक्तसङ्ग्रामो गमिष्यसि तदा त्वया मयि महान्द्रोह· प्रयुक्त· स्यात् । यत एवमपहससेऽप्युदासीनं मामसमर्थं महावीरा मन्येरन् । तथा च लोके महानपवाद· स्यात् । (निश्वस्य ।)

मनोर्वंशे जाता प्रथितयशसो भूमिपतयो
मनागप्येतेषा चरितमपवादे न पतति ।
त्रिलोकीविस्तारिप्रबलपरिवादैकजनक-
स्तृणीकारः कोऽयं शिवशिव मनो मे व्यथयति ॥ ५३ ॥

वाली—(आत्मगतम् ।) हन्त महद्विपरीतम् । यदनुकूलत्वेन मया चिन्तित तदेव प्रतिकूल सवृत्त । एतावत्पर्यन्तं युद्धे कृते देवताद्रोह इति सिद्धम् । इदानीं तु युद्धपरित्यागे महाद्रोह इत्यापतितम् । अहो विसवादः । अस्मिन्परमेश्वरदृष्ट्या मम स्वात्मनि परं निकृष्टबुद्धिः स्थिता । अस्य तु मयि महावीरबुद्ध्या परमोत्कर्षबुद्धिरेव । अतो मदीय-दुरुक्त्या महान्तमपराधं मन्यते । अतएव मदीयदुरुक्तिश्च न वाङ्मात्रम् । (प्रकाशम् ।) महानुभाव, मयि स्वजनप्रतिपत्त्या मदीयं दुरुक्तं क्षम्यताम् । किं प्रेक्षावन्त· परीक्षन्ते दावानले दहनशक्तिरस्ति वेति । तदेहि । सङ्ग्रामभूमिं गच्छावः ।

यद्वा प्रव्यथेत प्रकम्पेत चेत्तेन भेदादिनाशङ्काया न्यूनबलत्वसदेहस्य निरासेऽपगमे तदन्वनन्तर तुल्यबल. । इष्टो भवेदित्यर्थ· ॥ ५२ ॥ वीरबन्धो कुत्सितवीर । ब्रह्म-बन्धुक्षत्रबन्धुशब्दवद्वीरबन्धुशब्दोऽपि प्रकृतकुत्सापर ।तृणप्रायं तृणसदृशम्।महान्द्रोहोऽपकारः । उदासीनं निर्युद्धव्यापारमसमर्थमशक्तम् । अपवादो दोषप्रथा । **मनोरिति**।प्रथितयशस प्रख्यातकुलक्रमागतकीर्तय·।'कुलक्रमागता साचेद्यश इत्यभिधीयते' इत्युक्तेः।एतेषा भूमिपतीना चरित वृत्तमपवादे दोषप्रथाया न पतति । त्रयाणां लोकाना समाहारस्त्रिलोकी तस्या विस्तारिणः प्रबलस्य परिवादस्यैकजनको मुख्यजनन-हेतुस्तृणीकारोऽनादरो मनो व्यथयति दु खयति॥५३॥देवताद्रोह· परदेवतापकर.।**अ-हो इत्यादि**। विसवाद आवयोरितरेतरबुद्ध्योरनैकरूप्यम् । अस्मिन्रामे परमेश्वरदृष्ट्या परमात्मप्रमिल्या । अस्य तु रामस्य तु परमोत्कर्षबुद्धिरेव न तु निकृष्टबुद्धिरिति विसंवाद इत्यर्थ । अतो मय्युत्कर्षबुद्ध्या स्वजनप्रतिपत्त्या बन्धुबुद्ध्या । प्रेक्षावन्तः प्रज्ञावन्तः

रामः—वत्स लक्ष्मण, शबर्या सह सुग्रीवविभीषणौ गत्वा मद्वचनाद्ब्रूहि—'भवद्दर्शनाय प्रस्थितस्य मे मध्येमार्गं वालिना समागमः सम्प्राप्तः। तदतिक्रमे च महदनौचित्यम्। अतो मुहूर्तं विलम्बः सह्यताम्' इति।

लक्ष्मणः—यदाज्ञापयत्यार्यः। (इति निष्क्रान्तः।)

रामः—(धनुरास्फालयन्सहर्षम्।) हन्तेदानीमस्मदीयं धनुः प्रादुर्भवति।

द्रागभ्यागतनिर्भयप्रतिभटप्रागल्भ्यनिर्भेदन-
भ्राजद्धूमविभीतभूतनिनदप्राग्भारवद्भीरवः।
....
.... ॥ ५४ ॥

अपि च।

दृप्यज्जम्भारिडिम्भप्रहरणगिरिषु स्फूर्जदुज्जृम्भिविद्यु-
द्दम्भोलिस्पर्धिनीभिर्गुरुषु मदिषुभिर्भीममभ्याहतेषु।
तद्घाटीभग्नभूभृद्बृहदुपलदृढाघातविन्ध्याण्डभङ्ग-
स्फायद्भाङ्कारहेतुर्भवतु मम भुजस्तम्भगम्भीरसारः ॥ ५५ ॥

किं परीक्षन्ते। न परीक्षन्त एव। दहनशक्तेरतिप्रसिद्धत्वादित्यर्थः॥ मद्वचनान्मद्वाक्यं निवेद्य। त्यच्लोपे पञ्चमी। मध्येमार्गे मार्गस्य मध्ये। 'पारेमध्ये षष्ठ्या वा' इति समासः। विलम्बः समागमकालातिपातः॥ आस्फालयंश्चालयन्। **द्रागिति**। प्रतिभटस्य शत्रोः। प्रागल्भ्यस्य धृष्टत्वस्य। **निर्भेदनेत्यादि**। 'धृष्टे धृष्णुर्वियातश्च प्रगल्भः' इत्यमरः॥ ५४॥ **दृप्यदिति**। मम भुजस्तम्भयोर्गम्भीरोऽक्षोभ्यः सारो बलं कर्तृ स्फूर्जता निर्घोषवतोज्जृम्भिविद्युतोदग्रतटिद्युक्तेन दम्भोलिना वज्रेण सह स्पर्धिनीभिः संघर्षणीभिर्मर्दिषुभिर्मद्वाणैः। 'इषुर्द्वयोः' इत्युक्तेः स्त्रीत्वम्। वालिन आयुधभूतेषु पर्वतेषु भीमं यथातथाभ्याहतेषु ताडितेषु सत्सु। तेषां वालिनायुधीकृतानां मद्बाणहतानां गिरीणां घाटीभिर्वेगितगतिभिर्भज्यमाना भूभृता बृहदुपलानाम्। 'उपलाश्मानश्मिलाः दृषत्' इत्यमरः। दृढाघातेन यो विन्ध्याण्डभङ्गो विन्ध्याण्डयोः स्फोटस्तेन स्फायतो वर्धमानस्य। अनुदात्तेङ्गनिबन्धनमात्मनेपदमनित्यम्। भाङ्कारस्य हेतुः

---

१. अस्य श्लोकस्योत्तरार्धमसाकं मूलपुस्तकेभ्यो नष्टम्.

किंतु पूर्वबुद्ध्या वालिनः सङ्ग्रामवैमुख्यं कदाचित्संभाव्यत इति पर्याकुलं मे हृदयम् । भवतु सर्वं द्रक्ष्यामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते पञ्चमोऽङ्कः ।

भवतु । प्राप्तकाले लोट् ॥ ५५ ॥ पूर्वबुद्ध्या मयि पूज्यत्वबुद्ध्या । संभाव्यत इति सशय्यत इति । पर्याकुलं दु खितम् । सर्वं युद्धवैमुख्यं तदाभिमुख्यं वा । इति निष्क्रान्ताः सर्वे ॥

यो महीसारवास्तव्यो वाधूलो वीरराघवः ।
स महावीरचरिते पञ्चमाङ्कं व्यवीवरत् ॥

इत्यणणापङ्क्तार्यनामधेयेन वाधूलवीरराघवेण विरचितायां महावीरचरितव्याख्यायां भावप्रद्योतिनीसमाख्यायां पञ्चमोऽङ्कः ॥



षष्ठोऽङ्कः ।

(ततः प्रविशति संपातिर्नाम वानरः ।)

संपातिः—अङ्गदेन वानरराजसूनुना प्रेषितोऽस्मि—'सपाते, वालिन प्लवङ्गमाधीशस्य वृत्तान्तो न विज्ञायते । तदन्वेषणाय दिशि दिशि प्लवंगमाः प्रस्थापिता । त्वं च ऋष्यमूकसमीप गत्वा विचारय' इति । तत्र हि सुग्रीवविभीषणाभ्यां सह कृतसख्यो रामस्तिष्ठति । तत्रैवायं वृत्तान्तो विदितः स्यात् । (अग्रतोऽवलोक्य ।) अयं हनूमानित एवाभिवर्तते । यावदेनं पृच्छामि ।

(ततः प्रविशति हनूमान् ।)

हनूमान्—आदिष्टोऽस्मि महात्मना रामचन्द्रेण—'भो हनूमन्, वालिनं गवेषयितुं सुग्रीवविभीषणौ प्रस्थितौ । अहं चं लक्ष्मणेन सह तत्र तत्रान्वेष्टुं गमिष्यामि । त्वं च किष्किन्धासमीपं गत्वा विचारय' इति । क्व वाली मया द्रष्टव्यः । न केवलमिदं रामकार्यम् । यतो महाराजसुग्रीवोऽपि भ्रातृयशोनाशसंभावनया भ्रातरं युद्धार्थमानेतुं समन्तादन्विष्यन्पर्यटति । (पुरोऽवलोक्य ।) अयं संपातिरित एवाभिवर्तते । एतन्मुखेन विज्ञातव्यम् । (उपसृत्य ।) संपाते, क्व प्रस्थितोऽसि ।

संपातिः—एवम् । (इति कथयति ।) त्वं पुनः क्व प्रस्थितोऽसि ।

हनूमान्—एवम् । (इति कथयति ।)

इदानीं कविः पुनरपि विमर्शसधि षष्ठाङ्केन वदति—तत्राव्यापिन्या आगस्त्यकथाया. प्रकर्या वालिवधादपायाभावत. कार्यनिश्चयरूपनियतासेश्च वर्णनाद्विमर्शसधि । तदुक्तम्—'गर्भसधौ प्रसिद्धस्य बीजार्थस्यावमर्शनम् । हेतुना येनकेनापि विमर्शसधिरिष्यते ॥ नियताप्तिप्रकर्युक्तैरङ्गान्यस्य त्रयोदश ॥' इति । तत्र विष्कम्भकं रचयति—**ततः प्रविशति संपातिर्नाम वानर इत्यादिना** । पूर्वाङ्कविष्कम्भे गृध्रस्य सपाते. प्रवेशात्तद्वावृत्तये वानर इति ॥ आदिष्टोऽस्म्याज्ञप्तोऽस्मि । गवेषयितुमन्वेषयितुम् । 'अन्वेषित गवेषितम्' इत्यमर । भ्रातृयशसो नाशसभावनया युद्धमुपगम्य प्रच्छन्न इत्यपख्यात्या । पूर्वार्जितं यशो विनश्येदिति ज्ञानेनेत्यर्थ. । भ्रातर वालिनमन्विष्यन्मृगयमाण पर्यटति परितश्चरति । 'अट गतौ' । एतस्य मुखेन मुखोद्गतवचनेन ॥ **एवमिति** । पूर्वोपदर्शिताङ्गदवाक्यप्रकारेण ॥ **एवमिति** । उपदर्शितरामवाक्यप्रकारेण ॥ यावन्निवेदयामि निवेदयिष्यामि । 'यावत्पुरानिपातयोर्लट्'

संपातिः—विदितं मया वेदितव्यम् ।

हनूमान्—मया च विदितं विज्ञातव्यम् । यावद्रामाय निवेदयामि । अयं च रामो लक्ष्मणेन सह वालिनमन्विष्यन्निव एवाभिवर्तते । यावदुपसर्पामि ।

(इति निष्क्रान्तौ ।)

शुद्धविष्कम्भः ।

(तत प्रविशत्यधिज्यधन्वा वालिगवेषणव्यग्रो रामो लक्ष्मणश्च ।)

रामः—हन्त किमेतत् । न जाने क्व गतो वाली वानरेन्द्रः । पूर्वेद्युरहं वाली च सहैव सङ्ग्रामभूमिमभिप्रस्थितौ । स च मद्विषाद्बहुमानान्मा-प्रत्युपचारार्थं पुरोगमन पार्श्वगमन च परिहृत्य परिवारं च किष्किन्धां संप्रेष्यैकाकी पृष्ठत एव मामनुगतः । अहं चाप्रतीक्षमेव सङ्ग्रामभूमिपर्यन्तमागत । तत्र युद्धारम्भाय पृष्ठतः समालोकितो न दृष्टः । आश्चर्यम् । ततस्तं बहुशोऽन्विष्यापि क्वाप्यपश्यन्नैराश्येनपर्य्यम्कमहमागतः । (पुरोऽवलोक्य सहर्षम् ।) **अयमसौ वाली** । (सत्वरं बाण धनुषि सधत्ते ।)

लक्ष्मणः—मम तु संशयो वर्तते वाली वा सुग्रीवो वेति ।

रामः—विभीषणो न दृश्यतेऽनुचराश्च न दृश्यन्ते । तस्मादयं वालीति निश्चिनोमि । पूर्वेद्युश्चैकाकी स्थितः ।

(प्रविश्य ।)

हनूमान्—सुग्रीवोऽयम् । न हन्तव्यो न हन्तव्यः ।

रामः—आकृतिसाम्यादनर्थहेतुर्विपर्ययः ।

(तत प्रविशति सुग्रीव ।)

सुग्रीवः—न दृष्टो वाली ।

इति लट् ॥ अधिज्यमध्यारूढमौर्वीकम् । परिवार परिकरम् । 'स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे' इत्यमर । किष्किन्धा सप्रेष्य प्रस्थाप्येति द्विकर्मकम् । एकाकी एकः । न विद्यते प्रतीक्षा पश्चादवलोकनं यस्मिन्कर्मणि तत्तथोक्तम् । इदं चागमनेऽन्वेति ॥ **विभीषण इति** । विभीषणविनाभावान्नायं सुग्रीवः । अनुचरविरहादयं वालीत्यर्थः । वालित्वेऽनुचरविरहस्य हेतुत्वमाह—**पूर्वेद्युरिति** । पूर्वेद्युश्चैकाकी स्थित इति ॥ न हन्तव्य इत्यस्य सम्भ्रमेण द्विरुक्तिः ॥ विपर्ययोऽन्योन्यतादा-

रामः—सखे सुग्रीव, विभीषणः क्व गतः । अनुचरा वा क्व गताः ।

सुग्रीवः—एकत एवान्वेषणे स न दृश्यत इति नानामुखा वयं प्रस्थिताः ।

(तत प्रविशति विभीषण ।)

विभीषणः—त दृष्टो वाली ।

हनूमान्—स्वामिन्, वालिनो दर्शन दुर्लभमस्माकम् । यतस्तदीया अपि वानरास्तत्र तत्रान्विष्यन्तो न पश्यन्ति ।

रामः—तर्ह्यस्यमूकं गमिष्याम । किंत्वमोघस्य बाणस्य किंचिल्लक्ष्यं प्रदर्शनीयम् । निरपराधेषु च न प्रयोक्तव्यः । किं करोमि । (पुरतोऽवलोक्य ।) अयमितो नातिदूरे वृक्षखण्डे कश्चिन्मृगः संचरति । अयमेव लक्ष्यीकर्तव्यः । मृगया च राज्ञां धर्म एव । सावधानेन भवितव्यम् । यतो मृगजातिर्धनुर्धरं दृष्ट्वा पलायतेऽतो वृक्षविटपान्तरितो भूत्वा हनिष्याम्येनम् ।

(इति निष्क्रान्तो रामः ।)

सुग्रीवविभीषणौ—अहो क्व वाली गतः स्यात् । (परस्परं विमृशतः ।)

(प्रविश्य सभ्रान्त ।)

रामः—हन्त महद्वैशसमापादितम् ।

मया बाणेन तीक्ष्णेन मृगो हृदि विदारितः ।
अद्रिराजप्रमाणेन वालिरूपधरो मृगः ॥ १ ॥

किमिति । तदग्रतो गत्वा विचारयामि ।

त्म्यभ्रम. ॥ एकत एवैकस्या दिश्येव । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । वयं विभीषणोऽहमन्ये च ॥ अमोघस्यावन्ध्यस्य । लक्ष्यं शरव्यम् । न प्रयोक्तव्य. । बाण इति शेष. । वृक्षखण्डे वृक्षसमूहे । निरपराधे मृगे कथं प्रयोक्तव्य इत्यत्राह—**मृगयेति** । 'आखेटो मृगया स्त्रियाम्' इत्यमर. । धर्म एवाचार एव । सावधानेन व्यासङ्गान्तररहितेन । मृगजातिशब्देन जात्याश्रयव्यक्तय उच्यन्ते । पलायतेऽन्यत्रापगच्छति । 'अय गतौ' इत्यस्मिन्परे उपसर्गस्य पराशब्दस्य रेफस्य 'उपसर्गस्यायतौ' इति लकार. । एनं मृगम् पलायनकर्तृत्वेनोक्तस्य हननकर्मत्वेनोपादानादन्वादेशे एनादेशः । 'दूराध्वानं वधं युद्धम्' इत्यादिना वधस्य दृश्यत्वप्रतिषेधादाह—**निष्क्रान्त इति** । अत्र वधोक्तेर्विद्रवः ॥ **हन्तेति** । वैशस हिंसादोष । **मयेति** । अद्रिराजप्रमाणेन पर्वतवरपरिमाणेनोपलक्षितं यद्वालिरूपं वालिशरीर तस्य धरो धारयिता

(प्रविश्य)

दिव्यपुरुषः—विजयी भव रामचन्द्र, विजयी भव ।

मुनिर्वा देवो वा भवतु ननु जम्भारिरपि वा
विधाता भूतानामपि भवतु यद्वा कमलभूः ।
तथा देहस्यान्ते स्वयमनुगृहीतस्य भवता
ममाग्रे कस्तेषां प्रभवति महिम्नामतिशयः ॥ २ ॥

रामः—

कस्त्व मया न विज्ञातः स्तौषि मां परया मुदा ।
कुतूहलेन सक्रान्तमन्तस्तत्त्वं प्रसीदति ॥ ३ ॥

दिव्यपुरुषः—अहं किल

वसुंधराधीश महाबलाना वाली विनेता वनवानराणाम् ।
मदान्धभावेन मयाभिपन्नो मतङ्गशापेन कुरङ्गभावः ॥ ४ ॥

पुरा किल मदोन्मत्ततया मतङ्गमुनेर्मर्यादामनपेक्ष्य तदीयाश्रमपरिसरे दुन्दुभिदेहमहं विक्षिप्तवान् । तद्रुधिरपर्युक्षितं निजाश्रमाङ्गणं दृष्ट्वा स मुनिः शशाप—'दुरात्मन्, वीरदर्पेण स्वल्पेवमकार्षीः । अनेनातिक्रमेण देहस्यान्ते कुरङ्गरूपं लब्ध्वा वीरधर्मविरुद्धं कुत्सितं मरणं प्राप्स्यसि' इति । ततो मया मुनिर्बहुशः प्रयत्नैरनुनीतः पुनरनुजग्राह ।

॥ १ ॥ **मुनिर्वेति** । मुनि शापानुग्रहसामर्थ्यहेतुमननशीलो देव शक्तिविशेषयुक्त, तस्मादप्यधिको जम्भारिरिन्द्र, ततोऽप्यधिको भूताना विधाता स्रष्टा कमलभूर्भगवान्नाभिपद्मजन्मा ब्रह्मा, तेषा पूर्वोक्तमुनिप्रभृतिचतुर्मुखपर्यन्ताना ये महिमानो माहात्म्यानि तेषा को वातिशयो देहान्ते भवता स्वयमनुगृहीतस्य ममाग्रे प्रभवति स्थातु शक्नुयात् । ब्रह्मादिभ्योऽप्यतिशयितप्रभावो मुक्त शास्त्रेषु श्रूयत इति भाव । अत्र स्वशक्तिप्रशंसनरूपव्यवसाय उक्त ॥ २ ॥ **क इति** । विज्ञातो न भवति न विज्ञात. । नशब्दस्य समासान्नलोपो न । कुतूहलेन सक्रान्तं हर्षकर्तृकसक्रमणाधिकरणमन्तस्तत्त्व मन. पदार्थ । प्रसीदति प्रसन्नं भवति ॥ ३ ॥ **वसुंधरेति** । अहमित्यादि । हे वसुंधराधीश भूमिपते राम, महाबलाना वनवानराणा वनेता नियामक. । वनेति ग्राम्यप्राकृतवानरेभ्यो व्यावृत्ति । वाल्यहम् । कथमिद कुरङ्गत्वमित्याह—**मदेति** । मदेन गर्वेण योऽन्धभाव कृत्याकृत्यविवेकशून्यता तेन यो मतङ्गशापस्तेन कुरङ्गभावो हरिणत्वं मयाभिपन्न. प्राप्तः ॥ ४ ॥ पूर्वोक्तमेव विशदयति—**पुरा किलेत्यादिना** । मर्यादा व्यवस्थाम् । तदीयाश्रमस्य मतङ्गसबन्धिन आश्रमस्य । परिसरे समीपे । विक्षिप्तवान्विसृष्टवान् । पर्युक्षितं परितः सिक्तम् । वीरदर्पेण शौर्य-

रामः—सखे सुग्रीव, विभीषणः क्व गतः । अनुचरा वा क्व गता.।

सुग्रीवः—एकत एवान्वेषणे स न दृश्यत इति नानामुखा वय प्रस्थिताः ।

(तत प्रविशति विभीषण ।)

विभीषणः—त दृष्टो वाली ।

हनूमान्—स्वामिन्, वालिनो दर्शनं दुर्लभमस्माकम् । यतस्तदीया अपि वानरास्तत्र तत्रान्विष्यन्तो न पश्यन्ति ।

रामः—तर्ह्यर्ष्यमूकं गमिष्याम· । किंत्वमोघस्य बाणस्य किंचिल्लक्ष्य प्रदर्शनीयम् । निरपराधेषु च न प्रयोक्तव्यः । किं करोमि । (पुरतोऽवलोक्य ।) अयमितो नातिदूरे वृक्षखण्डे कश्चिन्मृगः संचरति । अयमेव लक्ष्यीकर्तव्यः । मृगया च राज्ञां धर्म एव । सावधानेन भवितव्यम् । यतो मृगजातिर्धनुर्धरं दृष्ट्वा पलायतेऽतो वृक्षविटपान्तरितो भूत्वा हनिष्याम्येनम् ।

(इति निष्क्रान्तो रामः ।)

सुग्रीवविभीषणौ—अहो क्व वाली गतः स्यात् । (परस्परं विमृशतः ।)

(प्रविश्य सभ्रान्त ।)

रामः—हन्त महद्वैशसमापादितम् ।

मया बाणेन तीक्ष्णेन मृगो हृदि विदारितः ।
अद्रिराजप्रमाणेन वालिरूपधरो मृगः ॥ १ ॥

किमिति । तदग्रतो गत्वा विचारयामि ।

त्म्यभ्रम. ॥ एकत एवैकस्या दिश्येव । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । वयं विभीषणोऽहमन्ये च ॥ अमोघस्यावन्ध्यस्य । लक्ष्यं शरव्यम् । न प्रयोक्तव्य. । बाण इति शेषः । वृक्षखण्डे वृक्षसमूहे । निरपराधे मृगे कथं प्रयोक्तव्य इत्यत्राह—**मृगयेति** । 'आखेटो मृगया स्त्रियाम्' इत्यमर । धर्म एवाचार एव । सावधानेन व्यासङ्गान्तररहितेन । मृगजातिशब्देन जात्याश्रयव्यक्तय उच्यन्ते । पलायतेऽन्यत्रापगच्छति । 'अय गतौ' इत्यस्मिन्परे उपसर्गस्य पराशब्दस्य रेफस्य 'उपसर्गस्यायतौ' इति लकार । एनं मृगम् पलायनकर्तृत्वेनोक्तस्य हननकर्मत्वेनोपादानादन्वादेशे एनादेशः । 'दूराध्वानं वधं युद्धम्' इत्यादिना वधस्य दृश्यत्वप्रतिषेधादाह—**निष्क्रान्त इति** । अत्र वधोक्तिर्विद्रवः ॥ **हन्तेति** । वैशस हिंसादोष । **मयेति** । अद्रिराजप्रमाणेन पर्वतवरपरिमाणेनोपलक्षितं यद्वालिरूपं वालिशरीर तस्य धरो धारयिता

(प्रविश्य)

दिव्यपुरुषः—विजयी भव रामचन्द्र, विजयी भव ।

मुनिर्वा देवो वा भवतु ननु जम्भारिरपि वा
विधाता भूतानामपि भवतु यद्वा कमलभूः ।
तथा देहस्यान्ते स्वयमनुगृहीतस्य भवता
ममाग्रे कस्तेषा प्रभवति महिम्नामतिशयः ॥ २ ॥

रामः—

कस्त्वं मया न विज्ञातः स्तौषि मा परया मुदा ।
कुतूहलेन सक्रान्तमन्तस्तत्त्व प्रसीदति ॥ ३ ॥

दिव्यपुरुषः—अहं किल

वसुंधराधीश महाबलाना वाली विनेता वनवानराणाम् ।
मदान्धभावेन मयाभिपन्नो मतङ्गशापेन कुरङ्गभावः ॥ ४ ॥

पुरा किल मदोन्मत्ततया मतङ्गमुनेर्मर्यादामनपेक्ष्य तदीयाश्रमपरिसरे दुन्दुभिदेहमहं विक्षिप्तवान् । तद्रुधिरपर्युक्षितं निजाश्रमाङ्गण दृष्ट्वा स मुनिः शशाप—'दुरात्मन्, वीरदर्पेण स्वल्वेवमकार्षीः । अनेनातिक्रमेण देहस्यान्ते कुरङ्गरूपं लब्ध्वा वीरधर्मविरुद्धं कुत्सितं मरणं प्राप्स्यसि' इति । ततो मया मुनिर्बहुशः प्रयत्नैरनुनीतः पुनरनुजग्राह ।

॥ १ ॥ **मुनिर्वेति** । मुनि शापानुग्रहसामर्थ्यहेतुमननशीलो देव शक्तिविशेषयुक्त, तस्मादप्यधिको जम्भारिरिन्द्र, ततोऽप्यधिको भूताना विधाता स्रष्टा कमलभूर्भगवान्नाभिपद्मजन्मा ब्रह्मा, तेषा पूर्वोक्तमुनिप्रभृतिचतुर्मुखपर्यन्ताना ये महिमानो माहात्म्यानि तेषा को वातिशयो देहान्ते भवता स्वयमनुगृहीतस्य ममाग्रे प्रभवति स्थातु शक्नुयात् । ब्रह्मादिभ्योऽप्यतिशयितप्रभावो मुक्त शास्त्रेषु श्रूयत इति भाव । अत्र स्वशक्तिप्रशंसनरूपव्यवसाय उक्त ॥ २ ॥ **क इति** । विज्ञातो न भवति न विज्ञात. । नशब्दस्य समासान्नलोपो न । कुतूहलेन सक्रान्तं हर्षकर्तृकसक्रमणाधिकरणमन्तस्तत्त्व मन पदार्थ । प्रसीदति प्रसन्नं भवति ॥ ३ ॥ **वसुंधरेति** । अहमित्यादि । हे वसुंधराधीश भूमिपते राम, महाबलाना वनवानराणा वनेता नियामक. । वनेति ग्राम्यप्राकृतवानरेभ्यो व्यावृत्ति । वाल्यहम् । कथमिद कुरङ्गत्वमित्याह—**मदेति** । मदेन गर्वेण योऽन्धभाव कृत्याकृत्यविवेकशून्यता तेन यो मतङ्गशापस्तेन कुरङ्गभावो हरिणत्व मयाभिपन्न प्राप्त. ॥ ४ ॥ पूर्वोक्तमेव विशदयति—**पुरा किलेत्यादिना** । मर्यादा व्यवस्थाम् । तदीयाश्रमस्य मतङ्गसबन्धिन आश्रमस्य । परिसरे समीपे । विक्षिप्तवान्विसृष्टवान् । पर्युक्षितं परितः सिक्तम् । वीरदर्पेण शौर्य-

वेदान्तजालपरिशीलनलब्धवर्णो
वेदान्तरायविकलोऽयमनन्यभावः ।
देवासुरैरपि दुरूहतमेन तेन
देहान्तमन्यदुरवापमवाप्स्यसीति ॥ ५ ॥

स एवायं शापो यदहं सङ्ग्रामभूमिं प्रति त्वामनुगच्छन्नन्तरा मृगो भूत्वा स्वरूपं च विस्मृत्य पलायितः । स एवायमनुग्रहो यत्तव प्रसादाद्ब्रह्मादीनामप्यलभ्यमैश्वर्यमवाप्तवानस्मि । तदेव भवदनुग्रहतो मामुपनतं शाश्वतं पदं गमिष्यामि ।

रामः—तथास्तु ।

(निष्क्रान्तो दिव्यपुरुषः ।)

रामः—वत्स लक्ष्मण, विभीषणेन सह किष्किन्धां गत्वा वालिनः कृतोत्तरक्रियं सुग्रीवं वानरराज्येऽभिषिच्य कतिपयदिवसैरेव मत्सकाशमागच्छ । विभीषणस्तु भ्रातृव्यसनकर्शितस्य सुग्रीवस्य समाश्वासनाय तत्रैवास्ताम् । अहं तु सुग्रीवभृत्यैः कतिपयैर्वानरैः परिचर्यमाण ऋष्य-

---

गर्वेण । वीरेति भावप्रधानो निर्देश । अतिक्रमेण मर्यादातिवृत्तिलक्षणेनापराधेन । वीरधर्मेण सह युद्धे मरणरूपवीरपुरुषाचारेण सह विरुद्धं विरोधवत् । अनुजग्राहानुग्रहं कृतवान् । अनुगृहीतार्थमाह—**वेदान्तेति** । यं परमपुरुष वेदान्तजालाना छान्दोग्यतैत्तिरीयकाद्युपनिषज्जालाना परिशीलनेन ब्रह्मसूत्रपदान्तस्थहेतुभिरुपबृंहणैश्च तात्पर्यनिर्णयाभ्यासेन लब्धवर्णो विचक्षण'। अनेन श्रवणमनने उक्ते । अनन्यभावोऽनन्यहृदय । अन्यानुल्लेखिध्यानयुक्त इत्यर्थ । अनेन निदिध्यासनमुक्तम् । अन्तरायेण मोक्षविघ्नेन स्वर्गाद्यभिप्रायेण विकलो रहित । 'विघ्नोऽन्तराय प्रत्यूह' इत्यमर । अन्तरायशब्दनिर्देशेन 'वासुदेवे मनो यस्य जपहोमार्चनादिभि । तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥' इति पुराणरत्नवचन स्फोरितम् । वेद पश्यति । 'ततस्तु तं पश्यते निष्कलं ध्यायमान.' इति श्रुति । दुरूहतमेन तत्प्रसादेन विना तर्कितुमशक्येन तेन परमपुरुषेणान्यदुरवाप देवादीनामपि दुर्लभ देहान्तं देहनाशमवाप्स्यसीत्यनुजग्राहेति पूर्वेण सबन्धः । अत्र प्रकरणे मदान्धेति दोषप्रख्यापनात्मकोऽपवाद । दुरात्मन्निति रोषसभाषणरूप· सफेट । मर्यादामनवेक्ष्येति गुरुतिरस्कृतिरूपो द्रव । शशापेति वधबन्धनादिरूपो विद्रव. । अनुनीत इति विरोधशमनरूपशक्ति. । वेदान्तजालेत्यादिना गुरुकीर्तनरूपः प्रसङ्ग इति विमर्शसधेरङ्गान्युक्तानि ॥ ५ ॥ **स एवायं शाप इति** । पलायित इति यत्स एवाय शाप इत्यन्वयः । **स एवायमनुग्रह इति । यत्तवेति** । ऐश्वर्यं प्राप्तवानस्मीति यत्स एवायमनुग्रह इत्यन्वय । उपनत प्राप्तम् । शाश्वतं पदं मोक्षस्थानम् ॥ कृतोत्तरक्रियमनुष्ठितौर्ध्वदै-

मूके वत्स्यामि । मया खलु मिथिलायां प्रतिज्ञातं चतुर्दश वर्षाणि नगरप्रवेशं न करिष्यामीति । वृष्टिकालमासचतुष्टये व्यतीते बहु कार्यं निर्वर्तनीयम् ।

लक्ष्मणः—यदाज्ञापयत्यार्यः । सुग्रीवस्य राज्याभिषेकानन्तरमेव त्वत्सकाशमहमागमिष्यामि । तावत्पर्यन्तमिमे वनचराः परिचरन्तु । सीताविरोगदुःखितस्य तव समाश्वासनायर्श्यमूकगुहायामवस्थापितं सीताभरणजालं च समर्पयिष्यन्ति । पूर्वेद्युस्त्वदागमनसंभ्रमेण त्वदुपचारव्याप्तैरेतैस्त्वया च सुहृत्समागमसंतोषातिशयेन तत्कथालापविनोदव्यग्रतया विस्मृतमेतत् ।

(निष्क्रान्ता लक्ष्मणादयः ।)

रामः—(परिक्रम्यावलोक्य च ।) अयमसावृष्यमूकः । (आरोहणं नाटयित्वोपविश्य ।)

हतं तावत्कृत्स्नं निशिचरपतेः पौरुषबलं
हठाक्रान्ते मित्रे प्लवगकुलमुख्ये विनिहते ।

(हस्तौ निपीड्य ।)

कदा भस्मीकुर्यामहमहह लङ्कामविकलं
कथापि क्रव्यादा इति जगति नष्टा मम रुषा ॥ ६ ॥

मायामात्रमितः परं तस्य बलमवशिष्टम् । तत्प्रतीकाराय कश्चिदुपाय-

---

हिककर्मणम् । भ्रातृव्यसनकर्शितस्य भ्रातृमरणदु खपीडितस्य । समाश्वासनाय दु खलघूकरणाय । परिचर्यमाण क्रियमाणशुश्रूष । चतुर्दश वर्षाणीति पदद्वयम् । अत्यन्तसयोगे द्वितीया । मासचतुष्टये । 'पक्षा वै मासा.' इति द्वयो. सिंहकन्यामासयोश्चतुष्टयम् । यद्वा तुलावृश्चिकमासयोरप्यत्यन्तयात्रार्हत्वाद्वार्षिकत्वम् । इदमेवाभिप्रेत्य 'चत्वारो वार्षिका मासा' इत्युक्तम् ॥ **तत्कथालापेति** । तस्य सुहृद. कथालाप एव पूर्ववृत्तप्रतिपादकप्रश्नप्रतिवचननिर्देश एव विनोद सीताविरोगदु खलघूभावस्तत्र व्यग्रतया च व्यासक्ततया च ॥ **हतं तावदिति** । प्लवगकुलमुख्ये वालिनि हते सति निशिचरपते रावणस्य पौरुषबल पुरुषसबन्धि बलम् । मित्रबलमित्यर्थः । हतं ध्वंसितम् । तावच्छब्द. क्रमार्थक । पौरुषबलमायाबलयोर्मध्ये प्रथममिदं पुरुषबलं हतमित्यर्थ. । क्रव्यादा इति कथापि शब्दोऽपि मम रुषा नष्टा नष्टप्रायैव । भवतीति शेष. । खरादिवधातिरेकविवक्षया कृत्स्नमिति विशेषणम् । अत्र कथापि मम रुषा नष्टेति स्वशक्तिप्रशंसनरूपव्यवसायात्मकं सध्यङ्गमुक्तम् ॥ ६ ॥ मायैव मायामात्रम् । माया च शाम्बरीप्रभृति. । सा चापूर्वसृष्टिर्वञ्चना च । तत्प्रती-

श्चिन्तनीयः । (पुरोऽवलोक्य सविस्मयम् ।) किमेतदद्भुतं ज्योतिरितोमुखमभिवर्तते । (सम्यग्विभाव्य ।) अहो भगवानगस्त्यः सम्प्राप्तः ।

(ततः प्रविशत्यगस्त्य ।)

अगस्त्यः—अद्यैवास्मत्सुहृदा विश्वामित्रेण संदिष्टम्—

यन्मयाधिष्ठितं यत्नाद्यातुधानवधादिकम् ।
जगन्मङ्गलकामेन रामस्य चरिताद्भुतम् ॥ ७ ॥

तदेतद्भवतो विदितम् । तत्र देवासुराणामप्यप्रधृष्यं दिव्यास्त्रजातं साक्षादेवास्माभिर्दत्तम् । ततश्च कुतश्चित्कारणाद्भवदाश्रमे निक्षिप्तं माहेन्द्रं धनुर्वरं शिष्यमुखेन याचितम् । तच्च भवता मिथिलागताय रामाय प्रेषितम् । ततश्चास्मदीयतपःप्रभावप्रचोदितबुद्धिना माल्यवता प्रोत्साहितस्य जामदग्न्यस्य हस्ताद्वैष्णवं धनुरप्यानीय दापितम् । यच्चान्यदपेक्षितं तत्सर्वं मया सकल्पेनैव साधितम् । इदानीमेतावदवशिष्टम् । मायाविनो राक्षसा भवन्ति । यथा रामस्तदीयमायावशंवदो न भविष्यति तथा प्रत्यायनं भवेदिति । (परिक्रम्यावलोक्य च ।)

अयं रामः कामप्रतिमतनुसौन्दर्यगरिम-
श्रिया नेत्रानन्दं जनयति जनाना जडधियाम् ।
चिरादन्तश्चेतःपरिचितचिदानन्दपरम-
श्रिया ब्रह्मानन्दं मम मनसि नित्यं प्रथयति ॥ ८ ॥

(रामस्याग्रतोऽवतरणं नाटयति ।)

काराय तत्परिहाराय । अत्र कार्यग्रहणरूपमादान नाम सन्ध्यङ्गमुक्तम् । सम्यग्विभाव्य निपुण चिन्तयित्वा ॥ **यदिति** । मया यद्यातुधानवधादिकम् । आदिशब्दाद्वालिवधसग्रह । अधिष्ठित कर्तव्यत्वेनाध्यवसितम् ॥७॥ भवतो विदितम् । विदितमेव खल्वित्यर्थः । अस्मदीयतप प्रभावेन प्रचोदितबुद्धिना प्रेरितबुद्धिना । सकल्पेनैव मनोव्यापारेणैव । तथा प्रत्यायनं तथा ते प्रत्ययो भवेदिति विश्वामित्रेण सदिष्टमिति सबन्धः । **अयमिति** । अय राम· कामप्रतिमया मन्मथतुल्यया तनुसौन्दर्यगरिमश्रिया विग्रहसौभाग्यसमुदायसमृद्ध्या जडधिया जनानामपि नेत्रानन्द जनयति । अय रामो ममलन्तश्चेतसा योगसामर्थ्या प्रत्यक्प्रवणेन मनसा चिरात्परिचितस्य समाधिविषयीकृतस्य चिदानन्दस्य स्वप्रकाशानन्दस्य परमश्रिया निरतिशयसमृद्ध्या ब्रह्मानन्दमानन्दवल्लयाम् 'यतो वाचो निवर्तन्ते' इत्यादिनोपपादित वाङ्मनसागोचरमात्मानुभवानन्द प्रथयति विस्तारयति । योगदशानुभूतानन्दसमृद्ध्या सह मुक्तिदशाभाविसाक्षात्कारानन्दं जनय-

रामः—(ससंभ्रममुत्थाय ।) भगवन्, अभिवादये ।

अगस्त्यः—अप्रतिहतास्ते मनोरथाः सिध्यन्ति ।

(उपविशतः ।)

रामः—अहो महान्प्रसादः । यत्स्वयमेव भगवानागत्य मामनुगृह्णाति ।

अगस्त्यः—किमन्यदीयं कार्यम् । अस्मदीयतपोविघ्नकारिणामेव वधे प्रवृत्तोऽसि । ते च मायाविनः । अतस्तेषां मायाबलं ज्ञात्वा तद्विजये प्रवर्तितव्यम् ।

मायाबलमविज्ञाय महाबल मनागपि ।
मायाविनं प्रति स्पर्धां मनसापि न चिन्तयेत् ॥ ९ ॥

अतो ददामि ते दिव्यं चक्षुः । (कमण्डलूदकेन नेत्रे परिमार्जयति ।)

रामः—हन्त, लङ्कावृत्तान्तः प्रत्यक्षं प्रतिभाति ।

अगस्त्यः—किं पश्यसि ।

रामः—रावणो राक्षसराजः सर्वप्रकृतिभिः परिवृतो मन्त्रयते ।

रावणः—मातामह मातामह, किमत्र कृत्यम् ।

माल्यवान्—किमत्र कृत्यम् ।

त्वया यद्यत्कृत्यं कपटविधिना तत्तदखिलं
प्रयुक्तं दुर्दैवादहह विपरीतं परिणतम् ।
महावीरो वाली तव च परम पौरुषबलं
जयार्थी युद्धाय त्वरितमभियातो विनिहतः ॥ १० ॥

वयं तु रामस्याग्रतः स्थातुमपि न शक्ताः । यतः ।

तीत्यर्थं ॥ ८ ॥ **मायाबलमिति** । महाबल राम, मायाविन प्रति मायाविना सह स्पर्धा विरोधं मनागपि स्वल्पमपि न चिन्तयेच्चिन्तयितु न युक्तम् । अर्हे लिङ् ॥९॥ **अत इति** । दिव्यं विप्रकृष्टार्थदर्शनक्षमम् ॥ किं पश्यसि । त्वया दृश्यमानो लङ्कावृत्तान्त क इत्यर्थ ॥ 'रावण·' इत्यारभ्य 'ननु पुरुषधर्मो बहुमत' इत्यन्तो लङ्कावृत्तान्त । सर्वप्रकृतिभिरमात्यसेनापालादिभि । मन्त्रयते कर्तव्यविषये गुप्तं भाषते । 'मन्त्रि गुप्तभाषणे' इति चुरादि ॥ मातामहेत्यस्य सभ्रमाद्विरुक्ति ॥ **त्वयेति** । त्वया यद्यत्कृत्यं कपटविधिना वञ्चनोपायेन प्रयुक्तमनुष्ठित तत्तदखिल दुर्दैवादुर्भाग्याद्विपरीतं परिणतं सवृत्तम् । विराधव्यापारादिको रामवधाय प्रयुक्तो विराधादिवधस्यैव हेतुरभूदिति भाव । तव परमं पौरुषबलं तथाविधबलभूतो युद्धायाभियातस्त्वरित विनि-

अस्माकमपि लोके द्वावप्रकम्प्यौ महाबलौ ।
राजा वानरवीराणां रामश्च क्षत्रियान्तकः ॥ ११ ॥

तयोरपि रामो विजेता । अवधारितमेव पूर्वमस्माभिर्यो वालिनं हन्ति हता वयं च तेनैवेति । परं तु पुनरप्येकवारं तूष्णीं दण्डः प्रयोज्यः । फलं तु दैवायत्तम् । प्रकाशदण्डस्तु रामे न प्रसरतीति सिद्धमेव ।

रावणः—तत्कथ्यतां यत्ते मनसि वर्तते ।

माल्यवान्—इदानीमेव मे चारैरावेदितम् । ऋष्यमूके रामः कतिपयैरेव वानरैः परिचर्यमाणः प्रतिवसति । लक्ष्मणस्तु सुग्रीवपट्टाभिषेकाय किष्किन्धां प्रविष्टः । स च कतिपयैर्दिवसै रामसकाशमागमिष्यति । विभीषणः पुनर्मासचतुष्टयं सुग्रीवसकाशे वत्स्यतीति । इदानीमन्योन्यविप्रयुक्तौ रामलक्ष्मणौ ।

परस्परविनाभावे परस्परसहाययोः ।
छद्मदण्डप्रयोगश्चेत्सफलो भविता तयोः ॥ १२ ॥

रावणः—कीदृशः ।

माल्यवान्—यदा तावल्लक्ष्मणः सुग्रीवसकाशादृष्यमूकमागच्छति तदा मध्येमार्गमिन्द्रजिता लक्ष्मणस्याग्रतो मायासीतायाः शिरश्छेदः कर्तव्यः । तदा लक्ष्मणो मुहूर्तं मोहमापत्स्यते सङ्ग्रामप्रयोजननिवृत्त्या निरुत्साहो विषण्णश्च संपत्स्यते । तदानीमिन्द्रजिता मुहूर्तादामो लक्ष्मणश्च जेतव्यः । अतिधीरस्यापि पुरुषस्य स्वजनविषये

हत ॥ १० ॥ **अस्माकमिति** । वानराणा राजा वाली । क्षत्रियान्तको राम. परशुराम. ॥ ११ ॥ एकवारमेकस्मिन्नवसरे । 'निवहावसरौ वारौ' इत्यमर । अत्यन्तसयोगे द्वितीया । सकृदित्यर्थं । तूष्णींदण्डो वञ्चनात्मको वधोपाय । दैवायत्तं भाग्याधीनम् । प्रकाशदण्डस्तु सेनया प्रकटाभियानेन युद्धरूप ॥ चारैर्दूतैरावेदितमाह—'ऋष्यमूके' इत्यादिना 'वत्स्यति' इत्यन्तेन । विप्रयुक्तौ विश्लिष्टौ । **परस्परेति** । परस्परसहाययोस्तयो परस्परविनाभावे विश्लेषे सति च्छद्मदण्डस्य प्रयोगोऽनुष्ठानं चेत्सफलो भविता भविष्यति । भवतेर्लृट् ॥ १२ ॥ कीदृश कथंभूतश्छद्मदण्ड इत्यनुषङ्ग ॥ छद्मदण्डप्रकारमाह—'यदा तावत्' इत्यादिना 'जेतव्य' इत्यन्तेन । मोहमापत्स्यते मूर्च्छां प्राप्स्यति । सङ्ग्रामप्रयोजनस्य सीतावाप्तिरूपस्य निवृत्त्या ध्वंसनेन । सपत्स्यते भविष्यति । स्वजनविषये बन्धुविषये । अस्य च विनिपा-

आकस्मिकोपसंपन्ने विनिपातेऽतिदारुणे ।
अङ्गारे वाङ्घ्रिणाकान्ते जायते विकलं मनः ॥ १३ ॥

त्वया च विद्युज्जिह्ममायानिर्मितं सीताशिरो रामस्याग्रतो निक्षेप्तव्यम् । ततः सोऽपि मोहमापत्स्यते । ततः प्रागेव समाश्वासादविलम्बेन जेतव्यः ।

रावणः—यद्यपि युक्तं त्वयाभिहितम्, इदं तु संभाव्यते । कदाचित्प्रत्यक्षापराधद्विगुणितकोपौ तदवस्थधैर्यौ रामलक्ष्मणौ भवेतां तदा तत्सनिधानमनर्थहेतुरेव ।

माल्यवान्—तदा युद्धं कर्तव्यमस्माभिस्तदर्थं च सर्वं राक्षसबलं भवन्तमिन्द्रजितं चानुगच्छतु । कुम्भकर्णश्च प्रबोधयितव्यः ।

रावणः—किं सर्वविनाशायोपायं चिन्तयसि । सर्वथा रामलक्ष्मणसनिधानमस्माभिः परिहरणीयमेव ।

माल्यवान्—क्व वा गूढप्रदेशे निलीनो भवितुमिच्छसि सीतापहारनिमित्ते महावैरे जाग्रति ।

मातृगर्भं प्रविष्टानामपि नः सर्वथा पुनः ।
रामरूपमहामृत्योर्न मोक्ष इति मे मनः ॥ १४ ॥

(औदासीन्यमवलम्ब्य ।) कुत्सितमरणापेक्षया वीरधर्मेण मृत्युः श्लाघ्यः । दण्ड एव शरणमस्माकम् । अत्र च

तेऽन्वयः । **आकस्मिकेति** । विनिपात आकस्मिकोपसंपन्नेऽकाण्ड एव प्राप्ते सति । अङ्गारेऽङ्घ्रिणा पादेनाक्रान्ते वाक्रान्त इव । 'वा स्याद्विकल्पोपमयो' इत्यमर । अतिधीरस्यापि पुरुषस्य मनो विकलं धैर्यशून्यं जायते भवति ॥ १३ ॥ विद्युज्जिह्वस्य विद्युज्जिह्वाख्यस्य मायया वञ्चनशक्त्या निर्मितं सृष्टं निक्षेप्तव्यं निधातव्यम् । समाश्वासात्प्रागेवेत्यन्वय । प्रत्यक्षापराधेन चाक्षुषेण सीताशिरोहरणरूपानिष्टाचरणेन । प्रत्यक्षेत्यनेन सीतापहारव्यावृत्ति । द्विगुणितकोपावपहारकोपादप्यधिककोपौ । तदवस्थधैर्यौ यथावस्थितधैर्यौ तयो संनिधान सामीप्यम् ॥ राक्षसबल राक्षससेना । 'सैन्यास्थिरूपरेतःशक्तिस्थौल्येषु चेद्बल क्लीबे' इति रत्नमाला । कुम्भकर्ण इति । सुप्त इति शेष ॥ **क्वेति** । निलीन प्रच्छन्न । जाग्रति प्रकटे सति । अस्य चोत्तरत्रान्वय । **मातृगर्भमिति** । महामृत्योर्मृत्योरपि मृत्योर्मोक्षो बहिर्निर्गमनम् ॥ ४ ॥ औदासीन्य दण्डानुष्ठानशून्यताम् । वीराणां धर्मेण श्रेय साधनेन शत्रुकृतप्रहारेण ।

तूष्णींदण्डः प्रयोक्तव्यस्तस्य सिद्धौ ध्रुवो जयः ।
प्रकाशदण्डे मृत्युश्च यशः श्रेयश्च शाश्वतम् ॥ १५ ॥

औदासीन्यं तु मृत्युरश्रेयश्चापवादः । अतो यथास्मदभिहितमनुष्ठीयताम् ।

जयो वा मृत्युर्वा भवतु नियतं मे मतमिदं
रिपावौदासीन्यं मनसि न समाधानमयते ।
अनारम्भे नित्या विपदितरथा चेदनियता
तदानीमुद्योगो ननु पुरुषधर्मो बहुमतः ॥ १६ ॥

अगस्त्यः—सर्वं भगवता प्रत्यक्षमवगतम् । इतः परं राक्षसचेष्टिते विश्वासो विषादश्च मा भूत् । अप्रतिहतधैर्यो विजयस्व राक्षसान् । आदित्यहृदयं च ते विजयप्रदमुपदिशामि । (उपदेशं नाटयति ।)

रामः—अनुगृहीतोऽस्मि । वर्षाकाले व्यतीते राक्षसानामुन्मूलनं मया संकल्पितम्, तत्कतिपयैरेव दिवसैर्भविष्यति प्रियं मे । किं तु लक्ष्मणः कथं राक्षसचेष्टितं विज्ञास्यतीति पर्याकुलं मे हृदयम् ।

अगस्त्यः—लक्ष्मणविभीषणयोरविनाभावेन भवितव्यम् । वि-

मृत्युर्मरणम् । अत्र च दण्डसामान्ये च । **तूष्णींदण्ड इति** । तस्य सिद्धौ निष्पत्तौ । दण्डगततूष्णींभावे सिद्धे सतीत्यर्थः । परैरज्ञाते सतीति यावत् । प्रकाशदण्डे युद्धे सति मृत्युश्च मरणं च, यशो वीरधर्मस्थैर्यप्रथा, श्रेयश्च वीरलोकप्राप्तिरूपेष्टार्थसिद्धिश्च, शाश्वतम् । निश्चितमित्यर्थ । शाश्वतश्च शाश्वतं च शाश्वतं चेति सहोक्तौ 'नपुंसकमनपुसकेनैकवच्चास्यान्यतरस्याम्' इत्येकशेषैकवद्भावौ ॥ १५ ॥ औदासीन्ये तु दण्डसामान्यप्रयोगे तु मृत्यु कुत्सितमरणं अश्रेयो वीरलोकविरहश्च । सीतास्तेयपापस्य वधेन निष्कृतावपि वीरलोको न सिध्यतीति भाव । यथास्मदभिहित मदुक्तम् । दण्डवधप्रयोगमनतिक्रम्य । पदार्थानतिवृत्तावव्ययीभाव । **जय इति** । नियतमन्यतरदवर्जनीयम् । इदं दण्डद्वयानुष्ठानं मे मतं ममेष्टम् । रिपौ शत्रौ विषय औदासीन्यं दण्डाननुष्ठान कर्तृ समाधान सशयनिवृत्तिं कर्म मनसि नायते न प्राप्नोति । अनारम्भे दण्डाननुष्ठानरूपौदासीन्ये विपन्मृतिर्निल्या निश्चिता । इतरथा दण्डप्रयोगे तु विपदनियता सदिग्धा । तदानीं दण्डप्रयोगस्यानियतविपत्कत्वे पुरुषधर्म उद्योगो वीरपुरुषस्वभावभूतो दण्डप्रयोगप्रयत्नो बहुमतो ननु श्लाघ्य एव । एव लङ्कावृत्तान्त प्रत्यक्षित ॥ १६ ॥ विश्वासो याथार्थ्यज्ञानम् । विजयस्वाभिभूया । 'विपराभ्या जे.' इत्यात्मनेपदम् । आदित्यहृदयमादित्यहृदयाख्यं सूर्यस्तोत्रम् ॥ उन्मूलनं मूलेन सह ध्वंसनम् ॥ अविनाभावेन नियतसनिकर्षेण । सर्वं राक्षसमायाचेष्टितम् । राक्षसी रक्ष-सब-

भीषण एव सर्वमावेदयिष्यति। तस्य राक्षसी माया राक्षसजातिवशेन प्रत्यक्षैव। अतः क्षणमात्र विभीषणेन लक्ष्मणो न मोक्तव्यः। वानरबलं च सर्वं सनद्धमेव तिष्ठतु। तत्किल महता राक्षसबलेन योद्धुं भूलोकमवतीर्णं देवतानीकमेव। तदेतत्सर्वमद्यैव लक्ष्मणाय सुग्रीवविभीषणाभ्यां च सदिश्यताम्। अहं च निजाश्रमं गमिष्यामि। (उत्थाय सहर्षम्।) हन्त, त्वयेदानीम्

लङ्काद्वीपगतं निशाचरकुलं कृत्स्नं पराभूयते
दिष्ट्या सत्वरमस्मदीयतपसो विघ्नो विनिर्धूयते।
उल्लासो मनसीशितुर्दिविषदामुच्चैरुपाधीयते
सम्यक्पालनशीलनेन जगतां सौख्यं समास्थीयते॥ १७॥

(कतिचित्पदानि गत्वा समन्तादवलोक्य।) हन्त भोः, कतिपयदिवसैरस्मिन्प्रदेशे गर्जतां वानरेन्द्राणामट्टहासा दिशो विदिशश्च विदारयिष्यन्ति।

बिभ्यद्भूपरिरम्भिकौणपवधूनिर्भिन्नगर्भार्भक-
श्रेणीद्भावितभीमभावगरिमन्यग्भूतदम्भोलयः।
यज्ञश्रेषकृदुद्भवप्रविलयप्रारम्भसंभावित-
स्वर्भोगप्रतिलम्भसंभृततमःसंभारजम्भारयः॥ १८॥

न्धिनी। राक्षसजातिवशेन राक्षसत्वानुरोधेन। 'नतु राक्षसचेष्टित 'इति राक्षसकृत्यस्यैव प्रतिषेधात्। सनद्धं सज्जम्। 'सनद्धौ सज्जवर्मितौ' इति रत्नमाला। भूलोकमवतीर्णं वानरात्मना भूमिं प्राप्तम्। देवतानीकं देवसेनाचक्रम्। 'चक्रं चानीकमस्त्रियाम्' इत्यमर। सदिश्यता वाचिकेन बोध्यताम्। हन्तेति हर्षे। त्वयेदानीमित्यस्य चोत्तरत्रान्वय। लङ्केति। त्वया लङ्काद्वीपगत कृत्स्न निशाचरकुल पराभूयते शीघ्रमेव जेष्यते। वर्तमानसामीप्ये लट्। एवमुत्तरत्रापि। दिष्ट्येत्यानन्दे। विनिर्धूयते नाशयिष्यते। दिविषदामीशितुरिन्द्रस्य मनस्युल्लासो हर्षे उच्चैरधिकमुपाधीयते जनयिष्यते। उपाधानमिह जननम्। सम्यक्पालन त्वविवद्रक्षण शीलन स्वभावो यस्य स तथोक्तस्तेन त्वय जगता सौख्य समास्थीयते कर्तव्यत्वेनाधिष्ठास्यते। अत्र सिद्धवद्भाविश्रेय कथनरूपं प्ररोचनं नाम विमर्शसध्यङ्गमुक्तम्॥ १७॥ अट्टहासा महान्तो हासा। 'अट्टहासो महान्हासो मुखरागादिकृत्' इत्यभिधानात्। दिश प्राच्यादय, विदिश आग्नेय्यादय, ता विदारयिष्यन्ति भेत्स्यन्ति। बिभ्यदिति। अर्धद्वयोक्तं विशेषणद्वय पूर्वोक्ताट्टहासविशेषणम्। बिभ्यतीनामतएव भूपरिरम्भिणीना भूमौ पतितानां कौणपवधूना राक्षसीना निर्भिन्नेषु विदीर्णेषु गर्भेषूदरान्तर्देशेषु स्थितानामर्भकाणा बालाना श्रेणीनाधःपातेनोद्भावितस्योपपादितस्य भीमभावस्य भयंकरत्वस्य गरिम्णा-

इदं च ते लङ्काकिष्किन्धयोरन्तरालं निशाचरशवैरलंकरिष्यति ।

उद्भूतप्रतिभूपभूमविभुताविभ्रंशकृद्भावना-
माबिभ्रद्भवदीयनिर्भरभुजासभारसंभावितम् ।
उद्यद्भैरवभावभावितभवद्भ्रूभङ्गभङ्गीमिल-
द्गम्भीरोद्भटभूरिभीमरणितप्राग्भारगर्भं धनुः ॥ १९ ॥

(इति निष्क्रान्ता सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते षष्ठोऽङ्कः ।

तिशयेन न्यग्भूतोऽधरीभूतो दम्भोलिरशनिशब्दो यैस्ते तथोक्ता । यज्ञभ्रेषकृता यज्ञविघ्नकराणा रक्षोभैकाणाम् । 'भ्रेषो भ्रंशो यथोचितात्' इत्यमर' । उद्भव एवोत्पत्तिदशायामेव प्रविलयप्रारम्भेण मरणारम्भेण सभावितेन स्वर्भोगप्रतिलम्भेन स्वर्गसुखप्राप्त्या सभृत सपादितस्तम सभार शोकातिशयो यस्य स, तथोक्तस्तथा-विधो जम्भारिरिन्द्रो यैस्ते तथोक्ता । 'तमो राहौ गुणे ध्वान्ते शोके' इति रत्नमाला । यज्ञविघ्नकारिणामपि स्वर्गसुखं जातमितीन्द्रस्य दु खमभूदिति भाव । एवंविधा अट्टहासा दिशो विदिशश्च विदारयिष्यन्तीति सबन्ध. ॥ १८ ॥ **इदं चेति** । इदं च ते धनु-रित्यन्वय । **उद्भूतेति** । उद्भूताया उत्पन्नाया. प्रतिभूपाना प्रतिपक्षिणा भूम्नः सङ्घस्य विभुताया प्रभुत्वस्य विभ्रंशकृद्भावना नाशकरी भावना संस्कारमाबिभ्रद्धानं भवदीयाया निर्भराया सामर्थ्यप्रचुराया भुजाया बाहो सभारेण धारणसामर्थ्यातिशयेन सभावितं धृतम् । 'दोर्दोषा च भुजा भुज ' इति द्विरूपकोशः । उद्यतोद्गच्छता भैरवभावेन भयंकरत्वेन सह भावितयोत्पादितया भवद्भ्रूभङ्गभङ्ग्या स्वदीयभ्रूभेदप्रकारेण । 'भङ्गी प्रकारे तु' इति रत्नमाला । मिलद्युक्तम् । गम्भीरो घन उद्भटो दीर्घो भूरि वर्धमानो भीमरणितस्य भयकरस्य टङ्कारस्य प्राग्भार समूहो गर्भे यस्य तत्तथोक्तमिदं ते धनुर्निशाचरशवैरन्तरालमलकरिष्यतीति सबन्ध ॥ १९ ॥

यो महीसारवास्तव्यो वाधूलो वीरराघव ।
स महावीरचरिते षष्ठमङ्क व्यवीवरत् ॥

इत्यण्णाप्पङ्कार्यनामधेयेन वाधूलवीरराघवेण विरचितायां महा-वीरचरितव्याख्यायां भावप्रद्योतिनीसमाख्यायां षष्ठोऽङ्कः ॥

सप्तमोऽङ्कः ।

(ततः प्रविशत्याकाशयानेन प्रहृष्ट इन्द्रो दशरथश्च ।)

इन्द्रः—महाराज, चिरात्परिपूर्णोऽयमस्माकं मनोरथः । अयं किल तवात्मजो रामचन्द्रः

हत्वा हन्त दशाननं सतनयं सभ्रातरं सान्वयं
हित्वा स्त्रैणमहो निहत्य तरसा सर्वं च सेनागणम् ।
दत्त्वा तत्र विभीषणाय नमते लङ्काधिराज्यश्रियं
तत्त्वाख्यायिनि जातवेदसि ततः सीता प्रियामादित ॥ १ ॥

दशरथः—अहो, भगवता हव्यवाहेन महान्प्रसादः प्रदर्शितः । यदात्मानं प्रविष्टामपि तदवस्थामेव सीतामङ्केनादाय सुग्रीवसमक्षं सुपरिशुद्धामावेद्य रामाय समर्पितवान् ।

इन्द्रः—जगतामुपकारी रामचन्द्रः । कस्तस्य प्रतिकूले कर्मणि प्रवर्ततेऽनुकूले वा न प्रवर्तते । तदीयपौरुषावष्टम्भेन हि सर्वलोकाः कृतार्थाः ।

इदानी कवि सप्तमाङ्केन निर्वहणसंधिं प्रस्तौति । तत्स्वरूपं च 'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ फलान्विकार्यानुगुण्यादङ्गान्यस्य चतुर्दश । सन्धिर्विरोधो ग्रथन निर्णय· परिभाषणम् ॥ प्रसादानन्दसमया कृतिर्भाषोपगूहने । पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥' इति । अत्र वसिष्ठव्यापाररूपस्य फलनिर्वाहकात्मकस्य कार्यस्य, सीतया सह रामपट्टाभिषेकात्मकफलागमस्य चार्थप्रकृतेर्वर्णनान्निर्वहणसंधि । अङ्गस्वरूपनिरूपणं तु तत्तदवसरेषु वक्ष्यते । तत्र विष्कम्भकमाह—**ततः प्रविशतीत्यादिना** । आकाशयानेन । विमानेनेत्यर्थ । गगनगमनेन वा । मनोरथोऽभिलाष परिपूर्ण । रावणवधादिरूपविशिष्टसीमा जात इत्यर्थ । **हत्वेति** । हन्तेति हर्षे । सान्वयं सवंशम् । स्त्रैणं हित्वा स्त्रीसमूहं त्यक्त्वा । हननक्रियाया कर्मतया परिहृत्येर्थ । तरसा वेगेन । ततस्तदनन्तरं जातवेदसि वह्नौ तत्त्वाख्यायिनि सति सीतापरिशुद्धिलक्षणसत्यार्थवादिनि सति ततोऽग्ने· सकाशात्प्रिया सीतामादित स्वीकृतवान् । आङ्पूर्वाद्दातेर्लुङि सिचो लोपः ॥ १ ॥ हव्यवाहेन वह्निना । प्रसादोऽनुग्रह । आत्मानं स्वम् । वह्निपरामर्श्ययमात्मञ्शब्द· । तदस्यां सैवावस्था यस्या· सा तथोक्ता ता यथापूर्वं स्थिताम् ॥ **जगतामिति** । चन्द्र इव रामो रामचन्द्रः । प्रतिकूलेऽनिष्टकरे क प्रवर्तते । कोऽपि न प्रवर्तत एवेत्यर्थः । अनुकूले वा को न प्रवर्तते । सर्वोऽपि प्रवर्तत एवेत्यर्थ· । अत्र कार्यमार्गणात्मको विरोधो नाम संध्यङ्गमुक्तम् । तदीयपौरुषावष्टम्भेन

दशरथः—इत्थं भवन्तो रामस्य पौरुषातिशयं स्तुवन्ति । मम त्वेतावदेव बहुमतं यदरण्यवासात्प्रतिनिवृत्तः सीतालक्ष्मणाभ्यां सह क्षेमेण पुनरयोध्यामागत इति । अनेन हि धर्मैकप्रधानेन

पुरा तत्कैकेयीवचनपरिपाटीपरवता
पुरंध्रीसध्रीचा गहनपदमध्यासितमितः ।
पुनः प्राप्त दृष्ट्वा कुशलितमयोध्यापुरमिमं
पुनर्जात मन्ये पुरुषपरिणामं सुचरितम् ॥ २ ॥

इन्द्रः—रामचन्द्रानुभावेन त्रयो लोकाः पुनर्जाताः । अस्य प्रभावमजानन्निव व्यवहरसि । पितापुत्रभावो हि पुत्रस्य महिमानं गोपयति ।

(नेपथ्ये ।)

भो भोः सामाजिकाः, त्वर्यता त्वर्यता रामचन्द्रस्य राज्याभिषेकाय । अयं किल रामचन्द्रपट्टाभिषेकोत्सवदिदृक्षया स्वर्गलोकादवतीर्य साकेतनगरसनिकृष्टे नभोमध्ये प्रतीक्षते

महेन्द्रेण प्राप्तप्रणयभरमर्धासनगतो
महाभागः कामं सुरपरिषदुद्गीतविभवः ।

रामपराक्रमाश्रयेण ॥ **इत्थमिति** । पौरुषातिशय बलाद्यतिशयम् । एतावदेव वक्ष्यमाणमियदेव । अरण्यवासाद्वनवास प्राप्य । ल्यब्लोपे पञ्चमी । क्षेमेण सीतालक्ष्मणात्मकलब्धाशरक्षणेन सह । अनेन रामेण । धर्म एक केवल प्रधानमुद्देश्य यस्य स तथोक्तस्तथाविधेन । एकशब्दो राज्यसुखादिक व्यवच्छिनत्ति । अस्य चोत्तरत्रान्वय । **पुरेति** । तत्कैकेय्यास्तादृश्या कैकेय्या वचनपरिपाट्या वाक्यानुक्रमेण । 'परिपाटी अनुक्रम.' इत्यमर । परवता तदधीनेन । पुरध्रया कुटुम्बिन्या सीतया सहाञ्चति गच्छतीति पुरंध्रीसध्यङ् तेन । 'स्यात्तु कुटुम्बिनी पुरध्री' इत्यमर । 'सहस्य सध्रि' इति सध्र्यादेश । सीतासहायेनेत्यर्थ । अनेन रामेणेतोऽयोध्यातो गहनपदं वनस्थानमध्यासितमध्युषितम् । 'अधिशीङ्स्थासा कर्म' इति सकर्मकत्वम् । इमं राम कुशलिन सन्त पुनरयोध्यापुर प्राप्त दृष्ट्वा पुरुषपरिणामं पुरुषवदात्मना परिणत सुचरित सर्वलोकसुकृतसमुदाय पुनर्जात मन्ये पुनरवतीर्ण सभावयामि । अन्वादेशस्याविवक्षणादममित्यत्र एनादेशाभाव. ॥ २ ॥ व्यवहरसि वदसि । पितापुत्रभावस्तव रामस्य च जन्यजनकभाव· सबन्धो महिमान रामस्य माहात्म्यं गोपयति सवृणोति । 'गुप गोपने' । अत्र बीजोपगूहन नाम सध्यङ्गमुक्तम् ॥ समाज रक्षन्तीति सामाजिका. । 'रक्षति' इति ठक् । रामचन्द्रपट्टाभिषेकाय त्वर्यतामित्यर्थ. । दिदृक्षया दर्शनेच्छया । साकेतनगरमयोध्यानगरं तत्सनिकृष्टे समीपगते प्रतीक्षते प्रतिपालयति । **महेन्द्रेणेति** । प्राप्त· प्रणयभर प्रेमातिशयो यस्मिन्कर्मणि तद्यथा भवति तथा अर्धास-

महानन्दोद्रेकप्लवभरपराधीनहृदयो
महाराजः साक्षाद्द्युमणिरिव दीप्त्या दशरथः ॥ ३ ॥

इन्द्रः—भगवानरुन्धतीपतिः प्रकृतिवर्गं त्वरयित्वा रत्नमये पीठे सीतासहितं रामचन्द्रं निवेशयति। तत्प्रस्तूयन्तां मङ्गलानि।

गन्धर्वा घनरागबन्धमधुरं गायन्तु कान्तस्वरं
गम्भीराभिनयप्रयोगचतुरा नृत्यन्तु रम्भादयः।
दीप्तानि त्वरिताः किरन्तु परितः पुष्पाणि विद्याधरा
दिव्या दुन्दुभयो गभीरनिनदाः कुर्वन्तु कोलाहलम् ॥ ४ ॥

दशरथः—दिष्ट्या वसिष्ठादिभिः सीतासमेतो रामचन्द्रः सर्वेभ्यः सागरेभ्यः सर्व्वाभ्यो नदीभ्यश्च समानीतैः पुण्योदकैरभिषिक्तो दिव्यमाल्याम्बरधरो दिव्यगन्धैरनुलिप्तो दिव्याभरणैरलंकृतो दिव्येन किरीटेन विराजमानो दिव्यसिंहासनोपविष्टो दिव्यया राज्यलक्ष्म्या विराजते। सफलमद्य मे जातं चक्षुः।

नगतस्तदीयसिंहासनसमाशगत। आसनस्यार्धमर्धासनम्। 'अर्धं नपुंसकम्' इति समास। महाभागोऽतिशयितभाग्यवान्। सुरपरिषदा देवगोष्ठ्योद्गीतविभव उच्चैर्गीतैश्वर्यः। महानन्दस्य मोक्षसदृशानन्दस्य। 'मुक्तिर्मोक्षो महानन्द.' इति निघण्टुः। उद्रेको वृद्धिस्तस्य प्लवः प्रवाहस्तस्य भरेणातिशयेन पराधीनहृदयो महाराज साक्षात्प्रत्यक्षभूतो दीप्त्या द्युमणिरिव स्थितो दशरथः नभोमध्ये प्रतीक्षत इति संबन्ध। अत्र कार्योपक्षेपणरूप प्रथनं नाम संध्यङ्गमुक्तम् ॥ ३ ॥ अरुन्धतीपतिर्वसिष्ठः प्रकृतिवर्गममात्यादिसमूह त्वरयित्वा। रत्नमये रत्नप्रचुरे। निवेशयत्युपवेशयति। तत्तस्मान्मङ्गलानि विघ्ननिवर्तकानि चिकीर्षितसपादकानि च गाननाट्यादीनि प्रस्तूयन्ता प्रक्रियन्ताम्। **गन्धर्वा इति**। घनैर्गम्भीरै रागबन्धै. सुनिर्बन्धनरागैर्मधुरं यथा तथा। यद्वा घनरागा नाम नाट्यगौलवरालिप्रभृतयस्तेष्वभ्यर्हितत्वात्प्रथमो नाट्यरागस्तेन मधुरं यथा तथा। कान्तस्वरं मनोज्ञस्वरं च यथा तथा गन्धर्वा गायन्तु। गम्भीरस्य निपुणोन्नेयभावरससूचकस्याभिनयस्य सात्त्विकाङ्गिकाहार्यादिकस्य चतुर्विधस्य रसभावव्यञ्जकव्यापारस्य प्रयोगेऽनुष्ठाने चतुरा निपुणा रम्भादयोऽप्सरसो नृत्यन्तु। विद्याधरास्त्वरिता वेगयुक्ताः सन्तो दीप्तानि पुष्पाणि किरन्तु वर्षन्तु। दिव्या. स्वर्गस्था दुन्दुभयो मेर्यो गम्भीरनिनदाः सन्तो घनध्वनय. सन्तः कोलाहलं कलकलं कुर्वन्तु। अत्र बीजानुगुणकार्यप्रख्यापनानिर्णयो नाम सध्यङ्गमुक्तम्। यथोक्तम्—'बीजानुगुणकार्यस्य प्रख्यापनं निर्णयः' इति ॥ ४ ॥ दिष्ट्येत्यानन्दे। वसिष्ठादिभिरित्यादिशब्देन विश्वामित्रवामदेवादीनां सग्रहः। दिव्यमाल्येत्यादेः सष्ठोऽर्थः। अत्र वाञ्छि-

इन्द्रः—आचार इत्युत्सव इति रामचन्द्रस्य पट्टाभिषेको बहुमतः। न पुनरस्याभिषेकेण राज्याधिकारः क्रियते। अनेन ह्यवलम्बितानामपि राज्यं करस्थम्।

अहं तावदरीन्हत्वा स्वाराज्ये विनिवेशितः।
विभीषणश्च धर्मात्मा लङ्काराज्येऽभिषेचितः॥ ५॥
सुग्रीव. किल किष्किन्धाराज्यलक्ष्मीमवापितः।
असाध्यमिदमत्यन्तमन्यस्य मनसापि वा॥ ६॥

(नेपथ्ये कलकल।)

इन्द्रः—(पृष्ठतोऽवलोक्य।) अहो, भगवानिन्दुमौलिर्ब्रह्मणा सह सत्वरमितश्चैवाभिवर्तते। प्रत्युद्गमनेनाराधयामः।

(इति निष्क्रान्तौ।)

शुद्धविष्कम्भः।

(तत प्रविशत्यभिषिक्त सपरिवारो रामः सीता च वसिष्ठादयश्च।)

वसिष्ठः—

आकल्पान्तमनन्तकोटिगुणितैरर्थैरनेकाध्वरै-
रानन्दं गमयन्नशेषविबुधान्दिव्यानदिव्यानपि।
आत्मीयानुपलालयन्नविरतैरैश्वर्यविश्राणनै-
राशीर्वादपरम्परामनुभवन्नस्माकमास्तां भवान्॥ ७॥

तप्राप्तिरानन्दो नाम सध्यङ्गमुक्तम्॥ **आचार इत्युत्सव इति।** शिष्टाचारोऽनुरोद्धव्यः, उत्सवश्चाप्रतिषेध्य इति हेतोः। पट्टाभिषेकः। राजान्तरस्येव पट्टाभिषेकेण राज्यस्वामित्वं न क्रियत इत्यर्थः। अनेन रामेणावलम्बिताना परिगृहीतानाम्। **अहं तावदिति।** प्रथममहं शत्रून्हत्वा स्वर्गराज्ये स्थापितः॥ ५॥ **सुग्रीव इति।** अवापितः प्रापितः। द्विकर्मकमिदम्। अन्यस्य रामादन्यस्य मनसाप्यसाध्यम्। वाशब्दः करणान्तर विकल्पयति। अत्र मिथोजल्पनरूपं परिभाषा नाम संध्यङ्गमुक्तम्॥ ६॥ **आकल्पान्तमिति।** अनन्ताभिः कोटीभिर्गुणितैरावर्तितैरर्थैर्वित्तैः साधितैरनेकाध्वरैर्यागैर्दिव्यानिन्द्रादीनदिव्यान्भूमिष्ठानशेषविबुधान्समस्तदेवान्। देवान्भूदेवाश्चेत्यर्थः। आनन्द गमयन्प्रापयन्। आत्मीयान्क्षत्रियानविरतैर्निर्लैरैश्वर्यविश्राणनैर्दानैरुपलालयन्पुत्रानिव प्रीणयन्नस्माकमाशीर्वादपरम्परामनुभवन्नाकल्पान्तं कल्पान्त-

विश्वामित्रः—

आलोकालोकशैलादविकलभवनीमात्मकीर्तिप्रकाशै-
राशापालानुभावग्रसनगुरुतरैरञ्चितामादधानः ।
आज्ञामात्रादशेषानपि रिपुनृपतीनात्तगन्धानपास्य-
न्नाचन्द्रार्कं धरित्र्यामनुभवतु भवानाधिराज्यप्रतिष्ठाम् ॥ ८ ॥

रामः—अनुगृहीतोऽस्मि ।

सीता—[1]परमत्थविण्णाणं मुणीणं वअणं ण विसवदइ ।

(तत· प्रविश्याकाशयानेन ब्रह्मणानुगम्यमानो महेश्वर इन्द्रदशरथौ च ।)

इन्द्रः—सखे महाराज, पश्य, पश्य सुहृद्भ्रातृभिर्यथोचितं सेव्यमानस्य सीतासमेतस्य रामचन्द्रस्य दर्शनीयताम् ।

शत्रुघ्नः शरदिन्दुबिम्बधवलं छत्रं दधाति स्वयं
सुग्रीवश्च विभीषणश्च बिभृतः पार्श्वद्वये चामरे ।
सानन्दं व्यजनेन वीजयति च स्वैरं सुमित्रासुतः
सुप्रीतो युवराज एष भरतः स्वीयोपचारे स्थितः ॥ ९ ॥

दशरथः—अहो ममानन्यसुलभं भाग्यम् । यदेतादृशं रामभद्रं पश्यामि ।

---

१. परमार्थविज्ञानानां मुनीना वचनं न विसंवदति ।

पर्यन्तमास्ताम् । तिष्ठत्वित्यर्थ· । आशिषि लोट् ॥ ७ ॥ **आलोकालोकेति** । आशापालाना दिक्पतीनामिन्द्रादीनामनुभावस्य प्रभावस्य ग्रसनेन तिरोधानेन गुरुतरैरभ्यधिकैरात्मकीर्तिप्रकाशैरवनी भुवमालोकालोकशैलाल्लोकालोकशैलपर्यन्तमञ्चिताम-ङ्कितम् । 'अञ्चू विशेषणे' चुरादिः । आदधान कुर्वाणः सन्नात्तगन्धानभिभूतानशेषानपि रिपूनृपतीनाज्ञामात्रात् । न युद्धादित्यर्थ· । अपास्यन्निरस्यन्धरित्र्यामाधिराज्यस्य सार्वभौमत्वस्य प्रतिष्ठा स्थैर्यं भवानाचन्द्रार्कमनुभवत्वित्याशिषि लोट् । अत्र लब्ध-स्थिरीकरणं कृतिर्नाम सध्यङ्गमुक्तम् ॥ ८ ॥ परमार्थविज्ञानाना यथार्थविषयज्ञानव-ताम् । न विसवदत्यर्थशून्यं न भवति । ब्रह्मणा चतुर्मुखेन । महेश्वरो रुद्र· । सुहृदौ सुग्रीवविभीषणौ । भ्रातरः शत्रुघ्नादय· । यथोचितं यथायोग्यम् । दर्शनीयता चारु-ताम् । **शत्रुघ्न इति** । चामरे बालव्यजनद्वयं बिभृतो धारयतः । बिभर्तेर्लटि तसो डित्त्वाट्टेरणाभाव· । सुमित्रासुतो लक्ष्मणो व्यजनेन तालवृन्तेन वीजयति मन्दमारुतमु-द्भावयति । युवा चासौ राजा च युवराजः । 'राजाह सखिभ्यष्टच्' इति टच् । स्वीयोपचारे स्वानुरूपोपचारे स्थितस्तिष्ठति । अत्र पर्युपासनात्मकः प्रसादो नाम

(रामादय सर्वे सत्वरमुत्थाय साष्टाङ्ग भूयोभूयः प्रणम्य महेश्वरं वैदिकस्तोत्रै-राराध्य बद्धाञ्जलयस्तिष्ठन्ति ।)

महेश्वरः—(रामं प्रति ।) सुप्रीता वयं भवदीयचरिताद्भुतेन, यत्त्वया रक्षोमृत्युग्रस्तं जगज्जातमुज्जीवितम् ।

पुनर्जाता इमे लोकाः पुनर्जाता इमाः प्रजाः ।
पुनश्चैते त्रयो वेदाः पुनर्यज्ञादिकाः क्रियाः ॥ १० ॥

एतावता कालेन त्वया जगतामुपद्रवो निरासितः । अद्यप्रभृति परिपालने तवाधिकारः ।

एतावन्तं त्वया कालं युद्धवीरोऽवलम्बितः ।
धर्मदानदयावीरास्त्वामिदानीमुपस्थिताः ॥ ११ ॥

तद्भवान्वसिष्ठविश्वामित्रोपदिष्टमार्गेण लोकरक्षाध्वरे दीक्षितो भवतु ।

सर्वे सन्तु परस्परं सुमनसः सान्द्रप्रमोदा जनाः
संतुष्यन्तु समीहितप्रणयनैः संभाविताः साधवः ।
सद्यः सिद्धिमुपैतु सज्जनमनःसत्कार्यचिन्ता सदा
सायंप्रातरमी तवैव विजयं संप्रार्थयन्तां द्विजाः ॥ १२ ॥

संध्यङ्गमुक्तम् ॥ ९ ॥ अनन्यसुलभमन्येषा दुर्लभम् ॥ **सुप्रीता इति** । चरिताद्भुतेन चरितरूपेणाश्चर्येण । रक्षो रावण एव मृत्युस्तेन ग्रस्तमुज्जीवितं सप्राणीकृतम् । **पुन-रिति** । पुनर्जाता लोकाः पातालभूस्वर्गादिभुवनानि । प्रजा जना· । त्रयो वेदा ऋग्यजुःसामात्मकाः । पुनर्जाता इत्यनुषङ्ग· । यज्ञादिका इत्यादिशब्देन दानहोमयो-पूर्तस्य च संग्रहः । अत्र प्राप्तकार्यानुमोदनमाभाषणं नाम सध्यङ्गमुक्तम् ॥ १० ॥ परिपालने इष्टप्रापणेऽधिकार कर्तृभाव । **एतावन्तमिति** । एतावति काले नैरन्तर्येण युद्धवीरो युद्धप्रयोजकवीररसस्त्वयावलम्बित स्वीकृत· । कालमित्य-त्यन्तसयोगे द्वितीया । धर्म· शास्त्रैकावधेयश्रेय साधनम्, दान दीनेभ्यो वित्तोत्सर्ग, दया परदु·खदु·खित्वम्, वीर पूर्वोक्तवीररसश्च । त्वामुपस्थिता भूयिष्ठ प्राप्ता· । पूर्व धर्मादीना वीरोपसर्जनत्वम् । इत·पर तु वीरस्य तदुपसर्जनत्वमित्यर्थ· । पूर्वार्धे धर्मा-द्युक्तिस्तेषा वीरोपसर्जनत्वव्यञ्जनार्था । अत्र वीरस्य वीरेति चरमोक्तिस्तस्य धर्माद्युपस-र्जनत्वव्यञ्जनार्था । धर्मादेः सदैव रामस्वरूपानुबन्धित्वात् । **सबुध्यन्त** क्वचित्पठ्यते ॥ ११ ॥ **लोकरक्षैवाध्वरो** यागस्तत्र दीक्षितः सकल्पितः । **सर्व इति** । जनाः परस्परं सुमनसः प्रियहितपरहृदयाः सान्द्रप्रमोदा घनप्रीतयश्च सन्तु । तत्र विशेष-माह—सतुष्यन्त्विल्यादिना । साधवः परोपकाररसिकाः समीहितस्याभीष्टस्य प्रणयदै-करणैः सभाविताः सत्कृताः सन्तः संतुष्यन्तु विशेषतो हर्षं भजन्तु । सज्जनमनसां सत्कार्यचिन्ता सत्कार्यचिकीर्षा सद्यः सिद्धिं उत्तरक्षण एव विषयसिद्धिं सदोपैतु ।

ब्रह्मा—

त्रैलोक्यकुशलं राम त्वया यत्नेन साधितम् ।
सुखी भव चिरं जीव सर्वत्र विजयी भव ॥ १३ ॥
सौजन्यैकरसेन सान्द्रनिभृतस्नेहेन सौमित्रिणा
साकं कर्मसु सावधानमनसा सत्येन धर्मेण च ।
सर्वानन्दविधायिसाधुचरितं सर्वात्मना साधय
सौराज्यातिशयेन सर्वसुजनश्लाघ्यो यशस्वी भव ॥ १४ ॥

भरतोऽपि यौवराज्याधिकृतः शत्रुघ्नेन सह तव यशः संपादयतु ।

इन्द्रः—सकलभुवनाभिरामरामचन्द्रप्रभावेन पुनः स्वाराज्ये प्रतिष्ठितोऽस्मि । सर्वे लोका निरुपद्रवाः संपन्नाः । निश्चिताश्च सर्वे देवाः ।

हृद्यानद्यप्रभृति भुवि नः कल्पयिष्यन्ति हन्त
क्षोणीदेवा मुदितमनसः सर्वतो यज्ञभागान् ।

अमी द्विजास्तवैव विजय सर्वोत्कर्षं सायप्रात सप्रार्थयन्ताम् । स्वकीययोगक्षेमनिर्वाहस्य स्वद्भरत्वात् । व्यापारान्तरानपेक्षया स्वदुत्कर्षप्रार्थनैव सर्वदा द्विजानामुचितेति भाव. । अत्रेष्टकार्यदर्शनात्मक पूर्वभावो नाम सध्यङ्गमुक्तम् ॥ १२ ॥ **त्रैलोक्येति ।** त्रयो लोकास्त्रैलोक्यम् । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । तस्य कुशलं सुखं यत्नेन युद्धादिविषयोद्योगेन हेतुना त्वया कर्त्रा साधितं निष्पादितम् । सुखी भवेत्यादे. स्पष्टोऽर्थः ॥ १३ ॥ **सौजन्येति ।** सुजनस्य भावः सौजन्यं स्वचरणपरिचरणैकस्वभावत्वं तत्रैकरसेन रागान्तरासवलितरागयुक्तेन । 'रसो रागे द्रवे हर्षे' इत्यभिधानम् । सान्द्रो घनो निभृत स्थिर स्नेह प्रेमा यस्य स तथोक्तस्तथाविधेन । कर्मस्वैहिकामुष्मिकव्यापारेषु सावधानमप्रमत्तं मनो यस्य स तथोक्तस्तेन सौमित्रिणा लक्ष्मणेन साकं सहित सन्त्यत्वेन भूतहितपरतथ्यवचनेन, धर्मेणाहिंसनादिना च सर्वात्मनानुक्तेन तत्तद्गोचरप्रयत्नेन च । सर्वेषामानन्दजनकं साधुचरित सदाचार साधयन् । 'यद्यदाचरति श्रेष्ठ' इत्याद्युक्तप्रकारेण स्वयमनुष्ठायान्यानुष्ठापयन्सौराज्यस्य शोभनराजभावस्यातिशयेन परया काष्ठया सर्वै सुजनै श्लाघ्य प्रशंसनीयो यशस्वी पूर्वेषामपि दुर्लभगुणप्रथापूर्णो भव । आशिषि लोट् ॥ १४ ॥ यौवराज्येऽधिकृतस्त्वया नियोजित । **सकलेति ।** स्वाराज्ये स्वर्गपरिपालनकर्मणि । 'स्वरव्ययम्' इत्यमर । तस्य राजा स्वाराज. । 'रोरि' इति रेफलोपे 'ढ्रलोपे–' इति दीर्घ. । तत कर्मणि ब्राह्मणादेराकृतिगणत्वात्ष्यञ् । प्रतिष्ठापितोऽस्मि स्थिरीकृतोऽस्मि । निश्चिता । रावणकर्तृकोपमर्दाभावनिर्णयेन नाशसशयनिवृत्त्या निखसत्तानिश्चयगोचरा इत्यर्थ । 'निश्चिन्ता' इति पाठे रावणोपद्रवचिन्तारहिता इत्यर्थः । **हृद्यानिति ।** क्षोणीदेवा ब्राह्मणा अद्यप्रभृति मुदितमनसः सन्त. सर्वत. सर्वदेशसर्वकालेषु हृद्यान्रावणभयाभावेन मन प्रियान्यज्ञ-

राज्ञां योग्यैस्त्वमपि बहुभी राजसूयाश्वमेधै-
रिष्ट्वा यज्ञैः समधिगमय स्फारमानन्दमस्मान् ॥ १५ ॥

दशरथः—वत्स रामभद्र,

त्वया लोकैकवीरेण धर्मनिष्ठेन धीमता ।
नरो मम समो नास्ति न भूतो न भविष्यति ॥ १६ ॥

एकतस्तावत्त्वदीयारण्यवासमूलशोक एतावन्तं कालमवस्थितः । इदानीं महान्तमानन्दमनुभवामि ।

तवारण्ये वासे मम हृदि महाशोकविकले
न किंचित्स्वारस्यं त्रिदशपदलाभोऽप्यलभत ।
त्वयि प्रत्यावृत्ते पुनरिह महानन्दभरिते
न धत्ते भूमानं मम मनसि निःश्रेयसमपि ॥ १७ ॥

इतः परमिष्टतमैरिष्टापूर्तैरिक्ष्वाकुवंशजानामस्माकं शाश्वतं पदं परिकल्पय । वयं च भवतः श्रेयःसंतानसिद्धिमाशास्महे । सर्वानिमालङ्कासमरसुहृदः सुग्रीवाङ्गदप्रमुखान्यथोचितं संभाव्य प्रजारक्षणमवलम्बस्व ।

भागान्यागीयहविरशान्भुवि भूमौ न कल्पयिष्यन्त्यस्मभ्यं दास्यन्ति । इन्तेति हर्षे । त्वमपि राज्ञा योग्यै क्षत्रियार्हैर्बहुभिरमितै राजसूयै राजा सोमलता सूयते कण्ड्यतेऽस्मिन्निति व्युत्पत्त्या राजसूयनामकैर्यागविशेषैरश्वमुख्यकत्वादश्वमेधशब्दवाच्यैः क्रतुभिश्च । राजसूयशब्दस्यार्धचादित्वेन नपुंसकत्वेन 'अध्वर्युक्रतुरनपुंसकम्' इति समाहारनियमप्रवृत्तेरितरेतरयोगद्वन्द्व । यज्ञैरिष्ट्वास्मान्स्फारं बहुलमानन्दं समधिगमय सम्प्रापय ॥ १५ ॥ **त्वयेति** । पुत्रेणेति शेषः ॥ १६ ॥ **एकतस्तावदिति** । त्वदीयारण्यवासो मूलं हेतुर्यस्य स तथोक्त । एतावन्तं कालं चतुर्दश वर्षाणि । अत्यन्तसंयोगे द्वितीया । इदानीं पट्टाभिषेकादनन्तरम् । **तवेति** । तवारण्ये वासे वनवासकाले महाशोकेन तत्प्रयुक्तनिरवधिकदुःखेन हेतुना विकले शिथिलिते मम हृदि त्रिदशपदलाभोऽपि सर्वोभ्यर्थनीयस्वर्गस्थानस्थितिरपि किंचित्स्वारस्यं मनागपि सुखरूपता नालभत नाभजत् । त्वयीह प्रत्यावृत्ते वनवासादयोध्यां पुनरागते सति । पुन शब्दस्तुशब्दार्थक. । महानन्दभरिते मम मनसि नि श्रेयसमपि सर्वातिशयितमोक्षसुखमपि भूमानं वैपुल्यं न धत्ते न भजति । त्वदागमनसुखान्मोक्षसुखमल्पमिति भाव । अत्र दुःखप्रशमनात्मक समयो नाम सध्यङ्गमुक्तम् ॥ १७ ॥ **इत इति** । इष्टापूर्तैर्यागानुष्ठानतटाकनिर्माणादिभि शाश्वतं पदं नित्यं स्थानम् । श्रेयस शुभस्य सतानस्यापत्यस्य च सिद्धिं निष्पत्तिम् । 'सताना. स्युरविच्छित्तिर्वंशापत्यसुरद्रुमा' इति रत्नमाला । आशास्महे इच्छामः । 'आङ· शासु इच्छायाम्' । **लङ्केत्यादि** । लङ्काया

आदित्यैरभिरूपधारितमहीभारैरुदारैर्नृपै-
राविर्भूतगुणानुभावमुरुभिर्धर्मेण गुप्ताः प्रजाः ।
आप्तैरात्महितावधारणचणैरारब्धनिर्वाहकै-
रादिष्टेन पथानुपालय महीमा चक्रवालाचलम् ॥ १८ ॥

वसिष्ठविश्वामित्रौ विना न किंचिदपि त्वया मन्त्रयितव्यम् ।

महेश्वरः—(तयोरभिमुखो भूत्वा ।)

वसिष्ठारुन्धतीजाने विश्वामित्र महामुने ।
युवामशेषकार्येषु युक्तौ स्यातमतन्द्रितौ ॥ १९ ॥

तौ—अनुगृहीतौ स्वः ।

महेश्वरः—सर्वे भवन्त इहैव नित्योत्सवाः सन्तु । वयं च स्वं स्वं स्थानं प्रविशामः ।

(इति निष्क्रान्ता महेश्वरादय ।)

(रामादय सर्वे यथोचितमुपविशन्ति ।)

विश्वामित्रः—किं ते भूयः प्रियमुपहरामि ।

युद्धसहायानित्यर्थ । सभाव्य पूजयित्वा । **आदित्यैरिति** । आदित्यस्यापत्यैः । 'दित्यदित्यादित्य–' इत्यादिना ण्यप्रत्ययः । अभिरूप मनोज्ञं यथा भवति तथा धारितोऽनुष्ठितो मह्या भूमिस्थप्राणिना भार इष्टप्रापणानिष्टनिवारणव्यापारो यैस्ते तथोक्तास्तैः । 'प्राप्तरूपमुरूपाभिरूपा बुधमनोज्ञयो.' इत्यमरः । उदारै· परेभ्यः प्राणपर्यन्तदायिभिराविर्भूतै प्रकाशमानैर्गुणैः शौर्यादिभिरनुभावैः प्रभावैश्च गुरुभिर्महद्भिर्नृपै· कर्तृभिर्धर्मेण शास्त्रोक्तधर्मयुक्ततया । प्रकृत्यादिलात्तृतीया । प्रजा गुप्ताः पालिता । आप्तैर्यथार्थद्रष्टृत्वे सति यथार्थवक्तृभिरात्मन स्वस्य । अयमात्मशब्दस्तत्परो रामपरो वा । हितस्य कालान्तरेऽपि सुखपर्यवसायिनोऽर्थस्यावधारणेन प्रागेव न्यायदृष्ट्या निश्चयेन प्रसिद्धै । 'तेन वित्त –' इति चणप्प्रत्यय· । आरब्धनिर्वाहकैः प्रारब्धकार्यनिष्पादकै पुरुषैरादिष्टेनोपदिष्टेनाज्ञप्तेन वा पथा मार्गेण आ चक्रवालाचलं देशत. कालतश्च चक्रवालपर्वतमवधीकृत्य महीमनुपालय रक्ष ॥ १८ ॥ **वसिष्ठेति** । न मन्त्रयितव्य नालोचयितव्यम् ॥ **तयोरिति** । महेश्वर । आहेति शेष । **वसिष्ठेति** । अरुन्धती जाया यस्य स तथोक्तस्तस्य सबुद्धि· । 'जायाया निङ्' इति निङ् । युक्तौ सनद्धौ । अतन्द्रितावालस्यरहितौ । स्यातं भवेतम् । अस्ते सार्वधातुक लिङ् ॥ १९ ॥ **तौ** वसिष्ठविश्वामित्रौ । आहतुरिति शेष । अनुगृहीतौ कृतप्रसादौ स्वो भवावः । अस्तेर्लटयुत्तमपुरुषद्विवचनम् ॥ सर्वे भवन्तो रामादय· सर्वे यूयम् । इहैवायोध्यायामेव । नित्योत्सवा अविच्छिन्नानन्दजनकव्यापारा । वयं चाहं चतुर्मुखो महेन्द्रो दशरथश्च स्वं स्वं स्थानं कैलासं सत्यलोकं स्वर्गं च ॥ **रामादय इति** ।

रामादयः—किमितःपरं प्रियमस्ति ।

हन्तव्या जगदातङ्कहेतवो राक्षसा हताः ।
प्रजापालनदीक्षा च प्रविष्टा शाश्वती मया ॥ २० ॥

तथापीदमस्तु—

(भरतवाक्यम् ।)

साहित्योदयसंभृतो विजयते संभूय सारस्वतः
सारो यत्र समन्ततः सहृदयैः संभावनीयोदयः ।
सम्यग्भावितसंविधानतरलः सोऽयं सुधासुन्दरः
सदर्भो विदुषाममन्दहृदयानन्दाय संदायताम्* ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविश्रीभवभूतिविरचिते महावीरचरिते सप्तमोऽङ्कः ।

आदिशब्देन वसिष्ठविश्वामित्रादीनां संग्रहः । यथोचितं गुरुशिष्यभावाद्यनुरूप यथा तथा । किं ते भूयः प्रियमुपहरामि । पुनः किं तव प्रियं करवाणीत्यर्थः ॥ इतःपर पञ्चमाणादन्यत् । **हन्तव्या इति** । जगतामातङ्कहेतवो भयंकरा अतएव हन्तव्या आवश्यकहननकर्मीभूता राक्षसा हताः । किंच शाश्वती चिरकालस्थायिनी प्रजापालनदीक्षा च यथा प्रविष्टेति यत् । इत परं प्रियमस्तीति सबन्धः । अत्र कार्यार्थोपसंहृतिरूप उपसंहारो नाम सध्यङ्गमुक्तम् ॥ २० ॥ भरतस्य नाट्याचार्यस्य वाक्यं वचनम् । **साहित्येति** । यत्र महावीरचरिताख्ये सदर्भे साहित्यस्य समुचितपदरचनाया उदयेनाविर्भावेन सभृतः सपादितः, सहृदयैः काव्यकलाकौशलयुक्तानसूयहृदययुक्तैः पुरुषैः । समन्ततः सभावनीयः पूजनीय उदय आविर्भावो यस्य स तथोक्तः, सारस्वतः सरस्वतीसबन्धी सार उत्कृष्टांश सभूय मिलित्वा विजयते सर्वोत्कर्षेण वर्तते । तथाविधः सम्यग्भावितेन निष्पादितेन सविधानेनेतिवृत्तसघटनेन तरलो विलसितः । यद्वा सविधानमेव तरलो मध्यस्थमणिर्यस्मिन्स तथोक्तः । रूपकाणां मिथो भेदकेषु रसवस्तुनायकेषु वस्तुशब्दितस्य प्रख्यातोत्पाद्यमिश्रभेदभिन्नस्येतिवृत्तांशस्य मध्ये मिश्रस्य चारुतातिशयावहत्वात्तरलत्वरूपणम् । सुधावदमृतवत्सुन्दरो रमणीयः । 'मृतसजीवनं रामवृत्तान्त' इत्युक्तरीत्या सुधावन्मृतसजीवनोऽयं सदर्भो महावीरचरिताख्यो

---


* अस्मिन्नाटके वालिप्रकरणे 'दौरात्म्यादरिमि' (१९३ पृष्ठे पञ्चमाङ्के ४६ श्लोक) इति श्लोकपर्यन्तेन ग्रन्थसदर्भेण भवभूतिना त्रिभागपरिमिता कथा विरचिता । ततः 'अवश्यं च श्रेयस्विना मया भवितव्यम्' (१९४ पृष्ठे) इति वालिवाक्यादारभ्य भरतवाक्यपर्यन्तेन ग्रन्थसंदर्भेण सुब्रह्मण्यकविना कृत्स्नोऽपि कथाशेषः पूरितः ।

गिरा गुम्फो विदुषा वेदनशीलाना पण्डितानाममन्दहृदयानन्दायानल्पमन सुखाय सदायता सम्यक्शोधितो भवतु । 'दैप् शोधने' इत्यस्मात्कर्मकर्तरि लकारः । अघुत्वादीत्वं न । 'सतायताम्' इति च पाठ । अविच्छेदो भवतु । पूर्ववल्लकार । 'तनोतेर्यकि' इत्यात्वम् । अत्र शुभशसनरूपप्रशस्तिर्नाम सध्यङ्गमुक्तम् ॥ २१ ॥ एवं साङ्ग नाटकं वृत्तम् ॥

शुद्धगुणलब्धरूपा सत्पात्रस्नेहसभृतालोका ।
दीपकलिकेव सुदृशा भावप्रद्योतिनी रुचिं दिशतु ॥
जितामित्रो मित्रप्रियकृदनुरज्यद्भिरनुजै.
समं सीतादेव्या सह मुदमसीमामनुभवन् ।
कृपातुङ्गैरस्माननुकलमपाङ्गैरभिमृश-
न्सुवोक्तिप्रेमाणं कलयतु मदुक्तौ रघुवरः ॥
यो महीसारवास्तव्यो वाधूलो वीरराघव. ।
स महावीरचरिते सप्तमाङ्क व्यवीवरत् ॥

इत्यणाप्पङ्गार्यनामधेयेन वाधूलवीरराघवेण विरचितायां भावप्रद्योतिनीसमाख्यायां महावीरचरितव्याख्यायां सप्तमोऽङ्कः ॥

समाप्तमिदं नाटकम् ।



श्रीभवभूतिकविप्रणीतमहावीरचरितस्य सर्वतः प्रचलितः पाठः ।

दौरात्म्यादरिभिर्निजार्जवशुचौ मायाविभिर्वञ्चिते
धर्मात्मन्यतिथौ निजानपि जगत्पूज्ये गृहानागते ।
एतस्मिन्नुचितं न नाम विहितं वाचापि नोक्तं प्रियं
धिक्पापेन मया रिपाविव कथं बद्धो वधायोद्यमः ॥ ४६ ॥

कथितं च संप्रत्येवमेव चारकैः—'विभीषणेन सुग्रीवस्याप्यनाख्याय रामान्तिकं श्रमणा प्रेषिता । प्रतिपन्नलङ्काधिपत्यश्च तस्य दाशरथिरस्मिन्मतङ्गाश्रमोपकण्ठे वर्तते' इति । भवतु । अवतरामि । (तथा नाटयति।) कः कोऽत्र भोः ।

विजितपरशुरामं सत्यधर्माभिरामं
गुणनिधिमभिरामं द्रष्टुमभ्यागतोऽस्मि ।
भवति च फलवत्ता चक्षुषस्तत्र दृष्टे
भवति च रमणीयो दर्पकण्डूनिकाषः ॥ ४७ ॥

रामः—वत्स सौमित्रे, मामिहस्थमावेदय महाभागाय ।

लक्ष्मणः—(उपसृत्य ।) अयमार्यस्तिष्ठति । तदुपसर्पतु महाभागः ।

वाली—अपि त्वं पुनरसौ लक्ष्मणः ।

लक्ष्मणः—अथ किम् ।

(उभावुपसर्पतः ।)

वाली—(स्वगतम् ।)

स एष रामश्चरिताभिरामो
धर्मैकवीरः पुरुषप्रकाण्डः ।
स्वान्येव पूर्वाणि परैश्चरित्रै-
र्योऽत्यद्भुतैरप्रतिमोऽतिशेते ॥ ४८ ॥

(प्रकाशम् ।) राम,

आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं तु ममापि संप्रति कुतस्त्वद्दर्शने चक्षुषः ।
त्वत्सांगत्यसुखस्य नास्मि विषयस्तत्किं वृथा व्याहृतै-
रस्मिन्विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम् ॥ ४९ ॥

रामः—

दिष्ट्या यदद्य दृष्टस्त्वं सत्यमेतच्च युज्यते ।
किं त्वशस्त्रेषु युष्मासु कथं रामोऽस्तु सायुधः ॥ ५० ॥

वाली—(विहस्य ।) भो महाक्षत्रिय, किमित्यननुकम्पनीयानप्येवमस्माननुकम्पसे ।

ज्ञाता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते
संयत्तो भव सत्यमस्ति भवतः सत्यं मनुष्यो भवान् ।
शस्त्रैरव्यवधीयमानविजयाः प्रायो वयं तेषु चे-
द्राहस्ते सुखमाश्वसन्ति गिरयो यैर्वानराः शस्त्रिणः ॥ ५१ ॥

तदितः स्थलीमधितिष्ठाव ।

लक्ष्मणः—आर्य, यथाह महाभागः स्वजातिसमयव्यवस्थिता युद्धधर्मा इति ।

वालिरामौ—(अन्योन्यमुद्दिश्य ।)

कामं त्वया सह श्लाघ्यो वीरगोष्ठीमहोत्सवः ।
किं त्विदानीमतिक्रान्ते त्वय्यवीरा वसुंधरा ॥ ५२ ॥

(परिक्रम्य निष्क्रान्तौ ।)

लक्ष्मणः—कथमास्फालिते धनुषि कुपितः सांक्रन्दनिः । तथा हि ।

गर्जत्पर्जन्यघोरस्तनितमविरतं तिग्मगम्भीरमन्त-
र्गुञ्जन्गुञ्जाभजृम्भाविवृतमुखविशद्विश्वदिक्चक्रवालः ।
सरम्भोत्तम्भतुङ्गस्थितविततततडित्पिङ्गलाङ्गूलकेतु-
र्व्यस्तं विस्तार्य दर्पादपिहितगगनोत्सङ्गमङ्गं धुनोति ॥ ५३ ॥

(नेपथ्ये ।)

विभीषण विभीषण,

आर्यस्य वालिन इव ध्वनिरेष नूनं
तस्यैव नूतनघनस्तनितप्रचण्डः ।
मौर्वीरवश्च कुत एष भयानकः स्या-
द्व्यापारितं किमु हरेण धनुः पिनाकम् ॥ ५४ ॥

लक्ष्मणः—आर्ये, अयं नु कः ।

श्रमणा—स एष खलु विभीषणसखः सुग्रीवः सविमर्शसंरम्भं संप्रहारमनुसरति । सर्वे च यूथपतयो गिरिगह्वरेभ्यः संपतन्ति ।

लक्ष्मणः—तेन हि संप्रति मयाप्यारोपयितव्यं धनुः ।

श्रमणा—एष वालिकायदुन्दुभिकरङ्कसप्ततालगिरिमहीतलान्यवदार्य रामतूणीरमधिशयितः शरः ।

(नेपथ्ये ।)

मद्द्रोहाच्छपथान्प्रसीदतु मतिः पौलस्त्यसुग्रीवयो-
र्हे वीराः कपय. शमोऽस्तु भवतामीश स एवास्मि चेत् ।
रामात्प्राप्तमहार्घ्यवीरमरणस्याशास्तिरेषाद्य मे
योऽहं सूर्यसुत· स एष भवतां योऽयं स वत्सोऽङ्गदः ॥ ५५ ॥

लक्ष्मणः—तदयमनुचराज्ञानियन्त्रणोन्मुक्तवीरसमयसङ्गलसदसह्य-दुःखनिभृतैर्यूथपतिभिरार्येण च सपक्षपातबाष्पेण वीक्ष्यमाण स्वद्रोह-शपथयन्त्रितसशोकविभीषणेन याच्यमानशरीरसौष्ठवः प्रयत्ननिरुद्धनिष्ठुर-प्रहारमर्मच्छेदवेदनावेगः परिष्वङ्गव्याजविधृतसुग्रीवकण्ठपरिघीकृतस्व-कण्ठकनककमलमालागुणः शक्रसूनुरस्यामपि दशायां वीरश्रिया प्रदीप्यते ।

(तत. प्रविशत. सुग्रीवविभीषणौ वाली रामश्च ।)

रामः—

अप्राकृताभिजनवीर्ययशश्चरित्रा-
न्पुण्यश्रियः कुलमहीधरभूरिसारान् ।
एवंविधानपि निपात्य कटुर्विपाकः
सर्वंकष. कषति हा विषमः कृतान्तः ॥ ५६ ॥

वाली—वत्स विभीषण, पश्य पश्य । सुष्ठु शोभते वत्ससुग्रीवस्य वक्षसि सहस्रपुष्करमालागुणः ।

सुग्रीवविभीषणौ—(अपवार्य ।)

अकाण्डशुष्काशनिपातरौद्रः
क एष धातुर्विषमो विवर्तः ।
असाभिरार्यः शपथैर्निरुद्धैः
कथं विलङ्घ्यः कथमासितव्यम् ॥ ५७ ॥

वाली—रामभद्र रामभद्र,

रामः—आर्य, अयमस्मि ।

वाली—

यदासक्तं दैवादनभिमतसख्येऽपि हि जने
मया सख्यं प्राणैरनृण इव तस्याहमधुना ।
यदन्यत्साधूनां तव च गुणराशेः समुचितं
प्रहाणे प्राणानां तदपि हि यथाशक्ति विदधे ॥ ५८ ॥

(राम सविनयलज्जाशोकस्तिष्ठति ।)

सुग्रीवविभीषणौ—(जनान्तिकम् ।) आर्ये श्रमणे, कथममृतह्रदादिवास्माकं रामदेवादेष दैवविपाकः ।

श्रमणा—माल्यवता किलैवम् । (इत्युभयो कर्णे कथयति ।)

वाली—वत्स सुग्रीव,

(सुग्रीवो बाष्पस्तम्भं नाटयति ।)

वाली—ननु सुग्रीव, कथमाः प्रातिकूलिकः संवृत्तः ।

सुग्रीवः—(सकरुणम् ।) आर्य आर्य, प्रसीद । आज्ञापय ।

वाली—वत्स, कथय वस्तवास्मि ।

सुग्रीवः—गुरुः स्वामी च ।

वाली—त्वं तु मम कः ।

सुग्रीवः—शिष्यः प्रेष्यश्च ।

वाली—वत्स, कथय क आवयोरन्योन्यधर्मः ।

सुग्रीवः—वशित्वं वो वश्यता च मम ।

वाली—(तं हस्ते गृहीत्वा ।) तर्हि दत्तोऽसि रामाय । रामभद्र, नन्वेष गृह्यताम् ।

रामसुग्रीवौ—को हि पूज्यस्य गुरोर्वचनं न बहु मन्यते ।

विभीषणः—अहो विस्तरस्थानेऽपि धर्मोपपत्तिविशुद्धः संक्षेपः ।

वाली—वत्स सुग्रीव, अथ ब्रह्मपुत्रादाचार्याज्जाम्बवतोऽधीतधर्मपारायणवचनेन कीदृशस्त्वया मैत्रीधर्म आगमितः ।

सुग्रीवः—

प्राणैरपि हिता वृत्तिरद्रोहो व्याजवर्जनम् ।
आत्मनीव प्रियाधानमेतन्मैत्रीमहाव्रतम् ॥ ५९ ॥

वाली—रामभद्र, तवापि भगवतः सहस्रकिरणान्वयपुरोहिताद्वसिष्ठादेष एव हि सम्प्रदायः ।

रामः—आर्य, अथ किम् ।

वाली—तदनेन मैत्रीधर्मेण भवद्भ्यामन्योन्यस्य वर्तितव्यम् । मदनुरोधात्क्रियतामुपनिबन्धोऽग्निसाक्षिकश्च । समयो नातिवर्तते । सन्निहित एवायं मतङ्गयज्ञाग्निः ।

रामसुग्रीवौ—(अन्योन्यहस्तग्राहम् ।)

पुण्ये मतङ्गयज्ञाग्नौ सख्यं निर्वृत्तमावयोः ।
ममेव हृदयं तेऽस्तु तवेव हृदयं च मे ॥ ६० ॥

वाली—रामभद्र, अयं तु वत्सो विभीषणस्त्वया प्रतिश्रुतलङ्काधिराज्य एव पुरतः श्रमणायाः ।

विभीषणः—(सलज्जाशङ्कम् ।) कथं ज्ञातोऽस्मि ।

श्रमणालक्ष्मणौ—अहो चारचक्षुष्मत्ता ।

रामः—अथ किम् ।

विभीषणः—तर्हि प्रसन्न देवेन । (इति प्रणमति ।)

सुग्रीवः—मयाप्यविदितः श्रमणावृत्तान्तः फलितस्त्विति तर्कितार्थोऽस्मि ।

रामः—हे प्रियसुहृदौ महाराजसुग्रीवविभिषणौ, एष वामिदानीं सौमित्रिः ।

लक्ष्मणः—आर्यौ, लक्ष्मणोऽभिवादयते ।

उभौ—एह्येहि वत्स । (इत्यालिङ्गत ।)

श्रमणा—अतिगम्भीरः सरसः स्वीकारः ।

वाली—वत्स विभीषण, तवाप्यलमिदानीं स्वार्थशालीनतया । एवं परिणाममेवैतद्वस्तु । रावणो हि नास्त्येवेति मद्वृत्तान्तेनैव व्याख्यातम् । अपत्यस्नेहसाम्येऽपि पिण्डोपजीविनो विशेषतो रावणहितोपस्थानं धर्मः । स्वयं कथयितुं सम्यग्विभीषणस्य प्रेयसा योग इति मातामहस्य युक्तम् । महान्त एव हि तादृशानामगाधसत्त्वानामविनयपरिस्पन्दितं जानन्ति । प्रचलन्ति हि मे प्राणाः । तदवसानप्रपातस्थलमुपनयन्तु मां भवन्तः ।

नीलप्रभृतयः—

हा वीर हा मघवनन्दन मन्दराद्रि-
निष्कम्पसार जगदप्रतिमल्ल वीर ।
उद्दर्पदुन्दुभिनिशुम्भपटुप्रचण्ड-
दोर्दण्डमण्डल गतोऽसि हहा हताः स्मः ॥ ६१ ॥

(इति रुदद्भिस्तैर्धार्यमाणः परिक्रम्य ।)

वाली—भो महात्मानः प्लवङ्गमपुंगवाः,
सुग्रीवाङ्गदयोः प्रभुत्वमिह यत्सौजन्यमेतद्धि वो
मत्प्रीत्यैव तु नावधीर्यमनयोर्यद्वो महिम्न क्षमम् ।
प्राप्तः संप्रति रामरावणरणः स्नेहस्य निर्व्यञ्जक-
स्तस्मिन्नञ्जलिरेष शान्तमथवा वीर्येषु व. के वयम् ॥ ६२ ॥

किंच ।

कर्णावर्जितदिग्व्रतङ्गजयुगद्वन्द्वोपमर्दाश्च ते
पुच्छास्फोटदलत्समुद्रविवरैः पातालझम्पाश्च ताः ।
कापेयस्य च पौरुषस्य च तथा प्रेम्णो गरिम्णश्च य-
द्दोष्णामुन्मथितद्विषा सुसदृश तन्मा स्म वो विस्मरत् ॥ ६३ ॥

(इति निष्क्रान्ता सर्वे ।)

इति महावीरचरित आरण्यकं नाम पञ्चमोऽङ्कः ।

षष्ठोऽङ्कः ।

(तत प्रविशति विषण्णो माल्यवान् ।)

माल्यवान्—(सचिन्तम् ।) अहह, रक्षःपतेर्दुर्विनयविटपिकोरकाः परितः प्रकीर्णा इव ।

बीज यस्य विदेहराजतनयायाश्चाङ्कुरोऽपि स्वसु-
र्यात्रा तौ परिवञ्चितुं किसलय मारीचमायाविधिः ।
शाखाजालमयोनिजापहरणं तस्य स्फुटं कोरकाः
कोशाधीशवधोऽनुजस्य गमनं सख्यं तयोस्तेन च ॥ १ ॥

अयमचिरादेव फलोन्मुखोऽपि भवितेति मन्ये । यतो वृद्धबुद्धिरनागतं पश्यति । (नि श्वस्य ।) अहो वामता भागधेयानाम् ।

व्यसनेऽस्मिन्मन्त्रशक्त्या यद्यत्प्रतिकृतं मया ।
अलसस्य यथा कार्यं तत्तत्प्रच्युतमात्मना ॥ २ ॥

(सानुतापम् ।) साचिव्य नाम महते सतापाय ।

यत्किंचिद्दुर्मदा स्वैरमाद्रियन्ते निरर्गलम् ।
तत्र तत्र प्रतीकारश्चिन्त्यो वक्रे विधावपि ॥ ३ ॥

अहो दुरात्मनः क्षत्रियवटो सर्वातिशायि चरितम् । यत्तथाविधशौर्यो-
प्माणं कपिचक्रवर्तिन शैरः संयमयता कि नाम न विहितम् । (स्मरणं नाटयित्वा ।) उक्त च किष्किन्धातः प्रतिनिवृत्तेन चारकेण । यत्सीतामन्वेष्टुमनुदिशमभिदुद्रुवु· कपिपुंगवा इति ।

(नेपथ्ये ।)

भ्रान्तीः सप्ताधिकानां प्रविदधदरुणैरर्चिषां चक्रवालै-
र्द्रोग्वीराणामलक्ष्यप्रसृतिरतिसमुत्तप्तरौक्मालयेषु ।
अर्धभ्रष्टापसर्पद्रजनिचरभटोद्गाढकल्पान्तशङ्कं
लङ्कां प्रौढो हुताश सह परिदलितोऽब्धेस्त्रिकूटेन लीढे ॥ ४ ॥

(प्रविश्य पटाक्षेपेण सभ्रान्ता ।)

त्रिजटा—परित्ताअदु[1] परित्ताअदु कणिट्ठमादामहो । (इति सोरस्ताडं पतति ।)

---

१ परित्रायतां परित्रायता कनिष्ठमातामह· ।

माल्यवान्—वत्से, अलं कातरतया । किमिदमुच्चैरत्याहितम् ।

त्रिजटा—(उत्थाय ।) कणिट्ठमादामह[1], किं कहेमि मन्दभाइणी । एसो क्खु कोवि दुट्ठवाणरो सअलं विडज्जिअ णअरं खणमेत्तएण तीरकक्खणहरिणीक्खेवक्खित्तविविहरक्खसलोओ अक्खेण क्खुं कुमालएण अणुवन्धिज्जमाणो तस्मि कदन्तलीलं कदुअ झत्ति णिक्कन्तो ।

माल्यवान्—(सखेदम् ।) किं नाम दग्धं नगरम् । हतोऽक्ष· कुमार· । अपि को नामायं कपिः स्यात् । (सस्मरणम् ।) उक्तं च चारकेण हनूमानवाची दिशमिति । अहह ।

तूलदाहं पुरं लङ्का दहतैव हनूमता ।
अपि लङ्कापतेस्तीव्रः प्रतापो निरवाप्यत ॥ ५ ॥

वत्से, अपि तेन सीताप्रवृत्तिरुपलब्धा ।

त्रिजटा—कणिट्ठमादामह[2], पुरदो ज्जेव कोवि मक्कडपरमाणू तीए सम मन्तअन्तो दिट्ठो । तीए वि उम्मोचिअ केसाहरणं अहिण्णाणं त्ति तस्स हत्थे समप्पिदम् । एत्तिअ जाणामि ।

माल्यवान्—कि न पर्याप्तम् । (साशङ्कम् ।) एतेनैव कपिपरमाणुना तावदेवमनुष्ठितम् । एव पर शता· कोट्य· श्रूयन्ते सप्रति सुग्रीवभुजबलपरिपालिते कपिसर्गे ।

त्रिजटा—(सवितर्कम् ।) कहं तारिसी सुउमारदंसणा वि सुसिणिद्धव्वाहारा वि माणुसी विसीदा अह्माणं रक्ससाणं वि रक्खसी जादा[3] ।

---

१. कनिष्ठमातामह, किं कथयामि मन्दभागिनी । एष खलु कोऽपि दुष्टवानरः सकलं विदह्य नगरं क्षणमात्रेण तीरकक्षणहरिणीक्षेपविक्षिप्तविविधराक्षसलोकोऽक्षेण खलु कुमारकेणानुबध्यमानस्तस्मिन्कृतान्तलीला कृत्वा झटिति निष्क्रान्त· ।

२. कनिष्ठमातामह, पुरत एव कोऽपि मर्कटपरमाणुस्तया समं मन्त्रयमाणो दृष्टः । तयाप्युन्मुच्य केशाभरणमभिज्ञानमिति तस्य हस्ते समर्पितम् । एतावज्जानामि ।

३. कथं तादृशी सुकुमारदर्शनापि सुस्निग्धव्याहारापि मानुष्यपि सीतास्माकं राक्षसानामतिराक्षसी जाता ।

माल्यवान्—वत्से, युज्यतेऽपि ।

पतिव्रतामयं ज्योतिः शान्तं दीपं च घुष्यते ।

(विमृश्य ।) अथवा । किं नाम सा वराकी ।

दुष्कर्मणा परीपाक· स्वयमेवैष दीप्यते ॥ ६ ॥

त्रिजटा—[1]कणिट्ठमादामह, पढमं क्खु दण्डकारण्णपरेन्तपरिट्ठिद-विविहमहीहरप्पदेसेसु णिवासो ज्जेव अह्माण रक्खसाणम् । विहारा क्खु णिखिलम्मि जम्बुद्दीवे । सपदं क्खु इह णअरे वि अक्खमो णिवासो । का गइ । को पडिआरो ।

माल्यवान्—वत्से, किमेवमतिकातरासि । पश्य ।

दुर्गोऽयं चित्रकूटस्तदुपरि नगरं सप्तधातुप्रकार-
प्राकारं दुस्तरैषा निरवधिपरिखाप्यब्धिरभ्रंकषोर्मिः ।

(विमृश्य ।) अथवा किमनेन ।

दोर्दण्डा एव दृप्यद्रिपुदलनमहासत्रदीक्षाः प्रतीक्ष्या
रक्षोनाथस्य—

(वामाक्षिस्पन्दन सूचयन्, सव्यथम् ।)

किं नो विधिरिह वचनेऽप्यक्षमो दुर्विपाकः ॥ ७ ॥

वत्से, वत्सस्य कुम्भकर्णस्य निद्रागमसीम्नः कियदवशिष्टम् ।

त्रिजटा—[2]कणिट्ठमादामह, अस्सिं जेव्व कसणचउद्दसीदिअहे चउट्ठमासो परिसमत्तो ।

माल्यवान्—कथमद्यापि विप्रकृष्टतमः किल प्रबोधकालः । (सस्मरणम् ।) विमृश्यमाने तु दिष्ट्या कनिष्ठवत्स एव दूरदर्शी यस्याविमृश्यकारितापि शुभोदर्का सुबहुशोऽप्यभिसधीयमाने कुलप्रतिष्ठातन्तुं तमेवोत्पश्यामि ।

---

१. कनिष्ठमातामह, प्रथमं खलु दण्डकारण्यपर्यन्तपरिस्थितविविधमहीधर-प्रदेशेषु निवास एवास्माकं राक्षसानाम् । विहारा खलु निखिले जम्बुद्वीपे । साप्रत खल्विह नगरेऽप्यक्षमो निवास । का गति· । क प्रतीकार· ।

२ कनिष्ठमातामह, अस्मिन्नेव कृष्णचतुर्दशीदिवसे चतुर्थमासः परिसमाप्तः ।

त्रिजटा—(ससंभ्रमम् ।) [१]कणिट्ठमादामह, हद्धी हद्धी । सन्तं पावम् । पडिहदममङ्गलम् ।

माल्यवान्—किमिति ।

त्रिजटा—[२]कणिट्ठमादामहस्स अअं णअवअणोवण्णासो अण्णस्सिं जेव्व कस्सि अमङ्गले जेव्व विस्सन्तो ।

माल्यवान्—वत्से, नैतदनुसंधायोक्तम् । एवं किलावसीयते । यतः ।

न कुत्राप्यन्यत्र प्रबलभवितव्यादयमहो
विशुद्धैवोत्पत्त्या पतति न च तत्पापधिषणा ।
यथा खैरं भ्राम्यन्निरवधि वियत्यस्तशिखरं
व्युदस्यायं भास्वांस्तदनुगतघस्रार्चिरपि सा ॥ ८ ॥

तदत्र प्रतीकारेषु केवलं मतिसंधानजृम्भितमवशिष्यते । कृतमनेन । वत्से, अवैषि किमुपक्रमस्तावद्देवो दशकंधरः ।

त्रिजटा—[३]कणिट्ठमादामह, सामी क्खु संपदं सव्वतोभद्दं णाम अट्टालअं आरुहिअ तीए रक्खसकुलकालरत्तीए अधिट्ठिदं असोअवणिअं जेव्व पुलोअन्तो चिट्ठदि । अण्णं अ इहिमुहं पउत्ताए एसा पउत्ती सुदा । एदं णअरवुत्तन्तं अणुहविअ किवि दुम्मणाअन्ती सामिणी पडिवोहेदुं तहि जेव्व पत्थिदेत्ति ।

माल्यवान्—वत्से, स्त्रीत्वेऽपि वरं सा खलु देवी मन्दोदरी यन्मतिः प्रतिबोधनायोत्ताम्यति । न पुनर्देवो यः प्रतिबोधितोऽद्यापि न बुध्यते । तदेहि तावत् । अभ्यन्तरं प्रविश्य प्रणिधिकार्यं विचारयामः ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

---

१ कनिष्ठमातामह, हा धिक् हा धिक् । शान्तं पापम् । प्रतिहतममङ्गलम् ।

२. कनिष्ठमातामहस्यायं नयवचनोपन्यासोऽन्यस्मिन्नेव कस्मिन्नमङ्गल एव विश्रान्तः ।

३. कनिष्ठमातामह, स्वामी खलु साम्प्रतं सर्वतोभद्रं नामाट्टालकमारुह्य तया राक्षसकुलकालरात्र्याधिष्ठितामशोकवनिकामेव विलोकयंस्तिष्ठति । अन्यच्च इतोमुखं प्रवृत्तयैषा प्रवृत्ति श्रुता । एतन्नगरवृत्तान्तमनुभूय किमपि दुर्मनायमाना स्वामिनी प्रबोधयितुं तत्रैव प्रस्थितेति ।

(ततः प्रविशति सोत्कण्ठो रावणः ।)

रावणः—(सीता विभाव्य ।)

मुखं यदि किमिन्दुना यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी भ्रुवौ ।
किमात्मभवधन्वना यदि सुसंयताः कुन्तलाः
किमम्बुवहडम्बरैर्यदि तनूरियं किं श्रिया ॥ ९ ॥

(सस्मरणोल्लासम् ।) अहो, हलमुखविनिर्भिन्नविश्वंभराविर्भूतयोषिद्रत्नमनुभवतो मम मनोरथेन चिराय फलितम् । (विमृश्य ।) अनुकूलस्य विधेः किलायं विश्वासः । (सगर्वम् ।) अथवा क एष विधिरपि ।

पिष्ट्वा ब्रह्माण्डमस्मादथ भुवनविभागादुदस्यापि किंचि-
द्ब्रह्माणं चातिकृत्याप्रतिमरुचितरं स्व प्रतापं यशश्च ।
सूर्येन्दू सविधाय स्वयमधिकतरं निर्वृतः स्यामहं चे-
न्न स्यादालस्यदोषः सकरुणमथवा कोऽनुकम्प्येषु कोपः ॥ १० ॥

(तत प्रविशति मन्दोदरी चेटी च ।)

चेटी—[1]इदो भट्टिणी । एदं अ राअअसोवाणमग्गदुआरअम् । ता आरोअदु भट्टिणी ।

मन्दोदरी—(सोपानारोहणं नाटयित्वा । रावणं निरूप्य ।) [2]कहं एसो महाराअदसकन्धरो उवट्ठिदो वट्टदि । (निर्वर्ण्य ।) कहं असोअवणिआसंमुहं पुलोएदि । (सखेदम् ।) कहं ईरिसे वि रिउवक्खाहिओए सवुत्ते राअकज्जाणवेक्खो लक्खीअदि महाराअदसकन्धरो त्ति । (उपसृत्य ।) जेदु जेदु महाराअदसकन्धरो ।

रावणः—(आकारसवरणं नाटयित्वा ।) कथं मन्दोदरी । (इति पार्श्वे समुपवेशयति ।)

मन्दोदरी—(तथा कृत्वा ।) [3]महाराअ, किं एत्थ चिन्तिदम् ।

---

१. इतो भर्त्रि । एतच्च राजतसोपानमार्गद्वारकम् । तदारोहतु भर्त्री ।

२. कथमेष महाराजदशकंधर उपस्थितो वर्तते । कथमशोकवनिकासमुखमवलोकयति । कथमीदृशेऽपि रिपुपक्षाभियोगे सवृत्ते राजकार्यानपेक्षो लक्ष्यते । महाराजदशकंधर इति । जयतु जयतु महाराजदशकन्धरः ।

३. महाराज, किमत्र चिन्तितम् ।

रावणः—कुत्र ।

मन्दोदरी—रिउ[1]वक्खाहिओए ।

रावणः—(सोत्रासम् ।) कथं रिपुस्तत्पक्षस्तदभियोगश्चेत्यश्रुत श्राव्यते देव्या ।

योऽह द्वाभ्या भुजाभ्यां मृधभुवि युगपन्मत्तदिग्दन्तिदन्ता-
न्रुद्वा दोर्भिश्चतुर्भिः सरभसमजितान्दिक्पतीनप्यरौत्सम् ।
दीव्यद्वज्रादिचण्डप्रहरणपतनक्षुण्णवक्षस्त्वचो मे
तस्यापि प्रातिभाव्याद्विपुरिति कलित कोऽप्यपूर्वः प्रमादः ॥११॥

भवतु । तथापि श्रोतव्यम् । देवि, स कः ।

मन्दोदरी—णिखिचलेमुक्कणुगदसुग्गीवाग्गेसरो सहकणिट्ठो दासरही रामो त्ति सुणीअदि ।[2]

रावणः—कि सहानुजस्तापसः । देवि, कि गतेन तेन तैर्वा स ।

मन्दोदरी—मैंहाराअ, समुदाओ क्खु सङ्कीअदी । अवरं अ साअरवेलासु सेणां विणिवेसिअ आहूदो णेण साअरो ण णिग्गदो भवणादो त्ति । तदा तु[3]

(सस्कृतमाश्रित्य ।)

प्रायुङ्क्तास्त्र स किंचिज्जलनिधिकुहरे यन्महिम्ना क्षणार्धा-
दावृत्यावृत्य चक्रभ्रममखिलमभूत्क्काथतः शोणमम्भ· ।
उन्मूर्च्छन्नक्रचक्र झटिति परिदलत्कच्छपौघ प्रमुह्य-
द्भूय. पाथोमनुष्य स्फुटदतुलरवं प्रस्फुटच्छङ्खशुक्ति ॥ १२ ॥

रावणः—(सावज्ञम् ।) कि ततः ।

मन्दोदरी—मैंहाराअ, तदो अ पुङ्खमेत्तपेक्खिज्जमाणतिक्खसर-[4]

---

१ रिपुपक्षाभियोगे ।

२. निखिलवलीमुखचक्रानुगतसुग्रीवाग्रेसर. सहकनिष्ठो दाशरथी राम इति श्रूयते ।

३. महाराज, समुदायः खलु शङ्क्यते । अपरं च सागरवेलासु सेनां विनिवेश्याहूतोऽनेन सागरो न निर्गतो भवनादिति । तदा तु ।

४ महाराज, ततश्च पुङ्खमात्रप्रेक्ष्यमाणतीक्ष्णशरनिकरपक्ष्मलितशरीरेण

णिअरपल्लालिदसरीरेण णिक्कमिअ सलिलादो सवादवडणं अब्भत्थिअ मग्गो उवदिट्ठो । साहसिएण उण तेण साहिज्जवित्ती सुणीअदि ।

रावणः—(सहासम् ।) अस्तु श्रूयते । देवि, कीदृशः ।

मन्दोदरी—[1]महाराअ, वलीमुहसहस्साणीदेहिं महीहरेहि सेदू णिम्मीअदि ।

रावणः—देवि, विप्रलब्धासि केनचित् । अकलितगाम्भीर्यमहिमा किलायं पाथोनाथः ।

जम्बुद्वीपेऽथवान्येषु द्वीपेष्वपि महीधराः ।
यावन्तस्तै· कुक्षिकोणोऽप्यस्य न भ्रियते किल ॥ १३ ॥

अपि च । साहसिकेनेति वदन्त्या देव्या विस्मृतप्रायम् । मत्साहसे तु

उत्पुप्यद्बलधमनिस्फुटप्रसर्प-
त्प्रत्यग्रक्षतजझरीनिवृत्तपाद्यः ।
हर्षाश्रुप्रचुरमधुस्मितस्फुटश्री-
वक्त्राब्जार्चितचरणः शिव· प्रमाणम् ॥ १४ ॥

मन्दोदरी—[2]महाराअ, ओधारेहि कि वि अण्णारिसी रअणा कस्स वि वलीमुहस्स हत्थपुण्णदो । उवरि जेव चिट्ठन्दि ते महीहरा जलम्मि त्ति ।

रावणः—(सधिर कम्पम् ।) इदं तदप्रतीकार्यं मौग्ध्यमबलाना यद्वा-वाणोऽपि प्लवन्त इति । देवि, किं बहुनोक्तेन ।

श्रुतं मे जानाति श्रुतिकविरथाज्ञां सहचरः
स शच्या धैर्यं चाशनिरथ यशोऽदस्त्रिभुवनम् ।
बलं कैलासाद्रिः किमपरमहो साहसमपि
क्षरत्कीलालाम्भःस्नपितचरणः खण्डपरशुः ॥ १५ ॥

निष्क्रम्य सलीलात्सपादपतनमभ्यर्थ्य मार्गं उपदिष्ट । साहसिकेन पुनस्तेन साध्यवृत्तिः श्रूयते ।

१ महाराज, वलीमुखसहस्रानीतैर्महीधरै· सेतुर्निर्मीयते ।

२. महाराज, अवधारय किमप्यन्यादृशी रचना कस्यापि वलीमुखस्य हस्त-पुण्यत. उपर्येव तिष्ठन्ति ते महीधरा जल इति ।

(नेपथ्ये महान्कलकल. ।)

मन्दोदरी—[1]महाराअ, परित्ताहि परित्ताहि । (इति सत्रासमुदीक्षते ।)

रावणः—देवि, अलं शङ्कया ।

(पुनर्नेपथ्ये ।)

भो भो लङ्काद्वाररक्षिणो राक्षसगणाः,
दत्त द्वाराणि तूर्णं सरलतरगुरूण्यश्मसारार्गलानि
क्षिप्यन्ता शस्त्रजातं तदुपरि नयत स्वान्वयांश्चावधत्त ।
रुध्यध्वं निर्विषासूञ्शिशुयुवतिजनान्वीवधांश्चाद्रियध्वं
प्राप्तः सुग्रीवमुख्यप्लवगपरिवृतः सानुजो रामभद्रः ॥ १६ ॥

(नेपथ्यार्धं प्रविष्टा ।)

प्रतीहारी—[2]भट्ट, एसो पडीहारभूमीए चिट्ठदि सेणावई प्पहत्थो विण्णविदुकामो ।

रावणः—कथं सेनापतिः प्रहस्तः । प्रवेशय ।

प्रतीहारी—[3]तधा । (इति निष्क्रान्ता ।)

(ततः प्रविशति प्रहस्त ।)

प्रहस्तः—अहो, मनुष्यपोतस्य तावदत्यूर्जस्वलं चरितम् । तथाहि ।

भीमं गोष्पदवद्विलङ्घ्य परितः कल्लोलमालाकुलं
पाथोनाथमुपेत्य मन्थरतरं लङ्कानिबद्धेक्षणः ।
स्कन्धावारमसौ निवेश्य विषमे सौवेलमूर्ध्नि स्वयं
कैश्चिद्वानरपुंगवैः परिवृतोऽध्यास्ते पुरः प्राङ्गणम् ॥ १७ ॥

(पुरो निरूप्य ।) कथमयं लङ्केश्वरः ।

रावणः—भद्र सेनापते, किंहेतुरयं कलकलः ।

प्रहस्तः—(स्वगतम् ।) कथमद्याप्यनभिज्ञ एव देवः । भवतु । कार्यमात्रं विज्ञापयामि । (प्रकाशम् ।)

पुरं निःशेषघटितं कपाटद्वारमावृतम् ।
रक्षा चास्तैर्भक्तिमद्भिः कौणपैः परितः कृता ॥ १८ ॥

---

१ महाराज, परित्रायस्व परित्रायस्व ।

२. भट्ट, एष प्रतीहारभूमौ तिष्ठति सेनापतिः प्रहस्तो विज्ञापयितुकाम. ।

३. तथा ।

रावणः—किमिति ।

प्रहस्तः—(स्वगतम् ।) कथं सैवावस्था । भवतु । (प्रकाशम् ।) देव लङ्केश्वर,

मनुष्यपोतमात्रेण सानुजेन पुरी तव ।
रुध्यते स्म यथासारं वीवधाद्यपि दुर्लभम् ॥ १९ ॥

(प्रविश्य ।)

प्रतीहारी—[1]भट्ट, एसो को वि वलीमुहो रामस्स दूदो त्ति भणिअ पडीहारदेसे चिट्ठदि ।

रावणः—(सार्वज्ञम्) वलीमुख । प्रवेशय ।

प्रतीहारी—[2]तधा । (इति निष्क्रम्याङ्गदेन सह प्रविश्य तं प्रति ।) एसो भट्टो । उपसप्प ।

अङ्गदः—(उपसृत्य ।) जयति जयति परममाहेश्वरो लङ्केश्वरः ।

रावणः—सुग्रीवानुचरो भवान् ।

अङ्गदः—नहि नहि ।

रावणः—तर्हि कस्य ।

अङ्गदः—लङ्केश्वर, श्रूयता योऽहं यदर्थमागतश्च ।

दृप्यद्राक्षसचक्रकाननमहादावानलस्याज्ञया
दूतो दाशरथेस्तदीयवचसा त्वामागतः शासितुम् ।
सीतां मुञ्च भजावरोधनसुहृद्दायादपुत्रान्वितः
सौमित्रेश्चरणौ न चेत्तदिषुभि. शासिष्यसे दुर्मदः ॥ २० ॥

रावणः—(सहासम्।) वलीमुखोऽपि वाचाटः । किं वक्तव्यम् ।

अङ्गदः—अहं यत्किंचित्स्याम् । त्वं तु सिद्धान्तमेवावधारय ।

तत्पादाब्जनखं किं वा तत्तीक्ष्णेषुमुखं नताः ।
स्प्रष्टारस्तेऽद्य मूर्धानस्तयोरभिमतं वद ॥ २१ ॥

रावणः—(सक्रोधम्।) क. कोऽत्र भो. । यत्किंचिद्वादिनोऽस्य मुखं संस्कुर्यात् ।

---

१. भट्ट, एष कोऽपि वलीमुखो रामस्य दूत इति भणित्वा प्रतीहारदेशे तिष्ठति ।

२. तथा । एष भर्ता । उपसर्प ।

प्रहस्तः—देव, दूतः किलायम् । किमत्र क्रोधेन ।

रावणः—एतन्मुखसंस्कार एव तपस्विनः प्रत्युत्तरीकरणम् ।

अङ्गदः—(उद्रोमकूपस्फुरणमभिनीय ।)

यथासंख्यं तीक्ष्णक्रकचविषमक्रूरनखर-
प्रगल्भव्यापारप्रमथितशिरोबन्धशिथिलैः ।
शिरोभिस्ते दिग्भ्यो बलिमनुपहृत्यैव किमहं
निवर्ते यत्स्यां चेन्न रघुपतिदौत्येन परवान् ॥ २२ ॥

(इत्याकृष्य निष्क्रान्त ।)

रावणः—(निरूप्य ।) अहो, जातिसुलभं चापलमप्रतीकार्यम् ।

प्रहस्तः—देव, निदेशाक्षरमालिकापरिग्रहायोत्कण्ठते हृदयम् ।

रावणः—किमत्रापि प्रष्टव्यो निदेशः ।

त्रोट्यन्तामभितोऽर्गलानि भुवनप्रख्यातसारोद्धतैः
पाट्यन्तां परितो रणानि च परव्याक्षेपिभी राक्षसैः ।
मथ्यन्ता रिपुघस्मरप्रहरण विक्षोभ्य भङ्क्त्वा भुजाः
खण्ड्यन्ता च मुहुर्विवल्गनवृथोत्थानोत्कटा मर्कटाः ॥ २३ ॥

प्रहस्तः—यदाज्ञापयति महाराजः । (इति निष्क्रान्त ।)

(नेपथ्ये महान्कलकल· ।)

(सर्वे ससम्भ्रममाकर्णयन्ति ।)

(पुनर्नेपथ्ये ।)

वध्यन्तेऽस्त्रपपुङ्गवाः प्रतिभयाभोगै प्लवङ्गाधिपै-
र्बध्यन्ते च वितर्दिकाः प्रतिदिशं कृत्तै रदोमूर्धभिः ।
छिद्यन्ते च बहिः प्रपित्सव इमे मध्ये क्रुधान्धाः क्षणा-
द्विद्यन्ते पुरगोपुरा· प्रतिदिशं क्षिप्तैश्च गण्डोपलैः ॥ २४ ॥

रावणः—(ऊर्ध्वमवलोक्य सक्रोधमुत्प्रेक्ष्य च ।) कथमेते तपस्विपक्षपातादनात्मज्ञा वासवपुरःसरा दिवौकसोऽपि मत्सरिणो विक्षुभ्यन्ते । तद्देवि, त्वमभ्यन्तरे प्रविश । अहमपि तावत्

कैश्चिद्दोर्भिः प्रमत्तान्प्लवगपरिवृढान्दिक्षु विक्षिप्य दक्षै-
रन्यै. पिष्ट्वापि युद्धाभिनयविधिनटौ तौ तपस्विप्ररोहौ ।

शिष्टैः कृष्ट्वा स्वचेत प्रतिफलितवृथारन्ध्रमात्रप्रविष्टा-
न्दुष्टांस्तैर्विष्टपानप्यपगतकरुणस्तैर्बिभर्मि स्वकाराम् ॥ २५ ॥

(इति विकटं परिक्रम्य निष्क्रान्त. ।)

(तत प्रविशति रथेन सपरिवारो वासव सूतश्च मातलि ।)

मातलिः—देव दिवस्पते, यथा तावदधिलङ्कमेषः

संवर्तप्रकटविवर्तसप्तपाथो-
नाथोर्मिव्यतिकरविभ्रमप्रचण्ड. ।
निर्घोषः स्फुरति भृशं पर सहस्र-
व्यावल्गत्प्रबलगतागतास्त्रपाणाम् ॥ २६ ॥

तथा तर्कये युयुत्सया निर्यियासति नक्तंचरचक्रवर्तीति ।

वासवः—सूत, पश्य पश्य ।

दृढतरमभियोग वीक्ष्य रक्षोविनेता
सह तनुजसगर्भप्रेष्यरक्षःसहस्रै ।
सरभसमरराणि द्रागपावृत्य विद्रा-
वितनिखिलवनौका निर्गतोऽय नगर्या. ॥ २७ ॥

(शब्दश्रवणं नाटयित्वा ।) आः, क एष कौबेर्याः ककुभः क्वणत्कनककिङ्किणीजालमालिना विमानेन सरभसमित एवाभ्येति ।

सूतः—(निर्वर्ण्य ।) देव, भवतैव गन्धर्वराज्याधिपत्याभिषेककृतमहाप्रसादश्चित्ररथ. ।

(ततः प्रविशति विमानाधिरूढश्चित्ररथ ।)

चित्ररथः—जयति जयति देवराज ।

वासवः—गन्धर्वराज, समरदिदृक्षानिर्भरं किं चेत. ।

चित्ररथः—तदप्यन्यदपि ।

वासवः—किमन्यत् ।

चित्ररथः—अलकेश्वरनिदेशः ।

वासवः—कीदृशः ।

चित्ररथः—

दुर्बाधो जनिदिवसान्मम प्रवृद्धः
कोऽप्याधिः प्रबलतमोऽथवा त्रिलोक्याः ।

तस्येदं निधनदिनं विधेर्विलासा-
त्कल्याणी परिणतिरस्तु वान्यथा वा ॥ २८ ॥

तदवगन्तुमहं प्रहित. ।

वासवः—सकुल्यानामप्येष मनोरथः ।

चित्ररथः—कि चित्र सहजाः किल ते मिथः शत्रवः । कृत्रिमतापि निधिपुष्पकादिहरणवृत्तेर्दुर्वृत्तस्य सुप्रथिता । अथवा ।

यावत्त्रिलोक्या किल जन्तुजातं तत्सर्वमस्योद्धतदुश्चरित्रैः ।
कदर्थितं श्रीरघुनन्दनस्य प्रीत्या विधत्ते विजयप्रतीक्षाम् ॥ २९ ॥

वासवः—(निरूप्य ।) गन्धर्वराज, यदिदमधित्यकातः सुवेलाद्रेरकाण्ड एव प्रबलकिलिकिलाकोलाहलमुखरितहरिन्मुखं वलीमुखचक्रमक्रममेवोच्चलितम्, तथा मन्ये पतितमेव प्रहरणैरिति ।

चित्ररथः—देवराज, पश्य, पश्य ।

अयं रक्षोनाथः क्षितिधरशिरोबन्धुरतरे
रथे तिष्ठन्प्रष्ठ. प्रधनरसनिष्णातमनसाम् ।
मुहुर्जीवाघोषैर्बधिरयति दिक्प्रान्तशिखरि-
प्रतिध्वानाध्मातैर्गगनविवराभोगमभितः ॥ ३० ॥

वासवः—गन्धर्वराज, न तुलाधृतस्तावदनयोर्वीरसमयोचितः परिकरः । (सावेगम् ।) सूत सूत, सांग्रामिक मे रथमुपहर रामभद्राय । अहमपि गन्धर्वराजाधिष्ठितं विमानमेवाधितिष्ठामि । (तथा करोति ।)

सूतः—यथाज्ञापयति देवराजः । (इति निष्क्रान्त ।)

चित्ररथः—देवराज, कथमतिसधेयं तुमुलम् । तथा हि ।

रक्षोभिर्विपिनौकसां परिवृढैश्चारादपास्तक्रमं
मुष्टीमुष्टि कचाकचि प्रहरणप्रक्षेपमूढात्मभिः ।
प्रारब्धं रणकर्म दुर्धरमिथोनिष्पेषशीर्यद्वपु-
र्निष्ठ्यूतास्रझरीभिरेव सरणिर्दुःसचराभूद्यथा ॥ ३१ ॥

अपि च ।

वीराणां रुण्डतुण्डप्रविघटनपटुस्फारदोर्दण्डखण्ड-
व्यापारक्षिप्यमाणप्रतिभटविकटाटोपवर्ष्मप्ररूढः ।

कूटः कोऽप्येष युद्धाजिरभुवि जरठश्चित्रकूटानुकारी
लीयन्ते यत्र शत्रुप्रपतनविवशाः कोटिशः शूरकीटाः ॥ ३२ ॥

वासवः—गन्धर्वराज, इत इतः ।

प्रासप्रोतप्रवीरोल्बणरुधिरपरामृष्टबुक्काजिघत्सा-
धावद्भ्राधिराजाप्रतिमतनुरुहच्छायया वारितोष्णाः ।
विश्राम्यन्ति क्षणार्धं प्रघनपरिसरेष्वेव मुक्ताभियोगा
वीराः शस्त्रप्रहारव्रणभररुधिरोद्गारदिग्धाखिलाङ्गाः ॥ ३३ ॥

इतोऽपि ।

प्रतीक्षन्ते वीरा. प्रतिमुखमुरोभि. सरभसं
विपक्षाणा हेती प्रतिनियतधैर्यानुभवतः ।
विदीर्णत्वग्भारा दलितपिशिताश्छिन्नधमनि-
प्रकाण्डास्थिस्नायुस्फुटतरविलक्ष्यान्त्रनिवहाः ॥ ३४ ॥

चित्ररथः—देवराज, अपूर्वोऽयं रक्षःपतेः संग्रामावतरणसर्गः । तथा हि ।

प्रेक्ष्याः संग्रामसीमन्यनुजशतवृतो मेघनादोऽपि पार्श्वे
वामेऽन्यत्र प्रवीरेष्वतिविषममदोद्बोधित· कुम्भकर्णः ।
कैकस्या बन्धुवर्गोऽप्ययमतिविकटः पृष्ठतस्तिष्ठमानो-
ऽध्यास्ते मध्ये निषण्णो रथशिरसि भृशं विन्ध्यवद्दुर्विगाहः ॥३५॥

वासवः—गन्धर्वराज, एवमभियोगोद्धुरं द्विषन्तमभिवीक्ष्यापि निष्प्रकम्प एव रामभद्रः । अथवोचितमेवैतत् । यतः ।

न कम्पन्ते झञ्झामरुति किल वाति प्रतिदिशं
समुन्मूर्च्छत्सारा: कुलशिखरिण· किंचिदपि ते ।
न मर्यादा तेऽपि प्रतिजहति गाम्भीर्यगरिम-
स्फुरद्ब्रह्माणोऽकलितमहिमानोऽम्बुनिधयः ॥ ३६ ॥

चित्ररथः—देवराज, पश्य पश्य ।

भक्तिप्रह्वं कथमपि यवीयांसमुत्सृज्य चापा-
रोपव्यग्राङ्गुलिकिसलयं मेघनादक्षयाय ।

लक्षीकृत्य प्रधनकुशलं सानुजं राक्षसेन्द्रं
जीवां भूयो रघुपतिवृषा स्पर्शतः संस्करोति ॥ ३७ ॥

कथमेतदतिदुष्करमिव मन्ये । तथा हि ।

आक्रम्यैकैकमेते रजनिचरभटाः कोटिशः शस्त्रवर्षै-
र्भास्वद्वंशप्ररोहं पिदधति परितः सत्क्रियायौगपद्याः ।

अथवा किं नाम दुष्करम् ।

एतावप्युत्प्रभावावकलितमहिमप्राभवौ युद्धभूमा-
विन्धाते शत्रुशस्त्रप्रविदलनफलस्पष्टबाणाभियोगौ ॥ ३८ ॥

(समन्ततोऽवलोक्य ।) अहो, कथमेते वनौकसोऽपि महति सपत्नसंगरे स्वाभिधानयोगमेव ख्यापयन्तः पञ्चषाः केवलं रामभद्रपादमूलमासेवन्ते । तथा हि ।

सुग्रीवः स्यन्दनस्याग्रे सोऽङ्गदः पृष्ठतः पुनः ।
पञ्चषा जाम्बवान्भावी लङ्काधीशोऽपि पार्श्वयोः ॥ ३९ ॥

(विचिन्त्य ।) हनूमान्पुनः कनीयासं काकुत्स्थम् । (सविमर्शम् ।) वरमेत एवोभयथा रामभद्रपादपद्मोपसेविनः । यतस्तावदेतेषाम्

स्वामिभक्तिश्च धैर्यं च व्याख्याते गात्रमक्षतम् ।
रक्षोभियोगस्त्वन्येषां दृश्यते दैन्यमप्यलम् ॥ ४० ॥

वासवः—गन्धर्वराज, मानुषे लोके वात्सल्यं नाम केवलमखिलेन्द्रियवशीकरणचूर्णमुष्टिः । यतः ।

सौमित्रिः कृतहस्तताप्रभृतिभिर्न्यूनो न कैश्चिद्गुणैः
सारेणापि पुनः प्रसिद्धमहिमा शौर्याग्रणी रावणिः ।
इत्थं तुल्यतरे किल व्यतिकरे रामस्य रक्षःप्रभो-
श्चान्योन्यं शरवृष्टिरेव वलते दृष्टिस्तयोर्वत्सला ॥ ४१ ॥

चित्ररथः—देवराज, युक्तमेवैतत् । एवं वात्सल्यमनुरुध्यन्ते किल महात्मानः । (साद्भुतमात्मगतम् ।) पश्यतु देवराजः ।

सौमित्रेर्बाणवज्रैरधिकतरममी मर्मवेधं प्रविद्धा
धावन्तः क्ष्माधरेन्द्रा इव रजनिचराः शेरते युद्धसीम्नि ।

रक्षोनाथोऽपि पुत्रान्कतिचन पतितान्वीक्ष्य रामाभियोगं
संत्याज्यानिष्टशङ्की निपतति तरसा मेघनादोपकण्ठम् ॥ ४२ ॥

तदेतदत्याहितमाशङ्के ।

वासवः—गन्धर्वराज, किमत्र नामात्याहितम् । अपरिच्छेद्यमहिमानः किलैते ककुत्स्थकुलप्ररोहा. । तथा हि ।

पर सहस्रं रजनीचरेन्द्रा
यथास्य वीरस्य किलैकलक्ष्यम् ।
तथा रणेष्वद्भुतवीरगोष्ठी-
भूषायमाणो दशकंधरोऽपि ॥ ४३ ॥

चित्ररथः—देवराज, बहुभिरेकस्याभियोगेऽपि शुभोदर्कतेत्येतदबहुव्यक्तिनिष्ठम् । (सचमत्कारम् ।) इतोऽवधत्ता देवराज· ।

रक्षोनाथे सरभसमितो निर्गते विग्रहेच्छुः
क्षुभ्यत्युच्चै रघुपतिशरै कीलित. कुम्भकर्णः ।
कुम्भोऽप्येता पितुरुपनतां वीक्ष्य वस्थां वपुष्मा-
न्गर्व. किं वा निपतति जवाज्जङ्गमः क्ष्माधरेन्द्र· ॥ ४४ ॥

(साद्भुतम् ।) अहो छिद्रसंचारिता मर्कटजातेः । यतः ।

उद्दिश्याराद्दशरथकुलाङ्कूरमाद्यं पतन्तं
सद्य कुम्भं मृधभुवि कपिः कोऽपि मध्ये रुरोध ।

(सविशेषं निर्वर्ण्य ।) कथं सुग्रीव एव । (सविचिकित्सम् ।)

दो.स्तम्भाभ्यां सरभसमथापीड्य विक्षिप्य भूमौ
क्रान्त्वाप्येनं प्रतिघविवशो माषपेषं पिपेष ॥ ४५ ॥

(साशङ्कम् ।)

एतन्निरीक्ष्य निपपात च कुम्भकर्णः
सुग्रीवमुग्रतरविद्युतिरग्रहीच्च ।
उन्मोच्य सोऽपि निपुणः स्वममुष्य नासां
लज्जां स्वमुश्च युगपत्किल निश्चकर्त ॥ ४६ ॥

वासवः—गन्धर्वराज, इत इतः ।

लघुरघुपतिरेष राक्षसाना-
मधिभुवि किच कुमारमेघनादे ।
किमपि चरितमद्भुतं व्यतानी-
त्सपदि यथा प्रतिघान्धतामधत्त ॥ ४७ ॥

अहह । इदमतिदुष्करं प्रतिसंविधानमापतितमस्य रघुशिशोः । तथा हि ।

यावन्मन्त्रप्रभावादनधिगतगतीन्मेघनादप्रणुन्ना-
न्दुर्भेद्यान्नागपाशान्विहगपरिवृढास्त्रप्रयोगाद्व्यधूनोत् ।
तावद्रक्षोविनेत्रा पुनरतिरभसं मर्मणि क्रोधभूम्ना
गाढं विद्धः शतघ्न्या हनुमति सहसा मोहनिघ्नो न्यपप्तत् ॥४८॥

चित्ररथः—देवराज, अयमत्राद्भुततरो विमर्दः । यदा तु भ्रातुर्मोहमधिगम्य भाविलङ्केश्वरादक्रममेव करुणवीरानुभावभावितचित्तवृत्तिस्तथाविधस्यापि दर्शनोत्सुकः समवरुध्यत परितः कुम्भकर्णप्रमुखया रक्षःपृतनया, तदा पुनरिदमेव प्रत्यकार्षीत् । तथा हि ।

पुरां जेता पूर्वं त्रिपुरविजये यामुदवह-
त्स्थितिं तामेवायं रघुपतिवृषाश्रित्य वपुषा ।
क्षणाद्रक्षोनाथानुजमिषुभिराच्छिद्य कणश-
श्चमूं भस्मीकृत्याप्यनुजमभियात्युत्सुकतमः ॥ ४९ ॥

(निर्वर्ण्य ।) अहो वात्सल्यमहिमा रघुपुंगवस्य । येन पुनर्विषयीकृतमात्रामेवानुजस्यावस्थामभिजानाति स्म । (परितो निरूप्य । सहर्षम् ।) दिष्ट्या स्वस्ति रघुकुलकुमाराभ्यामेताभ्यामुत्पश्यामि । यतस्तावदेतयोरस्मिन्व्यसनमहार्णवे यातुधानाधीशेनापि सपरिवारेण कुम्भकर्णवधात्संभ्रान्तम् । (पुनरेतौ निर्वर्ण्य ।) कथमद्यापि प्रमुग्धावेव । विषमो ध्यानव्यतिकरस्तावदापतितः । यतः ।

बहुच्छलानि रक्षांसि रिपवस्त्ववशः स्वयम् ।
एषावस्थापि कपयः सहायास्तेऽपि विक्लवाः ॥ ५० ॥

तत्किमुपक्रमं दैवमत्रेति न जाने ।

वासवः—गन्धर्वराज, किमेवमाशङ्कसे । पश्य । जीवत्प्रतिबोधितः किलायमचिन्त्यमहिम्नां प्रथमः प्राभञ्जनिः । संप्रति

उत्स्फूर्जद्रोमकूपः प्रलयपरिमिलत्पांशुवर्षानुकारी
किंचिद्भुग्नाग्रपुच्छाप्रतिमविचलनापास्तनक्षत्रचक्रः ।
भूम्नौत्सुक्यानुरूपव्यवसितिरधिक पर्यवष्टभ्य गत्वा
क्वापि प्राज्ञः क्षणार्धात्क्वमपि गिरिमसावाहरन्नाजगाम ॥ ५१ ॥

चित्ररथः—(विभाव्य । सोल्लासम् ।) देवराज, पश्य ।

यथा चन्द्रालोक कुमुदनिवहश्चुम्बकमणिं
दृषत्सारस्तत्त्वामृतमपि भवाम्भोनिधिगतः ।
तथा संभाव्यैतौ हनुमदुपनीतगद्रिमरुतं
झटित्युज्जृम्भेते किमपि गहनो वस्तुमहिमा ॥ ५२ ॥

(दक्षिणतो विभाव्य ।) कथमेष लङ्केश्वरः । कल्पावसाननिर्मर्यादं पाथ इव पाथोनाथस्य राक्षसबलमाकर्षन्पुनरभ्यमित्रमेति । (विमृश्य ।) संप्रति तु धर्मयुद्धसभावनाप्रतिहतबहुतरप्रधानव्यक्तिरावणमेघनाद-शेषमेतद्राक्षसबलमेताभ्यामवगणितमित्येतावप्युभौ न गणयन्ते परः-सहस्रमप्यस्रपकीटाः । (पुनर्लक्ष्मणं निर्वर्ण्य ।) एवं तु

शाणोत्कीर्णो मणिरिव घनाम्भोदमुक्तो विवस्वा-
न्निःकोशोऽसिर्झटिति विगलत्कञ्चुकः पन्नगेन्द्र ।
दीव्यत्युच्चैर्लघुरघुपतिः किंनु वा स्यात्किमन्य-
द्दिव्यौषध्या जयति महिमा कोऽप्यचिन्त्यानुभावः ॥ ५३ ॥

(निरूप्य ।) कथं प्रक्रान्तमेव कपिराक्षसनासीरचरयोर्भटयोः पुनरायोध-नम् । तथा हि ।

शितैर्बाणैरेके मृधभुवि परे तीक्ष्णनखरैः
क्रियासातत्येनाप्यहमहमिकाक्रान्तमनसः ।
मिथो विध्यन्ति स्म प्रबलतमसमर्दविदल-
त्क्षितिक्षोदैः पिष्टातकसुरभिवक्षस्तटभृतः ॥ ५४ ॥

(सविशेषं निश्चित्य ।) तावदन्तरमनयोर्बलयोरधिगम्यमानं प्रातःसंध्यायां यावदन्धतमसारुणालोकयोः । तथा हि ।

प्रतिक्षणमिय रक्षःपृतना क्षीयतेतराम् ।
यथा तथा प्लवङ्गानामनन्तगुणतैधते ॥ ५५ ॥

वासवः—गन्धर्वराज, पुनरितो महत्कदनमुपक्रान्तम् । रक्षोनाथो रघूणां त्वरितमधिभुवा रावणिर्लक्ष्मणेन
द्वन्द्वीभूय प्रहृष्यद्भुजबलमहिमाविष्कृतेष्वासशिक्षौ ।
दिव्यास्त्राणां प्रयोगप्रतिकृतिमुचितां चाप्नवानौ मिथोऽमू
मूर्च्छत्कल्पावसानज्वलनपरिभवं सैन्ययो पर्यदाताम् ॥ ५६ ॥

चित्ररथः—देवराज, दुरवरोधोऽयमनयोर्महावीरयोर्मिथो विमर्दः । तथा हि ।

क्ष्वेडाभिः ककुभः पृषत्कनिकरैर्व्योम द्विधा खण्डितै-
र्देहैर्विद्विषतां धरातलमपि प्रच्छादयन्तौ चिरम् ।
कुर्वातेऽश्रुजलाविलेक्षणपथान्येतावकाण्डोच्चर-
द्रोमाञ्चानि सवेपथून्यपि मुहुर्वर्ष्माणि नः पश्यताम् ॥ ५७ ॥

(सविशेषं विभाव्य ।) कथं प्रत्यक्षानुमानाभ्यामुपलभ्यमानमेकमेव वस्तु विप्रकृष्टान्तरं संपद्यते । तथा हि ।

असाद्रावणवृत्ताद्राघववृत्तं तु दशगुणं वीक्षे ।
अनुमन्येऽनन्तगुणं पार्श्वपतत्कौणपेन्द्रविनिपातैः ॥ ५८ ॥

(परितो निरूप्य । सकुतुकाश्चर्यम् ।)

यावन्तो रजनीचराः प्रहरणोद्भूर्णध्वजाकेतवो
युध्यन्तोऽभिमुखा. स्फुरद्भुजमदाध्माता. पुरो निर्गता. ।
प्रक्षिप्ताशुगजालपक्षपवनाधूते प्रतापानले
चित्र दाशरथे. क्षणाच्छलभता यान्ति स्म सर्वेऽपि ते ॥ ५९ ॥

(सविमर्शम् ।) एवं किलेयं पाञ्चभौतिकी सृष्टिः ।

त्रैलोक्यमप्यपर्याप्तं रक्षसां स्थातुमप्यदः ।
येषां ते केवलं भूमौ विलिल्युः पञ्चता गताः ॥ ६० ॥

वासवः—गन्धर्वराज, पश्य विस्मयनीयविप्रलम्भौ किलामू रामलक्ष्मणौ । यतः ।

एताभ्यां राघवाभ्यां सकुतुकमिषुभिश्छिद्यमानेषु मूर्ध-
स्वेकस्यैकोऽप्यनन्त. किमु सरसगुणो वर्णनीयोऽपरस्य ।

एतत्संपश्यतोरप्यतिचिरमनयोः कोऽप्यचिन्त्यः प्रभावो
यत्रोत्साहो न धैर्यं विरमति न शिरश्छेदतः पत्रिणोऽपि ॥६१॥

(नेपथ्ये ।)

भो भो रामभद्र, किमद्याप्युपेक्षसे दुर्वृत्तमेनम् । कथं वैकक्रियासाध्यमेतावन्तमर्थम् । अवधत्स्व तावत् ।

भवान्सीतां लोकस्त्रिभुवनगतः प्रीतिमुचितां
कनीयान्पौलस्त्यः पुरममरतां स्वा पुनरयम् ।
किमत्रान्यत्साक्षात्कृतपरमतत्त्वो मुनिगणः
प्रसादप्रोन्मीलन्मुदि मनसि शान्तिं च लभताम् ॥ ६२ ॥

चित्ररथः—(निशम्य ।) कथमेष दिव्यर्षिगणोऽप्येतयोर्वधाय राघवौ त्वरयति । अथवा दुष्टप्रशान्तिः कस्य न मनःप्रीत्यै । (ससम्भ्रमाद्भुतौत्सुक्यम् ।) देवराज, पश्य ।

आभ्यां ब्रह्माच्युतास्त्रस्मरणसुरभिभिर्मार्गणैः राघवाभ्यां
मूर्धानौ चिच्छिदाते रजनिचरपते रावणेश्च क्रमेण ।
पश्चाद्रक्ष कबन्धौ मृधभुवि विवशः सोऽपि रक्षोऽवरोधः
क्षोण्यां श्रीदाशरथ्योः शिरसि च वियतः पुष्पवर्षं पपात ॥६३॥

वासवः—(नेपथ्याभिमुखमवलोक्य । सोल्लासम् ।) गन्धर्वराज, पश्य तावदेते किल त्रिभुवनशत्रोर्दशकधरस्य निधनवृत्तान्तश्रवणेन प्रमोदनिर्भरा सहमहर्षयः सुमनसः कमपि महोत्सवमनुबुभूषन्तो मामेव प्रतीक्षन्ते । तद्गच्छाम्येतेषां मनोरथसंपादनाय । त्वमप्येतद्वृत्तान्तनिवेदनेन प्रियसखमलकेश्वरं प्रीणय ।

(इति परिक्रम्य निष्क्रान्ता सर्वे ।)

इति महावीरचरिते षष्ठोऽङ्कः ।

सप्तमोऽङ्कः ।

(तत प्रविशति शोकाकुला लङ्का ।)

लङ्का—(साक्रोशम् ।) हा[1] महाराअ दसकन्धर, तेल्लोक्कवीरलच्छीपडिग्गहदुल्ललिद, हा सअलरक्खसलोअपडिबालणतमत्थदुम्मदभुअदण्ड, हा पसुवइपादजुअलच्चणोपजुज्जन्तमुद्धमुहपुण्डरीअ, हा केकसीपुत्ततिलअ, हा बन्धुअणवच्छल, कहि मए तुम पेक्खिदव्वो । हा कुमार कुम्भअण्ण, हा वच्छ मेहणाह, कहि सि । देहि मे पडिवअणम् । (परितो विलोक्य ।) कह को वि ण मन्तेदि । (ऊर्ध्वमवलोक्य ।) हा दुट्ठदेव्वदुव्विलसिअ, कीस एव्व परिणद सि । अहवा को एत्थ भवदो उवालम्भो । अत्तणो एव्व दुच्चरिद एदं विपरिणमेदि । (इति सानुक्रोश रोदिति ।)

(तत प्रविशत्यलका ।)

अलका—अहो, कथमस्य रक्षःपतेरपूर्वः कोऽप्ययं दशापरिपाकः । यदेतावानपि रक्ष सर्गः क्षणेनैव विभीषणमात्रशेष संवृत्तः । (शब्दश्रवण नाटयित्वा । परिक्रम्य ।) कथ कनीयसी मे भगिनी प्रत्यग्रभर्तृविरहव्यथाविधुरा क्रन्दती लङ्का । (उपसृत्य ।) भगिनि, समाश्वसिहि समाश्वसिहि ।

लङ्का—(विभाव्य ।) केहं[2] बहिणिआ मे अलआ ।

अलका—भगिनि, समाश्वसिहि समाश्वसिहि । एवं किलेयं लोकयात्रा ।

---

१. हा महाराज दशकधर, त्रैलोक्यवीरलक्ष्मीप्रतिग्रहदुर्ललित, हा सकलराक्षसलोकप्रतिपालनसमर्थदुर्भुजदण्ड, हा पशुपतिपादयुगलार्चनोपयुज्यमानमुग्धमुखपुण्डरीक, हा केकसीपुत्रतिलक, हा बन्धुजनवत्सल, कुत्र मया त्व प्रेक्षितव्य । हा कुमार कुम्भकर्ण, हा वत्स मेघनाद, कुत्रासि । देहि मे प्रतिवचनम् । कथं कोऽपि न मन्त्रयते । हा दुष्टदैवदुर्विलसित, कस्मादेवं परिणतमसि । अथवा कोऽत्र भवत उपालम्भः । आत्मन एव दुश्चरितमेतद्विपरिणमति ।

२. कथ भगिनी मेऽलका ।

लङ्का—अइ[1] बहिणिए, कुदो मे आस्सासो । जुवइजणमेत्तसेसा सवुत्तह्मि । एक्को उण कुलतन्तू कुमारविहीसणो क्खु चिट्ठदि त्ति सुणीअदि । सो वि मन्दभाइणीए अधण्णदाए रिउवक्खं जेव्व सेवेदि ।

अलका—अयि भगिनि, मा भैवम् । न खल्वस्माकं स रिपुपक्षः ।

लङ्का—कहं[2] विअ ।

अलका—यस्य रिपुः स गतः । तच्च गतम् । संप्रति तु निसर्ग-सुहृदस्माकं त्रिभुवनप्रसिद्धसबन्धो दाशरथिः ।

लङ्का—(आश्वस्य ।) कहं[3] ईरिसो वि ।

अलका—ईदृश एव ।

लङ्का—कहं[4] अह्म सामिसु ईरिसो वि परिणदो ।

अलका—अप्यननुसधाने किमेव भाषसे । शृणु ।

रघुकुलतिलकेऽस्मिन्भ्रातृमात्रद्वितीये
किमपि पितृनिदेशाद्दण्डकां सप्रविष्टे ।
यदुचितमसुना ते राक्षसानां विनेत्रा
विहितमयमशेषः कर्मणस्तस्य पाकः ॥ १ ॥

लङ्का—हुं[5] । तुम उण ईरिसे पत्थावे कहं एत्थ उवट्ठिदासि ।

अलका—अवधत्स्व । अहं किल वैमात्रकेण पौलस्त्येन गन्धर्वराजाच्चित्ररथादमु वृत्तान्तमुपलभ्य शिष्टबन्धुप्रतिबोधनाय विभीषणस्य च लङ्काभिषेकसाक्षात्करणाय रावणापहृतविमानराजस्य पुष्पकस्य च रामभद्रोपस्थानोपदेशदानाय संदिष्टा ।

---

१. अयि भगिनि, कुतो म आश्वास । युवतिजनमात्रशेषा सवृत्तास्मि । एक पुन· कुलतन्तु कुमारविभीषण खलु तिष्ठतीति श्रूयते । सोऽपि मन्द-भागिन्या अधन्यतया रिपुपक्षमेव सेवते ।

२. कथमिव ।

३ कथमीदृशोऽपि ।

४. कथमस्माकं स्वामिष्वीदृशोऽपि परिणत ।

५. हुम् । त्व पुनरीदृशे प्रस्तावे कथमत्रोपस्थितासि ।

लङ्का—अम्मो[1], कहं भअवदो पसुवइणो वि मित्तं णिधाणाहिवई सअं एव्वं उवचरदि रामभद्दम् ।

अलका—अयि, किमत्राश्चर्यम् ।

इद हि तत्त्वं परमार्थभाजामयं हि साक्षात्पुरुषः पुराण ।
त्रिधा विभिन्ना प्रकृति. किलैषा त्रातुं भुवि स्वेन सतोऽवतीर्णा ॥२॥

लङ्का—कहं[2] अम्ह सामिणा रक्खसणाहेण एदं ण ओधारिदम् ।

अलका—अयि सरले, शापमहिम्ना किल मूर्च्छन्मोहः सोऽपि नापराध्यति ।

(नेपथ्ये कलकलः ।)

(उभे ससम्भ्रममाकर्णयत ।)

(पुनर्नेपथ्ये ।)

समवधत्त भोस्त्रिजगच्चराणि भूतानि ।
वस्वर्करुद्रसहित. स्वयमेष साक्षा-
द्वृद्धश्रवाः समभिनन्दति साधु साध्वीम् ।
अग्निप्रवेशपरिनिर्गमशुद्धभावां
सीतां रघूत्तम भवत्स्थितिमाद्रियस्व ॥ ३ ॥

अलका—कथमेते दिवौकसोऽपि दशकधरगृहनिवासव्यसनकौलीन-शङ्कापनुत्यै कृतपावकप्रवेशनिर्गमनां सीतादेवीमभिनन्दन्ति । अहह ।

पतिव्रतामयं ज्योतिर्ज्योतिषान्येन शोध्यते ।
इदमाश्चर्यमथवा लोकस्थित्यनुवर्तनम् ॥ ४ ॥

लङ्का—(शब्दश्रवणं नाटयित्वा ।) कहं[3] मङ्गलतूरवमिस्साओ गीदीओ णिसामीअन्ति ।

अलका—(नेपथ्याभिमुखमवलोक्य ।) कथं सीताविशुद्ध्यनुमोदनार्थ-मवतीर्णाभिरप्सरोभिर्दिव्यर्षिगणैश्च रामभद्रनिदेशेन निष्पादिताभिषेक-

---

१ अहो, कथ भगवत पशुपतेरपि मित्रं निधानाधिपति स्वयमेवमुपचरति रामभद्रम् ।

२. कथमस्माकं स्वामिना राक्षसनाथेनेदं नावधारितम् ।

३. कथ मङ्गलतूर्यरवमिश्रा गीतयो निशम्यन्ते ।

कल्याणो विभीषणः पुष्पकं पुरस्कृत्य रामभद्रमभ्येति । तदेहि । तथाविधसहजमहिममहनीयचरितमहानुभावावलोकनेन चक्षुः कृतार्थयावः ।

(इति परिक्रम्य निष्क्रान्ते ।)

मिश्रविष्कम्भकः ।

(तत प्रविशति पुष्पकं पुरस्कृत्य विभीषण. ।)

विभीषणः—अनुष्ठित. किल मया रामभद्रादेशः । तथा हि । सत्कृतं मातलिमनु

अजस्रगलदस्रसंप्लवकिणाङ्कगण्डस्थलाः
स्खलत्कनककङ्कणं नियमितैकवेणीभृत. ।
क्षमाबलविवर्तनातिमलिनाम्बरा मोचिता.
प्रयान्ति किल सस्मिताः स्म सुरलोकवन्दिस्त्रिय· ॥ ५ ॥

(उपसृत्य ।) जयति जयति रामभद्र । देव, एतदवसान. किल निदेशः संपादितः ।

बन्दीभिरेधिताः काराः शृङ्खलाभिरलंकृताः ।
कार्तस्वराभिर्दृश्याभिः पताकाभिश्च सांप्रतम् ॥ ६ ॥

अयं च पुष्पकनामा स विमानराजः ।

असरुद्धगतेरिष्टप्रवृत्तेर्वशवर्तिनः ।
मनोरथस्यानुगुणं सर्वदा यस्यं चेष्टितम् ॥ ७ ॥

रामः—साधु लङ्केश्वर, साधु संपादितम् । (सुग्रीवं प्रति ।) सखे वैकर्तने, किमत्रावशिष्यते ।

सुग्रीवः—

उत्खातस्त्रिभुवनकण्टकोऽतिदृप्य-
द्दोर्दण्डाञ्चितमहिमाप्ययं निकार. ।
देव्याश्च प्रतिशमितस्तथात्र संधा
निर्व्यूढा प्रगुणविभीषणाभिषेकात् ॥ ८ ॥

संप्रति तु द्रोणाद्रिं प्रत्याहरतो हनूमत. सविशेष गृहीतप्रवृत्तिर्दुर्मनायते किल कुमारभरत. । तं प्रति वार्ताहरः प्रविसृज्यतां प्राभञ्जनिः । स्वयमप्यलंक्रियतां विमानराजः ।

रामः—यदभिरुचितं प्रियवयस्याय । (इति तथा करोति ।)

(सर्वे विमानारोहणं नाटयन्ति ।)

सीता—(अपवार्य । लक्ष्मणं प्रति ।) अम्हेहि[1] संपदं कहि पत्थीअदि ।

लक्ष्मणः—देवि, रघुकुलराजधानीमयोध्यां प्रति ।

सीता—अवि[2] समत्तो सो वणवासस्स अवही ।

लक्ष्मणः—देवि, अद्यतनमेव दिन तत् ।

(सर्वे विमानगति रूपयन्ति ।)

सीता—(साश्चर्यम् ।) अज्जउत्त[3], एदे उण कदमा दूरादो अणिद्धारिददक्खिणोद्देसा अवित्थरिज्जन्तसामलत्तणपरिसरा दीसन्ति ।

रामः—देवि, नैते भुवां परिसराः किंतु

साक्षात्किलाष्टमूर्तेस्तस्यैषा मूर्तिरम्मयी प्रथमा ।
गीतः सागर इति नृभिरपरिच्छेद्यात्मगाम्भीर्यः ॥ ९ ॥

सीता—जो[4] अम्हाणं जेट्ठससुरेहि किदणिम्माणो त्ति बुड्ढपरंपराए सुणीअदि । एदस्स मज्झे वि किं एदं दूरप्पसारिदं धवलसुअं विअ अहिणवतिणच्छण्णासु भूमिसु दीसइ ।

लक्ष्मणः—देवि

सोत्साहं धृतशासनैः सकुतुकैर्वृक्षौकसां नायकैः
दिक्पर्यन्तधराधरेन्द्रशिखराण्यानाय्य निर्मापितः ।
कल्पान्तावधिवन्दनीयमहिमा लोकस्य सेतुर्नवः
कीर्तिस्तम्भ इवायमार्यचरितस्याम्भोनिधौ लक्ष्यते ॥ १० ॥

रामः—(अङ्गुल्या निर्दिशन् ।) वत्स,

एता भुव. परिचिनोषि मिलत्तमाल-
च्छायान्धकारिततुषारनिकुञ्जपुञ्जाः ।

---

१. अस्माभिः साप्रत क्व प्रस्थीयते ।

२. अपि समाप्त. स वनवासस्यावधि ।

३. आर्यपुत्र, एते पुन. कतमा दूरतोऽनिर्धारितदक्षिणोद्देशा अविस्तीर्यमाणश्यामलत्वपरिसरा दृश्यन्ते ।

४. योऽस्माकं ज्येष्ठश्वशुरै कृतनिर्माण इति वृद्धपरम्परया श्रूयते । एतस्य मध्येऽपि किमेतदूरप्रसारितं धवलांशुकमिवाभिनवतृणाच्छन्नासु भूमिषु दृश्यते ।

उन्मूर्च्छदच्छमलयाचलतुङ्गशृङ्ग-
प्राग्भारनिष्पतितनिर्झरपूरभाजः ॥ ११ ॥

लक्ष्मणः—आर्य, ता एवैताः । नातिदूर एव तावदासां स जीर्ण-कन्दरः ।

गर्जाजर्जरितासु दिक्षु बधिरे तत्स्फूर्जथुस्फूर्जितै-
व्योंम्नि भ्राम्यति दुष्प्रभञ्जनजवादभ्रेऽप्यदभ्रे मुहुः ।
आक्षिप्यान्धयति द्रुमान्धतमसे चक्षुः प्रविश्य क्षपा
यत्रासीत्क्षपिता क्षरज्जलधरे त्वक्सारलक्षीकृते ॥ १२ ॥

सीता—(स्वगतम् ।) अहो[1] पमादो । कहं मह मन्दभाइणीए दुट्ठ-देव्वेहि एदे वि महाणुहावा ईरिस अवत्थन्तरं अनुहाविदा ।

विभीषणः—देव रामभद्र, दृश्यन्ते किलैता कावेरीतीरभूमय ।

यत्पर्यन्तमहीध्रसीम्नि कुहलीमाध्वीकधारोद्गिर-
द्भृष्यत्पूगवनीघनीकृततलैस्तुङ्गैर्जरच्छाखिभिः ।
लक्ष्यन्ते विविधाश्रमाः स्थिरतप.स्वाध्यायसाक्षात्कृत-
ब्रह्माणो निवसन्ति यत्र मुनयः कल्पस्थितेः साक्षिणा ॥ १३ ॥

यतो नातिदूर एव किलावाच्यां लोपामुद्रापरिष्कृतपरिसरे दीप्यति कौम्भसंभवं ज्योतिः ।

रामः—कथमतिक्रान्तमागस्त्यमाश्रमपदम् ।

अय वारां राशिः किल मरुरभूद्यद्विलसितै-
रय विन्ध्यो येनाहृतविहृतिराध्मानमजहात् ।
विलिल्ये यत्कुक्षिस्थितशिखिनि वातापिवपुषा
स कासां वाणीना मुनिरकलितात्मास्तु विषय. ॥ १४ ॥

तदप्रमेयविभवा विश्वान्तरात्मसाक्षिणस्ते महात्मानः कुतश्च नाभि-वन्द्याः ।

(सर्वे तथा कुर्वन्ति ।)

---

१. अहो प्रमाद । कथं मम मन्दभागिन्या दुष्टदैवैरेतेऽपि महानुभावा ईदृशमवस्थान्तरमनुभाविता. ।

(आकाशे ।)

सानुजस्त्वं प्रजा· शाधि कल्पान्तस्थायि ते यशः ।
नामापि राम गृणतामृतत्वाय कल्पताम् ॥ १५ ॥

रामः—(आकर्ण्य ।) कथमशरीरिण्या गिरा परमनुगृहीतो महामुनिवन्दारुः ।

(इतरे अभिनन्दन्ति ।)

विभीषणः—देव रामभद्र, एतास्ताः पम्पापर्यन्तभूमयः, यासु बहो. कालादनुभूयमानान्यप्यभिज्ञानानि बलाच्चक्षुराकर्षन्ति । तथा हि ।

बाणेनैकेन विद्धं विसलति पुरतस्तज्जरत्तालखण्ड
सोऽपि क्रीडाकपित्व क्षणमिषुनिवहैरन्वभूदत्र वाली ।
सौमित्रि. पादघातादिह हि सकुतुक प्राक्षिपत्कूटमस्भां
काबन्ध दृष्टमस्मिन्हनुमति भवतैवोत्तरीय च देव्याः ॥ १६ ॥

सीता—(स्वगतम् ।) किं[1] णाम मह उत्तरीअं अज्जउत्तेण हणुमन्तस्स हत्थे दिट्ठम् ।

रामः—(सस्मरणम् ।) हे देवि, तदा किल वैक्लव्यादपह्रियमाणाया भवत्याः प्रभ्रष्टमनसूयानामाङ्कमुत्तरीयमस्माभि. प्रथममभिज्ञानमासादितम् ।

दृशोः शरच्छीतकरप्रकाशः कायेऽपि कर्पूरपरागपूरः ।
स्वान्तेऽपि सान्द्रामृतकुम्भसेकस्तदा यदासीत्किल दृष्टमात्रम् ॥१७॥

(सीता लज्जा नाटयति ।)

लक्ष्मणः—अयम्

तातस्य मित्र किल गृध्रराजस्तं पापमस्मिन्सहसानुबध्नन् ।
गात्रं जराजर्जरितं विहाय यश·शरीरं नवमाललम्बे ॥ १८ ॥

सीता—(स्वगतम् ।) केण[2] मह कारणादो तारिसाणं वि महाणुहावाणं ईरिसो अवत्थाविसेसो णिसामीअदि ।

सुग्रीवः—देव, अतिक्रम्यन्ते किलैता दण्डकासीमानः ।

---

१. किं नाम ममोत्तरीयमार्यपुत्रेण हनुमतो हस्ते दृष्टम् ।

२. कथ मम कारणात्तादृशानामपि महानुभावानामीदृशोऽवस्थाविशेषो निशम्यते ।

यत्र तेऽपि स्वसुः कर्णनासौष्ठविचिचीक्षया ।
सानुप्लवाः क्वापि यातास्त्रिमूर्धखरदूषणाः ॥ १९ ॥

सीता—(वेपमाना ।) अम्मो, कहं पुणो वि रक्खसा जेव्व सुणीअन्ति[1] ।

रामः—देवि, अलं शङ्कया । अभिधानमात्रमवशिष्यते ।

शरासनस्य टङ्कारात्सौमित्रेः केवलं किल ।
रक्षसां प्रलय सिंहगर्जनाद्दन्तिनां यथा ॥ २० ॥

(निरूप्य ।) किमन्यादृशीव गतिरस्य विमानराजस्य[2] ।

विभीषणः—देव, अत्युच्चै किलायं सद्यः सानुमान् । एनमतिक्रम्य गम्यते किलार्यावर्तः । तदतिक्रमणायेदमपि मध्यमलोकसांनिध्य किंचिदुज्झति ।

लक्ष्मणः—द्रष्टव्य किलोत्तमपुरुषपदलाञ्छितो मध्यमलोक ।

(सर्वे उच्चैर्गतिवेग निरूपयन्ति ।)

रामः—(निरूप्य । सविस्मयम् ।)

य पूर्वेषा नः कुलस्य प्रतिष्ठा देवः साक्षादेष धाम्नां निधानम् ।
त्रय्याः सारः कोऽपि मूर्तो विवस्वान्प्रत्यासन्नः पुष्पकारोहणेन ॥२१॥

(सर्वे कपोतकेन प्रणमन्ति ।)

सीता—(उच्चैर्निरूप्य ।) अम्मो, कहं[3] दिणम्मि वि तारआचक्क विअ एद दीसदि ।

रामः—देवि, तारकाचक्रमेवैतत् । अतिविप्रकर्षाद्रविकिरणप्रतिहतचक्षुर्भिर्न दृश्यते किल दिवसे । स विमानारोहणादपास्तः ।

सीता—(सकुतुकम् ।) कह[3] गअणवाडिआए फुल्लाइ कुसुमाइ व्व दीसन्दि ।

रामः—(समन्तादवलोक्य ।) कथमपरिच्छेद्यदिग्विभागमिव संप्रति जगत् । यतः

---

१. अहो, कय पुनरपि राक्षसा एव श्रूयन्ते ।
२. अहो, कथं दिनेऽपि तारकाचक्रमिवतदृश्यते ।
३ कथं गगनवाटिकायां फुल्लानि कुसुमानीव दृश्यन्ते ।

संस्तूयन्ते विप्रकर्षाद्भौमा नोपाधयः स्फुटम् ।
आन्तरीक्षाः पुनरमी सर्वतः सदृशा इव ॥ २२ ॥

सुग्रीवः—देव, भ्रातुः सौहार्देन विधेयीकृतो यदृच्छया दिगन्तेषु विचरन्नभ्युपपन्नवानस्मि । तथा हि ।

उदयास्ताचलावेतौ यत्क्रोडे बाल्यवार्धके ।
विस्रम्भाच्चन्द्रसूर्याभ्यामतीयेते विनिर्भयम् ॥ २३ ॥

अवधत्तामितो देवः ।

कैलासाञ्जनशैलावेतौ तुल्योन्नतत्वपरिणाहौ ।
चन्दनमृगमदलेपं गमितौ क्षोण्या नु वक्षोजौ ॥ २४ ॥

इतश्चायं काञ्चनाचलः । परतश्चायमभ्रंकषशिरः शिखरी गन्धमादनः । ततः परस्मादगम्या मादृशां भूमय ।

रामः—(परितो विलोक्य । ससम्भ्रमाद्भुतम् ।) कथमेकपद एव सर्वमहो चक्षुर्गोचरः । परिच्छेद्या च सर्गस्थितिः ।

सीता—[1]अम्मो, एदं किं वि अदिट्ठपुव्वं अण्णारिसं जेव्व दीसइ ण माणुसो णावि पसू ।

रामः—देवि, अश्वमुखं किन्नरमिथुनमेतत् । प्रायेणैतासु भूमिष्वेवविधानामेव भूयसां प्रचारः ।

विभीषणः—कथं समुखमेवाभ्येति । प्रायेणालकेश्वरादेशधारिणानेन भवितव्यम् ।

(नेपथ्ये ।)

देव दिनकरकुलमणे रामभद्र, भवन्तमेकपिङ्गाचलेश्वरनिदेशादुपश्लोकयितुं साकेतं प्रस्थितयोरावयोर्यात्रासुकृतपरिणामादन्तराल एव चक्षुर्विषयोऽसि । तन्निदेशपारतन्त्र्यमपि भूयसे गुणाय । यत्पुराणस्यैव पुसोऽभिव्यक्तिपर्यायनिष्ठं महः साक्षात्क्रियते । (इति प्रदक्षिणीकृत्याभिवन्देते ।)

(सर्वे निरूपयन्ति ।)

---

१ अहो, इदं किमप्यदृष्टपूर्वमन्यादृशमेव दृश्यते न मानुषो नापि पशु ।

(पुनर्नेपथ्ये ।)

किन्नरः—

आपन्नवत्सल जगज्जनतैकबन्धो
विद्वन्मरालकमलाकर रामचन्द्र ।
जन्मादिकर्मविधुरैः सुमनश्चकोरै-
राचम्यतां तव यशः शरदां सहस्रम् ॥ २५ ॥

(तत्रैव ।)

किन्नरी—

यावत्फणीन्द्रशिरसि क्षितिचक्रमेत-
द्यावत्पुनर्ग्रहगणैः शबलं विहायः ।
वैदेहि तावदमलो भुवनेषु पुण्यः
श्लोकः प्रशस्तचरितैरुपगीयतां ते ॥ २६ ॥

(दम्पती मन्दाक्षं नाटयत ।)

इतरे—प्रियं नः प्रियम् ।

रामः—लङ्केश्वर, चिरसंचरणादत्र नानुरोधं तर्कये । तद्वरमितो मध्यमलोकसांनिध्येन गन्तुम् ।

विभीषणः—देव,

एते ते सुरसिन्धुधौतदृषदः कर्पूरखण्डोज्ज्वलाः
पादा जर्जरभूर्जवल्कलभृतो गौरीगुरोः पावनाः ।
तत्त्वालोकनिरस्तमोहतमसामध्यात्मविद्याजुषां
यत्र ब्रह्मविदां निसर्गमधुरं जागर्ति सौम्यं महः ॥ २७ ॥

लक्ष्मणः—आर्य, कथमेते भुवां परिसराः संस्तुतपूर्वान्यविषयग्राहित्वं न क्षमन्ते चक्षुषोः ।

रामः—(निरूप्य । सस्मरणावेगम् ।) वत्स, ता एवैता गुरूणां कौशिकपादानां संचरणेन पवित्रितपर्यन्तास्तपोवनभूमयः । यत्र तु तत्रभवता याज्ञवल्क्यान्तेवासिना द्वितीयेन विदेहाधिपतिना सह तत्संलापामृतप्रमोदमनुभवतां गुरूणां लालनीयाभ्यामावाभ्यां बाल्योचितमुल्ललितम् ।

जटी चीरी रामेत्यमृतविभवं नाम रसय-
न्मुहुर्हर्षोद्भ्रान्तप्रकृतिसहितोऽभ्येति भरतः ॥ ३० ॥

रामः—(सोल्लासम् ।) अहो, चिरायायुष्मत्सौहार्दमुपलभामह इति सर्वानन्दानामुपरि वर्तामहे ।

लक्ष्मणः—(सौत्सुक्यम् ।) सखे मारुते, कुत्रार्यः ।

हनूमान्—य एते सैन्यस्य पुरत. पञ्चषास्तन्मध्ये पुरःसर· सानुज स महात्मा भरत. ।

(लक्ष्मणो निर्वर्णयति ।)

सीता—(निरूप्य ।) [1]कहं अण्णारिसो जेव्व दीसई ।

विभीषणः—हंहो विमानराज, चिराय बन्धुजनदर्शनालिङ्गनसंभावनादिना मिथोऽङ्गप्रमोदमनुभवन्त्वेते महानुभावा. । तत् क्षणं विरम ।

(सर्वे विमानावतरणं नाटयन्ति ।)

(ततः प्रविशत कतिचनप्रधानपुरुषपरिवृतौ भरतशत्रुघ्नौ ।)

रामः—(सरभस पादपतितं भरतमुत्थाप्य ।) एह्येहि वत्स,

अनुभावयति ब्रह्मानन्दसाक्षात्क्रियामिव ।
स्पर्शस्तेऽद्य वराम्भोजप्रस्फुरन्नालकर्कश ॥ ३१ ॥

(इति निर्भरमालिङ्ग्य विसृजति ।)

(लक्ष्मण सपादपतन भरतमालिङ्गति ।)

(शत्रुघ्नो रामलक्ष्मणावभिवादयते ।)

उभौ—कुलस्थितिमनुवर्तस्व ।

(भरतशत्रुघ्नौ दण्डवत्सीता प्रणमतः ।)

सीता—[2]कुमारा, जेट्ठाणं भादुआणं अभिमदा होह ।

रामः—वत्सौ भरतशत्रुघ्नौ,

अस्माकं व्यसनाम्भोधावयं पोतत्वमागतः ।
कपीन्द्रोऽय च लङ्केन्द्रो मित्रं धर्महिते रतः ॥ ३२ ॥

तत् परिष्वजतम् । (इति सुग्रीवविभीषणौ दर्शयति ।)

---

१. कथमन्यादृशा एव दृश्यते ।

२. कुमारौ, ज्येष्ठयोर्भ्रात्रोरभिमतौ भवतम् ।

(भरतशत्रुघ्नौ तौ परिष्वज्य यथोचितमुपचरत ।)

भरतः—आर्य, कुलगुरुर्नो भगवान्मैत्रावरुणिः सिंहासनग्रहे संपादितसकलाभिषेकसभारो भवन्तं प्रतीक्षते । यथाज्ञापयत्यार्यः ।

रामः—(स्वगतम् ।) कौशिकपादाः प्रतीक्षणीयाः स च भगवान्मैत्रावरुणिरेवमाज्ञापयति । भवतु । समयोचितं प्रतिकरिष्यते । (प्रकाशम् ।) यथाज्ञापयति कुलगुरुः ।

(सर्वे परिक्रामन्ति ।)

(तत प्रविशति वसिष्ठो दशरथकलत्रैरुपचर्यमाणारुन्धती च ।)

वसिष्ठः—(स्वगतम् ।)

क्षमायाः स क्षेत्रं गुणमणिगणानामपि खनिः
प्रपन्नानां मूर्तः सुकृतपरिपाको जनिमताम् ।
कृपारामो रामो बहिरिह दृशोपास्यत इति
प्रमोदाद्वै तस्याप्युपरि परिवर्तामह इमे ॥ ३३ ॥

भवतु । तथापि लोकयात्रानुवर्तनीया । (प्रकाशम् ।) वध्वौ कौशल्यासुमित्रे ।

उभे—आणवेदु[1] कुलगुरू ।

वसिष्ठः—दिष्ट्याक्षतप्रतिनिवृत्तवत्से स्तः ।

उभे—तुह्माणं[2] आतिसाणं पहावो ।

अरुन्धती—(कैकेयीं विलोक्य ।) वत्से कैकेयि, किमेवमतिदुर्मनायसे ।

कैकेयी—अम्ब[3], मह मन्दभाइणीए अधण्णदाए सअलो वि लोओ एव्वं कोलीणं भणदि । जं वच्छाण पवासजणणी मज्झमजणणी मन्थरा मुहे आसि । ता कहं वच्छाणं मए मुहं पेक्खिदव्वम् ।

अरुन्धती—वत्से, अलं वृथा कौलीनशङ्कया । आर्यमिश्रैरयमर्थस्तदैवान्तरेण चक्षुषा साक्षात्कृतः ।

---

१ आज्ञापयतु कुलगुरु ।

२. युष्माकमाशिषा प्रभाव ।

३. अम्ब, मम मन्दभागिन्या अधन्यतया सकलोऽपि लोक एवं कौलीनं भणति । यद्वत्सयोः प्रवासजननी मध्यमजननी मन्थरामुख आसीत् । तत्कथ वत्सयोर्मया मुखं प्रेक्षितव्यम् ।

सर्वाः—कहं[1] विअ।

अरुन्धती—मन्थरारूपधारिण्या शूर्पणखया माल्यवद्वचनादेतद्विहितमिति।

सर्वाः—अहो[2] रक्खसाणं दुट्ठताभिओओ जो इहट्ठिदं अबलाजणं वि बाधेदि।

वसिष्ठः—हुं मङ्गलसमयेऽलमलं यत्किंचिद्दुःखैः का पुनरद्यापि राक्षसाभियोगवार्ता।

रामः—(वसिष्ठ विलोक्य। सोल्लासम्।) स एष भगवान्मैत्रावरुणिः।

यद्दर्शनात्किमप्येवं द्रवीभवति मे मनः।
राकासुधाकारलोकादिन्दुकान्तोपलो यथा॥ ३४॥

(लक्ष्मणं प्रति।) वत्स, इत इतः।

उभौ—(उपसृत्य।) भगवन्कुलगुरो, रामलक्ष्मणावभिवादयेते।

वसिष्ठः—

चक्षुषां स्वस्वसमये संस्कारत्वं समाश्रुताम्।
वत्सौ नयेन धर्मेण ज्ञानेन च पुरस्कृतम्॥ ३५॥

(उभावरुन्धतीमभिवन्देते।)

अरुन्धती—इष्टैर्युज्येथाम्।

(उभौ क्रमेण सर्वा मातॄरभिवन्देते।)

सर्वाः—(तौ निर्भरं परिष्वज्य मूर्ध्न्युपाघ्राय।) जं[3] अम्हे चिन्तेमो तं तुह्माणं होदु।

(सीतोपसृत्य वसिष्ठं प्रणमति।)

वसिष्ठः—वत्से, वीरप्रसविनी भव।

---

१. कथमिव।

२. अहो राक्षसानां दुष्टताभियोगो य इहस्थितमबलाजनमपि बाधते।

३. यद्वयं चिन्तयामस्तद्युष्माकं भवतु।

(सीतारुन्धतीं प्रणमति ।)

अरुन्धती—(सीता निर्भरमालिङ्ग्य ।)

लोपामुद्रानसूयाहमिति तिस्रस्त्वया सह ।
पतिव्रताश्चतस्रोऽत्र सन्तु जानकि सांप्रतम् ॥ ३६ ॥

(सीता श्वश्रूरभिवन्दते ।)

सर्वाः—जादे, कुलपडिट्ठावअदारअप्पसविणी होहि[1] ।

(नेपथ्ये ।)

प्रवर्तन्तां पौराः प्रतिसदनमद्योत्सवविधौ
चिरं स्वे स्वे कर्मण्यथ समवधत्ताप्यधिकृताः ।
यथोक्तं सभारं पुनरिह विधत्त द्विजवराः
कृशाश्वान्तेवासी कुशिकपतिराज्ञापयति वः ॥ ३७ ॥

वसिष्ठः—(आकर्ण्य ।) अहो, अयं भाग्यमहिमा वत्सस्य । यद्भगवान्कौशिकः स्वयं सिंहासने समभिषेक्तुं संप्राप्तः ।

इतरे—प्रियं नः प्रियम् ।

(तत प्रविशति सशिष्यो विश्वामित्र ।)

विश्वामित्रः—

सत्रप्रत्यूहशान्त्यै दशरथकरतः कर्षतैनं मया य-
द्यत्खान्ते सविमृष्टं तदनुगुणविधौ यच्च वैयग्र्यमासीत् ।
तद्दैवस्यानुगुण्यात्प्रयतनविभवैश्चाद्य राज्येऽभिषिच्य
श्रीरामं निर्वृताना फलितमिति मुहुः सप्रमोदामहे नः ॥ ३८ ॥

(इति परिक्रामति ।)

वसिष्ठः—स एष कौशिकः

क्षात्रं प्राकृतिक तेजो ब्राह्मं यस्य विशिष्यते ।
लोकोत्तरचमत्कारनिधेस्तस्याद्भुतं न किम् ॥ ३९ ॥

---

१. जाते, कुलप्रतिष्ठापकदारकप्रसविनी भव ।

(वसिष्ठविश्वामित्रावुपसृत्यान्योन्यमुपचरत ।)

विश्वामित्रः—भगवन्मैत्रावरुणे, किमद्यापि प्रतीक्ष्यते ।

वसिष्ठः—यथोचितमाह्रियताम् ।

विश्वामित्रः—(दिव्यर्षिगणमुद्दिश्य ।) निर्वर्त्यतां रामभद्रस्याभिषेकः ।

(मुनयो यथोचितमाचरन्ति ।)

(नेपथ्ये दुन्दुभिध्वनि ।)

(सर्वे सविस्मयं पुष्पवृष्टिं रूपयन्ति ।)

वसिष्ठः—कथं सलोकपालो भगवान्पाकशासनो रामभद्रस्याभिषेकमनुमोदते ।

(कृताभिषेकमङ्गल ।)

रामः—(वसिष्ठविश्वामित्रावुपसृत्य ।) गुरू, अभिवादये ।

उभौ—

रामभद्र गुणाराम भ्रातृभिस्त्वं पुरस्कृतः ।
इक्ष्वाकुमुख्यैर्भूपालैश्चिरमूढां धुरं वह ॥ ४० ॥

इतरे—तथास्तु । (इत्यनुमोदन्ते ।)

विश्वामित्रः—वत्स रामभद्र ।

रामः—आज्ञापयन्तु गुरवः ।

विश्वामित्रः—विसृज्येतामेतावनुभूतोत्सवप्रमोदौ सुग्रीवविभीषणौ । पुष्पकं च संकल्पसमयसुलभं राजराजमेवाश्रयताम् ।

(रामस्तथा करोति ।)

विश्वामित्रः—वत्स रामभद्र,

निर्व्यूढं गुरुशासनं गुरुतरं धर्मोऽपि संरक्षितो
रक्षःसंहरणाच्चिकित्सितमनोरोगा त्रिलोकी कृता ।
सिद्धार्थाश्च सुराः सहानुजसुहृद्वारेण राज्यं पुनर्लब्धं किं करणीयमेतदधिकं श्रेयस्तदप्युच्यताम् ॥ ४१ ॥

रामः—इतोऽधिकमपि श्रेयोऽस्ति । तथापीदमस्तु भगवत्पादप्रसादात् ।

क्ष्मापाला क्षीणतन्द्राः क्षितिवलयमिदं पान्तु ते कालवर्षा
वार्वाहाः सन्तु राष्ट्रं पुनरखिलमपास्तेति संपन्नसस्यम् ।
लोके नित्यप्रमोद विदधतु कवयः श्लोकमाप्तप्रसाद
सख्यावन्तोऽपि भूम्ना परकृतिषु मुदं सप्रधार्य प्रयान्तु ॥ ४२ ॥

विश्वामित्रः—एवमस्तु ।

(इति निष्क्रान्ता. सर्वे ।)

इति सप्तमोऽङ्कः ।

समाप्तमिदं महावीरचरितं नाम नाटकम् ।



महावीरचरितश्लोकानां सूची।

अकलिलतपस्तेजो २।३०
अकाण्डशुष्काशनि ५।५७
अजस्रगलदस्रसङ्ग ७।५
अज्ञो वा यदि वा ३।३५
अत्र सीरध्वजो वेत्ता १।४१
अथ स्वस्थाय देवाय १।१
अनुत्पन्न ज्ञानं यदि ३।३६
अनुभावयति ब्रह्मा ७।३१
अनेकयुगजीविन्या ५।११
अन्तर्धैर्यभरेण वृद्ध ३।४०
अन्योन्यमाहात्म्यविदो ४।३४
अन्विष्यत प्रमथनाय २।३१
अपरिष्वज्य भरतं ४।४३
अपि प्रभोर्वः कुशलं १।२९
अपि प्रवृत्तयज्ञोऽसौ १।१९
अप्राकृतस्य चरिता २।३९
अप्राकृतानि च गुणै ४।१२
अप्राकृताभिजनवीर्य ५।५६
अप्राकृतेषु पात्रेषु १।३
अभिजनतपोविद्या २।११
अमृताघ्मातजीमूत २।४६
अमोघमस्त्र क्षत्रस्य २।५
अम्भोधेर्नारिकेली ५।३२
अयं रक्षोनाथ क्षिति ६।३०
अय वारा राशिः किल ७।१४
अयं विनेता दक्षाना ३।४६
अय स भृगुनन्दन २।२३
अयं तु यजमानेन १।१५
अरिष्टस्त्वाष्ट्रस्य प्रश ४।१८
अर्थित्वे प्रकटीकृते २।९
अश्रान्तपुण्यकर्माण १।२६
असरुद्धगतेरिष्ट ७।७
असाध्यमन्यथादोषं ४।२३
अस्त्रप्रयोगखुरली २।३४
अस्त्वेकेन वरेण ४।४१
अस्माक व्यसनाम्भो ७।३२
अस्माद्रावणवृत्ता ६।५८
अस्मानधिक्षिपतु ३।३१
अस्माभिरप्यनाशास्यो ४।१३
अस्माभिरेव पाल्यस्य ३।३८
अहं हि श्रमणानाम ५।२७
आक्रम्यैकैकमेते रजनि ६।३८
आतङ्कश्रमसाध्वस २।२१
आदित्या कुलदेवता ४।१४
आनन्दाय च विस्मयाय ५।४९
आन्त्रप्रोतबृहत्कपाल १।३५
आपन्नवत्सल जग ७।२५
आभुमभ्रुकुटीविटङ्क ५।२१
आभ्या ब्रह्माच्युताभ्र ६।६३
आर्यस्य वालिन इव ५।५४
इक्ष्वाकुवंशतिलकस्य ४।४९
इदं हि तत्त्वं परमार्थ ७।२
इष्टापूर्तविधे सपत्न ३।१
इह समदशकुन्ता ५।४०
उत्कृत्योत्कृत्य गर्भा २।४८
उत्खातक्षितिपाल २।१९
उत्खातत्रिभुवन ७।८
उत्तालताटकोत्पात १।३७
उत्तिष्ठेत वधाय न. ४।६
उत्तिष्ठोत्तिष्ठ याव ३।३२
उत्पत्तिर्जमदग्नितः २।३६
उत्पत्तिर्दैवयजना १।२१
उत्पत्त्यैव हि राघव. २।६
उत्पुष्यद्बलधमनि ६।१४

उत्सिक्तस्य तप परा २।२२
उत्स्फूर्जद्रोमकूप ६।५१
उदयास्ताचलावेतौ ७।२३
उद्दिश्याराद्दशरथ ६।४५
ऋषिभिरुपजुष्टतीर्था ४।६०
ऋषिरयमतिथिश्चे २।४४
एकव्यक्त्यपराध ३।१३
एकस्य राघवऋिशोः ३।१६
एकीभूय शनैरनेक ४।५६
एतन्निरीक्ष्य निपपात ६।४६
एता भुव परिचिनोषि ७।११
एताभ्या राघवाभ्या ६।६१
एताश्चतुर्भ्यो रघु १।५८
एते ते सुरसिन्धुधौत ७।२७
एवं मया नियमित ३।१५
एष तातश्च तातश्च ४।५३
एष नो नरपति ३।३३
एष प्रह्वोऽस्मि १।४७
एष मूर्त इव क्रोधः ५।२०
एषोऽस्मि प्रलयमरु ५।१५
एह्येहि वत्स रघु १।५५
कन्यारत्नमयोनिजन्म १।३०
कर्णावर्जितदिग्धतङ्ग ५।६३
कल्पस्यादौ मम ५।१०
कल्पापायप्रणयि २।२५
का ते स्तुति स्तुति ४।२९
कामं हि न. खजन ३।४२
कामं गुणैर्महानेष ३।१२
कामं त्वया सह श्लाघ्यो ५।५२
कावेरीवलयितमेखलस्य ५।३
कि त्वनुष्ठाननित्यत्वं ४।३३
कृत्तक्षत्रियकण्ठ ३।४८
कृशाश्वान्तेवासी ४।१
कैलासाञ्जनशैलावेतौ ७।२४
कैलासे तुलिते जिते ५।३७
कैलासोद्धारसार २।१६
कैश्चिद्दोभि प्रमत्ता ६।२५
कौ त्वामनुगतावेतौ १।२२
क्षमायाः स क्षेत्र गुण ७।३३
क्षत्त्रालोकक्षुभितहुत ३।२८
क्षात्र प्राकृतिक तेजो ७।३९
क्षितेरानन्तर्यादप ४।७
क्ष्मापाला क्षीणतन्द्रा ७।४२
क्ष्वेडाभि ककुभ पृषत्क ६।५७
गभीरो माहात्म्या २।१५
गर्जत्पर्जन्यघोरस्त ५।५३
गर्जाजर्जरितासु दिक्षु ७।१२
चक्षुषा स्वसमये ७।३५
चञ्चत्पञ्चशिखण्ड २।३२
चतुर्दशसहस्राणि ५।१३
चूडाचुम्बितकङ्कपत्र १।१८
जगत्सनातनगुरौ ३।३९
जनकाना रघूणा च १।५७
जनपदबहिर्निष्ठा ४।२८
जम्बुद्वीपेऽथवान्येषु ६।१३
ज्ञाता एव वयं जगत्सु ५।५१
ज्याजिह्मया वलयितो ३।२९
ज्योतिर्ज्वालाप्रचय २।२६
ज्वलिततपसस्तेजो १।५१
झटित्युन्मीलितप्रज्ञ १।४८
झटित्येवोत्तप्तद्रुत १।४३
तत्कावकालपर्जन्य १।६०
तत्क्रूरदन्तकरपत्र ५।२९
तत्पादाब्जनखं किं वा ६।२९
तत्रैव गमनादेशो ४।४२
तथा च शरभङ्गेण ५।९
तदस्मिन्ब्रह्मावैस्त्रिदश १।११
तपो वा शस्त्रं वा ३।२४
तमासि ध्वंसन्ते १।१२
तस्य विद्यातपोवृद्ध ५।७

तस्या च कर्णनासोष्ठ ५।१२
तातस्य मित्रं किल ७।१८
तान्येव यदि भूतानि २।१४
तुण्डप्रोतशिर.क्रोटि ५।१९
तुरीयो ह्येष मेध्याग्नि १।१०
तूलदाहं पुर लङ्का ६।५
तृषैर्विरावमासानां ५।८
तेजोभिर्दिशिदिशि १।४४
तेनेदमुद्धृतजगत्त्रय १।६
तेषामिदानी दायादो १।१४
त्रय्यास्त्राता यस्तवार्यं ४।४४
त्रातु लोकानिव परि २।४१
त्रैलोक्यमप्यपर्याप्तं ६।६०
त्रोव्यन्तामभितोऽर्गलानि ६।२३
त्वं न पूज्यतमोऽतिथि २।५०
त्वन्नियोगादयुक्तोऽपि ५।४३
त्वं ब्रह्मण्य किल ३।२६
त्वं ब्रह्मवर्चसधनो ३।४४
त्वया पुत्रवती श्येनी ५।६
त्वा लक्ष्मण महाबाहो ४।५८
दण्डोऽप्यभ्यधिके शत्रौ ४।४
दत्त द्वाराणि तूर्णं सरल ६।१६
दधति कुहरभाजामत्र ५।४१
दनुर्नाम श्रियः पुत्र. ५।३४
दिष्ट्या यदद्य दृष्टस्त्वं ५।५०
दुर्गोऽयं चित्रकूटस्तदुपरि ६।७
दुर्दान्ताना दमनविधय ३।३४
दुर्बाधो जनिदिवसा ६।२८
दुर्विनीते त्वयि वयं ४।२६
दूर हृतश्चित्रमृगेण ५।१६
दूराद्वीयो धरणी २।१
दूरोद्वेल्लितवाडवस्य ५।२
दृढतरमभियोगं ६।२७
दृप्यद्राक्षसचक्रकानन ६।२०
दृशो शरच्छीतकर ७।१७
दोर्लीलाञ्चितचन्द्र १।५४
दौरात्म्यादरिभिर्निजा ५।४६
द्राङ्निष्पेषविशीर्णं १।३४
द्वितीयस्य च वर्णस्य १।१७
धर्तार· प्रलयेषु ये ५।१८
धर्मे ब्रह्मणि कार्मुके ३।३७
न कम्पन्ते झझामरुति ६।३६
न कुत्राप्यन्यत्र प्रबल ६।८
न तस्य राष्ट्रं व्यथते ३।१८
न तादृशः सुहृत्कार्ये ५।३६
न त्रस्त यदि नाम २।२८
नन्दिग्रामे जटा बिभ्र ४।५४
नन्वद्य राक्षसपते. १।४०
नन्वद्यैव प्रथितयश ३।४७
नान्यत्र राघवाद्वशा १।२३
नार्यं गिरिर्यशोराशि ५।३८
निकार प्राप्तोऽय ज्वल ३।४१
निमन्त्रितस्त्वेन विदेहै १।९
निर्व्यूढ गुरुशासनं ७।४१
निसर्गतः पवित्रस्य ४।२७
निसर्गेण स धर्मस्य २।७
न्यंक्कारो हृदि वज्र ५।२२
न्यस्तशस्त्रे भृगुपतौ ४।३९
पतिर्मृत्योर्वक्त्रं व्रजति ४।५२
पतिव्रतामयं ज्योतिर्ज्योतिषा ७।४
पतिव्रतामयं ज्योति· शान्तं ६।६
परशुरशनिचण्डः ३।१४
पर सहस्रं रजनी ६।४३
पर सहस्रैरयुक्तं ५।१७
परिषदियमृषीणा ३।५
परोक्षे सुकृतं कर्म ४।४६
पर्यायात्क्षणदृष्ट ५।१
पाल्य तस्य जगद्वयं ४।३
पिष्ट्वा ब्रह्माण्डमस्मा ६।१०
पुण्यानामृषयस्तटेषु ४।३८

पुण्या ब्राह्मणजाति ४।२२
पुण्ये मतङ्गयज्ञाग्नौ ५।६०
पुण्योऽपि भीमकर्मा २।२४
पुत्रसक्रान्तलक्ष्मीकै ४।५१
पुरं नि शेषघटित ६।१८
पुराकल्पे दूरोत्पतन ५।५
पुरा जेता पूर्व त्रिपुर ६।४९
पुरी यथा स्थितौ यातं ७।२८
पौलस्त्यविजयोद्दाम ३।४५
पौलस्त्यापजयप्रचण्ड २।१३
पौलस्त्यो विनयेन १।५९
प्रकृत्या पुण्यलक्ष्मीकौ १।१६
प्रचण्डपरिपिण्डित ५।२६
प्रतिक्षणमियं रक्ष ६।५५
प्रतिमन्वन्तरं भूतै ४।५९
प्रतीक्षन्ते वीरा प्रति ६।३४
प्रवर्तन्ता पौरा प्रति ७।३७
प्रसह्य रावणद्विष्ट २।३
प्रहर नमतु चापं २।४९
प्रागप्राप्तनिशुम्भशा २।३३
प्रागेव राक्षसवधाय ५।२५
प्राचेतसो मुनिवृषा १।७
प्राणा. प्रयान्ति परित ४।५५
प्राणैरपि हिता वृत्ति ५।५९
प्राप्ता कृच्छ्राद्दष्यश्रृङ्गो १।२४
प्रायश्चित्तं चरिष्यामि ३।८
प्रार्थ्य माल्यवता वाली ५।२५
प्रायुङ्क्तास्त्रं स किंचिज्जल ६।१२
प्रासप्रोतप्रवीरोल्बण ६।३३
प्रियं कल्याणकामाभि. ४।४५
प्रिये हा हा क्वासि ५।२८
प्रेक्ष्या संग्रामसीमन्य ६।३५
प्रेद्धं धाम यमामनन्ति ४।३०
बन्दीभिरेधिता कारा. ७।६
बहुच्छलानि रक्षांसि ६।५०
बाणेनैकेन विद्धं ७।१६
बाल्यात्प्रभृत्येव निरूढ ४।९
बिभ्राणश्चारुचामीकर ५।४४
बीजं यस्य विदेहराज ६।१
ब्रह्मक्षत्रसमाजमा ३।४३
ब्रह्मादयो ब्रह्महिताय १।४२
ब्रह्मेन्द्रद्रविणेशरुद्र १।४६
ब्रह्मैकतानमनसो ३।११
ब्राह्मणातिक्रमत्यागो २।१०
भक्तिप्रह्वं कथमपि ६।३७
भवान्सीता लोक ६।६२
भीमं गोष्पदवद्विलङ्घ्य ६।१७
मृगोर्वंशे जातस्तपसि ३।२७
भ्रान्ती सप्ताविकाना ६।४
मद्रोहाच्छपथात्प्रसी ५।५५
मध्यमाया प्रियसखी ४।४०
मनुष्यपोतमात्रेण ६।१९
मरुत्वन्तं देव य ४।१९
महापुरुषसरम्भो १।२
मातामहेन प्रतिषिध्य १।२८
मातुरेव शिरश्छेदो ३।१९
माहाभाग्यमहानिधि २।१८
मुख यदि किमिन्दुना ६।९
मुनिरयमथ वीर २।२७
यतो विमुक्तेरपि मान ३।९
यत्कल्याण किमपि ३।२३
यत्किंचिद्दुर्मदा खैर ६।३
यत्क्षत्रियेष्वपि पुन २।२९
यत्पर्यन्तमहीध्रसीम्नि ७।१३
यत्र तेऽपि स्वसु कर्ण ७।१९
यत्सक्रन्दननन्दन ५।३९
यथा चन्द्रालोकं ६।५२
यथासख्य तीक्ष्ण ६।२२
यदासक्तं दैवादनभि ५।५८
यदि प्रपद्येत धनु. २।१२

यद्दर्शनात्किमप्येवं ७।३४
यद्ब्रह्मवादिभिरुपा ४।२१
यद्वज्रलक्षणे वीर्य ५।३१
यद्वाचा विषयमतीत्य ४।१५
यद्विद्वानपि तादृशे १।३३
यन्मया क्षत्रविच्छेद ४।३७
य पूर्वेषा न कुलस्य ७।२१
यशसि निरवकाशे ३।४
यामोषधिमिवायुष्म ५।२४
यान्मैत्रावरुणि प्रशास्ति १।२५
यावत्त्रिलोक्या किल ६।२९
यावत्फणीन्द्रशिरसि ७।२६
यावन्तो रजनीचरा ६।५९
यावन्मन्त्रप्रभावाद ६।४८
येनैव खण्डपरशु २।३५
यैर्गुप्तान्यकुतोभयानि ५।२३
यो नस्त्रयीपरिध्वंसा १।३२
यो वालिनं हन्ति हता ४।१०
योऽसौ वरद्वयन्यास ४।४७
योऽहं द्वाभ्यां भुजाभ्यां ६।११
रक्षोघ्नानि च मङ्गलानि १।१३
रक्षोभिर्विपिनौकसा ६।३१
रक्षोनाथो रघूणा ६।५६
रक्षोनाथे सरभस ६।४४
रघुकुलतिलकेऽस्मि ७।१
रघुजनकगृहेषु गर्भ ४।३२
राजन्नितो ब्रेहि सहा १।६२
राजानो गुरवश्चैते ३।२०
राज्ञां मार्तण्डवंश्याना ७।२९
राम कर्मभिरद्भुतैः ३।३
रामभद्र गुणाराम ७।४०
राम राम नयनाभि २।३७
राम राम महाबाहो १।४९
रामाय पुण्यमहसे १।२७
रामेण पत्या सीताया १।५६
लघुरघुपतिरेष ६।४७
लाङ्गलोल्लिख्यमानाया १।२०
लोकालोकालवाल ५।४५
लोपामुद्रानसूयाह ७।३६
वध्यन्तेऽस्त्रपपुङ्गवाः ६।२४
वन्द्या विश्वसृजो युगा २।८
वयमिव यथा गृह्णो ३।१७
वश्यवाचः कवेर्वाक्यं १।४
वस्वर्करुद्रसहित ७।३
विजयसहजमस्त्रै १।८
विजितपरशुरामं ५।४७
विरम नरपते कथं ३।३०
विशिष्टभागधेयाना ५।३०
विश्वामित्रात्प्राप्य १।५०
विस्रंसयन्ती परि ५।४
वीरश्रिया च विन ४।२०
वीराणा रुण्डतुण्ड ६।३२
वीरोऽस्त्रपारगश्चिन्त्यो ४।२
वीरेण ते विजयमाज्ञ ४।३५
वीर्योत्कर्षैर्यदमृत २।२
वृद्धातिक्रमसमृतस्य ४।२५
व्यसनेऽस्मिन्मन्त्रशक्त्या ६।२
शत्रुध्वसात्परिणति ३।२५
शत्रुमूलमनुत्खाय ३।६
शभोर्वरादनुध्यान १।५२
शरासनस्य टङ्कारा ७।२०
शाणोत्कीर्णो मणिरिव ६।५३
शितैर्बाणैरेके मृधभुवि ६।५४
श्लाघ्यो गुणैर्द्विजवरश्च ३।२२
श्रुतं मे जानाति श्रुति ६।१५
श्रेष्ठ परमहंसाना १।५
स एष राजा जनको २।४३
स एष रामश्चरिता ५।४८
स एष रामः सौम्य ४।२४
सक्रोधप्रसभमहं ३।२१

सङ्ग्रामेष्वभयप्रदं ४।३१
संज्ञप्यते वत्सतरी ३।२
सत्यसंधा· स्थ यदि ४।५०
सत्यसंधा हि रघव· ४।४८
सत्रप्रत्यूहशान्त्यै ७।३८
सत्त्वभ्रशविषादिभि २।२०
सनत्कुमाराङ्गिरसो ४।१६
सपूजितं हि माहात्म्य ३।१०
सभाव्य सप्तभुवना २।००
संभूयैव मुखानि २।४५
संरोधने लभिभवा ४।८
संवर्तप्रकटविवर्त ६।२६
संस्तूयन्ते विप्रकर्षा ७।२२
सर्वदोषानभिष्वङ्गा १।३८
सर्वप्राणप्रवणमघवन् १।४५
साक्षात्किलाष्टमूर्ते ७।९
साक्षात्पुण्यसमुच्छ्रया ३।१७
साधारण्यान्निरातङ्कः १।३१
सानुजस्त्वं प्रजाः शाध्रि ७।१५
सीतावन्दीग्रहपरि २।४
सीरध्वजो धनुष्पाणि २।४२
सुग्रीव स्यन्दनस्याग्रे ६।३९
सुग्रीवाङ्गदयो प्रभुत्व ५।६२
सुप्रसिद्ध प्रवादो २।४७
सेयं सुकेतोर्दुहिता १।३६
सोत्साहं धृतशासनै ७।१०
सोऽयं त्रि सप्तवारा २।१७
सौमित्रि कृतहस्तता ६।४१
सौमित्रेर्बाणवज्रैरधिक ६।४२
सौहित्यात्पृथव क्थन्ति ५।३३
स्कन्धारोपितयज्ञपात्र ४।५७
स्थितो ध्यायन्नन्त किम ७।३०
स्थितमुपनतजृम्भा ५।४२
स्थिरस्ते प्रशमो भूया ४।३६
स्वसु सोदर्याया कथ ५।१४
स्वामिभक्तिश्च धैर्यं च ६।४०
स्फूर्जद्वज्रसहस्र १।५३
हन्त साध्विव संपन्नं १।६१
हा वत्साः खरदूषण ४।११
हा वीर हा मघव ५।६१
हिरण्यगर्भादृषयो ३।७
हृतजानिररातिभि· ४।५
हृन्मर्मभेदिपतदुत्कट १।३९
हेरम्बदन्तमुसलो २।३८

सुब्रह्मण्यकविकृतमहावीरचरितपूरणीस्थश्लोकानां सूची ।

अत्युग्रोदग्रवल्गद्भग ५।४८
अधर्मो धर्मतामेति ५।५०
अयं राम कामप्रति ६।८
अस्माकमपि लोके ६।११
अहं तावदरीन्हत्वा ७।५
आकल्पान्तमनन्त ७।७
आकस्मिकोपसपन्ने ६।१३
आदित्यैरभिरूप ७।१८
आलोकालोकशैला ७।८
उद्भूतप्रतिभूपभूम ६।१९
एतावन्त त्वया कालं ७।११
कस्त्व मया न विज्ञात ६।३
गन्धर्वा घनरागबन्ध ७।४
जयो वा मृत्युर्वा भव ६।१६
तवारण्ये वासे मम ७।१७
तूष्णींदण्ड प्रयोक्तव्य ६।१५
त्वया यद्यत्कृत्यं कपट ६।१०
त्वया लोकैकवीरेण ७।१६
त्रैलोक्यकुशलं राम ७।१३
दृप्यज्जम्भारिडिम्भ ५।५५
दौरात्म्यादरिभिर्निजा ५।४६
द्रागभ्यागतनिर्भय ५।५४
नि सार निरयानुबन्धि ५।५१
परस्परविनाभावे ६।१२
पुनर्जाता इमे लोका ७।१०
पुरा तत्कैकेयीवचन ७।२
बिभ्यद्भूपरिरम्भि ६।१८
मनोर्वंशे जाता ५।५३
मया बाणेन तीक्ष्णेन ६।१
महेन्द्रेण प्राप्तप्रणय ७।३
मातृगर्भं प्रविष्टाना ६।१४
मायाबलमविज्ञाय ६।९
मुनिर्वा देवो वा भवतु ६।२
ययाय निध्यात स्फुरति ५।४९
यन्मयाविष्ठितं यत्ना ६।७
यश.सतानो मे विशद ५।४७
लङ्काद्वीपगतं निशा ६।१७
वसिष्ठारुन्धतीजाने ७।१९
वसुधराधीश महा ६।४
वृक्षान्तर्लीनमूर्ति. ५।५२
वेदान्तजालपरिशील ६।५
शत्रुघ्न शरदिन्दुबिम्ब ७।९
सर्वे सन्तु परस्पर ७।१२
साहित्योदयसभृतो ७।२१
सुग्रीव किल किष्किन्धा ७।६
सौजन्यैकरसेन सान्द्र ७।१४
हत तावत्कृत्यं निशि ६।६
हत्वा हन्त दशानन ७।१
हन्तव्या जगदातङ्क ७।२०
हृद्यानद्यप्रभृति भुवि ७।१५